जब संसारके कारण भूत जो शोकमोह तिनकी निवृत्तिहीकेलिये गीताशास्त्रहै कुछयुद्धमें प्रवृत्तिकेलिये नहींहै इस अर्थमें साक्षिभूत दोऋचाओंको भगवान् अर्जुनसे कहते हैं कि हेअर्जुन यह जोतूमान रहाहै कियेभीष्मादि महारथ मारेजाते हैं औरमें इनका मारनेवाला हूं सोयह तेरीबुद्धि झूंठीही है इसका प्रकारसुन कि जो पुरुष इस उक्तप्रकार आत्माको मारनेवाला

न्न होतीहै फिर जब विचारसे प्रमाणोंकरकेदेखा तौ उससद्बुद्धिका विच्छेद
होजाताहै वही उसका अन्तकहाताहै अर्थात् सद्बुद्धिके अन्तमें फिर असद्
बुद्धिका निश्चयहोताहै तैसे स्वप्नमाया देहोंकेसदृश अन्तयुक्तजेदेह ते नित्य
औ नाशरहित औ प्रमाणकरने को अशक्य जो शरीरीआत्मा तिसके विवे-
कियोंने अन्तवन्त ऐसे कहेहैं अर्थात् नाशधर्मयुक्त ये देहहैं ऐसाकहाहै अब
यहां नित्य और अनाशी जे दो विशेषण जो आत्माकेकहे तिसमें पुनरुक्त
दोष आताहै क्योंकि जब अनाशी अर्थात् नाशरहित ऐसाकहा तो नित्य
कहनेकी कुछ आवश्यकता नहीं जो नाशरहित पदार्थ है सो आपहीनित्य
है ऐसे जब नित्यकहा तो भी नाशरहितही का ग्रहणहुआ क्योंकि नाश-
वान् पदार्थ कभी नित्य होही नहीं सक्ता अब इसपुनरुक्तदोषके दूरकरनेको
उत्तरकहतेहैं कि दोप्रकारका नित्य औ दोप्रकारका नाशलोकमें देखते हैं
एकतो जैसे देहभस्महोके फिर नहीं दिखाईदिया तौ उसको नष्टकहते हैं
और दूसरे विद्यमानभी देहहै परन्तु रोगादि युक्त होनेसे अथवा धनपुत्रादि
के नाशहोनेसे कुछ औरसे औरही चिन्ता शोकादि ग्रस्त और दुर्बल कान्ति-
रहित जब होताहै तौभी लोकमें उसको कहतेहैं कि यहनष्टहोगया इससे
दोनों प्रकारके नाशके वारणकरनेको नित्य यह विशेषण दिया और जैसे
[illegible]के पृथिवी नित्यहै ऐसी आत्माकी नित्यता नहीं है यह बोधन
करनेको अनाशीकहा अब जो कहाथा आत्मा प्रमाणकरनेको शक्यनहीं है
इससे अप्रमेय है तिसमें यह शंकाहोतीहै कि आत्माभी शास्त्रकरके जाना
जाताहै और निरंतरभी पूर्व अर्थात् पहिले प्रत्यक्षादि प्रमाणोंसे जानाजा-
ताहै फिर अप्रमेय कैसे तिसकाउत्तरयहहै कि आत्मास्वतः सिद्धहै अर्थात्
आपहीसिद्धहै इससे आत्माकी सिद्धिमें कुछ प्रमाणकी जरूरतनहींहै क्यों-
कि प्रमाणकरनेवाले आत्माको पहिले सिद्धहोनेहीके अनन्तर औरवस्तु

वेऽपि हेतुरिहैव विवक्षित इत्याह वा शब्दादिति अभूत्वेति छेदः देहवदिति व्यतिरेकि द हरणम् उक्तमेवार्थं साधयति योहीति जन्माभावे तत्पूर्विकास्तित्वविक्रियापि त्मनोऽस्तीत्याह यस्मादिति प्राणवियोगादात्मनो मृतेरभावे सावशेषनाशाभाववन्निरवशेषनाशाभावोऽपि सिध्यतीत्याह यस्मादिति ननु जन्मनाशयोर्निषेधे तदन्तर्गतानां विक्रियान्तराणामपि निषेधसिद्धेस्तन्निषेधार्थं न पृथक् यतितव्यमिति तत्राह यद्यपीति स्वशब्दैर्मध्यवर्तिविक्रिया निषेधवाचकैरिति यावत् आर्थिकेऽपि निषेधे निषेधस्य सिद्धतया शाब्दो निषेधो न पृथगर्थवानित्याशङ्क्याह अनुक्तानामिति नित्य शब्देन शाश्वत शब्दस्य पौनरुक्त्यं परिहरन् व्याकरोति शाश्वत इत्यादिना अपचयो हि स्वरूपेण वा स्यादगुणापचयतो वेति विकल्पक्रमेण दूषयति नेत्यादिना पुराणपदस्यागतार्थत्वं कथयति अपचयेति तदेव स्फुटयति योहीति न म्रियते वेत्यनेन चतुर्थपादस्य पौनरुक्त्यमाशङ्क्य व्याचष्टे यथेत्यादिना ननु हिंसार्थो हन्तिः श्रूयते तत्कथं विपरिणामो निषिध्यते तत्राह हन्तिरिति हिंसार्थत्वसम्भवे किमित्यर्थान्तरं हन्तेरिष्यते तत्राह अपुनरुक्ततायां इति हिंसार्थत्वे मृति निषेधे न पौनरुक्त्यं स्यात् तन्निषेधार्थं विपरिणामार्थत्वमेष्टव्यमित्यर्थः पूर्वावस्थात्यागेनावस्थान्तरापत्तिर्विपरिणामः तदर्थश्चेदत्र हन्तिरिष्यते तदा निष्पन्नमर्थमाह नेति न जायते इत्यादि मन्त्रार्थमुपसंहरति अस्मिन्निति षण्णां विकाराणामात्मनि प्रतिषेधे फलितमाह सर्वेति आत्मनः सर्वविक्रियाराहित्येऽपि किमायातमित्याशङ्क्याह यस्मादिति ॥ २० ॥

स्वामिकृतटीका।

न हन्यत इत्येतदेव षड्भावविकारशून्यत्वेन दृढयति नेति न जायत इति जन्मप्रतिषेधः न म्रियत इति विनाशप्रतिषेधः वा शब्दौ चार्थे नचायं भूत्वा उत्पद्य भविता भवति अस्तित्वं भजते किन्तु प्रागेव स्वतः सद्रूप इति जन्मान्तरास्तित्वलक्षणद्वितीयविकारप्रतिषेधस्तत्र हेतुः यस्मादजः यो हि जायते स जन्मानन्तरमस्तित्वं भजते नतु यः स्वत एवास्ति स भूयोऽप्यन्यदस्तित्वं भजत इत्यर्थः नित्यः सर्वदैकरूप इति वृद्धिप्रतिषेधः शाश्वतः शश्वद्भव इत्यपक्षयप्रतिषेधः पुराण इति विपरिणामप्रतिषेधः पुरापि नव एव नतु परिणामतो रूपान्तरं प्राप्य नवो भवतीत्यर्थः यद्वा भवितेत्यस्यानुषङ्गं कृत्वा भूयोऽधिकं यथा भवति तथा न भवितेति वृद्धिप्रतिषेधः अतो नित्य इति चोभयं वृद्ध्याद्यभावे हेतुरिति न पौनरुक्त्यं तदेवं जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यतीत्येवं यास्कादिभिरुक्ताः षड्भावविकारा निरस्ताः यदर्थमेते विकारा निरस्तास्तं प्रस्तुतं विनाशाभावमुपसंहरति न हन्यते हन्यमाने शरीर इति ॥ २० ॥

नवलभाष्य।

ऐसे विकार रहित आत्माहै इस आशयसे इसमंत्र कहते हैं कि हे अर्जुन यह आत्मा कभी नहीं उत्पन्नहोता है इससे कभी मरताभी नहीं उत्पत्तिरूप मृत्युक्रिया अर्थात् विनाशके अनन्तर विनाशरूप जन्मादिक्रियाभी नहीं होती है और किसीकाल में यह आत्मा (भूत्वा) होकरके अर्थात् भवनक्रिया का आश्रयहोके (अभविता) नहीं होता नहीं होता इससे क्रियाभी नहीं है जो होकरके होताहै [illegible]

मानता है अर्थात् हननक्रिया का कर्त्तामानता है और जो दूसरा इसआ त्माको और करके मैं माराजाता हूं ऐसा मानताहै अर्थात् हननक्रियाका कर्म अपनाको मानताहै सोये दोनों नहीं जानतेहैं अर्थात् अविवेकसे अहं प्रत्यय विषय जो देहाविशिष्ट आत्मा अर्थात् जिसमें मैंजाताहूं मैं आउता हूं मैं खाताहूं मैं पीताहूं ऐसीझूंठी प्रतीति होरहीहै तिसको देहके मरनेसे मैं मारने वालाहौं औमैं माराजाताहूं ऐसा जेजानते हैं ते आत्मस्वरूपके जाननेवाले नहींहै क्योंकि जिससे यह आत्मा किसीके मारनेवाला नहीं है अर्थात् हननक्रिया का कर्त्तानहीं है और न माराजाता है हनन क्रिया का कर्मभी नहींहै विकार रहितहै इस कारणसे ॥ १९ ॥

न जायतेम्रियतेवाकदाचिन्नायं भूत्वाभविता वा नभूयः।
अजोनित्यःशाश्वतोऽयंपुराणो न हन्यतेहन्यमानेशरीरे॥२०॥

शङ्करभाष्यम् ।

कथमविक्रियःआत्मेति द्वितीयो मन्त्रः न जायते नोत्पद्यते जनिलक्षणा तु वस्तु विक्रिया नात्मनो विद्यत इत्यर्थः तथा न म्रियते वा तत्र वा शब्दश्चार्थे न म्रियते चेत्यन्त्या विनाशलक्षणा विक्रिया प्रतिषिध्यते कदाचिच्छब्दः सर्वविक्रियाप्रतिषेधैः सम्बध्यते न कदाचिज्जायते न कदाचिन्म्रियतइत्येवं यस्मादयमात्मा भूत्वा भवनक्रियामनुभूय पश्चादभविता अभावं गन्तानभूयः पुनस्तस्मान्नम्रियते यो हि भूत्वा न भविता स म्रियत इत्युच्यते लोके वा शब्दान्न शब्दाच्चायमात्मा भूत्वा वा भविता देहवन्नभूयः पुनस्तस्मान्नजायते यस्मादेवं तस्मादजो यस्मान्न म्रियते तस्मान्नित्यश्च यद्यप्याद्यन्तयोर्विक्रिययोः प्रतिषेधे सर्वा विक्रियाः प्रतिषिद्धा भवन्ति तथापि मध्यभाविनीनां विक्रियाणां तदर्थैः स्वशब्दैरेव प्रतिषेधः कर्त्तव्य इत्यनुक्तानामपि यौवनादि समस्तविक्रियाणां प्रतिषेधो यथा स्यादित्याह शाश्वत इत्यादिना शाश्वत इत्यपक्षयलक्षणा विक्रिया प्रतिषिध्यते शश्वद्भवः शाश्वतोनापक्षीयते स्वरूपेण निरवयवत्वान्निर्गुणत्वाच्च नापि गुणक्षयेनापक्षयः अपक्षयविपरीतापि वृद्धिलक्षणा विक्रिया प्रतिषिध्यते पुराण इति यो ह्यवयवागमेनोपचीयते सवर्द्धतेऽभिनव इति चोच्यते अयं त्वात्मा निरवयवत्वात् पुरापि नवएवेति न पुराणो न वर्द्धत इत्यर्थः तथा न हन्यते न विपरिणम्यते हन्यमाने विपरिणम्यमानेऽपि शरीरे हन्तिरत्र विपरिणामार्थे द्रष्टव्योऽपुनरुक्ततायै न विपरिणमत इत्यर्थः अस्मिन् मन्त्रे षड्भावविकारा लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते सर्वप्रकारविक्रियारहित आत्मेति वाक्यार्थः यस्मादेवं तस्मादुभौ तौ न विजानीत इति पूर्वेण मन्त्रेणास्य सम्बन्धः ॥ २० ॥

आनन्दगिरिकृतटीका ।

[illegible] मन्त्रान्तरमवतारयति [illegible]

खुलासा अर्थहै जिससे इसप्रकार आत्मा विकार रहितहै इससे जो कोई आत्माको मारने वाला जानताहै और जो आत्मा माराजाता है ऐसा मानरहाहै ये दोनों नहीं जानतेहैं इसप्रकार पूर्वमन्त्रके साथ इसमन्त्रका भी संबन्धहै अर्थात् इनदोनों मन्त्रोंका मिलाही हुआ अर्थ है ॥ २० ॥

वेदाविनाशिनं नित्यं य एनमजमव्ययम्।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥ २१ ॥

शङ्करभाष्यम्।

य एनं वेत्ति हन्तारमित्यनेन मन्त्रेण हननक्रियायाः कर्त्ता कर्मच नभवतीति प्रतिज्ञायत इत्य नेनाविक्रियत्वे हेतुमुक्त्वा प्रतिज्ञातार्थमुपसंहरति वेदाविनाशिनमिति वेद विजानाति अविनाशिन मन्त्यभावविकाररहितं नित्यं विपरिणामरहितं यो वेदेति सम्बन्धः एनं पूर्वेण मन्त्रेणोक्तलक्षण मजम् अव्ययम् उपचयापक्षयरहितं कथं केन प्रकारेण स विद्वान् पुरुषोऽधिकृतो हन्ति हनन क्रियां करोति कथं वा घातयति हंतारं प्रयोजयति न कथञ्चित् कञ्चित् हन्ति न कथञ्चित् कंचित् घातयतीत्युभयत्राक्षेप एवार्थः प्रश्नार्थासम्भवात् हेत्वर्थस्य अविक्रियत्वस्य च तुल्यत्वाद्वि दुषः सर्वकर्मप्रतिषेध एव प्रकरणार्थोऽभिप्रेतो भगवता हन्तेस्त्वाक्षेप उदाहरणार्थत्वेन विदुषः कि ञ्चित् कर्मासम्भवे हेतुविशेषं पश्यन् कर्माण्याक्षिपति भगवान् कथं स पुरुष इति ननूक्तमेव आ त्मनोऽविक्रियत्वं सर्वकर्मासम्भवकारणविशेषः सत्यमुक्तो नतु सकारणविशेषोऽन्यत्वाद्विदुषोऽविक्रि यत्वादात्मन इति नन्वविक्रियं स्थाणुं विदितवतः कर्म न सम्भवतीतिचेन्न विदुषआत्मत्वान्नदे हादिसंघातस्य विद्वत्ता अतः पारिशेष्यादसंहत आत्मा विद्वानविक्रय इति तस्य विदुषः कर्मास म्भवादाक्षेपो युक्तः कथं स पुरुष इति यथा बुद्ध्याद्याहृतस्य शब्दाद्यर्थस्याविक्रिय एव सन् बु द्धिवृत्त्यविवेकविज्ञानेनाविद्ययोपलब्ध आत्मा कल्प्यते एवमेवात्मानात्मविवेकज्ञानेन बुद्धिवृ त्त्या विद्यया असत्यरूपयैव परमार्थतोऽविक्रिय एवात्मा विद्वानुच्यते विदुषः कर्मासम्भववचना द्यानि कर्माणि शास्त्रेण विधीयन्ते तान्यविदुषो विहितानीति भगवता निश्चयोऽवगम्यते ननु विद्याप्यविदुष एव विधीयते विदितविद्यस्य पिष्टपेषणवद्विद्याविधानानर्थक्यात् तत्राविदुषः कर्मा णिविधीयन्ते न विदुष इति विशेषोनोपपद्यत इति चेन्नानुष्ठेयस्य भावाभावविशेषोपपत्तेरग्निहो त्रादि विध्यर्थज्ञानो त्तरकालमग्निहोत्रादिकर्मानेकसाधनोपसंहारपूर्वकमनुष्ठेयकर्त्ताहं ममकर्तव्य मित्येवं प्रकारविज्ञानवतोऽविदुषो यथा नुष्ठेयं भवति नतु तथा न जायत इत्यात्मस्वरूपविध्यर्थ ज्ञानोत्तरकालभाविकिञ्चिदनुष्ठेयं भवति किन्तु नाहं कर्त्ता न भोक्तेत्याद्यात्मैकत्वाकर्तृत्वादिविष यज्ञानादन्यत् नोत्पद्यत इत्येष विशेष उपपद्यते यः पुनः कर्त्ताहमिति वेत्त्यात्मानं तस्य ममेदं कर्त्तव्यमिति अवश्यम्भाविनी बुद्धिः स्यात् तदपेक्षया सोऽधिक्रियत इति तं प्रति कर्माणि सम्भ वन्ति सचाविद्वान् उभौ तौ न विजानीत इति वचनात् विशेषितस्य च विदुषः कर्माक्षेपवचना त् कथं स पुरुष इति तस्माद्विशेषितस्य अविक्रियात्मदर्शिनो विदुषो मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारोऽतएव भगवान्नारायणः सांख्यान् विदुषोऽविदुषश्च कर्मिणः प्रविभज्य द्वे निष्ठे ग्राहयति ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति तथा च पुत्रायाह भगवान् व्यासो द्वा विमावथ पन्थानावित्यादि तथा चक्रिया पथश्चैव पुरस्तात् पश्चात् संन्यासश्चेत्येवमेव विभागं पुनः पुनर्दर्शयिष्यति भगवान् अतत्त्वविदहंकारविमूढात्मा कर्त्ताहमिति मन्यते तत्त्ववित्तु नाहं करोमी ति तथा च सर्वकर्माणि मनसा सन्न्यस्यास्ते इत्यादि तत्र केचित् पण्डितम्मन्या वदन्ति जन्मादि षड्भावविक्रियारहितोऽविक्रियोऽकर्त्तैकोऽहमात्मेति न कस्यचित् ज्ञानमुत्पद्यते यस्मिन् सति सर्व कर्मसन्न्यास उपदिश्यते तन्न न जायत इत्यादि शास्त्रोपदेशानर्थक्यप्रसंगात् तथा च शास्त्री

करताहै वोही मरताहै ऐसा लोकमें कहाजाताहै अथवा यहआत्मा घटादि के सदृश होकरके नहीं होताहै इससे जन्मता मरताभी नहींहै इन दोनों अर्थोंकरके होकरके होना जो अस्तित्वरूप विकार तिसका निषेधकिया औ जिससे नहीं उत्पन्न होताहै इसीसे अज कहाताहै और जिससे नहीं मरताहै इससे नित्यहै यद्यपि आदिअन्त के उत्पत्ति विकाररूप दोनों विकारोंके प्रतिषेधसे सब विकारोंका प्रतिषेध सिद्धहोता है तौभी मध्यमेंहोने वाले जे विकार तिनका निषेध अपने २ विकारके* वाचक शब्दोंही करके निषेध करना योग्यहै इससे अनुक्त जे यौवनादि विकार तिनकाभी निषेध जैसे होय इसआशय से कहते हैं [शाश्वतः] जो शाश्वत् अर्थात् निरन्तर होय कर्मीक्षय को प्राप्तनहोय इससे शाश्वत आत्मा कहाताहै इसप्रकार शाश्वत यह कहनेसे अपक्षयरूप+विकारका निषेधहुआ औनिर्गुण आत्मा है इससे गुणोंके क्षयसे भी अपक्षय नहींहै औपुराण इस कहनेसे अपक्षय से विपरीत वृद्धिरूप×विकारका भी प्रतिषेध कियाजाता है जो अंगोंकी पुष्टता करके युक्तहोता है वह वृद्धिको प्राप्तही नवीन ऐसा लोकमें कहा जाताहै और यहआत्मा तौ अवयव रहितहोने से पहिलेभी नवाहीहै इस से पुराण कहाताहै अर्थात् बढ़ता नहींहै औतैसेही शरीरके विपरिणामको प्राप्त होनेमेंभी अर्थात् और तरहरूपके होजानेमेंभी आत्मा [नहन्यते] विपरिणाम को प्राप्तनहीं होता अर्थात् रूपान्तरको प्राप्त नहीं होताहै और यहां हन्धातुका विपरिणाम अर्थहै इससे पुनरुक्तिदोषकी प्रसक्ति नहींहुई और जोहिंसा अर्थहोता तौ [नम्रियते-नहन्यते] इन दोनों पदोंका नहीं मरताहै नहीं माराजाता है इसप्रकार एकही अर्थहोनेसे पुनरुक्त दोषपर्यं होथा अब न जायते इत्यादि वेदके मन्त्रसे यह जानागया कि लौकिक देहादि पदार्थोंमें जैसे उत्पत्ति १ औउत्पन्नहोके रहना २ औरूपका बदलना ३ औबढ़ना ४ औघटना ५ औनाशहोना ६ येछःविकार होते हैं तैसे आत्मामें नहीं हैं अर्थात् सबप्रकारसे विकाररहित आत्मा है यहमन्त्र का

सम्भवति नहि ब्रह्मणोऽविक्रियस्य विद्यानिमित्ता विक्रिया स्वक्रिया भवितुमर्हति तत्रा ह यथेति अदृष्टेन्द्रियादि मह कृतमन्तःकरणं प्रदीपप्रभावद्विषयपर्यन्तं परिगतं बुद्धिर निरुच्यते तत्र प्रतिविम्बितं चैतन्यम् अभिव्यञ्जकबुद्धिवृत्त्यविवेकाद्विषयज्ञानमिति व्य वह्रियते तेनात्मोपलब्ध्या कल्प्यते तच्चाविद्याप्रयुक्तमिथ्यासम्बन्धनिबन्धनं तथैवाध्यासि कसम्बन्धेन ब्रह्मात्मैक्याभिव्यञ्जकवाक्योत्थबुद्धिवृत्तिद्वारा विद्वानात्मेत्यपदिश्यते नच मिथ्यासम्बन्धेन पारमार्थिकाविक्रियत्वविहतिरस्तीत्यर्थः अहं ब्रह्मेति बुद्धिवृत्तेर्मोक्षाव स्थायामपि भावादात्मनः सविशेषत्वमाशङ्क्य तस्य यावदुपाधिसत्त्वमवेत्याह असत्ये ति ननु कूटस्थस्यात्मनो मिथ्याविद्यावत्त्वेऽपि तस्य कर्माधिकारनिवृत्तौ कस्य कर्माणि विधीयन्ते नहि निरधिकाराणां तेषां विधिरित्याशङ्क्याह विदुष इति कर्माण्यविदुषो वि हितानीति विशेषमाक्षिपति नन्विति कर्मविधानमविदुषो विदुषोश्च विद्याविधानमि ति विभागे का हानिरित्याशङ्क्याह विदितेति विद्याया विदितत्वं लब्धत्वं कर्मविधिः अविदुषो विद्याविधिरिति विभागासम्भवे फलितमाह तत्रेति धर्मज्ञानानन्तरमनुष्ठेयस्य भावात् ब्रह्मज्ञानोत्तरकालञ्च तदभावात् ब्रह्मज्ञानहीनस्यैव कर्मविधिरिति समाधत्ते ना नुष्ठेयस्येति विशेषोपपत्तिमेव प्रपञ्चयति अग्निहोत्रादीति ननु देहादिव्यतिरिक्तात्मज्ञानं विना पारलौकिकेषु कर्मसु प्रवृत्तेरनुपपत्तेस्तथाविधज्ञानवता कर्मानुष्ठेयमिति चेत् तत्राह कर्ताहमिति आत्मनि कर्ता भोक्तेत्येवं विज्ञानवत्त्वेऽपि ब्रह्मज्ञानविहीनत्वेनाविदुषो ऽनुष्ठेयं कर्मेत्यर्थः देहादिव्यतिरिक्तात्मज्ञानवद्ब्रह्मज्ञानमपि ज्ञानत्वाविशेषात् कर्मप्र वृत्तावुपकरिष्यतीत्याशङ्क्याह नत्विति अनुष्ठेयविरोधित्वादविक्रियात्मज्ञानस्येति शेषः ननु ब्रह्मात्मैकत्वज्ञानादुत्तरकालमपि कर्ताहमित्यादिज्ञानोत्पत्तौ कर्मविधिःसावकाशः स्यादिति नेत्याह नाहमिति कारणाभावादिति शेषः कर्तृत्वादिज्ञानमन्यदित्युक्तम् अनु ष्ठानाननुष्ठानयोरुक्तविशेषादविदुषोऽनुष्ठानं विदुषो नेत्युपसंहरति इत्येष इति नन्वात्म विदो नचेदनुष्ठेयं किञ्चिदस्ति कथं तर्हि विद्वान् यजेतेत्यादि शास्त्रात्तं प्रतिकर्माणि वि धीयन्ते तत्राह यः पुनरिति आत्मनि कर्तृत्वादिज्ञानापेक्षया कर्मस्वधिकृतत्वज्ञाते तथा विधं पुरुषं प्रतिकर्माणि विधीयन्ते सच प्राचीनवचनादविद्वानेवेति निश्चीयते न ख ल्वकर्तृत्वादिज्ञानवतस्तद्विपरीतकर्तृत्वादिज्ञानद्वारा कर्मसु प्रवृत्तिरित्यर्थः कर्मासम्भवे ब्रह्मविदो हेत्वन्तरमाह विशेषतश्चेति वेदाविनाशिनमित्यादि नेति शेषः यद्यपि वि दुषोनास्ति कर्म तथापि विविदिषोः स्यादित्याशङ्क्याह तस्मादिति विद्यया विरुद्धत्वा दिष्यमाणमोक्षप्रतिपक्षत्वाच्च कर्मणामित्यर्थः यद्यपि मुमुक्षोराश्रमकर्माण्यपेक्षितानि त थापि विद्या तत्फलाभ्यामविरुद्धान्येव तान्यभ्युपगतान्यन्यथा विविदिषा संन्यासवि धिविरोधादित्यभिप्रेत्योक्तेऽर्थे भगवतोऽनुमतिमाह अतएवेति विदुषो विविदिषोश्च सं न्यासेऽधिकारो विदुषस्तु कर्मणीति विभागस्येष्टत्वादित्यर्थः अधिकारिभेदेन निष्ठाद्वयं भगवता वेदव्यासेनापि दर्शितमित्याह तथाचेति अध्ययनविधिना स्वाध्यायपाठे त्रैवर्णि कस्य प्रवृत्त्यनन्तरत्र क्रियामार्गो ज्ञानमार्गश्चेति द्वौमार्गावधिकारिभेदेनाभिदितावित्य र्थः आदिशब्दाद् यत्र वेदाः प्रतिष्ठिता इत्यादि गृह्यते उक्तयोर्मार्गयोस्तुल्यतां परिहर्त्त मुदाहरणान्तरमाह तथेति बुद्धिशुद्धिद्वारा कर्म तत्फलयोर्वैराग्योदयात् पूर्वं कर्ममार्गो विहितो विरक्तस्य पुनः संन्यासपूर्वको ज्ञानमार्गो दर्शितः स चैतस्मादतिशयवानीति स्तुतमित्यर्थः उक्त विभागेन पुनरपि यादृच्छिकानुकूल्यमादर्शयति एतमेवेति अहंकारवि मूढात्मेत्यस्य व्याख्यानम् अतत्त्वविदिति तत्त्ववित्त्विति श्लोकमवतार्य तात्पर्यम

पदेशसामर्थ्याद्धर्मास्तित्वविज्ञानं कर्तुश्च देहादिसम्बन्धिज्ञानञ्चोत्पद्यते तथा च शास्त्रात् वेदे चात्मनोऽविक्रियत्वा कर्तृत्वैकत्वादिविज्ञानं कस्मान्नोपपद्यते इति प्रष्टव्यास्ते करणगोचरत्वादिति चेन्न मनसैवानुद्रष्टव्यमिति श्रुतेः शास्त्राचार्योपदेशजनित शमदमादिसंस्कृतं मन आत्मदर्शने करणं तथा च तदधिगमायानुमाने आगमे च सति ज्ञानं नोत्पद्यते इति साहसमात्रमेतत् ज्ञानञ्चो त्पद्यमानं तद्विपरीतमज्ञानम् अवश्यं वाधत इत्यभ्युपगन्तव्य तत्राज्ञानं दर्शित हन्ताह हतोऽस्मीत्यु भौ तौ न विजानीत इत्यत्र चात्मनो हननक्रियायाः कर्तृत्वं कर्मत्वं हेतुकर्तृत्वञ्चाज्ञानकृतं दर्शितं तद् सर्वक्रियास्वपि समानकर्तृत्वादेरविद्याकृतत्वमविक्रियत्वादात्मनः विक्रियावान् हि कर्ताऽन्यं कर्मभूतमन्यं प्रयोजयति कुर्विति तदेतदविशेषेण विदुषः सर्वक्रियासु कर्तृत्वं हेतुकर्तृत्वञ्च प्रति षेधयति भगवान् विदुषः कर्माधिकाराभावप्रदर्शनार्थं वेदाविनाशिनं कथं स पुरुष इत्यादिना क्व पुनर्विदुषोऽधिकार इत्येतदुक्तं पूर्वमेव ज्ञानयोगेन सांख्यानामिति तथा च सर्वकर्म सन्न्या से वक्ष्यति सर्वकर्माणि मनसेत्यादिना ननु मनसेति वचनान्नवाचिकानां कायिकानाञ्च सन्न्यास इतिचेत् न सर्वकर्माणीति विशेषितत्वात् मानसानामेव सर्वकर्मणामितिचेन्न मनोव्यापारपूर्वकत्वा द्वाक्कायव्यापाराणां मनोव्यापाराभावे कर्मानुपपत्तेः शास्त्रीयाणां वाक्कायकर्मणां कारणानि मान सानि मनोव्यापाराणि वर्जयित्वान्यानि सर्वकर्माणि मानसासन्न्यस्यास्त इतिचेन्न नैव कुर्वन्न का रयन् इति विशेषणात् सर्वकर्मसन्न्यासोऽयं भगवतोक्तमरिष्यतो न जीवत इतिचेन्न नवद्वारे पुरे देही आस्ते इति विशेषणानुपपत्तेः नहि सर्वकर्मसन्न्यासे न मृतस्य तद्देहे आसनं सम्भवत्यकुर्वतो ऽकारयतश्च देहे सन्न्यस्येति सम्बन्धो न देहे आस्त इतिचेन्न सर्वत्रात्मनोऽविक्रियत्वावधा रणात् आसनक्रियायाश्चाधिकरणापेक्षत्वात् तदनपेक्षत्वाच्च सन्न्यासस्य संपूर्वस्तु न्यासशब्दोऽत्र त्यागार्थो न निक्षेपार्थः तस्माद्गीताशास्त्रे आत्मज्ञानवतः सन्न्यास एवाधिकारो न कर्मणीति तत्र तत्रोपरिष्टादात्मज्ञानप्रकरणे दर्शयिष्यामः ॥ २१ ॥

आनंदगिरिकृतटीका।

।याथ।मिति अन्यानीत्यशास्त्रीयावाक्कायकर्मकारणान्यशास्त्रीयाणि मानसानि तानिच
णि कर्माणीत्यर्थः वाक्यशेषमादाय दूषयति नैवेति नहि विवेकबुद्ध्या सर्वाणि क
णि अशास्त्रीयाणि संन्यस्य तिष्ठतीति युक्तं नैव कुर्वन्नित्यादि विशेषणस्य विवेकबु
सर्वत्यागहेतोस्तुल्यत्वादित्यर्थः भगवदभिमतसर्वकर्मसंन्यासस्यावस्थाविशेषे सं
कोचं दर्शयन्नाशङ्कते भविष्यत इति संन्यासो जीवदवस्थायामेवात्र विवक्षित इत्यत्र
लिंगं दर्शयन्नुत्तरमाह न नवेति अनुपपत्तिमेव स्फोरयति नहीति अन्वयविशेषाव्याख्या
नेन लिंगासिद्धिं चोदयति अकुर्वत इति विवेकवशाद्विशेषात्यपि कर्माणि देहे यथो
चितं निःक्षिप्याकुर्वन्नकारयंश्च विद्वानवतिष्ठते तथा च देहे कर्माणि संन्यस्याकुर्वतोऽ
कारयतश्च सुखमासनमिति सम्बन्धसम्भवात् विशेषणस्य सति देहे कर्मत्यागविषय
स्वाभावाज्जीवतः सर्वकर्मत्यागो नास्तीत्यर्थः अथवा कुर्वत इत्यादि पूर्ववदेव सम्बन्ध
नीयं लिंगासिद्धिं चोद्यन्तु देहे संन्यासेत्यारभ्योन्नेयम् आत्मनः सर्वत्राविक्रियत्वनिर्द्धा
रणाद्देहसम्बन्धमन्तरेण कर्तृत्वकारयितृत्वाप्राप्तेरप्राप्तप्रतिषेधप्रसंगपरिहारार्थमस्मदुक्त ए
व सम्बन्धः साधीयानिति समाधत्ते न सर्वत्रेति श्रुतिषु स्मृतिषु चेत्यर्थः किंच सम्बन्ध
स्याकांक्षा सन्निधियोग्यताधीनत्वाकांक्षावशादस्मदभिमतसम्बन्धसिद्धिरित्याह आस
नेति भव देहेन्तु सम्बन्धो न सिध्यद्व्याकांक्षाभावादित्याह तदनपेक्षत्वाच्चेति संन्यासश
ब्दस्य विक्षेपार्थत्वात् तस्य चाधिकरणसापेक्षत्वादस्मदिष्टसम्बन्धसिद्धिरित्याशङ्क्याह
संपूर्वन्त्विति अन्ययोपसर्गवैयर्थ्यादित्यर्थः मनसा विवेकविज्ञानेन सर्वकर्माणि परित्यज्या
स्ते देहे विद्वानित्यस्यैव सम्बन्धस्य साधुत्वं मत्वोपसंहरति तस्मादिति सर्वव्यापारोप
रमात्मनः सर्वकर्मसंन्यासस्याविक्रियात्मज्ञानां विरोधित्वात् प्रयोजकज्ञानवतो वैधे सं
न्यासेऽधिकारः सम्यग्ज्ञानवतस्त्ववैधे स्वाभाविके फलात्मनीति विभागमभ्युपेत्योक्तेऽ
र्थे वाक्यशेषमनुगुणं दर्शयति इति तत्र तत्रेति ॥ २१ ॥

स्वामिकृतटीका।

अतएव हन्तृत्वाभावोऽपि पूर्वोक्तः सिद्ध इत्याह वेदाविनाशिनमिति नित्यं वृद्धि
शून्यम् अव्ययमपक्षयशून्यम् अजम् अविनाशिनञ्च यो वेद स पुरुषः कं हन्ति एवम्भू
तस्य वधे साधनाभावात् तथा स्वयं प्रयोजको भूत्वान्येन कं घातयति कथं वा घात
यति न कथञ्चिदपीत्यर्थः अनेन मय्यपि प्रयोजकत्वदोषदृष्टिं माकार्षीरित्युक्तं भवति॥२१॥

नवलभाष्य।

अब यहां (यएनंवेत्तिहन्तारम्) इस पूर्वोक्तमन्त्रकरके आत्मा हनन कि
याका कर्ता औ कर्मनहीं होसक्ता यहप्रतिज्ञाकरके फिर (नजायते)इसमन्त्र
करके आत्माके विकार नहींहोनेमें कारण कहिके प्रथममन्त्रमें निश्चितकिये
हुये अर्थको तात्पर्यरूपकरके निरूपणकरते हैं कि हे अर्जुन जो पुरुष इस
आत्माको अविनाशी अर्थात् नाशरूप अन्त्यविकारकरके रहित और नित्य
अर्थात् विपरिणामरहित औ अज अव्यय अर्थात् उत्पत्ति औ अपक्षयकरके
रहित जानताहै सो यह विद्वान् विवेकी पुरुष कैसे मारताहै और कैसे मा-
रनेवालेको प्रेरणाकरताहै अर्थात् तू मार ऐसा कहता है अर्थात् कैसे भी
किसीको न मारताहै और न कैसेभी किसीको मरवासक्ताहै इसप्रकार आ-

र्थं संगृह्णाति नाहमिति पूर्वेण क्रियापदेनेतिशब्दः संबध्यते विरक्तमधिकृत्यवाक्यान्तरं पठति तथाचेति आदिशब्दस्तस्यैव श्लोकस्य शेषसंग्रहार्थः अविक्रियात्मज्ञानात् कर्म संन्यासे दर्शिते मीमांसकमतमुत्थापयति तत्रेति आत्मनो ज्ञानक्रियाशक्त्याधारत्वेनाक्रि यत्वाभावादक्रियात्मज्ञानं संन्यासकारणीभूतं न सम्भवतीत्यर्थः यथोक्तज्ञानाभावो वि षयाभावाद्वा मानाभावाद्वेति विकल्प्याद्यं दूषयति नेत्यादिना न तावदविक्रियात्मा भावो न जायते म्रियते वेत्यादि शास्त्रस्याप्रवाच्यतया प्रमाणस्यान्तरेण कारणमानं क्यायोगादित्यर्थः द्वितीयं प्रत्याह यथाचेति पारलौकिककर्मविधिसामर्थ्यसिद्धं विज्ञा नमुदाहरति कर्तुश्चेति कर्मकाण्डादज्ञाते धर्मादौ विज्ञानोत्पत्तिवत् ज्ञानकाण्डादज्ञाते ब्रह्मात्मनि विज्ञानोत्पत्तिरविरुद्धा प्रमात्वाविशेषादित्यर्थः ज्ञानस्य मनःसंयोगजन्यत्वा दात्मनश्च श्रुत्या मनोऽगोचरत्वनिरासान्नात्मज्ञाने साधनमस्तीति शंकते करणेति श्रु तिमाश्रित्य परिहरति न मनसेति तत्त्वमस्यादिवाक्योत्थमनोवृत्त्यैव शास्त्राचार्योपदे शमनुसृत्य द्रष्टव्यं तत्त्वमिति श्रूयते स्वरूपेण स्वप्रकाशमपि ब्रह्मात्मवस्तुवाक्योत्थवृ त्तिवृत्त्यभिव्यक्तं सविकल्पकव्यवहारावलम्बनं भवतीति मनोगोचरत्वोपचारादसिद्धं कर णागोचरत्वमित्यर्थः कथं तर्हि ब्रह्मात्मनो मनोविषयत्वनिषेधश्रुतिरित्याशङ्क्याऽसंस्कृत मनोवृत्त्यविषयास्तीति मन्वानः सन्नाह शास्त्रेति सत्यपि श्रुत्यादौ तदनुग्राहकाभावा न्नास्माकमविक्रियात्मकज्ञानमुत्पत्तुमर्हतीत्याशङ्क्याह तथेति तस्याविक्रियस्यात्मनः प्रधि गत्यर्थं विमतो विकारोऽनात्मधर्मो विकारत्वादुभयाभिमतविकारवदित्यनुमाने पूर्वोक्त श्रुतिस्मृतिरूपागमे च सत्येव तस्मिन्नोत्पद्यते ज्ञानमिति वचः साहसमात्रं सत्येव माने मेयं न भातीतिवदित्यर्थः ननु यथोक्तं ज्ञानमुत्पन्नमपि हानायोपदानाय वा न भवतीति कुतोऽस्य फलवत्त्वं तत्राह ज्ञानञ्चेति अवश्यमिति प्रकाशप्रवृत्तेस्तमोनिवृत्तिव्यतिरेके णानुपपत्तिवदात्मा ज्ञाननिवृत्तिमन्तरेणात्मज्ञानोत्पत्तेरनुपपत्तेरित्यर्थः नन्वज्ञानस्य ज्ञा नप्रागभावत्वात्तन्निवृत्तिरेव ज्ञानं नतु तन्निवर्तकमिति तत्राह तच्चेति कथं पुनर्भगवता पि ज्ञानाभावातिरिक्तमज्ञानं दर्शितमित्याशङ्क्याह अत्र चेति विमतं ज्ञानाभावो न भव त्युपादानत्वान्मृदादिवदिति भावः ननु हननक्रियायाश्च न हिंस्यादिति निषिद्धत्वात् तत्कर्तृत्वात् तत्कर्तृत्वादेरज्ञानकृतत्वेऽपि विहितक्रियाकर्तृत्वादेर्न तथात्वमिति नेत्या ह तत्रेति न तावदात्मनि कर्तृत्वादि नित्यत्वम् अमुक्तिप्रसंगान्नचानित्यमपि निरुपादानं [illegible] तदुपादानमात्मनि तत्प्रतिभानान्नचात्मैव तदु पादानं [illegible] अविक्रियत्वादिति कर्तृत्वाभाव [illegible] आत्मनि कर्तृत्वादिप्रतिभानःयाना [illegible] कर्तृत्वकारयितृत्व [illegible] धर्माधिकाराभावो भग [illegible] पुनरिति [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

र्थात् अज्ञानीही को विधानकिये हैं यह भगवान्का निश्चय प्रतीतहोता अर्थात् जानाजाताहै नकहो विद्याभी अज्ञानीही केलिये विधानकी जा-है क्योंकि जिसकी जानीहै उसको तो पिसेहुए को पीसनेकी तरह विद्याके विधानका अर्थात् ज्ञानके विधानका आनर्थक्य है अर्थात् निष्फलताहै तब जब ... हुआ तो अज्ञानीहीको कर्मविधान कियेजाते हैं ज्ञानीको नहीं इसमें कुछ विशेषता नहींहुई सो यहदोष नहीं आसक्ताहै क्योंकि अनुष्ठेय अर्थात् करनेकेयोग्य जो कर्मादि तिनकाभाव और अभावरूप विशेषताके दर्शनसे अर्थात् कर्मज्ञानके अनन्तर तो जोकुछ करनेयोग्यहै उसकाभाव दिखाईपड़ताहै और आत्मज्ञानके अनन्तर करनेकेयोग्यका अभाव होताहै यहही कर्म और विद्या इनके विधानमें विशेषताहै जब कि अग्निहोत्रादि यज्ञोंकीविधि का ज्ञानहोता है तब अनेक साधनोंके इकट्ठे करनेकी आवश्यकता होती है और इस अग्निहोत्रादि कर्मका करनेवालाहूं और यह कर्त्तव्य है अर्थात् करनेके योग्यहै इसप्रकारके भेद ज्ञानयुक्त अज्ञको जैसे अग्निहोत्रादि कर्म करनेहोतेहैं तैसे आत्मा न उत्पन्न होताहै न मरता है इत्यादि प्रकार के आत्मस्वरूप विधिके अर्थ ज्ञानके अनन्तर कालमें होनेवाला कुछ करनेके योग्य नहींहोता किन्तु न मैं करनेवाला,न भोगनेवालाहों इसको आदिलेके आत्माका अकर्तृत्व एकत्वादि विषयज्ञानसे और किसीतरहकाज्ञानउत्पन्नही नहींहोताहै इसप्रकारकी विशेषता अज्ञसे ज्ञानीमें दिखाईपड़तीहै और जो फिर कर्त्ता मैं हूं ऐसे आत्माको मानताहै तिसको मुझको तो यहकरना है ऐसीबुद्धि अवश्यहोगी उसीबुद्धिकी अपेक्षासे कर्ममें वहपुरुष अधिकारको प्राप्तहोताहै और उसीको कर्मसम्भव होतेहैं सो तो मूर्खही है क्योंकि जो कोई आत्माको मारनेवाला मानताहै और जो कोई मैं माराजाता हूं ऐसा मानताहै ये दोनों नहीं जानते हैं ऐसे साक्षात् भगवान् कृष्ण कहिआये हैं तिसप्रमाणसे और इसश्लोकमें भी कैसे वहपुरुष मारता है इसकहने से विशेष से ज्ञानीही को कर्मका आक्षेपकिया इससे भी आत्मा में कर्तृत्वादिबुद्धि करनेवालामूर्खहै तिससे पूर्वोक्त विशेषणयुक्त विकाररहित आत्मा का देखनेवाला जो ज्ञानी तिसको और मुमुक्षुको अर्थात् मोक्षकी इच्छा करनेवालेको सर्वकर्म त्यागरूप संन्यासही में अधिकारहै इसीसे भगवान् नारायण श्रीकृष्ण (ज्ञानयोगेनसांख्यानाम्) इत्यादि कथनसे ज्ञानी और कर्मी इनको न्यारा २ करके दो निष्ठा ग्रहणकरातेहैं और भगवान् व्यास भी अपनापुत्र जो शुक तिसके अर्थ (द्वाविमावपपन्थानौ) इत्यादि श्लोक करके भारतके मोक्षधर्म में दो मार्ग उपदेश करतेहुए ॥ और श्रीकृष्णभगवान्भी करो (अहंकारविमूढात्माकर्ताहमितिमन्यते) और (तत्त्ववित्तुमहाबाहो नाहंकरोमीति सर्वकर्माणिमनसासंन्यस्यास्ते) इनको आदि लेकर श्लोकोंसे कर्ममार्ग और संन्यासमार्गके विभागको न्यारा २ करके दिखावेंगे तहां कोई अपनेको पण्डित माननेवाले ऐसाकहते हैं कि जन्मादि छः

क्षेप अर्थमें यहां किं शब्दहै क्योंकि प्रश्न अर्थका असम्भवहै इससे जो प्रश्न अर्थमें यहां किं शब्दहोता तो उत्तरकाभी लेखहोता इससे यहां प्रश्नअर्थका असम्भवहै न कहो जब आक्षेप अर्थहै तो इसमें कुछहेतु कहनाचाहिये तो कहतेहैं कि अविकाररूपहेतु आत्माके नहीं कर्ताहोनेमें कहिआयेहैं उसकी तुल्यतासे यहांभी सम्बन्ध होजायगा इससे कुछहेतुवाचकशब्दके कहनेकी आवश्यकता नहीं है इससे ज्ञानीको सबकर्मोंका प्रतिषेधही इसप्रकरणका अर्थ कृष्णभगवान्को अभिप्रेतहै अर्थात् ज्ञानीको कर्मकरने के निषेधही में भगवान्का तात्पर्य्य है और [कंघातयतिहन्ति] यहां हनधातुका जो प्रयोग है तिसकाकथन तो आक्षेपअर्थमें उदाहरणके लियेहै इससे विद्वान्को अर्थात् ज्ञानीको कुछभी कर्म नहीं सम्भवहोता इसमें हेतु विशेष देखते हुए भगवान् कृष्ण कर्मोंका आक्षेप+करतेहैं [कथंसपुरुषःइति] न कहो आत्मामें जो विकारका अभावहै सो सबकर्मोंके असम्भवमें कारण विशेष कहाहीहै परन्तु वहकारणविशेष आत्मा ही में संघटित होताहै अर्थात् बनसका है क्योंकि आत्मा विकाररहितहै औरविद्वान्ज्ञानी तो उससे भिन्नहै फिरउसमें वहकारण विशेष कैसे भासकाहै और विकार रहित कूटस्थआत्माका जाननेवाला विद्वान्है इससे उसमें कर्म नहीं सम्भवहोता है ऐसाहीरहो तो यहकथन तो ठीकनहीं क्योंकि विद्वान् आत्मस्वरूपसेंशास्त्रमेंकहाहै औरजो देह आदि संघातविशिष्टमें अर्थात्देहयुक्तआत्मामें कर्मका अभाव नहींहोने मानके विशिष्टमें कर्माभावमानके विद्वान्पनामाने तो जड़देहादि संघातके अर्थात् समूहमें भी विद्वान्पना का प्रसंग होजायगा सो तो सर्वथाअयुक्त है क्योंकि ऐसे माननेमें जड़ चेतन ज्ञान अज्ञान इत्यादिपदार्थोंका विभाग री नहींहोजायगा इससे परिशेष से अर्थात् देहादि जड़वर्गके निषेध [illegible] अवशेष रहनेसे सबकेअन्तमें सत्यआत्माकारवृत्तिकी [illegible] देहादि संघातरहित आत्माही विद्वान्है सो विकाररहितहै तिसीविद्वान्के [illegible] श्रीकृष्णभगवान् ने कर्मोंके असंभवमें जो आक्षेप किया [illegible] [illegible] विद्वान् जिसको मानाताहै और जिसको मानताहै सोकुछहै न [illegible] [illegible] सदका सा प्रभावहै तो विद्वान्पनाभी [illegible] [illegible] [illegible] कि [illegible] अर्थात् [illegible] कर्माहित [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

५५ के [सर्वकर्माणि] यहां सर्व यह विशेष सामर्थ्यसे कायिक वाचिकों काभी ग्रहण इष्टहै इससे नकहौ सबमानसोंका ग्रहणहोय इसकेलिये सर्व शब्दका ग्रहणहै सो यहभी ठीकनहीं क्योंकि मनके व्यापारके विनाशरीर और वाणीका व्यापार होही नहीं सक्ता तौ मनके व्यापार के बिना कोई प्रकारके कर्मका संभव नहीं होगा तैसेही त्यागभी बिनामनके व्यापार नहीं होसक्ता इसहेतुसे कहाकि मनके सबकर्मोंका त्यागकरके सुखपूर्वक रहताहै कुछमानस कर्मोंकाही जुदाकरके ग्रहणहोय इसकेलिये (मनसा)यहविशेषण नहीं है औसर्वशब्द इसलिये है कि कायिक वाचिकादि सब कर्मोंका ग्रहणहोय इससे सबकर्मोंके त्यागहीमें भगवान्‌का अभिप्राय प्रतीत होता है और कोई तौऐसा कहतेहैं कि मानस व्यापारके विना कोई कायिक आदि कर्म नहीं होसक्ता है यह हमने माना परन्तु यहां शास्त्रविहित कायिक वाचिक कर्मोंके कारण भूत जे मानसकर्म अर्थात् मनके व्यापार तिनको छोड़िके और सब लौकिककर्मोंको मनसे त्यागकरके योगीरहता है यह अर्थ भगवान्‌को अभिमतहै सो यहभी कथन असंगत है क्योंकि वहां ऐसाभी कहाहै कि न तौ कर्मकर्त्ताहै और न किसीसे करताहै और शास्त्रीय कर्मभी करनेसेही होतेहैं तौ जब उसने शास्त्रीयकर्मकिया और लौकिक कर्म नहींकिया तौ सर्वथा नहींकरना कैसे बनसक्ताहै इससे कर्मकेत्याग में संकोचके वल तुम्हारा अपने मनसे कल्पनाकियागयाहै कुछ भगवान् को अभिमत नहींहै और कोई तौ ऐसाकहते हैं कि यह भगवान्‌करके कहाहुआ सब कर्मोंका त्याग जिससमयमें मरनेलगताहै उससमयकाहै क्योंकि बादमरनेके फिर कोईकर्म होतानहींहै सो यहभी कथन असंगतहै क्योंकि उसीश्लोक में यहभी कहा कि फिर नवद्वारपुर अर्थात् नवदरवाजे का पुर जो मनुष्यशरीर तिसमें बासकरताहै भला कहीं ऐसाभी सम्भव होता है मरजाइ और फिर उसीदेहमें कर्म नहींकरता कराता बासभी करै इससे तुम्हाराकथन सर्वथाअसंगतहै फिरवहअसंगतवादी कहाताहै देहमें(आस्ते) रहताहै इसक्रियाका सम्बन्धनहींहै किंतु (संन्यास) इसक्रियाका सम्बन्धहै अर्थात् देहमें सबकर्मों का त्यागकरके कहीं रहताहै ऐसाअर्थ है सो यह कथनभी असंगतहै क्योंकि सबजगह श्रुति और स्मृतियोंमें आत्मा विकाररहितहै ऐसा निश्चय कियागयाहै तौ देहसम्बंधके बिना करना औ कराना आत्मामें सम्भव नहींहोता औ यहांकहाहै कि ज्ञानी न करता न कराता है तौ जब ज्ञानीके देहका त्यागहोगया तौ आत्मामें करने करानेके असम्भव से निषेधही असंगत होजायगा दूसरे रहताहै यहांरहना यह क्रिया किसी आधारही में रहेगी क्योंकि बिनाआधार क्रियारहनहीं सक्ती और उनस्थिति क्रियाका आधार बिनादेहके औरकोई सम्भव नहींहोता क्योंकिआत्म तो विकाररहितहै उसमें क्रिया बननहींसक्ती और जो कहाकि देहमें कर्मोंका त्यागकरके ऐसाअर्थ होगे तहां त्यागरूप क्रियाको लियाकरने के देहरूप

विकाररहित एक अकर्त्ता आत्मा मैं हूं ऐसाज्ञान किसीको उत्पन्नही नहीं होता जिसज्ञानके होनेसे सब कर्मोंके संन्यासका उपदेश कियाजावै सो उनका कहना असंगतहै क्योंकि जबविकाररहित आत्माका ज्ञानही न हुआ तौ [न-जायते] इत्यादि मन्त्रकरके जो आत्माजन्मादि विकाररहित है ऐसा उपदेश किया सो अनर्थक होजायगा जैसे शास्त्रके उपदेश से यह धर्म यह अधर्महै और धर्म अधर्म करनेवाले का जन्मभी अवश्यहोता है तहां धर्म करने वालेको सुखहोता है और अधर्म करनेसे दुःख ऐसाज्ञान उत्पन्न होताहै तैसे शास्त्रसे तिसी आत्माको अविक्रियत्व औअकर्तृत्वका ज्ञान अर्थात् आत्मा अकर्ताहै औ विकाररहितहै ऐसाज्ञान क्योंनहीं उत्पन्न होता यह उनपंडित मानियोंसे पूछा चाहिये न कहो जैसे राज्यस्वर्गादि इन्द्रियोंके प्रत्यक्ष होताहै ऐसे आत्मानहीं है इससे हमनिर्गुण आत्माको नहीं मानते सोभी ठीकनहीं क्योंकि (मनसैवानुद्रष्टम्) मनहीकरके देखने योग्यहै इसश्रुतिके प्रमाणसे शास्त्रऔर आचार्यके उपदेशसे उत्पन्नहुए जे शमदमादि साधन तिन्होंकरके संस्कार युक्त जोमन सो आत्माके दर्शन में साधनहै इससे आत्माके जाननेमें शास्त्र औअनुमान रूप प्रमाणोंके विद्यमानता में भी अर्थात् इनके होनेमेंभी ज्ञाननहीं होताहै यह कथनके बल साहस मात्रही है और जोज्ञान उत्पन्नहोता है सो अपनेसे विपरीत अज्ञानको बाधताही है यह सिद्धान्त सबको मानने योग्यहै सो अज्ञान पहिले दिखलायाहीहै किजो आत्माकोमारनेवालामानताहै औरजोआत्मा माराजाता है ऐसामानता है और जोआत्मा मरवादेता है ऐसामानता है ये सब मूर्खहैं ऐसा पहिलेके श्लोकोंमें कहनेसे भगवान्ने अज्ञानका स्वरूप दिखाया औरयह भी सूचनकिया कि हनक्रियामें आत्माको कर्तृत्व औकर्मत्व औप्रयोजकत्व ये सब अज्ञान कल्पित हैं अर्थात् आत्मामें कर्तापना औकर्मपना और प्रयोजक कर्त्तापना ये सबअज्ञान करके कल्पितहैं ऐसेही सबक्रियाओं में आत्माको कर्त्तापना इत्यादि धर्म अज्ञान कल्पितही हैं अविक्रियत्व होनेसे अर्थात् विकाररहित होनेसे जो विकारयुक्त कर्ता है वा अपनी क्रिया का कर्मभूत जो अन्य कोई तिसको प्रेरणा करताहै कि तू कर इससे सब क्रियाविषे भगवान् कर्तृत्व और प्रयोजकत्व का अर्थात् करनेका और करानेका प्रतिषेधकरते हैं जिससे ज्ञानीको कर्मके अधिकारका अभाव सिद्धहोय सो [वेदाविनाशिनं नित्यम्] इत्यादि कथनसे अभिप्राय प्रकट किया कदाचित् कहो किज्ञानीका अधिकार किसमें है सो यह प्रथमही कह आये हैं कि [ज्ञानयोगेन सांख्यानाम्] आत्मानात्म विवेक ज्ञानयुक्त [illegible] ज्ञानयोगकरके संन्निष्ठा कहीहै इसकथनसे और सर्व कर्माणि [illegible] इत्यादि श्लोककरके आगेभी कर्मसंन्यास कहेंगे नरहो मनमा [illegible] करके [illegible] जो कर्महोता है उसीका त्यागसूचित होताहै [illegible] [illegible] नहींहै अर्थात् त्यागनहींहै सो ऐसानहीं कहना चाहिये

ीनवस्त्रों के ग्रहणकरने से उसग्रहणत्यागकर्त्ता को कोई विकारनहीं
... किन्तु वस्त्रोंही में विकारहोताहै तैसे आत्मामें कोई विकारनहीं देह
हि होताहै ॥ २२ ॥

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
नचैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ २३ ॥

शङ्करभाष्यम्।

कस्मादविक्रिय एवेत्याह नैनं छिन्दन्तीति एनं प्रकृतं देहिनं न छिन्दन्ति शस्त्राणि निरवयवत्वान्नावयवविभागं कुर्वन्ति शस्त्राण्यस्यादीनि तथा नैनं दहति पावकोऽग्निरपि न भस्मीकरोति तथा नचैनं क्लेदयन्त्यापोऽपां हि सावयवस्य वस्तुनः आर्द्रीभावकरणेन अवयवविश्लेषापादने सामर्थ्यं तन्न निरवयव आत्मनि सम्भवति तथा स्नेहवद् द्रव्यं स्नेहशोषणेन नाशयति वायुरेनं त्वात्मानं न शोषयति मारुतोऽपि ॥ २३ ॥

आनंदगिरिकृतटीका।

पृथिव्यादिभूतचतुष्टयप्रयुक्ते विक्रियाभाक्त्वादात्मनोऽसिद्धमविक्रियत्वमिति शंकते कस्मादिति यतो न भूतान्यात्मानं गोचरयितुमर्हन्त्यतो युक्तमाकाशवत् तस्याविक्रियत्वमित्याह नैनमित्यादिना ॥ २३ ॥

स्वामिकृतटीका।

कथं हन्तीत्यनेनोक्तं वधसाधनाभावं दर्शयन्नेव नित्यत्वमात्मनः स्फुटीकरोति नैनमिति आपो न क्लेदयन्ति मृदुकरणेन शिथिलं न कुर्वन्ति ॥ २३ ॥

नवलभाष्य।

काहेसे आत्मा विकाररहितहोताहै इसहेतुसे भगवान्कहतेहैं[नैनंछिन्दन्तीति] यह इसप्रकरणमें कहा जो आत्मा तिसको अंगोंके नहींहोनेसे शस्त्र जो खड्गादि ते नहीं छेदनकरते हैं अर्थात् अवयवों का विभाग टुकड़ेनहीं करतेहैं तैसेही इसआत्माको पावक जो अग्नि सोभी भस्मनहीं करसक्ताहै तैसे जल भी इसआत्माको गीलानहीं करसक्ते हैं क्योंकि जो अवयववान् अर्थात् अंगोंकरके युक्त वस्तुहोतीहै उसको आर्द्रकरके अर्थात् गीलाकरके अवयवोंके पृथक् पृथक् करनेमें जलोंकी सामर्थ्य होतीहै सो सामर्थ्य निरवयव अंगरहितआत्मामें नहीं सम्भवहोतीहै तैसेही जो द्रव्य चिकनाईकरके युक्तहै उसको उसचिकनाईके सुखानेसे पवन नाशकरताहै और आत्मा तो चिकनाई करके युक्त नहीं इससे इसआत्माको पवन नहीं सुखासक्ताहै ॥ २३ ॥

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः॥ २४ ॥

शङ्करभाष्यम्।

[illegible]

आधार की आकांक्षाही नहींहोती और विनाआकांक्षाके क्रियाका अन्वय नहीं सम्भवहोता इससे रहताहै इसी क्रियावाचकका देहमें सम्बंधहै त्याग रूपक्रियाका नहींहै इससे तुम्हारा कथन असंगतहीहै तिससे गीताशास्त्रमें आत्मज्ञानीको संन्यासही में अधिकारहै कर्ममें नहींहै इससिद्धांतको आगे भी आत्मज्ञानके प्रकरण में तहां तहां दिखलावेंगे ॥ २१ ॥

वासांसिजीर्णानियथा विहायनवानि गृह्णातिनरोऽपराणि।
तथाशरीराणिविहाय जीर्णान्यन्यानिसंयातिनवानिदेही॥२२॥

शङ्करभाष्यम्।

प्रकृतन्तु वक्ष्यामः तत्रात्मनोऽविनाशित्वं प्रतिज्ञातं तत् किमिवेत्युच्यते वासांसीति वासांसि वस्त्राणि जीर्णानि दुर्बलतां गतानि यथा लोके विहाय परित्यज्य नवानि अन्यानि गृह्णात्युपादत्ते नरः पुरुषोऽपराण्यन्यानि तथा तद्वदेव शरीराणि विहाय जीर्णान्यन्यानि संयाति सङ्गच्छति नवानि देहात्मा पुरुषवदविक्रिय एवेत्यर्थः॥ २२ ॥

आनंदगिरिकृतटीका।

आत्मनोऽविक्रियत्वेन कर्मासम्भवं प्रतिपाद्याविक्रियत्वहेतुसमर्थनार्थमेवोत्तरग्रन्थमवतारयति प्रकृतं त्विति किं तत्प्रकृतमिति शङ्कमानं प्रत्याह तत्रेति अविनाशित्वमित्युपलक्षणमविक्रियत्वमित्यर्थः तदेव दृष्टान्तेन स्पष्टयितुमुत्तरश्लोकमुत्थापयति तदित्यादिना आत्मनः स्वतोऽविक्रियाभावेऽपि पुरातनदेहत्यागे नूतनदेहोपादाने च विक्रियावत्त्वध्रौव्याद्विक्रियत्वं सिद्धमिति चेत् तत्राह वासांसीति शरीराणि जीर्णानि वयोहानिं गतानि त्वग्वलीपलितादिसंगतानीत्यर्थः वाससां पुरातनानां परित्यागे नवानाञ्चोपादाने त्यागोपादानकर्तृभूतलौकिकपुरुषस्यापि अविकारित्वेनैकरूपत्ववदात्मनो देहत्यागोपादानयोरविरुद्धमविक्रियत्वमिति वाक्यार्थमाह पुरुषवदिति ॥ २२ ॥

स्वामिकृतटीका।

नन्वात्मनोऽविनाशेऽपि तदीयशरीरनाशं पर्यालोच्य शोचामीति चेत् तत्राह वासांसीति कर्मनिबन्धनानां देहानामवश्यम्भावित्वाज्जीर्णदेहनाशेन शोकावकाश इत्यर्थः॥२२॥

नवलभाष्य।

अब जो प्रकरणमें अर्थहै तिसको कहते हैं तहां आत्मा अविनाशी है कभी नाशको प्राप्तनहीं होताहै यहप्रतिज्ञाकर आयेहैं सोकिसके सदृशहै यह दिखाने को भगवान् कहतेहैं [वासांसीति] जैसे लोकमें ये वस्त्रजीर्णहो जातेहैं अर्थात् पुराने होनेसे अथवा किसी कारणपाय गलजानेसे जब पहिरनेके योग्यनहीं रहतेहैं तो पुरुषउनकोको त्यागकर और नवीन वस्त्रोंको ग्रहण करताहै तैसेही देहोंजो आत्मासो वृद्धावस्थासे वा रोगादिसे जीर्ण होजाते हैं अर्थात् भोगके योग्यनहीं रहतेहैं तो उनकोत्याग करके और नवीनदेहोंको ग्रहणकरताहै तो जैसे पुरानेवस्त्रोंके त्यागसे और

द्रवत्वाभावादशोष्य इति इतश्च छेदादियोग्यो न भवति यतो नित्योऽविनाशी सर्वगतः स्थाणुः स्थिरस्वभावो रूपान्तरापत्तिशून्यः अचलः पूर्वरूपापरित्यागी सनातनोऽनादिः अव्यक्तश्चक्षुराद्यविषयः अचिन्त्यो मनसोऽप्यविषयः अविकार्यः कर्मेन्द्रियाणामगोचर इत्यर्थः उच्यत इति नित्यत्वादभियुक्तोक्तिं प्रमाणयति ॥ २४ ॥

नवलभाष्य।

और जिसकारणसे शस्त्रादिक इसका छेदनादिक नहींकरसक्के हैं तिसीसे यहआत्मा अछेद्यहै अर्थात् नहीं छेदनकरनेको शक्यहै और भस्मकरनेको भी शक्यनहीं है और गीलाकरने को भी शक्यनहीं है औसुखानेको भी शक्यनहीं है अर्थात् समर्थ नहींहै औजिससे परस्पर नाशहेतु भूत अर्थात् आपुसमें नाशकरने वाले जे भूतते इसआत्माका नाशकरने को नहीं उत्साहकरते हैं तिसीसे यह आत्मा नित्यहै औजिससे नित्यहै इसीसे सर्वगत है अर्थात् सर्वव्यापक है और जिससे सर्वव्यापक है इसीसे स्थिरस्वभाव है जिससे स्थिरहै इसीसे अचलहै और अचलहोनेही से यह आत्मा सनातनहै अर्थात् पुरानाहै किसी कारणसे पवनादिककीनाईं उत्पन्ननहीं हुआ है अब इसप्रकरणमें यहशंका होतीहै कि बहुतसा पुनरुक्तदोष आता है क्योंकि प्रथमतो [नजायते] इत्यादि श्लोककरके आत्मामें छःविकारनहीं हैं यहकहि आयेथे फिर [अविनाशितुतद्विद्धि] इसश्लोकसे यहकहा कि आत्मामें कोई कर्म नहीं संभवहोता और न कोई क्रिया औरतिसपै भी [नैनंछिन्दन्ति] इत्यादि श्लोकसे फिरक्रियाहीका निषेधकिया और तिसके आगे फिरभी [अच्छेद्योयमदाह्योयम्] इसश्लोकसे फिर उसी क्रियाका निषेधकिया इसप्रकार बहुत पुनरुक्तियां आतीहैं सो क्यासमुझके ऐसाकहा क्योंकि एक [नजायते] इसीश्लोककरके सब श्लोक गतार्थ हैं जब कि इस श्लोकमें छः विकारोंका निषेध करतेहैं तब जितनी छेदनादिक क्रिया हैं ते सब इनविकारोंही के अन्तर्गतहैं तो इसकथनका यहआशय है कि आत्मवस्तु अत्यन्त दुर्बोधहै अर्थात् दुःखकरके भी किसीसंसारी को आत्मज्ञान नहींहोता इससे बारम्बार प्रसंगवशसे और और शब्दोंकरके भगवान्वासुदेव श्रीकृष्ण उसी आत्मवस्तुको निरूपण करतेहैं कि कैसे भी इनसंसारी पुरुषोंको संसाररहित आत्मतत्त्व बुद्धिमें प्रविष्टहुआ संसारकी निवृत्ति के अर्थ होय ॥ २४ ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥ २५ ॥

शङ्करभाष्यम्।

तस्मादेवं यथोक्तप्रकारेणैनमात्मानं विदित्वा त्वं नानुशोचितुमर्हसि हन्ताहमेषां मयैते हन्यन्त इति ॥ २५ ॥

स्थिरत्वादचलोऽयमात्माऽतः सनातनश्चिरन्तनो न कारणात् कुतश्चिन्निष्पन्नोऽभिनव इत्यर्थः न तेषां श्लोकानां पौनरुक्त्यं चोदनीयं यत एकेनैव श्लोकेनात्मनो नित्यत्वमविक्रियत्वं चोक्तं न जायते म्रियते वा इत्यादिना तत्र यदेवाविक्रियं किञ्चिदुच्यते तदेतस्माद् श्लोकार्थान्नातिरिच्यते किञ्चिच्छब्दातः पुनरुक्तं किञ्चिदर्थं त इति दुर्बोधत्वादात्मवस्तुनः पुनः पुनः प्रसंगमापाद्य शब्दान्तरेण तदेव वस्तु निरूपयति भगवान् वासुदेवः कथं तु नाम संसारिणाम् असंसारित्वं बुद्धिगोचरतामापन्नं सदव्यक्तं तत्त्वं संसारनिवृत्तये स्यादिति किञ्च अव्यक्तोऽयमिति अव्यक्तः सर्वकरणाविषयत्वान्न व्यज्यते इति अव्यक्तोऽयमात्मा अतएवाचिन्त्योऽयं यद्धीन्द्रियगोचरं वस्तु तच्चिन्ताविषयत्वमापद्यते अयं त्वात्माऽनिन्द्रियगोचरत्वादचिन्त्योऽतएवाविकार्यो यथा क्षीरं दध्यादिना विकारि न तथा अयमात्मा निरवयवत्वाच्चाविक्रियो नहि निरवयवं किञ्चिद्विक्रियात्मकं दृष्टमविक्रियत्वादविकार्य्योऽयमात्मोच्यते ॥ २४ ॥

आनन्दगिरिकृतटीका ।

पृथिव्यादि भूतप्रयुक्तच्छेदनाद्यविक्रियाऽभावे योग्यताऽभावं कारणमाह यतइतिपूर्वार्द्धमुत्तरार्द्धे हेतुत्वेन योजयति यस्मादिति नित्यत्वादीनामन्योऽन्यं हेतुहेतुमद्भावं सूचयति नित्यत्वादिना नच नित्यत्वं परमाणुषु व्यभिचारादसाधकं सर्वगतत्वस्येति वाच्यं तेषामेवाप्रमाणिकत्वेन व्यभिचारानवताराच्च सर्वगतत्वेऽपि विक्रियाशक्तिमत्त्वमात्मनोऽस्तीति युक्तं विभुत्वेनाभिमते नभसि तदनुपलम्भात् विक्रियाशक्तिमत्त्वे स्थैर्यमास्थातुमशक्यं तथाविधस्य मृदादेरस्थिरत्वदर्शनादित्याशयेनाह स्थिरत्यादिति स्थाणोर्नित्यत्वेऽपि कारणाभावसम्भवादुत्पत्तिरपि सम्भवितेति कुतश्चिरन्तनत्वमित्याशङ्क्याह नकारणादिति आत्मनोऽविक्रियत्वस्य न जायते म्रियते वेत्यादिना साधितत्वात् तस्यैव पुनरभिधाने पुनरुक्तिरित्याशङ्क्याह न तेषामिति अनाशंकनीयस्य चोद्यस्य प्रसंगं दर्शयति यतइति अतो येदाविनाशिनमित्यादौ न शङ्क्यते पौनरुक्त्यमिति शेषः कथं तत्र पौनरुक्त्यशङ्का समुन्मिषति तत्राह तत्रेति वेदाविनाशिनमित्यादि श्लोकः समन्वा[illegible] [illegible] श्लोकेन न जायते म्रियते वेत्यादिनोच्यते नन्विह श्लोके जन्ममरणाद्यभावोऽभिलप्यते वेदेत्यादौ पुनरपवयाद्यभावो विवक्ष्यते तत्र कथमर्थातिरेकाभावमाश्रित्य पौनरुक्त्यशङ्का तत्राह किञ्चिदिति कथं तर्हि पौनरुक्त्यं नचोदनीयमिति मन्वानः [illegible] दुर्बोधत्वादिति पुनः पुनरभिधानमेतेन वस्तु निरूपयतो भगवतोऽभिप्रायमाह [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

...पितमभ्युपेत्याहोचेत महत्पापं कर्तुं व्यवसितावयमित्यादेस्तदीयशोकस्य निरवकाश ...मित्याह तथापीति एवमर्जुनस्य दृश्यमानमनुशोकप्रकारं दर्शयित्वा तस्य कर्तुमयो ...े हेतुमाह जन्मवत इति जन्मवतो नाशो नाशवतश्च जन्मेत्येतावश्यंभाविनौ मिथो व्याप्ताविति योजना ॥ २६ ॥

स्वामिकृतटीका।

इदानीं देहेन सहात्मनो जन्म तद्विनाशे च विनाशमंगीकृत्यापि शोको न कार्य इत्याह अथ चैनमिति अथ यद्यप्येनमात्मानं अनित्यं सर्वदा तत्तद्देहे जाते जातं मन्यसे तथा तत्तद्देहे मृते मृतञ्च मन्यसे पुण्यपापयोस्तत्फलभूतयोः अजन्ममरणयोरात्मगामित्वात् तथापि त्वं शोचितुं मार्हसि ॥ २६ ॥

नवलभाष्य।

और हेअर्जुन इसप्रकार युक्तिप्रमाण द्वाराआत्माके नित्यपनाकी सिद्धी में भी जो कदाचित् लोकायत मतवादियों के मतको आश्रयण करके देहके संग आत्माभी उत्पन्न होताहै और देहनष्ट होता है तौ आत्माभी उसके संगही नष्टहोता है इसप्रकार लोकप्रसिद्धि से नित्यदेह देहप्रति आत्माको उत्पन्न मानताहोवै और नित्य प्रतिदेह आत्माको मराहुआ मानता तौ भी तू शोचकरने योग्य नहींहै ॥ २६ ॥

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥ २७ ॥

शङ्करभाष्यम्।

तथा च सति जातस्येति जातस्य हि लब्धजन्मनो ध्रुवोऽव्यभिचारी मृत्युर्मरणं ध्रुवं जन्म मृतस्य च तस्मादपरिहार्योऽयं जन्ममरणलक्षणोर्थ स्तस्मिन्नपरिहार्येऽर्थे न त्वं शोचितु मर्हसि ॥ २७ ॥

आनंदगिरिकृतटीका।

तयोरवश्यकताविर्त्ये मत्यनुशोकस्याकर्तव्यत्वे हेत्वन्तरमाह तथाचेति ॥ २७ ॥

स्वामिकृतटीका।

जन्माविनि जन्ममरणलक्षणेऽर्थे त्वं विद्वान् शोचितुं योग्यो न भवसि ॥ २७ ॥

नवलभाष्य।

क्योंकि जो उत्पन्न हुआ है उसकी निश्चय करके मृत्युहोनेही वाली है और जोमरता है उसका जन्मभी अवश्य होगाही तब यहजन्म मरणरूप अर्थ अपरिहार्य है किसीको दूरकरने को शक्यनहीं अर्थात् यह किसीकी सामर्थ्य नहीं जो जिसका जन्महै उसकी मृत्यु न होय और जिसकी मृत्यु है उसका जन्म न होय इससे तू शोचकरने योग्यनहीं है ॥ २७॥

आनंदगिरिकृतटीका ।

आत्मयाथात्म्योपदेशमशोच्यानन्वशोचस्त्वमित्युपक्रम्य व्याख्यानमुपसंहरति तस्मा दिति अव्यक्तत्वाचिन्त्यत्वाविकार्यत्व नित्यत्वसर्वगतत्वादिरूपो यस्मादात्मा निर्दि ष्टस्तस्मात् तथैव ज्ञातुमुचितस्तज्ज्ञानस्य भलवत्त्वादित्यर्थः प्रतिषिध्यमनुशोकमभि भिनयति हन्ताहमिति ॥ २५ ॥

स्वामिकृतटीका ।

उपसंहरतितस्मादेवमितितदेवमात्मनोजन्मविनाशाभावाच्चशोकःकार्यइत्युक्तम् ॥२५॥

नवलभाष्य ।

औ हे अर्जुन फिर यहआत्मा अव्यक्त है सबकारणोंके अविषयहोनेसे किसीकरके नहींप्रकटहोय सो अव्यक्तकहाताहै अर्थात् शब्दकेअर्थके जानने में कारण प्रत्यक्षादि प्रमाणहैं तिन्होंकरके आत्मानहींजानाजाताहै इससे अव्यक्तहै और इसीसे अचिन्त्यहै जो इंद्रियगोचरवस्तु अर्थात् इंद्रियोंकर के जो वस्तु जानीजातीहै उसका मनसे चिन्तनहोताहै तौ उसको चिन्त्य कहतेहैं और यहआत्मा तौ इंद्रियगोचरहै नहीं इससे यहअचिन्त्यहै और इसीसे अविकार्य्यहै अर्थात् विकाररहितहै जैसे दुग्ध दधि आदि रूपकरके विकारयुक्तहोताहै तैसे यहआत्मा निरवयव अंगरहितहोने से विकारयुक्त नहीं होता क्योंकि कोई अवयवरहित अर्थात् अंगरहित वस्तु कभी विकार को प्राप्त नहींदेखी इससे विकाररहितहोनेसे आत्माअविकार्य कहाजाताहै इससे हे अर्जुन इसआत्माको पूर्वोक्तप्रकार करके जानके मैं इनका मारने वालाहूं येमुझकरकेमारेजातेहैं इसप्रकारसे शोचकरनेकेयोग्यतूनहींहै २५॥

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥ २६ ॥

शङ्करभाष्यम् ।

आत्मनोऽनित्यत्वमभ्युपगम्येदमुच्यते अथ चैनमिति अथ चेत्यभ्युपगमार्थः एनं प्रकृतमात्मा नं नित्यजातं लोकप्रसिद्ध्या प्रत्यनेकशरीरोत्पत्तिं जातोजात इति वा मन्यसे तथा प्रतितनु तद्वि नाशं नित्यं वा मन्यसे मृतं मृतोऽमृत इति तथापि भाविन्यपि आत्मनि त्वं महाबाहो नैवं शो चितुमर्हसि जन्मवतो नाशो नाशवतो जन्म चेत्येताववश्यम्भाविनाविति ॥ २६ ॥

आनन्दगिरिकृतटीका ।

आत्मनो नित्यत्वम्[illegible] प्रागेव निरूप्यात्[illegible]शोकानुपपत्तिरित्याशङ्क्याह आत्मन इति [illegible]शिष्टैः [illegible] लोकायतानां वा मतमिदमापराकृष्यते [illegible] [illegible] [illegible]मभ्युपगम्यापि [illegible]मितयोरन्यतरमतामनु[illegible] [illegible] [illegible] प्रकृतस्यात्मनो नित्यत्वादि[illegible] [illegible]नाशाभावात्[illegible] नोदिति [illegible] [illegible] [illegible] [illegible] तदपि परे।

मिथ्याहै यह जानकेभी शोककरना युक्तनहीं है क्योंकि हेअर्जुन ये सबभूत अव्यक्त जो अदर्शन अर्थात् न दिखाई पड़ना सो आदिमें जिनपुत्र मित्रादिकोंके अथवा पृथिव्यादिकोंके ऐसे हैं अर्थात् उत्पत्ति के पहिले इनपुत्र मित्रादिकों का कुछनाम रेखनथा और ऐसेही पृथिव्यादिकभी हैं और मरणके उपरान्त भी इनका नामरूप न रहैगा एकमध्यमें सहावेकी तरहनाम रूप दिखाई पड़ताहै वहभी मिथ्याही है तौ ऐसेभूतोंमें क्याविलाप करना चाहिये अर्थात् ऐसे स्वप्नवत् मिथ्यापुत्र मित्रादिकोंके वियोगकी संभावना से अपने मनमें क्लेशकरना व्यर्थ है सो पुराणों में कहाभी है (अदर्शनादापतितः पुनश्चादर्शनंगतः। नासौतत्रन तस्यत्वं वृथाका परिदेवनेति) इस का अर्थ अत्यन्त+स्पष्टइससे नहीं लिखा ॥ २८ ॥

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनंवेदनचैवकश्चित्॥२९॥

शङ्करभाष्यम्।

दुर्विज्ञेयोऽयं प्रकृत आत्मा किंत्वामेवैकम् उपालभेत् साधारणे भ्रांति निमित्ते कथं दुर्विज्ञेयमात्मेसत आह आश्चर्य्यवदिति आश्चर्य्यवदाश्चर्य्यम् अदृष्टपूर्वमद्भुतमकस्माद्दृश्यमानं तेनतुल्यमाश्चर्यं वदाश्चर्यमिवैनमात्मानं पश्यति कश्चिदाश्चर्य्यवदेनं वदति तथैवचान्य आश्चर्य्यवच्चैनमन्यःशृणोतिदृष्टावेत्स.श्रुत्वाप्यात्मानंवेद नचैव कश्चिदथवायोयमात्मानंपश्यति स आश्चर्यतुल्योयो वदातियश्च शृणोतिसोऽनेकसहस्रेषुकश्चिदेव भवसतो दुर्बोध आत्मेत्यभिप्रायः २९॥

आनंदगिरिकृतटीका।

अर्जुनं प्रत्युपालम्भं दर्शयित्वा प्रकृतस्यात्मनो दुर्विज्ञेयत्वात् तं प्रत्युपालम्भो न सम्भवतीतिमन्वानः सन्नाह दुर्विज्ञेय इति तथापात्माज्ञाननिमित्तविप्रलम्भस्य साधारणत्वादसाधारणोपालम्भस्य निरवकाशतेत्याह किं त्वामेवेति अहं प्रत्ययवेद्यत्वादात्मनो दुर्विज्ञेयत्वमसिद्धमितिशङ्कते कथमिति विशिष्टस्यात्मनोऽहं प्रत्ययस्य दृष्टत्वेऽपि केवलस्य तदभावादस्ति दुर्विज्ञेयतेति श्लोकमवतारयति आहेति आश्चर्यवदिति आद्येन पादेनात्मविषयदर्शनस्य दुर्लभत्वं दर्शयता द्रष्टुर्दौर्लभ्यमुच्यते द्वितीये नच तद्विषयवदनस्य दुर्लभत्वोक्तेस्तदुपदेष्टुस्तदात्वं कथ्यते तृतीयेन तदीयश्रवणस्य दुर्लभत्वद्वारा श्रोतुर्विरलता विवक्षिता श्रवणदर्शनोक्तीनां भावेऽपि तद्विषयसाक्षात्कारस्यात्यन्तायासलभ्यत्वं चतुर्थेनाभिमतमिति विभागः आत्मगोचरदर्शनादि दुर्लभत्वद्वारा दुर्बोधत्वमात्मनः साधयति आश्चर्यवदिति सम्प्रत्यात्मनि द्रष्टुर्वक्तुः श्रोतुः साक्षात् कर्तुश्च दुर्लभत्वाभिधानेन तदीयं दुर्बोधत्वं कथयति अथवेति व्याख्यानद्वयेऽपि फलितमाह अत इति ॥ २९ ॥

+दर्शनके अभावसे अर्थात् नहींदिखनेसे आयन्नात् आके प्राप्तहुआ और फिर भी अदर्शनको प्राप्तहुआ नहीं देखनेहोंके। प्रगटहुआ अर्थात् पहिले भी नहीं दिखाई देताथा अबभी नहीं दिखाई देताहै मध्यमेंही दिखाईदेता सोभी झूठाहीथा इसके नतो पहले हीथे और न तू निश्चयही तो फिर इनका विलाप करनाभी मिथ्याहै अर्थात् निष्फल है यह इस श्लोकका अर्थ सो सुस्पष्ट इससे स्फुट अनुवाद नहीं किया।

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥

शङ्करभाष्यम् ।

कार्य्यकारणसंघातात्मकान्यपि भूतान्युद्दिश्य शोको न युक्तः कर्तुं यतअव्यक्तादीनीति अव्यक्तादीन्यव्यक्तमदर्शनमनुपलब्धिरादिर्येषां भूतानां पुत्रमित्रादिकार्य्यकारणसंघातात्मनां तानि अव्यक्तादीनि भूतानि प्रागुत्पत्तेः उत्पन्नानि च प्राक् मरणात् व्यक्तमध्यान्यव्यक्तनिधनान्येव पुनरव्यक्तमदर्शनं निधनं मरणं येषां तानि अव्यक्तनिधनानि मरणादूर्ध्वमप्यव्यक्ततामेवप्रतिपद्यन्ते इत्यर्थः तथाचोक्तम् अदर्शनादापतितः पुनश्चादर्शनं गतः नासौ तव न तस्य त्वं वृथा का परिदेवनेति तत्र का परिदेवना को वा प्रलापः अदृष्टदृष्टप्रनष्टभ्रांतिभूतेष्वित्यर्थः २८॥

आनन्दगिरिकृतटीका ।

कुत इत्यतआह जातस्य हीति हि यस्माज्जातस्य स्वारम्भककर्मक्षये मृत्युर्ध्रुवो निश्चितः मृतस्य च तद्देहकृतेन कर्मणा जन्मापि ध्रुवमेव तस्मादेवमपरिहार्येऽर्थे आत्मानमुद्दिश्यानुशोकस्य कर्तुमयोग्यत्वेऽपि भूतसङ्घातात्मकानि भूतान्युद्दिश्य तस्य कर्तव्यत्वमाशङ्क्याह कार्येति समनन्तरश्लोकस्तत्र हेतुरित्याह यतइति चाक्षुषदर्शनमात्रं व्यावर्तयति अनुपलब्धिरिति नहि यथोक्ति सङ्घातरूपाणि भूतानि पूर्वमुत्पत्तेरुपलभ्यन्ते तेनतानि तथा व्यपदेशभाञ्जि भवन्तीत्यर्थः किं तन्मध्यं यदेषां व्यक्तमिष्यते तदाह उत्पन्नानीति उत्पत्तेरूर्ध्वं मरणाच्च पूर्वं व्यावहारिकं सत्वं मध्यमेषां व्यक्तमिति तथाच्यतेऽन्मानुसारित्वविलयस्य युक्तमितिमत्वा तात्पर्य्यार्थमाह मरणादिति उक्तेऽर्थे पौराणिकसम्मतिमाह तथाचेति तत्रेत्यस्यार्थमाह अदृष्टेति पूर्वमदृष्टानि सन्ति पुनर्दृष्टानि तान्येव पुनर्नष्टानितदेवं भ्रान्तिविषयतया घटिकायन्त्रवच्चक्रीभूतेषु भूतेषु शोकनिमित्तस्य प्रलापस्य नावकाशोऽस्तीत्यर्थः ॥ २८ ॥

स्वामिकृतटीका ।

किञ्च देहादीनां स्वभावं पर्य्यालोच्य तदुपाधिके आत्मनो जन्ममरणे शोको न कार्य्य इत्याह अव्यक्तादीनीति अव्यक्तं प्रधानं तदेवादि उत्पत्तेः पूर्वरूपं येषां तानि अव्यक्तादीनि भूतानि शरीराणि कारणात्मनास्थितानामेवोत्पत्तेः तथा व्यक्तमभिव्यक्तमध्यं जन्ममरणान्तराले स्थितिलक्षणं येषां तानिव्यक्तमध्यानि अव्यक्तेनिधनं लयोयेषांतानीमान्येवम्भूतान्येव तत्र तेषु का परिदेवना कःशोकनिमित्तो विलापः प्रतिबुद्धस्य स्वप्नदृष्टवस्तुष्विव शोको न युज्यत इत्यर्थः ॥ २८ ॥

नवलभाष्य ।

कदाचित् अर्जुन कहै आत्मा नित्यहै इससे शोच करनेयोग्य नहीं है यहरहो परन्तु आकाशादि भूतात्मक जे भीष्मादिकों के सुन्दरदेहहैं तेतो शोचनीयहैंही इसपै कहतेहैं भूतभी कार्यकारण+संघातरूप होनेसे अत्यन्त

+जैसे घटकार्यरूप और मृत्तिका उसका कारणहै और मृत्तिकाभी कारणरूपहै फिर [illegible] सब कार्य कारण [illegible] है ऐसे देहभी [illegible] और आकाशादि भूत और महत्तत्त्वादि सूक्ष्मकार्य कारण [illegible] होतेहैं और इनमें कारणहै और किंचकार्य है ।

नवलभाष्य।

अब भगवान् इस प्रकरणके अर्थको उपसंहार करतेहुए अर्थात् समाप्त तेहुए कहते हैं कि (देहीति) जिससे देही जोआत्मा सो नित्य अर्थात् सबकाल में औसब अवस्थामें अवध्य है किसीसे मारानहीं जाताहै क्योंकि अवयव अर्थात् अंग उसके कोई नहीं हैं इससे और नित्यपनासे औ सब के देहमें सर्वव्यापकता से स्थितभी है औसब प्राणिमात्रका देहमाराभी जाताहै परन्तु जिससे यहदेही आत्मा किसीको मारने को शक्यनहीं है तिससे भीष्मादिकजे प्राणीहैं तिनको शोचकरनेयोग्य तुम नहीं हौ ॥३०॥

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥३१॥

शङ्करभाष्यम्।

इह परमार्थतत्त्वापेक्षायां शोको वा मोहो वा न सम्भवतीत्युक्तं न केवलं परमार्थतत्त्वापेक्षायामेव किन्तु स्वधर्म्ममिति स्वधर्म्ममपि स्वो धर्म्मः क्षत्रियस्य धर्मः युद्धं तमप्यवेक्ष्य त्वं न विकम्पितुं प्रचलितुम् अर्हसि क्षत्रियस्य स्वाभाविकाद्धर्मादात्मस्वाभाव्यादित्यभिप्रायः तच्चयुद्धं पृथिवीजयद्वारेण धर्मार्थं प्रजारक्षणार्थंचेति धर्म्मादनपेतं परं धर्म्यं तस्मात् धर्म्यात् युद्धात् श्रेयोऽन्यत् क्षत्रियस्य न विद्यते हि यस्मात् ॥ ३१ ॥

आनंदगिरिकृतटीका।

श्लोकान्तरमवतारयन् वृत्तं कीर्तयति इहेति पूर्वश्लोकः सप्तम्यर्थः यत्पारमार्थिकं तत्त्वं तदपेक्षायामेव केवलं शोकमोहयोरसम्भवो न भवति किन्तु स्वधर्ममपि चावेक्ष्येति सम्बन्धः स्वकीयं क्षात्रधर्ममनुसन्धाय ततश्चलनं परिहर्तव्यमित्यर्थः यद्धि क्षत्रियस्य धर्मादनपेतं श्रेयः साधनं तदेव मयानुवर्तितव्यमित्याशङ्क्याह धर्म्यादिति जातिप्रयुक्तं स्वाभाविकं स्वधर्ममेव विशिनष्टि क्षत्रियस्येति पुनर्नकारोपादानमन्वयार्थं प्रचलितुमयोग्यत्वे प्रतियोगिनं दर्शयति स्वाभाविकादिति स्वाभाविकत्वमसाम्प्रतीयन्त्वमिति शङ्कां वारयितुं तात्पर्यमाह आत्मेति आत्मनः स्वस्यार्जुनस्य स्वाभाव्यं क्षत्रियस्वभावप्रयुक्तं वर्णाश्रमोचितं कर्म तस्मादित्यर्थः धर्मार्थं प्रजापरिपालनार्थञ्च प्रयतमानस्य युद्धादुपरतिर्न युक्तेत्याशङ्क्याह तद्धेति ततोऽपि श्रेयस्करं किञ्चिदनुष्ठातुं युद्धादुपरतिरुचितेत्याशङ्क्याह तस्मादिति तस्माद्युद्धात् प्रचलनमनुचितमिति शेषः ॥ ३१ ॥

स्वामिकृतटीका।

यच्चोक्तमर्जुनेन वेपथुश्च शरीरे इत्यादि तदप्ययुक्तमित्याह स्वधर्ममपीति आत्मनो नाशाभावादेवैतेषां हननेऽपि विकम्पितुं नार्हसि किंच स्वधर्ममप्यवेक्ष्य विकम्पितुं न योग्योसीति सम्बन्धः यतो धर्मादनपेतात् युद्धादन्यत् [illegible] तदाह धर्म्याद्धीति धर्मादनपेतस्माद्युद्धादन्यत् ॥ ३१ ॥

नवलभाष्य।

अब यहां परमार्थ तत्त्वकी अपेक्षामें अर्थात् परमार्थ तत्त्व विचारमें नौ

स्वामिकृतटीका।

कुतस्तर्हि विद्वांसोऽपि लोके शोचन्ति आत्माज्ञानादेवेत्याशयेनात्मनो दुर्ज्ञेयत्वमाह आश्चर्यवदिति कश्चिदेनमात्मानं शास्त्राचार्योपदेशाभ्यां पश्यन्नाश्चर्यवत् पश्यति सर्वगतस्य नित्यज्ञानानन्दस्वभावस्यात्मनोऽलौकिकत्वादैन्द्रजालिकवदृश्यमानं पश्यन्निव विस्मयेन पश्यति असम्भावनाभिभूतत्वात् तथाश्चर्यवदेवान्यो वदति शृणोति चान्यः कश्चित् पुनर्विपरीतभावनाभिभूतः श्रुत्वापि न वेद च शब्दादुक्त्वापि दृष्ट्वापि न सम्यग्वेदेति द्रष्टव्यम् ॥ २९ ॥

नवलभाष्य।

वा सांख्यबुद्धौ शरणमाश्रयमभयप्राप्तिकारणमन्विच्छ प्रार्थयस्व परमार्थज्ञानशरणो भ
यतोऽवरं कर्मकुर्वाणाः कृपणाः दीनाः फलहेतवः फलतृष्णा प्रयुक्ताः सन्तः यो वा ए
गार्ग्यविदित्वास्माल्लोकात् प्रैति स कृपण इति श्रुतेः ॥ ४९ ॥

आनन्दगिरिकृतटीका।

समत्वबुद्धियुक्तस्य सुकृत दुष्कृत तत्फलपरित्यागेऽपि कथं मोक्षः स्यादित्या शङ्क्याह यस्मादिति समत्वबुद्ध्या यस्मात् कर्मानुष्ठीयमानं दुरितादि त्याजयति तस्मात् परम्पराऽसौ मुक्तिहेतुरित्यर्थः मनीषिणो हि ज्ञानातिशयवन्तो बुद्धियुक्ताः सन्तः स्वधर्माख्यं कर्मानुतिष्ठन्तस्ततो जातं फलं देहप्रदन्ते हित्वा जन्मलक्षणाद्बन्धाद्विनिर्मुक्ताः वैष्णवं पदं सर्वसंसारसंस्पर्शशून्यं प्राप्नुवन्तीति श्लोकोक्तमर्थं श्लोक योजनया दर्शयति कर्मजमित्यादिना इष्टो देहो देवादिलक्षणोऽनिष्टो देहस्तिर्यगादिलक्षणस्तत्प्राप्तिरेव कर्मणो जातं फलं तद्यथोक्तं बुद्धियुक्ता ज्ञानिनो भूत्वा तद्बलादेव परित्यज्य बन्धविनिर्मुक्तिपूर्वकं जीवन्मुक्ता सन्तो विदेह कैवल्यभाजो भवन्तीत्यर्थः बुद्धियोगादित्यादौ बुद्धिशब्दस्य समत्वबुद्धिरर्थो व्याख्यातः सम्प्रति परम्परां परिहृत्यतु कृतदुष्कृतप्रहाणहेतुत्वस्य समत्वबुद्धावसिद्धेः बुद्धिशब्दस्य योग्यमर्थान्तरं कथयति अथवेति अनवच्छिन्नवस्तु गोचरत्वेनानवच्छिन्नत्वं तस्याःसूचयन् बुद्ध्यन्तराद्विशेषं दर्शयति सर्वत इति असाधारणं निमित्तं तस्यानिर्दिशति कर्मेति यथोक्त बुद्धिशब्दार्थत्वे हेतुमाह साक्षादिति जन्मबन्धविनिर्मोकादिरादिशब्दार्थः ॥ ५१ ॥

स्वामिकृतटीका।

कर्मणां मोक्षसाधनत्वप्रकारमाह कर्मजमिति कर्मजं फलं त्यक्त्वा केवलमीश्वराराधनार्थं कर्मकुर्वाणा मनीषिणो ज्ञानिनो भूत्वा जन्मरूपेण बन्धेन विनिर्मुक्ताः सन्तोऽनामयं सर्वोपद्रवरहितं विष्णोः पदं मोक्षाख्यं गच्छन्ति ॥ ५१ ॥

नवलभाष्य।

और हे अर्जुन जिससे समत्वबुद्धियुक्त जे पुरुष हैं ते कर्म से उत्पन्न हुआजो इष्टानिष्टदेह प्राप्तिरूप फल तिसको त्यागके ज्ञानीहोके जीवतेही जन्मरूप बन्धनसे छूटेहुए सबउपद्रवोंसे रहित विष्णुके मोक्षनामसे प्रसिद्ध जो मोक्षपद तिसको प्राप्तहोते हैं अथवा (बुद्धियोगाद्धनञ्जय) इसश्लोकसेलेके परमार्थज्ञानरूपा सबजगह से भरेहुए समुद्रके तुल्य कर्मयोगसे उत्पन्नहुई अन्तःकरणशुद्धीदिखलाई क्योंकि उसको साक्षात् सुकृत दुष्कृतादिके त्यागमें कारणताका श्रवणहै इससे ॥ ५१ ॥

> यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
> तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥ ५२॥

शङ्करभाष्यम्।

योगानुष्ठानजनितसत्त्वशुद्धिजा बुद्धिः कदा प्राप्स्यत इत्युच्यते यदेति यदा यस्मिन् काले ते तव मोहकलिलं मोहात्मकमविवेकरूपं कालुष्यं येनात्मानात्मविवेकबोधं कलुषीकृत्य विषयं प्रत्यन्तःकरणं प्रवर्तते तत् तव बुद्धिर्व्यतितरिष्यति व्यतिक्रमिष्यति अतिशुद्धभावमापत्स्यत इत्यर्थः तदा तस्मिन् काले गन्तासि प्राप्स्यसि निर्वेदं वैराग्यं श्रोतव्यस्य श्रुतस्य च तदा श्रोतव्यं श्रुतञ्च निष्फलं प्रतिभाति इत्यभिप्रायः ॥ ५२ ॥

आनंदगिरिकृतटीका।

पूर्वोक्त समत्व बुद्धियुक्तस्य स्वधर्मानुष्ठाने प्रवृत्तस्य किं स्यादित्याशङ्क्याह समत्वे बुद्धियुक्तः स्वधर्माख्यं कर्मानुतिष्ठन्निति शेषः बुद्धियोगस्य फलवत्त्वे फलितमाह तस्मादिति पूर्वार्द्धं व्याचष्टे बुद्धीत्यादिना ननु समत्वबुद्धिमात्रान्न पुण्यपापनिवृत्तिर्युक्ता फलार्थदर्शनवतस्तन्निवृत्तिप्रसिद्धेरिति तत्राह सत्येति उत्तरार्द्धं व्याचष्टे तस्मादिति स्वधर्मानुतिष्ठतो यथोक्तयोगार्थं किमर्थं मनो योजनीयमित्याशङ्क्याह योगोहीति तर्हि यथोक्तयोगसामर्थ्यादेव दर्शितफलसिद्धेरनास्था स्वधर्मानुष्ठाने प्राप्तेत्याशङ्क्याह स्वधर्माख्येष्वित्ति ईश्वरार्पितचेतस्तया कर्मसु वर्तमानस्यानुष्ठाननिष्ठस्य या यथोक्ता बुद्धिस्तत्तत्कौशलमिति योजना कर्मणां बन्धस्वभावत्वात् तदनुष्ठाने बन्धावद्धः स्यादित्याशङ्क्य कौशलमेव विशदयति तद्धीति समत्वबुद्धेरेतं फलत्वे स्थिते फलितमुपसंहरति तस्मादिति॥५०॥

स्वामिकृतटीका।

बुद्धियोगयुक्तस्तु श्रेष्ठ इत्याह बुद्धियुक्त इति सुकृतं स्वर्गादिप्रापकं दुष्कृतं निरयादिप्रापकं ते उभे इहैव जन्मनि परमेश्वरप्रसादेन त्यजति तस्मात् तदर्थाय कर्मयोगाय युज्यस्व घटस्व यतः कर्मसु यत् कौशलं बन्धकानामपि तेषामीश्वराराधनेन मोक्षपरत्व सम्पादक चातुर्यं स एव योगः ॥ ५० ॥

नवलभाष्य।

और समत्वबुद्धियुक्त होकर अपनेधर्मको करताहुआ पुरुष जिसफलको प्राप्त होताहै तिसको सुन (बुद्धीति) हे अर्जुन समत्वरूपकर्म योग में रहने वाली जो बुद्धि तिसकरके युक्त जो पुरुषसो जिससे इसी लोकमें अन्तःकरण शुद्धि ज्ञानप्राप्तिद्वारा सुकृत व दुष्कृत अर्थात् पुण्य औरपाप इनकोत्याग करताहै तिससे समत्वबुद्धि योगकेअर्थ यत्नकर क्योंकि कर्ममें जो कौशल निपुणता उसीको योगकहते हैं अर्थात् स्वधर्मरूपकर्मों के विषे प्रवृत्तहुआ जो पुरुष तिसकी ईश्वरार्पित चित्तसेहुई जो सिद्धि असिद्धिमें समत्वयुक्त बुद्धि सोईहुआ कौशल अर्थात् चतुराई वोहीकर्मकरनेकी चतुराई है याग है जिससे बन्धनस्वभावभी कर्म अपने स्वभावसे निवृत्तहोजाते हैं अर्थात् बन्धनसेछुड़ा देनेवालेहोजातेहैं तिससे हेअर्जुन तू समत्वबुद्धियुक्तहो ५०॥

कर्मजं बुद्धि युक्ताहि फलं त्यक्त्वा मनीषिणः।
जन्मबन्ध विनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ ५१ ॥

शङ्करभाष्यम्।

यस्मात् कर्मजमिति कर्मजं फलं त्यक्त्वेति व्यवहितेन सम्बन्धः इष्टानिष्ट देहप्राप्तिः कर्मजं कर्मभ्यो जातं बुद्धियुक्ताः समत्वबुद्धियुक्ताः सन्तोहि यस्मात् फलं त्यक्त्वा परित्यज्य मनीषिणो ज्ञानिनो भूत्वा जन्मबन्धविनिर्मुक्ताः जन्मैव बन्धो जन्मबन्धस्तेन विनिर्मुक्ताः जीवन्त एव जन्मबन्धात् विनिर्मुक्ताः सन्तः पदं परमं विष्णोर्मोक्षाख्यं गच्छन्त्यनामयं सर्वोपद्रवरहितं अथवा बुद्धियोगाद्धनञ्जयेत्यारभ्य परमार्थदर्शनलक्षणैव सर्वतः संप्लुतोदकस्थानीया [illegible] दर्शिता साक्षात्सुकृतदुष्कृतप्रहाणादिहेतुत्वश्रवणात् ॥ ५१ ॥

शङ्करभाष्यम्।

मोहकालिलासयद्वारेण लब्धात्मविवेकजप्रज्ञः कदा कर्म्मयोगजं फलं परमार्थयोगमवाप्स्यामीति चेत् तच्छृणु श्रुतिविप्रतिपन्नेति श्रुतिविप्रतिपन्ना अनेकसाध्यसाधनसम्बन्धप्रकाशनश्रुतिभिः श्रवणैर्विप्रतिपन्ना नानाप्रतिपन्ना अध्यात्मशास्त्रातिरिक्तस्तस्येपरार्थः श्रुतिविप्रतिपन्ना विक्षिप्तासती ते तव बुद्धिर्यदा यस्मिन् काले स्थास्यति स्थिरीभूता भविष्यति निश्चला विक्षेपचलन वर्जिता सती समाधौ समाधीयते चित्तमस्मिन्निति समाधिरात्मातस्मिन्नात्मनीत्येतदचला तत्रापि विकल्पवर्जितेतद्बुद्धिरन्तःकरणं तदातस्मिन् काले योगमवाप्स्यसि विवेकप्रज्ञां समाधिं प्राप्स्यसि ॥ ५३ ॥

आनंदगिरिकृतटीका।

बुद्धिशुद्धिविवेकवैराग्यसिद्धावपि पूर्वोक्तबुद्धिप्राप्तिकालो दर्शितो न भवतीति शङ्कते मोहेति प्रागुक्तविवेकादियुक्त बुद्धेरात्मनि स्थैर्य्यावस्थायां प्रकृतबुद्धिशुद्धिरित्याह तत् शब्दवतिपृष्टं कालविशेषाख्यं वस्तु तच्छब्देन गृह्यते बुद्धेः श्रुतिविप्रतिपन्नत्वं विशदयति अनेकेति नानाश्रुतिविप्रतिपन्नत्वमेव संक्षिपति विक्षिप्तेति उक्तं हेतुद्वयमनुसृत्य वैराग्यपरिपाकावस्था कालशब्दार्थः निश्चलत्वं विक्षेपराहित्यं अचलत्वं विकल्पशून्यत्वं विक्षेपो विपर्य्ययो विकल्पः संशय इति विवेकः विवेकद्वारा जाता प्रज्ञा प्रागुक्ता बुद्धिः समाधिस्तत्रैवनिष्ठा ॥ ५३ ॥

स्वामिकृतटीका।

ततश्च श्रुतेति श्रुतिभिर्नानालौकिकवैदिकार्थश्रवणैर्विप्रतिपन्ना इतः पूर्वं विक्षिप्ता सती तव बुद्धिर्यदा समाधौ स्थास्यति समाधीयते चित्तमस्मिन्निति समाधिः परमेश्वरस्तस्मिन्निश्चला विषयान्तरैरनाकृष्टा अतएवाचला अभ्यासपाटवेन तत्रैव स्थिरा च सती तदायोगं योगफलं तत्वज्ञानमवाप्स्यसि ॥ ५३ ॥

नवलभाष्य।

अब कदाचित् अर्जुनकहै कि कब मैं मोहरूपबुद्धिकी मलिनताकेनाशसे आत्मविवेकप्रज्ञाको प्राप्तहो कर्मयोगकाफल रूप जो परमार्थयोग तिसको प्राप्तहोऊंगा तो भगवान् कहते हैं कि तिसको सुन [श्रुतीति] कि हे अर्जुन जिसअवस्थामें अध्यात्मशास्त्रसे भिन्न और शास्त्रके साध्यसाधनसम्बन्धके प्रकाशक वचनोंके सुननेसे अनेकविरुद्ध कुतर्कोंको प्राप्तहुई जो तेरीबुद्धि सो निश्चलहुई अर्थात् चलनरहित स्थिरताको प्राप्तहुई आत्मामें अचलविकल्परहित स्थितहोवैगी तिसमें योगको अर्थात् विवेकबुद्धिको तू प्राप्तहोगा ॥ ५३ ॥

अर्जुनउवाच स्थितप्रज्ञस्यकाभाषा समाधिस्थस्य केशव।
स्थितधीः किंप्रभाषेत किमासीत व्रजेतकिम् ५४ ॥

शङ्करभाष्यम्।

[illegible]

आनन्दगिरिकृतटीका।

यस्मिन् कर्मणि क्रियमाणे परमार्थलक्षणा बुद्धिरुद्देश्यतया युज्यते तस्मात् कर्मणः सकाशादितरत् कर्म तथाविधोद्देश्यभूतबुद्धिसम्बन्धविधुरमतिशयेन निकृष्यते ततश्च परमार्थबुद्धिमुद्देश्यत्वेनाश्रित्य कर्मानुष्ठातव्यं परिच्छिन्नफलान्तरमुद्दिश्य तदनुष्ठानेऽनर्थप्रसंगात् किञ्च परमार्थबुद्धिमुद्देश्यतयामाश्रित्य कर्मानुतिष्ठतः करणशुद्धिद्वारा परमार्थदर्शनसिद्धौ जीवत्येव देहे सुकृतादिहित्वा मोक्षमधिगच्छति तथाच परमार्थदर्शनलक्षणयोगार्थं मनो धारयितव्यं योगशब्दितं परमार्थदर्शनमुद्देश्यतया कर्मस्वनुतिष्ठतो नैष्कर्म्यमिष्यते यदि च परमार्थदर्शनमुद्दिश्य तद्युताः सन्तः समारभेरन् कर्माणि तदा तदनुष्ठानवन्ति न बुद्धिशुद्ध्या ज्ञानिनो भूत्वा कर्मजं फलं परित्यज्य निर्मुक्तबन्धना मुक्तिभाजो भवन्तीत्येवमस्मिन् पक्षे श्लोकत्रयाक्षराणि व्याख्यातव्यानि यथोक्तबुद्धिप्राप्तिकाले प्रश्नपूर्वकं प्रकटयति योगेति श्रुतं श्रोतव्यं दृष्टं द्रष्टव्यमित्यादौ फलाभिलाषप्रतिबन्धमुक्तस्य बुद्धिरुदेष्यतीत्याशङ्क्याह यदेति विवेकपरिपाकावस्था कालशब्देनोच्यते कालुष्यस्य दोषपर्यवसायित्वं दर्शयन् विशिनष्टि येनेति तदनर्थरूपं कालुष्यं तवेत्यन्वयार्थं पुनर्वचनं बुद्धिशुद्धिफलस्यप्राप्त्वा वैराग्यप्राप्तिं दर्शयति तदेति अध्यात्मशास्त्रातिरिक्तं शास्त्रं श्रोतव्यादिशब्देन गृह्यतेऽक्तं वैराग्यमेव स्फोरयति श्रोतव्यमिति यथोक्तविवेकसिद्धौ स्वस्मिन्ननात्मविषये नैष्फल्यं प्रतिभातीत्यर्थः ॥ ५२ ॥

स्वामिकृतटीका।

कदाहं तत् पदं प्राप्स्यामीत्यपेक्षायामाह यदेति द्वाभ्यां मोहो देहादिष्वात्मबुद्धिस्तदेव कलिलं गहनं विदुरित्यभिधानकोषस्मृतेः ततश्चायमर्थः एवं परमेश्वराराधने क्रियमाणे यदा तत्प्रसादेन तव बुद्धिर्देहाभिमानलक्षणं मोहमयं गहनं दुर्गं विशेषेण तरिष्यति तदा श्रोतव्यस्य श्रुतस्य चार्थस्य निर्वेदं वैराग्यं गन्तासि प्राप्स्यसि तयोरनुपादेयत्वेन जिज्ञासां न करिष्यसीत्यर्थः ॥ ५२ ॥

नवलभाष्य।

और अब कर्मयोगके अनुष्ठानसे उत्पन्न हुई जो अन्तःकरण शुद्धि तिससे उत्पन्नहुई जो बुद्धि सो कबप्राप्तहोगी इसआकांक्षामें कहते हैं कि हे अर्जुन जिससमयमें तेरी मोहकलिल अर्थात् अविवेकरूप जो मालिन्य जिसमालिन्यकरके अन्तःकरण आत्मानात्म विवेकको मलिनकरके आप विषयमें प्रवृत्तहोरहाहै तिसमालिन्यको जब तेरी बुद्धिउल्लंघनकरके वर्तेगी अर्थात् अतिशुद्धभावको प्राप्तहोगी तिससमयमें सुनने के योग्य जो पदार्थ और सुनाहुआ जो पदार्थ तिसका जो वैराग्य तिसको प्राप्त तू होवेगा अर्थात् उससमयमें सुननेके योग्य और सुनाहुआ निष्फल होजायगा यह अभिप्रायहै ॥ ५२ ॥

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचलाबुद्धिस्तदा योगमवाप्स्यसि ॥ ५३

[illegible] प्रवृत्तो यश्च कर्मयोगेन तयोः स्थितप्रज्ञस्येतिप्रजहातीत्यारभ्याध्यायपरिसमाप्ति पर्य्यन्तं [illegible] साधनञ्चोपदिश्यते सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात् यानि यत्नसाध्यानि साधनानि लक्षणानि भवन्तितानि श्रीभगवानुवाच प्रजहातीति प्रजहाति प्रकर्षेण जहाति परित्यजति यदा यस्मिन् काले सर्वान् समस्तान् कामान् इच्छाभेदान् हेपार्थ मनोगतान् मनसि प्रविष्टान् हृदि प्रविष्टान् सर्वकामपरित्यागे तुष्टिकारणाभावाच्छरीरधारणनिमित्तशेषे च सत्युन्मत्तप्रमत्तस्येव प्रवृत्तिः प्राप्तेत्यत उच्यते आत्मनि एव प्रत्यगात्मस्वरूप एवात्मना स्वेनैव बाह्यलाभनिरपेक्षस्तुष्टः परमार्थदर्शनामृतरसलाभे नान्यस्मादलं प्रत्ययवान् स्थितप्रज्ञः स्थिता प्रतिष्ठितात्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते त्यक्तपुत्रवित्तलोकैषणः संन्यासी आत्मारामः आत्मक्रीडः स्थितप्रज्ञ इत्यर्थः ॥ ५५ ॥

आनंदगिरिकृतटीका ।

प्रश्नाक्षराणि व्याख्याय वाक्यार्थमाह स्थितप्रज्ञस्येति प्रतिवचनमवतारयितुं पातनिकां करोति यो हीति हि शब्देन कर्मसंन्यासकारणीभूतविरागता सम्मतिः सूच्यते आदितो ब्रह्मचर्य्यावस्थायामिति यावत् ज्ञानमेव योगो ब्रह्मात्मभावप्रापकत्वात् तस्मिन्निष्ठा परिसमाप्तिस्तस्यामित्यर्थः कर्मैव योगस्तेन कर्माण्यसंन्यस्य तन्निष्ठायामेव प्रवृत्त इति शेषः ननु तत्कथमेकेन वाक्येनार्थद्वयमुपदिश्यते द्वैधार्थं वाक्यभेदान्नचलक्षणमेव साधनंकृतार्थलक्षणस्य स्वरूपत्वेन फलत्वे साधनत्वानुपपत्तेरिति तत्राह सर्वत्रैवेति यद्यपि प्रकृतार्थस्य ज्ञानिनो ज्ञानलक्षणं तद्रूपेण फलत्वन्नसाधनत्वमधिगच्छति तथापि जिज्ञासोस्तदेव प्रयत्नसाध्यतया साधनं सम्पद्यते लक्षणञ्चात्र ज्ञानसामर्थ्यलब्धमनूद्यते न विधीयते विदुषोः विधिनिषेधागोचरत्वात्तेनजिज्ञासोः साधनानुष्ठानाय लक्षणानुवादादे कस्मिन्नेवसाधनानुष्ठाने तात्पर्य्यमित्यर्थः उक्तेर्थे भगवद्वाक्यमुत्थापयति यानीति लक्षणानि च ज्ञानसामर्थ्यलभ्यान्यप्रयत्नसाध्यानीति शेषः स्थितप्रज्ञस्य का भाषेति प्रथमप्रश्नस्योत्तरमाह प्रजहातीति कामत्यागस्य प्रकर्षो वासनाराहित्यं कामानामात्मनिष्ठत्वं कैश्चिदिष्यते तदयुक्तं तेषां मनो निष्ठत्व श्रुतेरित्याशयवानाह मनोगतानिति आत्मन्येवात्मनेत्याद्युत्तरभागनिरस्यञ्चोद्यमनुवदति सर्वकामेति तर्हि प्रवर्तकाभावाद्विदुषः सर्वप्रवृत्त्युपरतिरिति नेत्याह शरीरेति उन्मादवानुन्मत्तो विवेकविरहितबुद्धिभ्रमभागी प्रकर्षेण मदमनुभवन् विद्यमानमपि विवेकं निरस्यन् भ्रान्तवद्व्यवहरन् प्रमत्त इति विभागः उत्तरार्द्धमवतार्य व्याकरोति उच्यत इति आत्मन्येवेत्येवकारस्यात्मनेत्यत्रापि सम्बन्धं द्योतयति स्वेनैवेति बाह्यलाभनिरपेक्षत्वेन तुष्टिमेव स्पष्टयति परमार्थेति स्थितप्रज्ञपदं विभजते स्थितेति [illegible] सर्वकामोपरमावस्था तदेति निर्दिश्यते तदेव [illegible] स्पष्टयति त्यक्तेति आत्मानं जिज्ञासमानो वैराग्यद्वारा सर्वकर्मत्यागात्मकं संन्यासमादाय [illegible] तदज्ञानं प्राप्य [illegible] विषयवैमुख्येन [illegible] तत्रैव प्रतिलभमानः स्थितप्रज्ञ [illegible] ॥ ५५ ॥

स्वामिकृतटीका ।

[illegible]

आनन्दगिरिकृतटीका।

लक्षणभेदानुवादद्वारा विविदिषोरेव कर्तव्यान्तरमुपदिशति किञ्चेति ज्वरशिरोरोगा द्युकृतानि दुःखान्याध्यात्मिकानि आदिशब्देनाधिभौतिकानि व्याघ्रसर्पादिप्रयुक्तान्याधि दैविकानि चातियातवर्षादिनिमित्तानि दुःखानि गृह्यन्ते तेषूपलब्धेष्वपि नोद्विग्नमनोयस्य स तथेति सम्बन्धः नोद्विग्नमित्येतद्व्याचष्टे न प्रक्षुभितमिति दुःखानामुक्तानां प्राप्तौ परिहा राक्षमस्य तदनुभवपरिभावितं दुःखमुद्वेगस्तेन सहितं मनो यस्य न भवति स तथेत्याह दुःखप्राप्ताविति मनो यस्य नोद्विग्नमिति पूर्वेण सम्बन्धः सुखान्यपि दुःखवत्त्रिविधानी तिमत्वा तथेत्युक्तं तेषु प्राप्तेषु सत्सु तेभ्यो विगता स्पृहातृष्णा यस्य स विगतस्पृहइति योजना अज्ञस्य हि प्राप्तानि सुखान्यनुविवर्द्धते तृष्णाविदुषस्तु नैवमित्यत्रवैम्यदृष्टान्तमा ह नाग्निरिवेति यथा हि दाह्यस्येन्धनादेरभ्याधाने वह्निर्विवर्द्धते तथाज्ञस्य सुखान्युपग तान्यनुविवर्द्धमानापि तृष्णा विदुषो न तान्यनुविवर्द्धते नहि वह्निरदाह्यमुपगतमपि दग्धुंविवृद्धिमधिगच्छति तेन जिज्ञासुना सुखदुःखयोस्तृष्णोद्वेगौ न कर्तव्यावित्यर्थः रागा दयस्तुतेन कर्तव्या न भवन्तीत्याह वीतेति अनुभूताभिनिवेशे विषयेषु रञ्जनात्मकस्तृ ष्णाभेदो रागः परेणापकृतस्य चात्र नेत्रादिविकारकारणं भयं क्रोधस्तु परवशीकृत्यात्मानं स्वपरापकारवृत्तिहेतुर्बुद्धिवृत्तिविशेषः ननु ते इति मुनिरात्मविदित्यंगीकृत्याह संन्यासीति सुखदुःखादिविषय तृष्णादिरागादेश्चाभावावस्था तदेत्युच्यते ॥ ५६ ॥

स्वामिकृतटीका।

किञ्च दुःखेष्विति दुःखेषु प्राप्तेष्वपि अनुद्विग्नं सक्षुभितं मनो यस्य सः सुखेषुवि गतास्पृहा यस्य सः तत्र हेतुर्वीता अपगता रागभय क्रोधा यस्मात् तत्र रागः प्रीतिः समुनिःस्थितधीरुच्यते ॥ ५६ ॥

नवलभाष्य।

और हे अर्जुन जो आध्यात्मिक मनः सन्तापादि और आधि भौतिक ज्वरादि और आधिदैविक धन पुत्रादि नाश इनतीनोंप्रकारके दुःखोंके प्राप्त होतेभी नहीं उद्वेगयुक्त नहीं क्षोभकोप्राप्त अर्थात् नहीं आत्मध्यानसे चला-यमान हुआहै मन जिसका और इंद्रियभोग रूपसुखोंकी प्राप्तिमें नहीं है स्पृहातृष्णा जिसको अर्थात् जैसे प्रज्वलितअग्निमें घृतईंधनादि डालाजावै तो वहअग्नि जैसे वृद्धिको प्राप्तहोय तैसे विषयभोगोंकी प्राप्तिमें अज्ञपुरुषों के सदृश जिसकी तृष्णा वृद्धिको प्राप्त न होय और विगत हुएहैं राग और भय और क्रोध जिससे ऐसाजो मननशीलज्ञानी सो स्थितधीअर्थात्स्थिर बुद्धि कहाजाता है ॥ ५६ ॥

यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्।
नाभिनन्दति नद्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥

शङ्करभाष्यम्।

किञ्च यः मुनिः सर्वत्र देहजीवितादिष्वपि अनभिस्नेहः [illegible]

र्पणप्रजहाति त्यागे हेतुमाह आत्मनीति चात्मन्येव स्वस्मिन्येव परमानन्दरूपे [illegible] नात्स्वयमेव तुष्ट इत्यात्मारामः सन् यदा क्षुद्रविषयाभिलाषांस्त्यजति तदा तेन [illegible] मुनिः स्थितप्रज्ञ उच्यते ॥ ५५ ॥

नवलभाष्य ।

जो [स्थितप्रज्ञस्य] इत्यादि श्लोककरके अर्जुन स्थितप्रज्ञका [illegible] जिसकी बुद्धि स्थिरहुई है तिसकालक्षण पूछताहै तहां स्थितप्रज्ञ दोप्रकार काहै एक तो ब्रह्मचर्य्यावस्थाहीसे तीव्रवैराग्यहोने से सबकर्मोंको त्यागक रके ज्ञानयोगनिष्ठामें प्रवृत्तहुआ स्थितप्रज्ञकहाताहै और एककर्मयोगकरके शुद्धान्तःकरणहुआ स्थितप्रज्ञहोनेवालाहै तिसमें [प्रजहाति] इसश्लोकसे लेकरके अध्यायकी समाप्तिपर्य्यन्त स्थितप्रज्ञका लक्षण औ साधन दोनों कहेजाते हैं क्योंकि सबजगहही आत्मज्ञानशास्त्रमें जे कृतार्थ पुरुषके [illegible] र्थात् सिद्धावस्थाको प्राप्तहुएपुरुषके लक्षणहैं तेई मुमुक्षुकेलिये साधनरूप करके उपदेश कियेजाते हैं क्योंकि जे यत्नसाध्यहोयँ वे साधनकहाते हैं और जे ज्ञानीके स्वरूपहीमें स्थितहोयँ वे लक्षणकहाते हैं तिनको भगवान् [illegible] हैं [प्रजहातीति] हे अर्जुन जिससमयमें योगी हृदयमें प्रविष्टहुए जे [illegible] काम अर्थात् नानाप्रकारकी इच्छा तिन्होंको परित्यागकरताहै [illegible] जब सबकामोंका त्यागहोगया तो कोई [illegible] तो रहानहीं [illegible] [illegible] और शरीरधारणमें निमित्त प्रारब्धकर्म अभी [illegible] [illegible]

र्वान्तिके योजयन् ज्ञाननिष्ठापदं तत्र प्रवर्तयति एवमिति इन्द्रियाणां विषयेभ्यो वैमु-ख्य करणं प्रज्ञास्थैर्यहेतुरित्युक्तमुपसंहरति तस्येति ॥ ५८ ॥

स्वामिकृतटीका।

किञ्च यदेति यदा चायं योगी इन्द्रियार्थेभ्यः शब्दादिभ्यः सकाशादिन्द्रियाणि संहरते प्रत्याहरति अनायासेन संहारे दृष्टान्तमाह कूर्म इति अंगानि करचरणादीनि कूर्मो यथा स्वभावे नैवाकर्षति तद्वत् ॥ ५८ ॥

नवलभाष्य।

और हेअर्जुन ज्ञाननिष्ठामें प्रवृत्तजो संन्यासी सो जैसे कछुआ भयके कारणसे अपने अंगोंको समेट लेताहै ऐसे विषयों से इन्द्रियोंको उपसंहार करलेवे अर्थात् खैंचलेय तो तिसकीबुद्धि स्थिरकहीजाती है ॥ ५८ ॥

विषया विनिवर्त्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परंदृष्ट्वा निवर्त्तते ॥ ५९ ॥

शङ्करभाष्यम्।

तत्र विषयमाननाहरत आतुरस्यापि इन्द्रियाणि निवर्त्तन्ते कूर्मांगानीव संह्रियते नतु तद्विषयो रागः स कथं संह्रित इत्युच्यते विषया इति यद्यपि विषयोपलक्षितानि विषयशब्दवाच्यानीन्द्रियाण्यथवा विषया एव निराहारस्य अनाह्रियमाणविषयस्य देहिनः कष्टेन तपसि स्थितस्य मूर्खस्यापि निवर्त्तन्ते देहिनो देहवतः रसवर्जं रसोरागो विषयेषु यः तंवर्जयित्वा रसशब्दो रागे प्रसिद्धः स्वच्छन्दतः स्वरसेन प्रवृत्तो रसिको रसज्ञ इत्यादि दर्शनात् सोऽपि रसो रञ्जनरूपः सूक्ष्मोऽस्य यतः परं परमार्थतत्त्वं ब्रह्म दृष्ट्वोपलभ्याहमेव तदिति वर्त्तमानस्य निवर्त्तते निर्बीजं विषयविज्ञानं सम्पद्यते इत्यर्थः नासतिसम्यग्दर्शने रसस्य उच्छेदस्तस्मात् सम्यग्दर्शनात्मिकायाः स्थैर्यं कर्त्तव्यमित्यभिप्रायः ॥ ५९ ॥

आनंदगिरिकृतटीका।

इन्द्रियाणां विषयेभ्यो वैमुख्येऽपि तद्विषयरागानुवृत्तौ कथं प्रज्ञालाभः स्यादिति शङ्कते तत्रेति व्यवहारभूमिः सप्तम्यर्थः विषयमाननाहरतः [illegible] रागस्य [illegible] प्रज्ञालाभः सम्भवति [illegible] कथ [illegible] उच्यते इति [illegible]

भाशुभं तत्तच्छुभमशुभं वा लब्ध्वा नाभिनन्दति नद्वेष्टि शुभं प्राप्य न तुष्यति न हृष्यत्यशुभं प्राप्य नद्वेष्टि इत्यर्थः तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति ॥ ५७ ॥

आनंदगिरिकृतटीका ।

लक्षभेदानुवादद्वारा विविदिषोरेव कर्तव्यान्तरमुपदिशति किञ्चेति विवेकवतो विदुषोविवेकजन्या प्रज्ञा कथं प्रतिष्ठां प्रतिपद्यतामित्याशङ्क्याह यः सर्वत्रेति ननु देहजीवनादौ स्पृहा शुभाशुभप्राप्तौ हर्षविषादौ विदुषो विविदिषोश्चावर्जनीयो इति प्रज्ञा स्थैर्य सिद्धिस्तत्राह यो मुनिरिति तत्तदिति शोभनवत्त्वेनाशोभनवत्त्वेन वा प्रसिद्धत्वं प्रति द्योतयतेतदेव विभजते शुभमिति विषयेष्वभिषंगाभावः शुभादिप्राप्तौ हर्षाद्यभावश्च प्रज्ञा स्थैर्यकारणमित्याह तस्येति ॥ ५७ ॥

स्वामिकृतटीका ।

कथं भाषेतेत्यस्योत्तरमाह य इति यः सर्वत्र पुत्रमित्रादिष्वपि अनभिस्नेहः स्नेह शून्यः अतएवाधितानुवृत्त्या तत्तच्छुभमनुकूलं प्राप्य नाभिनन्दति न प्रशंसति अशुभं प्रति कूलं प्राप्य नद्वेष्टि न निन्दति किन्तु केवलमुदासीन एव भाषते तस्य प्रज्ञा प्रतिष्ठितेत्यर्थः ॥ ५७ ॥

नवलभाष्य ।

और जो पुरुष सबजगह अर्थात् देहके जीवनादिकोंमें भी स्नेह रहित और तौन तौन शुभ और अशुभको प्राप्तहोके न हर्षकरता है और न द्वेष करताहै अर्थात् अनुकूल सुखदाईवस्तुको प्राप्तहोके नतौ हर्षको प्राप्तहो और प्रतिकूल दुःखदवस्तुको प्राप्तहोके जो अप्रसन्न नहोय तिस हर्षविषाद रहित पुरुषकी विवेकसे उत्पन्नहुई जो बुद्धि सो स्वरूपमें प्रतिष्ठितहोती अर्थात् स्थिरहोतीहै ॥ ५७ ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥

शङ्करभाष्यम् ।

किञ्च यदा संहरत इति यदा संहरते सम्यक् उपसंहरते चायं ज्ञाननिष्ठायां प्रवृत्तो यतिः कूर्मोऽङ्गानीव सर्वशः यथा कूर्मो भयात् स्वान्यङ्गान्युपसंहरति सर्वतः एवं ज्ञाननिष्ठ इन्द्रियाणीन्द्रियार्थेभ्यः सर्वविषयेभ्य उपसंहरते तस्य प्रज्ञा प्रतिष्ठितेत्युक्तार्थं वाक्यम् ॥ ५८ ॥

आनन्दगिरिकृतटीका ।

स्थितप्रज्ञस्यैव कर्तव्यान्तरं सूचयति किञ्चेति इन्द्रियाणां विषयेभ्यो [illegible]
[illegible]

भिमुखं हि पुरुषं विक्षोभयन्त्याकुलीकुर्वन्त्याकुलीकृत्य च हरन्ति प्रसभं प्रसह्यप्रकाशमेव पश्यतो विवेक विज्ञानयुक्तं मनो यतस्तस्मात् ॥ ६० ॥

आनंदगिरिकृतटीका।

श्लोकान्तरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञास्थैर्यसम्भवे किमर्थमिन्द्रियाणां स्ववशत्वापादनमित्याशङ्क्याह ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यःस्वयमेवेन्द्रियाणि व्यावर्तन्ते किं तत्र प्रज्ञास्थैर्यचिकीर्षता कर्तव्यमिति तत्राह यततोहीतिविषयेषु भूयो दोषदर्शनमेव प्रयत्नः हि शब्दस्य यस्मादर्थस्य समाप्तौ सम्बन्धं दर्शयति अपिशब्दस्य प्रयत्नं कुर्वतोऽपीति सम्बन्धं गृहीत्वा सम्बन्धान्तरमाह पुरुषस्येति प्रमथनशीलत्वंप्रकटयति विषयेति विक्षोभस्याकुलीकरणस्य फलमाह आकुलीकृत्येति प्रकाशमेवेत्युक्तं विशदयति पश्यत इति विपश्चितो विदुषोऽपि प्रकाशमेव प्रकाशशब्दितविवेकाख्यविज्ञानयुक्तमेव मनो हरन्तीन्द्रियाणीति सम्बन्धः हि शब्दार्थं मनूद्यतस्मादिन्द्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेणसम्बन्धमभिसन्धायाह यतस्तस्मादिति ॥६०॥

स्वामिकृतटीका।

इन्द्रियसंयमं विनास्थितप्रज्ञता न सम्भवति अतः साधकावस्थायां तत्र महान प्रयत्नः कर्तव्य इत्याह यततोऽपीति द्वाभ्यां यततो मोक्षार्थं प्रयतमानस्य विपश्चितो विवेकिनोऽपि मन इन्द्रियाणि प्रसभं बलाद्धरन्ति यतः प्रमाथीनि प्रमथनशीलानि क्षोभकाणीत्यर्थः ॥ ६० ॥

नवलभाष्य।

अब यहप्रतिपादन करतेहैं कि सम्यग्दर्शनहै अर्थात् परमार्थज्ञान है स्वरूप जिसका ऐसी बुद्धिकी स्थिरताकरनेकी इच्छाकरताहुआ जो पुरुष तिसको प्रथम इंद्रिय अपने वशमें स्थापनकरनाचाहिये जिससे इंद्रिनको विना अपनेवशमें स्थापनकिये दोषहोताहै इसआशयसे कहते हैं [यतत- इति] जिससे हे अर्जुन यत्नकरताहुआ और विवेकवती बुद्धिकरकेयुक्तभी जो पुरुष तिसके भी मनको मथनकरनेका स्वभाव जिन्होंका ऐसी जे इं- द्रियां ते विषयोंके सेवनकरनेको उद्यत जो पुरुष तिसको व्याकुलकरके बलात्कारकरके उसपुरुषके देखते देखते विवेकज्ञान युक्तभी उसके मनको हरतीहैं अर्थात् विषयोंमें प्राप्तकरतीही हैं ॥ ६० ॥

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

शङ्करभाष्यम्।

तानीति तानि सर्वाणि संयम्य संयमनं वशीकरणं कृत्वा युक्तः समाहितः सन्नासीत मत्परो ऽहं वासुदेवः सर्वप्रत्यगात्मा परो यस्य स मत्परः नान्योऽहं तस्मादित्यासीन इत्यर्थः एवमासीनस्य यतेः वशे हि यस्येन्द्रियाणि वर्तन्ते अभ्यासबलात् तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥

आनन्दगिरिकृतटीका।

इन्द्रियाणां स्ववशत्वसम्पादनानन्तरं कर्तव्यमाह तानीति [illegible] हि

यस्ये विवेकद्वारा परिहृते स्थूलो रागो व्यावर्तते ततश्च सम्यग्ज्ञानोत्पत्त्या सूक्ष्मस्यापि रागस्य सर्वात्मना निवृत्त्युपपत्तेनेतरेतराश्रयतेत्यर्थः प्रज्ञास्थैर्यस्य सफलत्वं स्थिते फलित माह तस्मादिति ॥ ५९ ॥

स्वामिकृतटीका।

ननु नेन्द्रियाणां विषये प्रवृत्तिः स्थितप्रज्ञस्य लक्षणं भवितुमिति जडानामातुराणा मुपवासपराणाञ्च विषयेष्वप्रवृत्तेरविशेषात्तत्राह विषया इति इन्द्रियैर्विषयाणामाहरणं ग्रहणमाहारः निराहारस्य इन्द्रियैर्विषयग्रहणमकुर्वतो देहिनो देहाभिमानिनो ज्ञस्य विषयाः प्रायशो विनिवर्तन्ते तदनुभवो निवर्तत इत्यर्थः किन्तु रसो रागोऽभिलापस्तद्वर्जम् अभिलापश्च न निवर्तत इत्यर्थः रसोऽपि रागोऽपि परं परमात्मानं दृष्ट्वास्य स्थितप्रज्ञस्य स्वतो निवर्तते नश्यतीत्यर्थः यद्वा निराहारस्य उपवास परस्य विषयाः प्रायशो निवर्तन्ते क्षुधासन्तप्तस्य शब्दस्पर्शाद्यपेक्षाभावात् किन्तु रसवर्जं रसापेक्षा तु न निवर्तत इत्यर्थः शेषं समानम् ॥ ५९ ॥

नवलभाष्य।

तहां यह आशंकाहोतीहै कि जैसे विषयोंका सेवन नहींकरताहुआ जो रोगी तिसकी भी इन्द्रियां विषयोंसे खिंचीहुईनिवृत्तहोती हैं जैसे कछुआ के अंग समिटजातेहैं और विषयोंकाराग नहीं निवृत्तहोता है तो वहभी स्थितप्रज्ञ होजायगा इसआशंकाको निवृत्तकरतेहुए कहते हैं कि [विषया इति] हेअर्जुन इन्द्रियोंसे विषयोंका आहरणप्रापण नहीं करताहुआ जो पुरुष तिसके दर्शनस्पर्शनादिक विषय तो निवृत्तहोजाते हैं परन्तु उनविषयोंमें रस जो राग अर्थात् अभिलाष तिसकोछोड़के जैसे कोई बड़ेकष्टसे इन्द्रियोंको वशकरके तपमें प्रवृत्तहुआ तो उससमयके विषयोंके भोग की इच्छा तो शास्त्रमें श्रद्धाके आधिक्यसे निवृत्तहोजातीहै परन्तु उसतपकरके होनेवाला जो राज्यादिभोग तिसमें वासना बनीरहती है सो भी वासना अपनास्वरूप भूत जो परमात्मा परब्रह्म तिसको देखके अर्थात् सो मैं हींहूं ऐसा साक्षात्कारकरके निवृत्तहोजातीहै अर्थात् विषयका विज्ञान निर्बीज होजाताहै तिससे विनासम्यग्दर्शनके रसशब्द वाच्य सूक्ष्मवासनाकी निवृत्ति नहीं है तिससे सम्यग्दर्शन अर्थात् परमात्मदर्शन के बुद्धिकी स्थिरता अवश्य कर्त्तव्य है जिसको आत्मदर्शन बुद्धिकी स्थिरतासे सूक्ष्मवासनाभी निवृत्तहोगई है वोही स्थितप्रज्ञहै यहअभिप्रायहै ५९ ॥

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ ६० ॥

शङ्करभाष्यम्।

सम्यग्दर्शनलक्षणं प्रज्ञास्थैर्यं चिकीर्षता आदाविन्द्रियाणि स्ववशे स्थापयितव्यानि यस्मात् तदनवस्थापने दोषमाह यततो हीति यततः प्रयत्नं कुर्वतोऽपि हि यस्मात् अपि कौन्तेय पुरुषस्य [illegible] मेधाविनोऽपीति व्यवहितेन सम्बन्धः इन्द्रियाणि प्रमाथीनि प्रमथनशीलानि [illegible]

भिमुखे हि पुरुषं विक्षोभयन्त्याकुलीकुर्वन्त्याकुलीकृत्य च हरन्ति प्रसभं प्रसह्यप्रकाशमेव पश्यतो विवेक विज्ञानयुक्तं मनो यतस्तस्मात् ॥ ६० ॥

आनंदगिरिकृतटीका।

श्लोकान्तरमवतारयति सम्यग्दर्शनेति मनसः स्ववशत्वादेव प्रज्ञस्थैर्यसम्भवे किमर्थमिन्द्रियाणां स्ववशत्वापादनमित्याशङ्क्याह ननु विवेकवतो विषयदोषदर्शिनो विषयेभ्यःस्वयमेवेन्द्रियाणि व्यावर्तन्ते किं तत्र प्रज्ञास्थैर्यचिकीर्षता कर्तव्यमिति तत्राह यततोहीतिविषयेषु भूयो दोषदर्शनमेव प्रयत्नः हि शब्दस्य यस्मादर्थस्य समाप्तौ सम्बन्धं दर्शयति अपिशब्दस्य प्रयत्नं कुर्वतोऽपीति सम्बन्धं गृहीत्वा सम्बन्धान्तरमाह पुरुषस्येति प्रमथनशीलत्वंप्रकटयति विषयेति विक्षोभस्याकुलीकरणस्य फलमाह आकुलीकृत्येति प्रकाशमेवेत्युक्तं विशदयति पश्यत इति विपश्चितो विदुषोऽपि प्रकाशमेव प्रकाशशब्दितविवेकाख्यविज्ञानंयुक्तमेव मनो हरन्तीन्द्रियाणीति सम्बन्धः हि शब्दार्थं मनुद्यतस्मादिन्द्रियाणि स्ववशे स्थापयितव्यानीति पूर्वेणसम्बन्धमभिसन्धायाह यतस्तस्मादिति ॥६०॥

स्वामिकृतटीका।

इन्द्रियसंयमं विनास्थितप्रज्ञता न सम्भवति अतः साधकावस्थायां तत्र महान प्रयत्नः कर्तव्य इत्याह यततोऽपीति द्वाभ्यां यततो मोक्षार्थं प्रयतमानस्य विपश्चितो विवेकिनोऽपि मन इन्द्रियाणि प्रसभं बलाद्धरन्ति यतः प्रमाथीनि प्रमथनशीलानि क्षोभकाणीत्यर्थः ॥ ६० ॥

नवलभाष्य।

अब यहप्रतिपादन करतेहैं कि सम्यग्दर्शनहै अर्थात् परमार्थज्ञान है स्वरूप जिसका ऐसी बुद्धिकी स्थिरताकरनेकी इच्छाकरताहुआ जो पुरुष तिसको प्रथम इंद्रिय अपने वशमें स्थाए [illegible] जिससे इंद्रिनको विना अपनेवशमें स्थापनकिये दोष [illegible] ने हैं [यतत- इति] जिससे हे अर्जुन यत्न [illegible] करकेयुक्तभी जो पुरुष तिसके भ[illegible]नको [illegible] ा ऐसी जे इं- द्रियां ते विषयोंके [illegible] करनेको [illegible] करके बलात्कारकरके [illegible] को हरतीहैं अर्थात् [illegible]

[illegible] ॥ ६१ ॥

[illegible]

स्यादितितदा ह्यवशे होति समाहितस्य विक्षेपाविकलस्य कथमासनमित्यपेक्षायामाह मत्पर इति परापरभेदशङ्कामपाकृत्यासनमेव स्फोरयति नान्योऽहमिति उत्तरार्द्धं व्याक रोति एवमिति हि शब्दार्थं स्फुटयति अभ्यासेति परस्मादात्मनो नाहन्योऽस्मीति प्रागु क्तानुसन्धानस्यादरेण नैरन्तर्यदीर्घकालानुष्ठानसामर्थ्यादित्यर्थः अथवा विषयेषु दोषदर्श नाभ्याससामर्थ्यादिन्द्रियाणि संयतानीत्यर्थः ॥ ६१ ॥

स्वामिकृतटीका ।

यस्मादेवं तस्मात् तानीति युक्तो योगी तानीन्द्रियाणि संयम्य मत्परः संन्यासीत यस्य वशे वशवर्तिनीन्द्रियाणि एतेन च कथमासीतेति प्रश्नस्य वशीकृतेन्द्रियः संन्यासीते त्युत्तरं भवति ॥ ६१ ॥

नवलभाष्य ।

तिससे तिनसब इंद्रियोंको वशाकरके युक्त अर्थात् एकाग्रचित्त संन्यासी मत्परः मैंहीहूं आश्रयणीय जिसको अर्थात् वासुदेवही सर्व प्रत्यगात्मस्व-रूपहै अर्थात् सबजीवरूपहै इससे मैं भी वासुदेव स्वरूपही हौं इसप्रकार करके जो संन्यासी अभ्यासवशसे स्थितरहताहै तिसकी प्रज्ञाबुद्धि प्रतिष्ठित अर्थात् स्थिर कहाती है ॥ ६१ ॥

ध्यायतो विषयान् पुंसः संगस्तेषूपजायते ।
संगात् संजायतेकामःकामात् क्रोधोऽभि जायते॥६२॥

शङ्करभाष्यम् ।

अथेदानीं परा भविष्यत सर्वानर्थमूलमिदमुच्यते ध्यायत इति ध्यायतश्चिन्तयतो विषयान् शब्दादीन्विषयविशेषान् आलोचयतः पुंसः पुरुषस्य संग आसक्तिः प्रीतिः तेषु विषयेषूपजायते उत्पद्यते संगात् प्रीतेः संजायते समुत्पद्यते कामः तृष्णा तस्मात् कामात् कुतश्चित् प्रतिहता त् क्रोधोऽभिजायते ॥ ६२ ॥

ति नहींहोतीहै और स्मृतिभ्रंशसे फिर बुद्धिकानाशहोताहै यहकरनाचाहि ये यह नहीं करनाचाहिये इसप्रकारके विवेकज्ञानकी अन्तःकरणकीयोग्यताका नहींहोना जो उसीको बुद्धिनाश कहते हैं और फिर इसप्रकारके बुद्धिनाशसे तो पुरुष अपने मनुष्यपनासेही नाशको प्राप्तहोता है क्योंकि तभीतक पुरुषहै जबतक जिसका अन्तःकरण करनेके योग्य और नहींकरनेयोग्य पदार्थको जाननेको समर्थहै और कार्य्याकार्य्य विवेककी योग्यता नहींहोनेमें तो पाषाणतुल्य पुरुष नष्टहोजाताहै इससे यहां बुद्धि रूपअन्तःकरणके नाशसे पुरुष नाशको प्राप्तहोताहै इसका यहतात्पर्य्यहै कि पुरुषार्थ योग्य नहीं रहताहै ॥ ६३ ॥

रागद्वेषविमुक्तैस्तु विषयानिन्द्रियैश्चरन् ॥
आत्मवश्यैर्विधेयात्म प्रसादमधिगच्छति ॥ ६४ ॥

शङ्करभाष्यम् ।

सर्वानर्थस्य मूलमुक्तं विषयाभिध्यानमथेदानीं मोक्षकारणमिदमुच्यते रागद्वेषेति रागद्वेषवि मुक्तैः रागश्चद्वेषश्च रागद्वेषौ तत्पुरःसराहीन्द्रियाणां प्रवृत्तिः स्वाभाविकी तत्र यो मुमुक्षुर्भवति स ताभ्यां विमुक्तैः श्रोत्रादिभिरिन्द्रियैर्विषया न वर्जनीयांश्चरन्नुपलभमानः आत्मवश्यैरात्मनो वश्यानि वशीभूतानि तैरात्मवश्यैर्विधेयात्मेच्छातो विधेय आत्मान्तःकरणं यस्य सोऽयं प्रसादमधिगच्छति प्रसादः प्रसन्नता स्वास्थ्यम् ॥ ६४ ॥

आनंदगिरिकृतटीका ।

विषयाणां स्मरणमपि चेदनर्थकारणं सुतरां तर्हि भोगस्तेन जीवनार्थं भुञ्जानोविषयाननर्थं कथं न प्रतिपद्यत इत्याशङ्क्य वृत्तानुवादपूर्वकमुत्तरश्लोकतात्पर्य्यमाह सर्वानर्थस्येति अनर्थमूलकथनानन्तर्य्यमथशब्दार्थः परिहर्तव्ये निर्णीते सति तत्परिहारोपायजिज्ञासां दर्शयति इदानीमिति रागद्वेषपूर्विका प्रवृत्तिरित्यत्रानुभवदर्शनार्थो हिशब्दः शास्त्रीयप्रवृत्ति व्यावृत्त्यर्थं स्वाभाविकीत्युक्तं तत्रेत्यधिकृतानधिकृत्य प्रयोगो वर्जनीयानन्नपानादीन् देहस्थितिहेतूनिति यावत् इन्द्रियाणां विषयेषु प्रवृत्तिप्रत्यैनियमानुपपत्त्या वर्जनीयेष्वपि मा स्यादित्याशङ्क्याह आत्मेति अन्तःकरणाधीनत्वेपीन्द्रियाणां तदनियमात् तेषामपि नियमानुपपत्तिरित्याशङ्क्याह विधेयात्मेति ॥ ६४ ॥

स्वामिकृतटीका ।

नन्विन्द्रियाणां विषयप्रवणस्वभावानां निरोद्धुमशक्यत्वादयं दोषो दुष्परिहर इति चिन्तवतः कथं स्यादित्याशङ्क्याह रागद्वेष इति द्वाभ्यां रागद्वेषरहितैरतएवात्मवश्यैर्विषयांश्चरन्नुपभुञ्जानोऽपि प्रसादं शान्तिं प्राप्नोति रागद्वेषराहित्यमेवाह आत्मवश्यैरिति आत्मनो मनसो वश्यैरिन्द्रियैर्विधेयो वशवर्ती आत्मा मनो यस्येति अनेनैव कथं व्रजेदित्यस्य प्रश्नस्योत्तरमुक्तं भवति स्वाधीनैरिन्द्रियैर्विषयान् गच्छतीत्युक्तं भवति ॥ ६४ ॥

नवलभाष्य ।

सब अनर्थोंकामूल कारण जो विषयोंकाध्यान अर्थात् चिन्तन सो तौ कहा अब इसकेअनन्तर जो मोक्षकारण सोहै सो कहाजाताहै [रागद्वेषेति]

अर्जुन रागद्वेषपूर्वकही सबकिसीकी इंद्रियोंकी प्रवृत्ति स्वाभाविकी नाम स्वभावहीसे हुआकरती हैं अर्थात् रागनाम प्रीतिकाहै और द्वेष अप्रीतिसे कहते हैं तहां इष्टमित्रादिकों में तो संसारी मनुष्यकी प्रीतिपूर्वक मधुर भाषणादिव्यवहारमें इन्द्रियोंकी प्रवृति होती है और शत्रुओं में द्वेषपूर्वक कटुक भाषणादिव्यवहारमें इन्द्रियोंकी प्रवृत्तिहोती है यह लोक में प्रसिद्ध है तहां मुमुक्षुपुरुष को यह उपदेश कियाजाता है कि जिसपुरुष को मोक्ष की इच्छा होवे सो पुरुष राग और द्वेष इनकरके रहित जे इन्द्रियां और फिर अपने वशीभूत होयऐसी इन्द्रियों करके विषयों को सेवन करताहुआ अर्थात् प्रीति और द्वेष रहित हो सब पुरुषों में दर्शन स्पर्शनादि इन्द्रियों का व्यवहार करताहुआ और अपने वश में मनको भी जिसने कियाहोय ऐसा जो पुरुष सो चित्तकी प्रसन्नता को प्राप्त होताहै ॥ ६४ ॥

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्य्यवतिष्ठते ॥ ६५ ॥

शङ्करभाष्यम्।

प्रसादे सति किं स्यादित्युच्यते प्रसाद इति प्रसादे सर्व दुःखानाम् आध्यात्मिकादीनां हानिर्विनाशोऽस्य यतेरुपजायते किञ्च प्रसन्न चेतसः स्वच्छान्तःकरणस्य हि यस्मादाशु शीघ्रं बुद्धिः पर्य्यवतिष्ठते आकाशमिव परिसमन्तात् अवतिष्ठते आत्मस्वरूपेणैव निश्चली भवतीत्यर्थः एवं प्रसन्नचेतसोऽवस्थितबुद्धेः कृतकृत्यता यतस्तस्माद्रागद्वेषविमुक्तैरिन्द्रियैः शास्त्राविरुद्धेष्ववर्जनीयेषु युक्तः समाचरेदिति वाक्यार्थः ॥ ६५ ॥

आनन्दगिरिकृतटीका।

तथापि नानाविधदुःखाभिभूतत्वान्न स्वास्थ्यमास्थातुं शक्यमित्याशयेनपृच्छतिप्रसाद इति श्लोकार्द्धेनोत्तरमाह उपयत इति सर्वदुःखहान्या बुद्धिस्वास्थ्येऽपि प्रकृतं प्रज्ञास्थैर्यंकथं सिद्धमित्याशङ्क्याह प्रसन्नेति बुद्धिप्रसादस्यैव फलान्तरमाह किञ्चेति तस्मात् बुद्धि प्रसादार्थं प्रयतितव्यमिति शेषः श्लोकद्वयस्याक्षरोत्थमर्थमुक्त्वा तात्पर्य्यार्थमुपसंहरति वाक्यमिति युक्तः समाहितो विषयपारवश्यशून्यः सन्निति यावत् ॥ ६५ ॥

स्वामिकृतटीका।

प्रसादे सति किं स्यादित्यत आह प्रसाद इति प्रसादे सति सर्वदुःखानाम्नाशस्ततः प्रसन्नचेतसो बुद्धिः प्रतिष्ठिता भवतीत्यर्थः ॥ ६५ ॥

नवलभाष्य।

फिर चित्तकी प्रसन्नता में क्याहोता है इस आकांक्षा में कहते हैं कि (प्रसादइति) हे अर्जुन जबचित्तकी प्रसन्नता होती है तो तो इस जितेन्द्रिय पुरुष के सब आध्यात्मिकादिक दुःखोंका नाशहोजाताहै अर्थात् किसी तरहका दुःख इसके मनमें प्रवेशनहींकरता फिर प्रसन्नहुआ है चित्तजिसका ऐसे पुरुष की बुद्धि अर्थात् निर्मल अन्तःकरण पुरुष की बुद्धिआत्मामें

अयुक्त जो पुरुष अर्थात् जिसका चित्त एकाग्र नहीं हुआ ऐसा जो पुरुष तिसकी आत्म विषया बुद्धि नहीं उत्पन्न होती है और उस अयुक्त पुरुषको भावना भी अर्थात् आत्मज्ञानमें तत्परताभी नहीं होती है और विना भावनाके आत्मज्ञान आश्रयणके विना शान्तिरूप शमभी नहीं होताहै और अशान्त पुरुषको सुखकी आशा कहां क्योंकि विषय सेवाकी तृष्णासे निवृति जो है उसको सुख कहते हैं कुछ विषयकी तृष्णामें सुख नहीं है किन्तु तृष्णा दुःख रूपाही है तृष्णाकी विद्यमानता में सुखका लेश मात्र भी नहीं उत्पन्न होता है ॥ ६६ ॥

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ ६७ ॥

शङ्करभाष्यम् ।

अयुक्तस्य कस्माद्बुद्धिर्नास्तीत्युच्यते इन्द्रियाणामिति इन्द्रियाणां हि यस्मात् चरतां स्वविषयेषु प्रवर्तमानानां यन्मनोनुविधीयते अनुप्रवर्त्तते तदिन्द्रियविषयविकल्पनेन प्रवृत्तं मनोऽस्य यतेर्हरति प्रज्ञात्मानात्मविवेकजां नाशयति कथं वायुर्नावमिवाम्भस्युदके जिगमिषतां मार्गादुद्धृत्योन्मार्गे यथा वायुर्नावं प्रवर्तयत्येवमात्मविषयां प्रज्ञां हृत्वा मनोविषयां कल्पनां करोति॥६७॥

आनंदगिरिकृतटीका ।

आकांक्षाद्वारा श्लोकान्तरमुत्थापयति अयुक्तस्येति विक्षिप्तचेतसो भावनाभावे साक्षात्कारलक्षणा बुद्धिर्न भवतीति हेत्वन्तरेण साधयति इन्द्रियाणामिति यत्पदोपात्तं मनस्तत्पदेनापि इन्द्रियाणां विषयाः शब्दादयस्तेषां विकल्पनं मिथो विभज्य ग्रहणं तेनेति यावत् दृष्टान्तं व्याकरोति उदकइति यस्मात् तस्मादयुक्तस्य नोत्पद्यते बुद्धिरिति योजना ॥ ६७ ॥

स्वामिकृतटीका ।

नास्ति बुद्धिरयुक्तस्येत्यत्र हेतुमाह इन्द्रियाणामवशीकृतानां स्वैरं विषयेषु चरतांमध्ये यदेवैकमिन्द्रियं मनोऽनुविधीयते अवशीकृतं सदिन्द्रियेण सह गच्छति तदेवैकमिन्द्रियमस्य मनसः पुरुषस्य वा प्रज्ञां हरति विषयविक्षिप्तां करोति किमुवक्तव्यं बहूनिप्रज्ञांहरन्तीति यथा प्रमत्तस्य कर्णधारस्य नावं वायुः समुद्रे सर्वतः परिभ्रामयतितद्वदिति ॥ ६७ ॥

नवलभाष्य ।

अयुक्त पुरुषको काहेसे बुद्धिउत्पन्न नहींहोतीहै इसआशंकामें कहते हैं [इन्द्रियाणामिति] हे अर्जुन जिससे अपने अपने विषयोंमें प्रवृत्तहोरहीं जे इन्द्रियां तिनमें जिसइन्द्रियके पश्चात् अर्थात् पीछे मन प्रवृत्तहोताहै वह मन इसपुरुषकी बुद्धिको हरताहै अर्थात् तिसइन्द्रियके विषयको विकल्पन करके अर्थात्उसकेगुणदोषको चिन्तनकरके इसपुरुषकी आत्मानात्मविवेकसे उत्पन्नहुई जो बुद्धि तिसकोहरताहै अर्थात् नाशकरताहै जैसे वायु जो पवन सो जलमें नौकाको अन्यत्र प्राप्तकरताहै अर्थात् चलनेकी इच्छाकर-

सदृश सबजगह स्थितहोती है अर्थात् आत्म स्वरूप करके निश्चलहोत
है इसप्रकार प्रसन्न चित्त स्थिर बुद्धि पुरुषकी जिससे कृत कृत्यता हो
ती है तिससे राग द्वेष रहित इन्द्रियों करके शास्त्रसे अविरुद्ध और अ
षिद्ध अर्थात् शास्त्रसे जिनका विरोध न होय और शास्त्रमें जिनका नि
भी न होय ऐसे कर्मों में युक्त होके आचरण करै अर्थात् प्रवृत्त होव
संपूर्ण वाक्य का अर्थ है ॥ ६५ ॥

नास्ति बुद्धिरयुक्तस्य नचायुक्तस्य भावना।
नचाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥ ६६

शङ्करभाष्यम्।

सेऽयं प्रसन्नता स्तूयते नास्तीति नास्ति न विद्यते न भवतीत्यर्थः बुद्धिरात्मस्वरूपवि
अयुक्तस्यासमाहितान्तःकरणस्य नचायुक्तस्येति नचास्यअयुक्तस्य भावना आत्मज्ञानाभि
शः तथा च नास्य भावयतः आत्मज्ञानाभिनिवेशमकुर्वतः शान्तिरुपशमो न विद्यते अश
स्य कुतः सुखं इन्द्रियाणां हि विषयसेवा तृष्णातो निवृत्तिर्या तत् सुखं, न विषयविषया
दुःखमेव हि सा न तृष्णायां सत्यां सत्यां सुखस्य गन्धमात्रमपि उत्पद्यत इत्यर्थः ॥ ६६ ॥

आनंदगिरिकृतटीका।

भेदलक्षणायामविद्यानिद्रायां प्रसुप्तान्येव भूतानि जाग्रतीत्युच्यते यस्यां निशायां प्रसुप्ता इव स्वप्न दृशः सा निशा अविद्यारूपत्वात् परमार्थतत्त्वं पश्यतो मुनेरतः कर्माण्यविद्यावस्थायामेव चोद्यन्ते न विद्यावस्थायां विद्यायां हि सत्यामुदिते सवितरि शार्वरमिव तमः प्रणाशमुपगच्छत्य विद्याप्राग्विद्योत्पत्तेरविद्या प्रमाणबुद्ध्या गृह्यमाणा क्रियाकारकफलभेदरूपासती सर्वकर्म हेतुत्वं प्रतिपद्यते नाप्रमाणबुद्ध्या गृह्यमाणायाः कर्म्महेतुत्वोपपत्तिः प्रमाणभूतेन वेदेन मम चोदितं कर्त्तव्यं कर्मेति हि कर्मणि कर्त्ता प्रवर्ततेनाविद्यामात्रमिदं सर्वं निशेवेति यस्य तु पुनर्निशेवावि द्यामात्रमिदं सर्वभेदजातमिति ज्ञानं तस्यात्मज्ञस्य सर्वकर्मसंन्यास एवाधिकारो न प्रवृत्तौ तथा च दर्शयिष्यति तद्बुद्धयस्तदात्मान इत्यादिना ज्ञाननिष्ठायामेव तस्याधिकारः तत्रापि प्रवर्तक प्रमाणाभावे प्रवृत्तेरनुपपत्तिरिति चेत न स्वात्मविषयत्वादात्मविज्ञानस्य नह्यात्मनः स्वात्मनि प्रवर्तकप्रमाणापेक्षता आत्मत्वादेव तदन्तत्वाच्च सर्वप्रमाणानां प्रमाणत्वस्य नह्यात्मस्वरूपाधिगमे सतिपुनः प्रमाणप्रमेयव्यवहारः सम्भवति प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यंप्रमाणं निवर्तयदेव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे लोकेच वस्त्वधिगमे प्रवृत्तिहेतुत्वादर्शनात् प्रमाणस्य तस्मात् नात्मविदः कर्मण्य धिकार इति सिद्धम् ॥ ६९ ॥

आनन्दगिरिकृतटीका।

आत्मविदः स्थितप्रज्ञस्य सर्वकर्म परित्यागेऽधिकारस्तद्विपरीतस्याज्ञस्य कर्मणीत्येतस्मिन्नर्थे समनन्तरश्लोकमवतारयति योऽयमिति अविद्या निवृत्तौ सर्वकर्म निवृत्तिश्चेत् तन्निवृत्तिरेव कथमित्याशङ्क्याह अविद्यायाश्चेति स्फुटी कुर्वन् बाह्याभ्यन्तरकरणानां पराक् प्रत्यक् प्रवृत्तिवत् तथाविधे दर्शने च मिथो विरुध्यते परागदर्शनस्यानाद्यात्मावरणाविद्याकार्य्यत्वादात्मदर्शनस्य च तन्निवर्तकत्वात् तत् ततश्चात्मदर्शनार्थमिन्द्रियाण्यर्थेऽभ्योनिगृह्णीयादित्याहेति योजनासर्वप्राणिनां निशापदार्थाविवेककरीत्यत्रहेतुमाहतमः स्वभावत्वादिति सर्वप्राणिसाधारणीं प्रसिद्धां निशां दर्शयित्वा तामेवप्रकृतानुगुणत्वेन प्रश्नपूर्वकंविपदर्यतिकिं तदित्यादिनास्थितप्रज्ञविषयस्यपरमार्थतत्त्वस्यप्रकाशैकस्वभावस्य कथमज्ञानं प्रति निशात्वमित्याशङ्क्याह यथेति तत्रहेतुमाहअगोचरत्वादिति अतद्बुद्धीनां परमार्थतत्त्वातिरिक्तद्वैतप्रपञ्चे प्रवृत्तबुद्धीनामप्रतिपन्नत्वात्परमार्थतत्त्वंनिशेवाविदुषामित्यर्थः तस्यामित्यादि व्याचष्टे तस्यामिति निशावदुक्तायामवस्थायामिति यावत् योगीति ज्ञानी कथ्यते द्वितीयार्द्धं विभजते यस्यामिति प्रसुप्तानां जागरणं विरुद्धमित्याशङ्क्याह प्रसुप्ता इवेति परमार्थतत्त्वमनुभवतो निवृत्ताविद्यस्य संन्यासिनो द्वैतावस्थानिशेत्यत्र हेतुमाह अविद्यारूपत्वादिति परमार्थावस्था निशेत्यविदुषां विदुषान्तु द्वैतावस्था तथेति स्थिते फलितमाह अत इति अविद्यावस्थायामेव क्रियाकारकफलभेदप्रतिभानादित्यर्थः विद्योदयेऽपि तत्प्रतिभानाविशेषात् पूर्वमिव कर्माणि विधीयेरन्नित्याशङ्क्याह विद्यायामिति अविद्या निवृत्तौ बाधितानुवृत्त्या विभागमानेऽपि नास्ति कर्मविधिविभागाभिनिवेशाभावादित्यर्थः अविद्यावस्थायामेव कर्माणीत्युक्तं व्यक्तीकरोतिप्रागिति विद्योदयात् पूर्वं बाधकाभावादबाधिता विद्या क्रियादिभेदमापाद्य प्रमाणरूपयाबुद्ध्या ग्राह्यतां प्राप्य कर्महेतुर्भवति क्रियादिभेदाभिमानस्य तद्धेतुत्वादित्यर्थं न विद्यावस्थायामित्युक्तं प्रपञ्चयति नाप्रमाणेति उत्पन्नायाञ्च विद्यायां अविद्यायाः निवृत्तत्वात् क्रियादिभेदभानमप्रमाणमिति बुद्धिरुत्पद्यते तया गृह्यमाणा यथोक्तविभानभागिन्यप्यविद्या न कर्महेतुत्वं प्रतिपद्यते बाधितत्वेनाभासतया तद्धेतुत्वायोगादित्यर्थः विद्या विद्याविभागेनोक्तमेव विवृणोति प्रमाणभूतेनेति यथोक्तेन वेदेन काम्यनैमित्तिकनित्यादिरूपेण मम कर्मविहितं तेन मया

नेवालेपुरुषोंके मार्गसे और कुमार्गमें नौकाको डालके प्रवृत्त करताहै ऐसेही मन आत्मविषय बुद्धिको नाशकरके विषयकल्पनाको करता है ६७॥

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥

शङ्करभाष्यम्।

यतोहीत्युपन्यस्तस्यार्थस्यानेकविधोपपत्तिमुक्त्वा तञ्चार्थमुपपाद्योपसंहरति । इन्द्रियाणां प्रवृत्तौ दोष उपपादितोयस्मात् तस्मात्यतेःयस्य यतेः हेमहाबाहो निगृहीतानि सर्वशः सर्वप्रकारैर्मानसादिभेदैरिन्द्रियाणीन्द्रियार्थेभ्यः शब्दादिभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६८॥

आनन्दगिरिकृतटीका।

यततोह्यीत्यादि श्लोकाभ्यामुक्तस्यैवार्थस्य प्रकृत श्लोकाभ्यामपि कथ्यमानत्वादुक्ति पुनरुक्तिरित्याशङ्क्य परिहरति यततो ह्यीत्यादीना ध्यायतो विषयानित्यादीनामुपपत्तिवचनमुन्नेयं तच्छब्दापेक्षितार्थोक्तिद्वारा श्लोकमवतारयति इन्द्रियाणामिति असमाहितेनमनसा यस्मादनुविधीयमानानीन्द्रियाणि प्रसह्य प्रज्ञामपहरन्ति तस्मादिति योजना ॥६८॥

स्वामिकृतटीका।

इन्द्रिय संयमस्य स्थितप्रज्ञत्वे साधनत्वं लक्षणत्वञ्चोक्तमुपसंहरति तस्मादिति साधनत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता भवतीत्यर्थः लक्षणत्वोपसंहारे तस्य प्रज्ञा प्रतिष्ठिता ज्ञातव्येत्यर्थः महाबाहु इति सम्बोधयन् वैरिनिग्रहे समर्थस्य तवात्रापि सामर्थ्यं भवेदिति सूचयति ॥ ६८ ॥

नवलभाष्य।

इसप्रकारसे [यततोह्यपि] इसश्लोककरके कहेहुए अर्थहीअनेकप्रकारसे सिद्धकरके उसकेव्याख्यानको उपसंहार अर्थात् समाप्तकरतेहुए भगवान् तात्पर्य्यको कहते हैं [तस्मादिति] हे महाबाहो हे अर्जुन जिससे इन्द्रियों की प्रवृत्तिमें दोषकहागयाहै तिससे जिस संयमीपुरुषकी इन्द्रियां सबप्रकार से अर्थात् मानसादि भेदकरके शब्दादि विषयोंसे निग्रहकरीगई हैं अर्थात् वशकीगई हैं तिसीकी प्रज्ञाबुद्धि प्रतिष्ठित है अर्थात् स्थिरहै ॥ ६८ ॥

या निशा सर्वभूतानां तस्यां जागर्त्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥६९॥

शङ्करभाष्यम्।

योऽयं लौकिको वैदिकश्च व्यवहारः समुत्पन्नविवेकज्ञानस्यास्थितप्रज्ञस्याविद्याकार्यत्वादविद्यानिवृत्तौ निवर्त्तते अविद्यायाश्च विद्याविरोधान्निवृत्तिरित्येतमर्थं स्फुटीकुर्वन्नाह यानिशेति या निशा रात्रिः सर्वपदार्थानामविवेककरी तमःस्वभावत्वात् निशा सर्वेषां भूतानां सर्वभूतानां किं तत्परमार्थतत्त्वं स्थितप्रज्ञस्य विषयो यथा नक्तञ्चराणामहरेव सदन्येषां निशा भवति तद्वन्नक्तञ्चरस्थानीयानामज्ञानिनां सर्वभूतानां निशेव निशा परमार्थतत्त्वमगोचरत्वादतद्बुद्धीनां तस्यां परमार्थलक्षणायाम् अज्ञाननिद्राया प्रबुद्धो जागर्ति संयमी संयमवान् जितेन्द्रियो योगीत्यर्थः यस्यां

ारकरताहै सो सब प्राणियोंकी निशा रात्रिहै क्योंकि उसप्रकाशरूप भी
ार्थतत्त्वमें उनपुरुषोंका दर्शनादिव्यवहार होतानहीं इससे वह उनकी
टिमें रात्रिहीहै जैसे नक्तंचर अर्थात् रात्रिके विचरनेवाले उलूकराक्षसादि
को जो औरोंका दिनहै सोई रात्रिहोतीहै तैसे ही नक्तंचरोंके अर्थात्
ि... विचरनेवाले प्राणियोंके तुल्य जे अज्ञानी सम्पूर्ण प्राणी तिन्हों को
...र्थतत्त्वके अगोचरहोनेसे उसआत्मतत्त्वमें कभी बुद्धि जातीनहीं इस
वह परमार्थतत्त्वलक्षणाविद्या रात्रिकेतुल्य होरहीहै उसमें वे अज्ञानी
ीव अज्ञाननिद्रामें शयनकरतेहैं और उसअज्ञानियोंकी ज्ञानरूपरात्रिमें
ंयमी अर्थात् जितेन्द्रिय जो योगी सो जगता है अर्थात् उसआत्मतत्त्वमें
ावधानहो दर्शनादिव्यवहार कररहाहै इससे वह ज्ञानीका दिवसहै और
जिस ग्राह्य ग्राहकलक्षणाअविद्यामें अर्थात् यह धन पुत्र कलत्रादि पदार्थ
ग्रहणकरनेयोग्यहैं और हम इसके ग्रहणकरनेवालेहैं ऐसाहै भेद जिसमें
ऐसीअविद्यामें सोवतेके सदृश सबप्राणी जगतेहैं अर्थात् उसअविद्यामें
दर्शनादि व्यवहार होनेसे वह अज्ञानियोंका दिनहै सो वहअविद्या ब्रह्म
को देखताहुआ जो ज्ञानी तिसकीरात्रिहै क्योंकि जैसे रात्रिमें मनुष्य सोते
हैं और स्वप्नदेखते हैं तैसेही ज्ञानीपुरुष भी अविद्याकार्य्य धन पुत्रादिकों
को स्वप्नकेतुल्य देखताहै और अविद्यामें दृष्टिनहींकरता है यही उसका
सोनाहै इससे कर्म अविद्यावस्थाहीमें विधान कियेजाते हैं विद्यावस्थामें
ज्ञानदशामें नहीं विधान करेजातेहैं क्योंकि जब ज्ञानप्राप्तहुआ तो तो जैसे
सूर्य्यके उदयमें रात्रिकाअन्धकार नाशको प्राप्तहोताहै तैसे अविद्याभी वि-
द्याके उदयमें नाशको प्राप्तहोती है और विद्याकी अर्थात् ज्ञानकी उत्पत्ति
के प्रथम तो प्रमाणकरके अर्थात् [स्वर्गकामोयजेत] जिसको स्वर्गकी इ-
च्छाहोय सो यज्ञकरै इत्यादि वैदिकप्रमाणोंकरके ग्रहणकरी जो अविद्यासो
यज्ञादि कर्म कर्त्ता मन्त्र देवता फलादि भेदरूपको प्राप्तहुई सबकर्मोंकी कार-
णताको प्राप्तहोती है अर्थात् सबकर्मोंका कारण होती है क्योंकि अप्रमाण
बुद्धिकरके ग्रहणकरी अविद्या कभीनहीं कर्मकी प्रवृत्तिहेतु होसक्तीहै जबकि
कर्मकर्त्ता ऐसाजानताहै कि प्रमाणभूत वेदने यहकर्मविधानकियाहै इससे
अवश्य मुझको करनाचाहिये तभी कर्ममें प्रवृत्तहोता है और यहनहीं उस
समयमें जानताहै कि जैसे अन्धकारकी रात्रिमें कुछनहीं सूझपड़ताहै तैसे
अविद्यामात्र सबकर्मकाण्ड और इसका स्वर्गादिफलभी ऐसाहीहै क्योंकि
किसीअंशमें जो उसको अविद्या कल्पितहोनेसे झूंठपनाकीप्रतीतिहोय तो
बड़ाभारी आयासयुक्त लौकिक वैदिकादि कर्मोंमें क्यों प्रवृत्तहोय और इं-
द्रियादिसुख में झूंठीबुद्धि होय किसवास्ते धन पुत्रादिकोंमें आसक्तहोय
और जिस आत्मापुरुष को तो रात्रिकेतुल्य अविद्यामात्री अर्थात् झूंठा
ही सब भेद बुद्धि कल्पित वैदिक लौकिक कर्मकलापहै ऐसा निश्चयहुआ
है उसको तो कर्म संन्यासहीका अधिकारहै और प्रवृत्ति में अधिकारनहीं है

तत् कर्त्तव्यमिति मन्वानः ननु कर्मण्यसौ प्रवर्तते तं प्रतिसाधनविधिरेव किं प्र प्रवर्तकः स्यादित्यर्थः सर्वेभिरेवकर्माण्यात्मज्ञानिभिर्न निवर्त्तते मन्वानस्तु न प्रवर्तते कर्मणीति व्यापत्यमाह नाविद्येति विदुषो न कर्मण्यधिकारस्तेनास्याधिकारस्तर्हि कुत्रेत्याशङ्क्याह यत्नेति तस्य आत्मज्ञस्य फलभूतसंन्यासाधिकारे वाक्यमेव प्रमाणयति तथाहीति प्र तर्कं प्रमाणं विधिस्तदभावे कर्मान्वय विदुषोऽज्ञानिनां गामपि प्रवृत्तेरनुपपत्तेरात्मयाथात्म्य ज्ञानवतोऽपि विधिरिति शङ्कते तत्रापीति तथाप्यात्मज्ञानं विधिमपेक्षते किम्वात्मा नाम तस्य स्वरूपलिप्सयस्य यथा प्रमाणप्रमेयमुत् पत्तौ विध्यनपेक्षत्वादित्याह नत्वात्मेति नहि तीय इत्याह नहीति प्रवर्तकप्रमाणशब्द तस्य विधेः साध्यविषयत्वादात्मनश्चासाध्य त्वादिति हेतुमाह आत्मत्वादेवेति आत्मतज्ज्ञानयोर्विध्यनपेक्षत्वेऽपि ज्ञानिनो मानस व्यवहारं प्रतिनियमार्थं विध्यपेक्षा स्यादित्याशङ्क्याह तदन्तत्वाद्धेति सर्वेषां प्रमाणानां प्रमाणस्यात्मज्ञानोदयावसानत्वात् तस्मिन्नुत्पन्ने व्यवहारस्य निरवकाशत्वात्तत्प्रतिनि यमाय ज्ञानिनो विधिरित्यर्थः उक्तमेव व्यक्तीकरोति नहीति धर्माधिगमवदात्माधिगमे ऽपि किमिति यथोक्तो व्यवहारो न भवतीत्याशङ्क्याह प्रमातृत्वं हीति तन्निवृत्तौ कथम द्वैतज्ञानस्य प्रमाणमित्याशङ्क्याह निवर्तयदेवेति निवर्तयदद्वैतज्ञानं स्वयं निवृत्तं प्रमा णमित्यत्र दृष्टान्तमाह स्वप्नेति आत्मज्ञानस्य विध्यनपेक्षत्वे हेत्वन्तरमाह लोके चेति व्यवहारभूमौ हि प्रमाणस्य वस्तु निश्चयफलपर्यन्तत्वे सति प्रवर्तकविधिसापेक्षत्वानु पलम्भादद्वैतज्ञानमपि प्रमाणत्वान्नविधिमपेक्षते रज्ज्वादिज्ञानवदित्यर्थः आत्मज्ञानवत स्तन्निष्ठाविधिमन्तरेण ज्ञानमाहात्म्येनैव सिद्धत्वात् तस्य कर्म संन्यासेऽधिकारो न कर्म णीत्युपसंहरति तस्मादिति ॥ ६६ ॥

स्वामिकृतटीका ।

ननु न कश्चिदपि प्रसुप्त इव दर्शनादिव्यापारशून्यः सर्वात्मना निगृहीतेन्द्रियो लोके दृश्यते अतोऽसम्भावितमिदं लक्षणमित्याशङ्क्याह या निशेति सर्वेषां भूतानां या निशा निशेवनिशा आत्मनिष्ठा अज्ञानध्वान्तावृतमतीनां तस्यां दर्शनादिव्यापाराभावात् तस्यामा त्मनिष्ठायां संयमी निगृहीतेन्द्रियो जागर्ति प्रबुध्यते यस्यान्तु विषयनिष्ठायां भूतानि जाग्रति प्रबुध्यन्ते सा आत्मतत्त्वं पश्यतो मुनेर्निशा तस्यां दर्शनादिव्यापारस्तस्य नास्ती त्यर्थः एतदुक्तं भवति यथा दिवान्धामुलूकादीनां रात्रावेवदर्शनं नतु दिवसे एवं ब्रह्मदृष्टयो न्मीलिताक्षस्यापि ब्रह्मण्येव दृष्टिर्नतु विषयेषु अतो नासम्भावितमिदं लक्षणमिति ॥ ६६ ॥

नवलभाष्य ।

अब यह लौकिक वैदिक जितनाव्यवहारहै सो सब अविद्याकार्य्यहै इस हेतुसे उत्पन्नहुआहै विवेकज्ञान जिसको ऐसाजो स्थितप्रज्ञपुरुष तिसकी अविद्याकी निवृत्तिहोनेसे वह व्यवहारभी निवृत्तहोजाताहै और अविद्या की तो विद्याके विरोधसे अपनेआपही निवृत्तिहोतीहै अर्थात् विद्याके उदय में फिर अविद्याकी स्थितिनहींसम्भवहोतीहै इसअर्थको प्रकटकरतेहुए भग- वान् कहतेहैं [यानिशेति] तमस्वभाव अर्थात् अन्धकारस्वभाव होनेसे सब पदार्थोंके अविवेक करनेवाली जो निशारात्रि प्रसिद्धहै तिसीके तुल्य जो तत्त्व स्थितप्रज्ञ पुरुषका विषय अर्थात् जिसमें स्थितप्रज्ञ पुरुष स्थि-

करताहै सो सब प्राणियोंकी निशा रात्रिहै क्योंकि उसप्रकाशरूप भी
र्थतत्त्वमें उनपुरुषोंका दर्शनादिव्यवहार होतानहीं इससे वह उनकी
ष्टिमें रात्रिहीहै जैसे नक्तंचर अर्थात् रात्रिके विचरनेवाले उलूकराक्षसादि
ो जो औरोंका दिनहै सोई रात्रिहोतीहै तैसे ही नक्तंचरोंके अर्थात्
में विचरनेवाले प्राणियोंके तुल्य जे अज्ञानी सम्पूर्ण प्राणी तिन्हों को
परमार्थतत्त्वके अगोचरहोनेसे उसआत्मतत्त्वमें कभी बुद्धि जातीनहीं इस
से वह परमार्थतत्त्वलक्षणाविद्या रात्रिकेतुल्य होरहीहै उसमें वे अज्ञानी
जीव अज्ञाननिद्रामें शयनकरतेहैं और उसअज्ञानियोंकी ज्ञानरूपरात्रिमें
संयमी अर्थात् जितेन्द्रिय जो योगी सो जगता है अर्थात् उसआत्मतत्त्वमें
सावधानहो दर्शनादिव्यवहार कररहाहै इससे वह ज्ञानीका दिवसहै और
जिस ग्राह्य ग्राहकलक्षणअविद्यामें अर्थात् यह धन पुत्र कलत्रादि पदार्थ
ग्रहणकरनेयोग्यहै और हम इसके ग्रहणकरनेवालेहैं ऐसाहै भेद जिसमें
ऐसीअविद्यामें सोवतेके सदृश सबप्राणी जगतेहैं अर्थात् उसअविद्यामें
दर्शनादि व्यवहार होनेसे वह अज्ञानियोंका दिनहै सो वहअविद्या ब्रह्म
को देखताहुआ जो ज्ञानी तिसकीरात्रिहै क्योंकि जैसे रात्रिमें मनुष्य सोते
हैं और स्वप्नदेखते हैं तैसेही ज्ञानीपुरुष भी अविद्याकार्य्य धन पुत्रादिकों
को स्वप्नकेतुल्य देखताहै और अविद्यामें दृष्टिनहींकरता है यही उसका
सोनाहै इससे कर्म अविद्यावस्थाहीमें विधान कियेजाते हैं विद्यावस्थामें
ज्ञानदशामें नहीं विधान करेजातेहैं क्योंकि जब ज्ञानप्राप्तहुआ तो तो जैसे
सूर्य्यके उदयमें रात्रिकाअन्धकार नाशको प्राप्तहोताहै तैसे अविद्याभी वि-
द्याके उदयमें नाशको प्राप्तहोती है और विद्याकी अर्थात् ज्ञानकी उत्पत्ति
के प्रथम तो प्रमाणकरके अर्थात् [स्वर्गकामोयजेत] जिसको स्वर्गकी इ-
च्छाहोय सो यज्ञकरै इत्यादि वैदिकप्रमाणोंकरके ग्रहणकरी जो अविद्यासो
यज्ञादि कर्म कर्तृ मन्त्र देवता फलादि भेदरूपको प्राप्तहुई सबकर्मोंकी कार-
णताको प्राप्तहोती है अर्थात् सबकर्मोंका कारण होता है क्योंकि अप्रमाण
बुद्धिकरके ग्रहणकरी अविद्या कभीनहीं कर्मकी प्रवृत्तिहेतु होसकीहै जबकि
कर्मकर्त्ता ऐसाजानताहै कि प्रमाणभूत वेदने यहकर्मविधानकियाहै इससे
अवश्य मुझको करनाचाहिये तभी कर्ममें प्रवृत्तहोता है और यहनहीं उस
समयमें जानताहै कि जैसे अन्धकारकी रात्रिमें कुछनहीं सूझपड़ताहै तैसे
अविद्यामात्र सबकर्मकाण्ड और इसका स्वर्गादिफलभी ऐसाहीहै क्योंकि
किसीअंशमें जो उसको अविद्या कल्पितहोनेसे छूटनाकीइच्छानिहोय तो
बड़ाभारी आयासयुक्त लौकिक वैदिकादि कर्मोंमें क्यों प्रवृत्तहोय और इं-
द्रियादिकन में मूढबुद्धि होय किसवास्ते धन पुत्रादिकोंमें आनन्दहोय
और जिस आत्मज्ञानी को तो रात्रिकेतुल्य अविद्यामात्री अर्थात् झूठा
ही सब भेद बुद्धि कल्पित वैदिक लौकिक कर्मरचनाहै ऐसा निश्चयहुआ
है उससे तो कर्म संन्यासहीका अधिकारहै और प्रवृत्ति में अधिकारनहींहै

यहअर्थ भगवान् पञ्चमाध्यायके १७ संत्रहवेंश्लोकमें कहेंगेकि(
स्तदात्मानइति) उसीब्रह्ममें बुद्धि और मन जिन्होंके ऐसे ज्ञानी
प्राप्तहोतेहैं इससे आत्मज्ञानीको ज्ञाननिष्ठाहीमें अधिकारहै न क
कर्ममें प्रवृत्तिकराने में प्रत्यक्षादि प्रमाणहैं ऐसे आत्मामें प्रवर्त्तक
माणनहीं फिर कैसे प्रवृत्तहोसक्ताहै सो ऐसी आशंका नहीं करना
क्योंकि आत्मज्ञानको स्वात्मविषयत्वही है अर्थात् जिस आत्मस्वरू
से सब जाने जातेहैं उसका जाननेवाला कोई नहीं है इसीलिये
को अपने जाननेमें और प्रमाणकी अपेक्षानहीं क्योंकि जितनप्रमा
किक वैदिकहैं तिनके प्रमाणत्वधर्मका निश्चयकरनेवाला आत्माही
आत्मा सबप्रमाणोंका अन्तहुआ उसको अपनेमें प्रमाणकी अपेक्षा
होतीहै इसीसे आत्माके सब विषयहैं अर्थात् दृश्यहैं और आत्मा
करनेवाला कोईनहीं फिर जब आत्मज्ञानमें सब प्रमाणों की स
तब आत्मज्ञान होतसन्ते यहप्रमाणहै यहप्रमेयहै यहभी व्यवहा
नहींहोता और आत्मज्ञान अपनामेंप्रमाणका निवृत्तकरताहुआ प्र
धर्म की भी निवृत्तिकरताहै फिर प्रमाणादि व्यवहार रहित होता
जैसे कोई स्वप्नावस्थामें अनेकपदार्थोंको देखताहुआ उनपदार्थोंके
में अनेकप्रमाणोंसे निश्चयभी करताहै फिर जब स्वप्नदेख जगताहै
स्वप्नके निश्चयकरेहुए पदार्थोंको मिथ्याजानताहै और उनप्रमाण
मिथ्याजानताहै और अपनाको स्वप्नमेंप्रमाणकरनेवालाजोमानर
धर्मकोभी मिथ्याहीजानताहै और जो मैं स्वप्नदेखनेवालाथा सो
उसअन्यज्ञानमें किसीप्रमाणकी भी अपेक्षा नहींकरताहै तैसे ही
दशामें मायपदार्थोंके निश्चयकरनेको प्रमाणप्रमेयादि कल्पना
स्वयंप्रकाशआत्मा में प्रमाणकी अपेक्षा नहीं और लोकमें भी
प्रमाणकी आवश्यकता रहतीहै जबतक प्रमाणसे निश्चयकरनेयो
नहीं जानीजातीहै जानेके अनन्तर तो कुछ प्रमाणकी अपेक्षा न
कोईभी अधिकारी निवृत्तिके अनन्तर आत्मज्ञानमें भी प्रमाण
नहीं नहींआत्मज्ञानमें कोई प्रमाणकी अपेक्षारहतीहै तिसमें ज्ञान
है तिसको अपेक्षानहीं है यह सिद्धहुआ ॥ ६९ ॥

...त्मन्येव प्रलीयन्ते न स्वात्मवशं कुर्वंति मोक्षमाप्नोति नेतरः कामकामी. काम्यन्त इतिकामाः विषयास्तान् कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थः ॥ ७० ॥

आनंदगिरिकृतटीका।

नन्वसंन्यासिनापि विद्यावता विद्याफलस्य मोक्षस्य लब्धुंशक्यत्वात् किमितिविदुषः संन्यासो नियम्यते तत्राह विदुष इति आपातज्ञानवतो विवेकवैराग्यादिविशिष्टस्यैषणाभ्यः सर्वाभ्योभ्युत्थितस्य श्रवणादिद्वारा समुत्पन्नसाक्षात्कारवतो मुख्यस्य संन्यासिनो मोक्षो नान्यस्य विषयतृष्णा परिभूतस्य इत्येतत् दृष्टान्तेन प्रतिपादयितुमिच्छन् रागद्वेषविमुक्तैस्तु इति श्लोकोक्तमेवार्थं पुनराहेति योजना अद्भिः समुद्रस्य समन्तात् पूर्यमाणत्वे वृद्धिह्रासवतो तदीयास्थितिरापतेदित्याशङ्क्याह अचलेति नहि समुद्रस्योदकात्मकं प्रतिनियतं रूपं कदाचिद्विवर्द्धते ह्रसते वा तेन तदीयास्थितिरेकरूपैवेत्यर्थः तत्तन्नादेयाश्चेदापः समुद्रान्तर्गच्छन्ति तर्हि तस्य विक्रियावत्वादप्रतिष्ठा स्यादित्याशङ्क्याह स्वात्मस्थमिति इच्छाविशेषः विषयाणामसन्निधौ विदुषि निर्विकारे प्रविशन्तोऽपि सन्निधाने तस्मिन् प्रविशन्तो विकारमापादयेयुरित्याशङ्क्याह विषयेति प्रवेशं विषदयति सर्वत इति योःकाम इत्यादि श्रुतेर्विषयविमुखस्य निष्कामस्य मोक्षो न कामकामुकस्येत्याह स शान्तिमिति ॥ ७० ॥

स्वामिकृतटीका।

ननु विषयेष्वदृष्टभावे कथमसौ तान् मुक्त इत्यपेक्षायामाह आपूर्यमाणमिति नानानदनदीभिरापूर्यमाणमत्यचलप्रतिष्ठमनतिक्रांतमर्य्यादमेव समुद्रं पुनरप्यन्या आपो यथा प्रविशन्ति तथा कामाविषयाः यं मुनिमन्तर्दृष्टिं भोगैरविक्रियमाणमेव प्रारब्धकर्मभिराक्षिप्ताः सन्तः प्रविशन्ति स शान्तिं कैवल्यं प्राप्नोति नतुकामकामी भोगकामनाशीलः॥७०॥

नवलभाष्यं।

१ जिसकी थाह नाहो २ बराबरी ३ शरीर ४ जिसका आकार नहीं ॥

सब में पोई आतमा बाहर कोई नाहिं ११४

छोटे भांड़े में करै छोटाही परकाश ॥

बड़े जु भाँड़े में करै ज्यादा होय उकाश ११५

ज्ञानवन्त कूं मैं दियो दीपक को दृष्टान्त ॥

जो वह समझै चावसूं मिटै तिमिरै अरु भ्रांत ११६

जैसेही है पिण्ड में तैसेही ब्रह्मण्ड ॥

भीरत बाहर रमिरह्यो सातद्वीप नवखण्ड ११७

आप लखेते वाकूं पावै। जो पै सतगुरु भेद बतावै ॥ ज्ञान दृष्टि रशावै। आपामिटै ब्रह्मठहरावै ॥ ज्ञाता ज्ञानज्ञेय जहँ नाहीं। ध्याता ध्येय मिटि जाहीं ॥ जबहो एक दूसरा नासे। बन्ध मुकत के रहैं न ॥ मृतक अवस्था जीवत आवै। करम रहत अस्थिर गति पावै ॥ तब मिन्तर बैरी नाहीं। पाप पुण्यकी परै न छाहीं ॥ हरप शोक सम होजा ऊ। रक्षाकरो कि मारोकोऊ ॥ कोऊ हाथमें भोजन देजा। कोउ छीनकर हीं लेजा ॥ दोनों एकबराबर वाके। जग व्योहार कछू नहिं ज्ञाके ॥ हरि न और पिछान न कोई। तिनके इच्छा रही न दोई ॥ ज्ञान दिशा ऐसे गाई। चरणदास शुकदेव बताई ११८ ॥

दो० ज्ञान दिशा आवन कठिन विरला जानै कोय ॥

ज्ञानदिशा जब जानिये जीवत मृत्यक होय ११९

चौ० बाचक ज्ञानी बहुतक देखे। लखै ज्ञानी कोइ लेखे लेखे ॥ ज्ञानी बिगड़े विषयी होई। कथै एक अरु चालैदोई ॥ बुरेकरम औगुण चितलावै। भले करम गुण सब बिसरावै ॥ विषय बासना के रँगराते। झूठ कपट छल बल मदगाते ॥ इन्द्री वश मन हाथ न आवै। पाप करनसों नाहिंडरावै ॥ ज्ञानकथै अरु वाद चढ़ावै। रहन गहनका भेद न पावै ॥ ब्रह्मव्रतका आवन भारी। चरणदास शुकदेव विचारी १२० ॥

उनतीमो लक्षण लिये भक्त सदतहो ज्ञान ॥

...र २ भेग १ करनेवाल ४ हृदयान्तरमे देखनेवाले ॥

किं पुनर्मूर्खस्तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि निग्रहः निषेधरूपः किं करिष्यति मम चान्यस्य वा ॥ ३३ ॥

आनन्दगिरिकृतटीका ।

भगवन्मतानुवर्तनमन्तरेण परधर्मानुष्ठानेस्वधर्माननुष्ठाने चकारणं पृच्छति कस्मादिति मत् तत्प्रतिकूलत्वमेव तत्र कारणमित्याशङ्क्याह तत्प्रतिकूलाइति राजानुशासनातिक्रमे दोषदर्शनात् भगवदनुशासनातिक्रमेऽपि दोषसम्भवात् तत्प्रतिकूलत्वं भयकारणमित्यर्थः [illegible] वेन श्लोकमवतारयति सदृशमिति सर्वस्य प्राणिवर्गस्य प्रकृति वशवर्तित्वे कैमुतिकन्यायं सूचयति ज्ञानवानपीति सर्वाण्यपि भूतान्यनिच्छन्त्यपि प्रकृतिसदृशीं चेष्टां गच्छन्ति [illegible] त निगमयति प्रकृतिमिति भूतानां प्रकृतेरधीनत्वेऽपि प्रकृतिर्भगवता निग्राह्य [illegible] ह निग्रहइति का पुनरियं प्रकृतिर्यदनुसारिणी भूतानां चेष्टेति पृच्छति प्रकृतिर्नामेति भ[illegible] वदभिप्रेतां प्रकृतिं प्रकटयति पूर्वेति आदिशब्देन ज्ञानेच्छादिसंगृह्यते यथोक्तः सं[illegible] : स्वसत्वया प्रवर्तकश्चेत् प्रलयेऽपि प्रवृत्तिः स्यादित्याशङ्क्य विशिनष्टि वर्तमानेति [illegible] जन्तुरित्युक्तं विवेकिप्रवृत्तेस्तथात्वादिभिश्च विशेषादिति न्यायमनुस्मरन्नाह ज्ञानव[illegible] ति ज्ञानवतामज्ञानवताञ्च प्रकृत्यधीनत्वाविशेषे फलितमाह तस्मादिति प्रकृतिं यान्ति प्रकृतिसदृशीं चेष्टां गच्छन्त्यनिच्छन्त्यपि सर्वाणि भूतानि इत्यर्थः प्रकृते र्भगवता [illegible] तुल्येन वा केनचित् निग्रहमाशङ्क्यावतारितचतुर्थपादस्यार्थापेक्षितं पूरयति मम चेति ॥३३॥

स्वामिकृतटीका ।

ननु तर्हि महाफलत्वादिन्द्रियाणि गृह्य निष्कामाः सन्तः सर्वेऽपि स्वधर्ममेव किं नानुतिष्ठन्ति तत्राह सदृशमिति प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्याः स्वी[illegible] यायाः प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गुणदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्यम् [illegible] चेष्टत इति यस्माद्भूतानि सर्वेऽपि प्राणिनः प्रकृतिं यान्ति अनुवर्तन्ते एवञ्च सतीन्द्रिय निग्रहः किं करिष्यति प्रकृतेर्बलीयस्त्वादित्यर्थः ॥ ३३ ॥

नवलभाष्य ।

यदि कदाचित् अर्जुनकहे कि हे भगवन् कौन कारणसे फिर सबमनुष्य आपके मतका नहीं अनुवर्तन करतेहैं और और धर्मका तो सेवन करते और अपने धर्मका त्यागकरते हैं और वे विपरीताचरण करनेवाले इन धर्मनाशकी आज्ञाके उल्लंघन रूपदोषसे भयभीनहीं करतेहैं तो इसमें कौन कारणहैं इस आकांक्षामें कहते हैं कि (सदृशमिति) हे अर्जुन ज्ञानवान्‌भी प्राणी अपनी प्रकृतिके सदृशही चेष्टाकरता है अर्थात् प्रकृति [illegible] इसजन्म में प्रकटहुआ पूर्वजन्मका कियाहुआ धर्माधर्मादि संस्कार [illegible] [illegible] ज्ञानवानगुण दोषका जाननेवाला भी चेष्टाकरता है [illegible] [illegible] [illegible] निग्रहकरना है [illegible] ॥ ३३ ॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

शङ्करभाष्यम् ।

यदि सर्वो जन्तुरात्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविदमुच्यते इन्द्रियस्येति इन्द्रियस्येन्द्रियस्यार्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे शब्दादौ रागोऽनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थे रागद्वेषाववश्यम्भाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य विषय उच्यते शास्त्रार्थे प्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत् या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्य्ये पुरुषं प्रवर्तयति यदा तदा स्वधर्मपरित्यागः परधर्मानुष्ठानञ्च भवति यदा पुनः रागद्वेषौ तत् प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशस्तस्मात्तयो रागद्वेषयोर्वशं नागच्छेद्यतस्तौ ह्यस्य पुरुषस्य परिपन्थिनौ श्रेयो मार्गस्य विघ्नकर्त्तारौ तस्कराविवेत्यर्थः ॥ ३४ ॥

आनन्दगिरिकृतटीका ।

सर्वस्य भूतवर्गस्य प्रकृतिवशवर्त्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शंकते यदीति ननु यस्य न प्रकृतिरस्ति तस्य पुरुषकारसम्भवादर्थवत्त्वं तद्विषये विधिनिषेधयोर्भविष्यति नेत्याह न चेति शंकितदोषं श्लोकेन परिहरति इदमित्यादिना वीप्सायाः सर्वकरणगोचरत्वं दर्शयति सर्वेति प्रत्यर्थं रागद्वेषयोरव्यवस्थायां प्राप्तौ प्रत्यादिशति इष्ट इति प्रतिविषयं विभागेन तयोरन्यतरस्यावश्यकत्वेऽपि पुरुषकारविषयाभावप्रयुक्तं प्रागुक्तं दूषणं कथं समाधेयमित्याशङ्क्याह तत्रेति यतेरित्याद्यवतारितं भागं विभजते शास्त्रार्थस्येति प्रकृतिवशत्वाद्यन्त्रान्नैव नियोज्यत्वमित्याशङ्क्याह या हीति रागद्वेषद्वारा प्रकृतिवशवर्त्तित्वे स्वधर्मत्यागादि दुर्वारमित्युक्तमिदानीं विवेकविज्ञाने न रागादिनिवारणे शास्त्रीयदृष्ट्या प्रकृतिपारवश्यं परिहर्तुं शक्यमित्याह यदेति मिथ्याज्ञाननिबन्धनौ हि रागद्वेषौ तत्प्रतिपक्षत्वं विवेकविज्ञानस्य मिथ्याज्ञानविरोधित्वाद्ध्येयं रागद्वेषयोर्मूलनिवृत्त्या निवृत्तौ प्रतिबन्धध्वंसे कार्यसिद्धिमभिसन्धायोक्तं तदेति एवकारस्यान्ययोगव्यवच्छेदकत्वं दर्शयति नेति पूर्वोक्तं नियोगमुपसंहरति तस्मादिति तत्र हेतुमाह यत इति हि शब्दोपात्तो हेतुर्यत इति प्रकटितः स च पूर्वेण तच्छब्देन सम्बन्धनीयः पुरुषपरिपन्थित्वमेव तयोः सोदाहरणं स्फोरयति श्रेयोमार्गस्येति ॥ ३४ ॥

स्वामिकृतटीका ।

नन्वेवं प्रकृत्यधीनैव चेत् पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधशास्त्रस्य वैयर्थ्यं प्राप्तमित्याशङ्क्याह इन्द्रियस्येन्द्रियस्येति वीप्सया सर्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ततश्च तदनुरूपा प्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्ती न भवेदिति शास्त्रेण नियम्यते हि यस्मादस्य मुमुक्षोस्तौ परिपन्थिनौ प्रतिपक्षौ अयं भावः विषयस्मरणादिना रागद्वेषानुत्पाद्यानर्थिते पुरुषमनर्थेऽतिगम्भीरे स्रोतसीव प्रकृतिर्बलात् प्रवर्तयति शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबन्धके परमेश्वरभजनादौ तं प्रवर्तयति ततश्च गम्भीरस्रोतः पातात् पूर्वमेव नावमाश्रित इव नानर्थं प्राप्नोति तदेवं स्वाभाविकौ रागद्वेषौ दूरी कृत्य स्वधर्मं त्यक्त्वा धर्मे प्रवर्तितव्यमित्युक्तम् ॥ ३४ ॥

ो किं पुनर्मूर्खस्तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि निग्रहः निषेधरूपः किं करिष्यति
मम चान्यस्य वा ॥ ३३ ॥

आनन्दगिरिकृतटीका ।

भगवन्मतानुवर्तनमन्तरेण परधर्मानुष्ठानेस्वधर्मानुष्ठाने चकारणं पृच्छति कस्मादिति म
तत्प्रतिकूलत्वमेव तत्र कारणमित्याशङ्क्याह तत्प्रतिकूलाइति राजानुशासनातिक्रमे दो
र्शनात् भगवदनुशासनातिक्रमेऽपि दोषसम्भवात् तत्प्रतिकूलत्वं भयकारणमित्यर्थः उत्त
त्वेन श्लोकमवतारयति सदृशमिति सर्वस्य प्राणिवर्गस्य प्रकृति वशवर्तित्वे वैमुख्य
यं सूचयति ज्ञानवानपीति सर्वाण्यपि भूतान्यनिच्छन्त्यपि प्रकृतिसदृशीं चेष्टां गच्छ
ति निगमयति प्रकृतिमिति भूतानां प्रकृतेरधीनत्वेऽपि प्रकृतिर्भगवता निग्राह्ये त्याश
ह निग्रहइति का पुनरियं प्रकृतिर्यदनुसारिणी भूतानां चेष्टेति पृच्छति प्रकृतिर्नामेति
ावद्भिप्रेतां प्रकृतिं प्रकटयति पूर्वेति आदिशब्देन ज्ञानेच्छादिसंगृह्यते यथोक्तः सं
: स्वसत्वया प्रवर्तकश्चेत् प्रलयेऽपि प्रवृत्तिः स्यादित्याशङ्क्य विशिनष्टि वर्तमानेति
न्तुरित्युक्तं विवेकिप्रवृत्तेरतयात्वादिभिश्च विशेषादिति न्यायमनुस्मरन्नाह ज्ञान
ति ज्ञानवतामज्ञानवताञ्च प्रकृत्यधीनत्वाविशेषे फलितमाह तस्मादिति प्रकृतिं या
प्रकृतिसदृशीं चेष्टां गच्छन्त्यनिच्छन्त्यपि सर्वाणि भूतानि इत्यर्थः प्रकृते भगवता
तुल्येन वा केनचित् निग्रहमाशङ्क्यावतारितचतुर्थपादस्यार्थापेक्षितं पूरयति मम चेति॥३

स्वामिकृतटीका ।

ननु तर्हि महाफलत्वादिन्द्रियाणि गृह्य निष्कामाः सन्तः सर्वेऽपि स्वधर्ममेव
नानुतिष्ठन्ति तत्राह सदृशमिति प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्याः स
यायाः प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गुणदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्य
ञ्चेष्टत इति यस्माद्भूतानि सर्वेऽपि प्राणिनः प्रकृतिं यान्ति अनुवर्तन्ते एवञ्च सतीन्द्रि
निग्रहः किं करिष्यति प्रकृतेर्बलीस्त्वादित्यर्थः ॥ ३३ ॥

नवलभाष्य ।

भयकदाचित् अर्जुनकहे कि हे भगवन् कौन कारणसे फिर सबमनु
आपके मतका नहीं अनुवर्त्तन करतेहैं और और धर्मका तो सेवन करते
और अपने धर्मका त्यागकरते हैं और ये विपरीताचरण करनेवाले पु
धर्मनामवाली आज्ञाके उल्लंघन रूपदोषसे भयभीनहीं करतेहैं तो इसमें
[illegible] इसआकांक्षामें कहते हैं कि (सदृशमिति) हे अर्जुन ज्ञा
वान्भी प्राणी अपनी प्रकृतिके सदृशही चेष्टाकरता है अर्थात् प्रकृति
इसजन्म में प्रकटहुआ पूर्वजन्मका कियाहुआ धर्माधर्मादि संस्कार [illegible]
[illegible] ज्ञानवान्गुण दोषका जाननेवाला भी चेष्टाकरता
और [illegible] पेसी चेष्टाकरताहै इसका कहनाही क्याहै तिसमें
[illegible] अपने पूर्वजन्म संस्काराधीन स्वभावको प्राप्त होते हैं तहां
[illegible] निषेधरूप निग्रह क्याकरताहै ॥ ३३ ॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

शङ्करभाष्यम्।

यदि सर्वो जन्तुरात्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यमाप्ताविदमुच्यते इन्द्रियस्येति इन्द्रियस्येन्द्रियस्यार्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे शब्दादौ रागोऽनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थे रागद्वेषाववश्यम्भाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य विषय उच्यते शास्त्रार्थेप्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत् या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्य्येपुरुषं प्रवर्तयति यदा तदा स्वधर्मपरित्यागः परधर्मानुष्ठानञ्च भवति यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशस्तस्मात्तयो रागद्वेषयोर्वशं नागच्छेद्यतस्तौ ह्यस्य पुरुषस्य परिपन्थिनौ श्रेयो मार्गस्य विघ्नकर्त्तारौ तस्कराविवेत्यर्थः ॥ ३४ ॥

आनन्दगिरिकृतटीका।

सर्वस्य भूतवर्गस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शंकते यदीति ननु यस्य न प्रकृतिरस्ति तस्य पुरुषकारसम्भवादर्थवत्त्वं तद्विषये विधिनिषेधयोर्भविष्यति नेत्याह नचेति शंकितदोषं श्लोकेन परिहरति इदमित्यादिना वीप्सायाः सर्वकरणगोचरत्वं दर्शयति सर्वेति प्रत्यर्थं रागद्वेषयोर्व्यवस्थायां प्राप्तौ प्रत्यादिशति इष्ट इति प्रतिविषयविभागेन तयोरन्यतरस्यावश्यकत्वेऽपि पुरुषकारविषयाभावप्रयुक्तं प्रागुक्तं दूषणं कथं समाधेयमित्याशङ्क्याह तत्रेति यतोरित्याद्यवतारितं भागं विभजते शास्त्रार्थस्येति प्रकृतिवशत्वाद्यन्तानैव नियोज्यत्वमित्याशङ्क्याह येति रागद्वेषद्वारा प्रकृतिवशवर्तित्वे स्वधर्मत्यागादिदुर्वारमित्युक्तमिदानीं विवेकविज्ञाने रागादिनिवारणे शास्त्रीयदृष्ट्या प्रकृतिपारवश्यं परिहर्तुं शक्यमित्याह यदेति मिथ्याज्ञाननिबन्धनौ हि रागद्वेषौ तत्प्रतिपक्षत्वं विवेकविज्ञानस्य मिथ्याज्ञानविरोधित्वादवधेयं रागद्वेषयोर्मूलनिवृत्त्या निवृत्तौ प्रतिबन्धध्वंसे कार्यसिद्धिमभिसन्धायोक्तं तदेति एवकारस्यान्ययोगव्यवच्छेदकत्वं दर्शयति नेति पूर्वोक्तं नियोगमुपसंहरति तस्मादिति तत्र हेतुमाह यत इति हि शब्दोपात्तो हेतुर्यत इति प्रकटितः स च पूर्वेण तच्छब्देन सम्बन्धनीयः पुरुषपरिपन्थित्वमेव तयोः सोदाहरणं स्फोरयति श्रेयोमार्गस्येति ॥ ३४ ॥

स्वामिकृतटीका।

नन्वेवं प्रकृत्यधीनैव चेत् पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधशास्त्रस्य वैयर्थ्यं प्राप्तमित्याशङ्क्याह इन्द्रियस्येन्द्रियस्येति वीप्सया सर्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ततश्च तदनुरूपप्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्ती न भवेदिति शास्त्रेण नियम्यते हि यस्मादस्य मुमुक्षोस्तौ परिपन्थिनौ प्रतिपक्षौ अयं भावः विषयस्मरणादिना रागद्वेषानुत्पाद्यानर्थेऽतिगम्भीरे स्रोतसीव प्रकृतिर्बलात् प्रवर्तयति शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबन्धके परमेश्वरभजनादौ तं प्रवर्तयति ततश्च गम्भीरस्रोतः पातात् पूर्वमेव नावमाश्रित इव नानर्थं प्राप्नोति तदेवं स्वाभाविकी परधर्मप्रवृत्तिं त्यक्त्वा धर्मे प्रवर्तितव्यमित्युक्तम् ॥ ३४ ॥

ते किं पुनर्मूर्खस्तस्मात् प्रकृतिं यान्ति अनुगच्छन्ति भूतानि निग्रहः निषेधरूपः किं करिष्यति मम चान्यस्य वा ॥ ३३ ॥

आनन्दगिरिकृतटीका ।

भगवन्मतानुवर्तनमन्तरेण परधर्मानुष्ठानेस्वधर्मानुष्ठाने चकारणं पृच्छति कस्मादिति भगवत्प्रतिकूलत्वमेव तत्र कारणमित्याशङ्क्याह तत्प्रतिकूलाः इति राजानुशासनातिक्रमे दोषदर्शनात् भगवदनुशासनातिक्रमेऽपि दोषसम्भवात् तत्प्रतिकूलत्वं भयकारणमित्यर्थः उत्तरत्वेन श्लोकमवतारयति सदृशमिति सर्वस्य प्राणिवर्गस्य प्रकृति वशवर्तित्वे कैमुतिकन्यायं सूचयति ज्ञानवानपीति सर्वाण्यपि भूतान्यनिच्छन्त्यपि प्रकृतिसदृशीं चेष्टां गच्छन्तीति निगमयति प्रकृतिमिति भूतानां प्रकृतेरधीनत्वेऽपि प्रकृतिर्भगवता निग्राह्येत्याशङ्क्याह निग्रहइति का पुनरियं प्रकृतिर्यदनुसारिणी भूतानां चेष्टेति पृच्छति प्रकृतिर्नामेति भगवदभिप्रेतां प्रकृतिं प्रकटयति पूर्वेति आदिशब्देन ज्ञानेच्छादिसंगृह्यते यथोक्तः संस्कारः स्वसत्वया प्रवर्तकश्चेत् प्रलयेऽपि प्रवृत्तिः स्यादित्याशङ्क्य विशिनष्टि वर्तमानेति सर्वो जन्तुरित्युक्तं विवेकिप्रवृत्तेरतथात्वादिभिश्च विशेषादिति न्यायमनुस्मरन्नाह ज्ञानवानिति ज्ञानवतामज्ञानवताञ्च प्रकृत्यधीनत्वाविशेषे फलितमाह तस्मादिति प्रकृतिं यान्ति प्रकृतिसदृशीं चेष्टां गच्छन्त्यनिच्छन्त्यपि सर्वाणि भूतानि इत्यर्थः प्रकृते भगवता तत्तुल्येन वा केनचित् निग्रहमाशङ्क्यावतारितचतुर्थपादस्यार्थापेक्षितं पूरयति मम चेति॥३३॥

स्वामिकृतटीका ।

ननु तर्हि महाफलत्वादिन्द्रियाणि गृह्य निष्कामाः सन्तः सर्वेऽपि स्वधर्ममेव किं नानुतिष्ठन्ति तत्राह सदृशमिति प्रकृतिः प्राचीनकर्मसंस्काराधीनस्वभावः स्वस्याः स्वकीयायाः प्रकृतेः स्वभावस्य सदृशमनुरूपमेव गुणदोषज्ञानवानपि चेष्टते किं पुनर्वक्तव्यमज्ञश्चेष्टत इति यस्माद्भूतानि सर्वेऽपि प्राणिनः प्रकृतिं यान्ति अनुवर्तन्ते एवञ्च सतीन्द्रियनिग्रहः किं करिष्यति प्रकृतेर्बलीस्त्वादित्यर्थः ॥ ३३ ॥

नवलभाष्य ।

अबकदाचित् अर्जुनकहै कि हे भगवन् कौन कारणसे फिर सबमनुष्य आपके मतका नहीं अनुवर्तन करतेहैं और और धर्मका तो सेवन करतेहैं और अपने धर्मका त्यागकरते हैं और वे विपरीताचरण करनेवाले पुरुष धर्मशास्त्रकी आज्ञाकेउल्लंघन रूपदोषसे भयभीनहीं करतेहैं तो इसमें कौन ऐसाप्रबल हेतुहै इसआकांक्षामें कहते हैं कि (सदृशमिति) हे अर्जुन ज्ञानवान्भी प्राणी अपनी प्रकृतिके सदृशही चेष्टाकरता है अर्थात् प्रकृति जो इसजन्म में प्रकटहुआ पूर्वजन्मका कियाहुआ धर्माधर्मादि संस्कार तिसके सदृशनाम योग्यही ज्ञानवानगुण दोषका जाननेवाला भी चेष्टाकरता है और मूर्खपुरुष वैसी चेष्टाकरताहै इसकाक्याकहनाहै क्योंकि तिससे संपूर्ण प्राणी अपने अपने पूर्वजन्म संस्काराधीन स्वभावको प्राप्त होते हैं तहां मेरा और किसीका निषेधरूप निग्रह क्याकरताहै ॥ ३३ ॥

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ ३४ ॥

शङ्करभाष्यम्।

यदि सर्वो जन्तुरात्मनः प्रकृतिसदृशमेव चेष्टते न च प्रकृतिशून्यः कश्चिदस्ति ततः पुरुषकारस्य विषयानुपपत्तेः शास्त्रानर्थक्यप्राप्ताविदमुच्यते इन्द्रियस्येति इन्द्रियस्येन्द्रियस्यार्थे सर्वेन्द्रियाणामर्थे शब्दादिविषये इष्टे शब्दादौ रागोऽनिष्टे द्वेष इत्येवं प्रतीन्द्रियार्थे रागद्वेषाववश्यम्भाविनौ तत्रायं पुरुषकारस्य शास्त्रार्थस्य विषय उच्यते शास्त्रार्थप्रवृत्तः पूर्वमेव रागद्वेषयोर्वशं नागच्छेत् या हि पुरुषस्य प्रकृतिः सा रागद्वेषपुरःसरैव स्वकार्य्ये पुरुषं प्रवर्तयति यदा तदा स्वधर्मपरित्यागः परधर्मानुष्ठानञ्च भवति यदा पुनः रागद्वेषौ तत्प्रतिपक्षेण नियमयति तदा शास्त्रदृष्टिरेव पुरुषो भवति न प्रकृतिवशस्तस्मात्तयो रागद्वेषयो वशं नागच्छेद्यतस्तौ ह्यस्य पुरुषस्य परिपन्थिनौ श्रेयो मार्गस्य विघ्नकर्त्तारौ तस्कराविवेत्यर्थः ॥ ३४ ॥

आनन्दगिरिकृतटीका।

सर्वस्य भूतवर्गस्य प्रकृतिवशवर्तित्वे लौकिकवैदिकपुरुषकारविषयाभावाद्विधिनिषेधानर्थक्यमिति शंकते यदीति ननु यस्य न प्रकृतिरस्ति तस्य पुरुषकारसम्भवादर्थवत्त्वं तद्विषये विधिनिषेधयोर्भविष्यति नेत्याह नचेति शंकितदोषं श्लोकेन परिहरति इदमित्यादिना वीप्सायाः सर्वकरणगोचरत्वं दर्शयति सर्वेति प्रत्यर्थं रागद्वेषयोरव्यवस्थायां प्राप्तौ प्रत्यादिशति इष्ट इति प्रतिविषय विभागेन तयोरन्यतरस्यावश्यकत्वेऽपि पुरुषकारविषयाभावप्रयुक्त्या प्रागुक्तं दूषणं कथं समाधेयमित्याशङ्क्याह तत्रेति यतोरित्याद्यवतारितं भागं विभजते शास्त्रार्थस्येति प्रकृतिवशत्वाद्यन्तानैव नियोज्यत्वमित्याशङ्क्याह या हीति रागद्वेषद्वारा प्रकृतिवशवर्तित्वे स्वधर्मत्यागादिदुर्वारमित्युक्तमिदानीं विवेकविज्ञानेन रागादिनिवारणे शास्त्रीयदृष्ट्या प्रकृतिपारवश्यं परिहर्तुं शक्यमित्याह यदेति मिथ्याज्ञाननिबन्धनौ हि रागद्वेषौ तत्प्रतिपक्षत्वं विवेकविज्ञानस्य मिथ्याज्ञानविरोधित्वादव धेयं रागद्वेषयोर्मूलनिवृत्त्या निवृत्तौ प्रतिबन्धध्वंसे कार्यसिद्धिमभिसन्धायोक्तं तदेति एवकारेणान्ययोगव्यवच्छेदकत्वं दर्शयति नेति पूर्वोक्तं नियोगमुपसंहरति तस्मादिति तत्र हेतुमाह यत इति हि शब्दोपात्तो हेतुर्यत इति प्रकटितः स च पूर्वेण तच्छब्देन सम्बन्धनीयः पुरुषपरिपन्थित्वमेव तयोः सोदाहरणं स्फोरयति श्रेयोमार्गस्येति ॥ ३४ ॥

स्वामिकृतटीका।

नन्वेवं प्रकृत्यधीनैव चेत् पुरुषस्य प्रवृत्तिस्तर्हि विधिनिषेधशास्त्रस्य वैयर्थ्यं प्राप्तमित्याशङ्क्याह इन्द्रियस्येन्द्रियस्येति वीप्सया सर्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेष इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ततश्च तदनुरूपाप्रवृत्तिरिति भूतानां प्रकृतिः तथापि तयोर्वशवर्ती नभवेदिति शास्त्रेण नियम्यते हि यस्मादस्य मुमुक्षोस्तौ परिपन्थिनौ प्रतिपक्षौ अयं भावः विषयस्मरणादिना रागद्वेषानुत्पाद्यानर्थहेतौ पुरुषमनर्थेऽतिगम्भीरे स्रोतसीव प्रकृतिर्बलात् प्रवर्तयति शास्त्रं तु ततः प्रागेव विषयेषु रागद्वेषप्रतिबन्धके परमेश्वरभजनादौ तं प्रवर्तयति ततश्च गम्भीरस्रोतः पातात् पूर्वमेव नावमाश्रित इव नानर्थं प्राप्नोति तदेवं स्वाभाविकी परधर्मप्रवृत्तिं त्यक्त्वा धर्मे प्रवर्तितव्यमित्युक्तम् ॥ ३४ ॥

नवलभाष्य।

तौ जो संपूर्ण प्राणी प्रकृतिके सदृशहीं कर्मकी चेष्टाकरता है और प्रकृतिरहित कोई जगत्में हैही नहीं तिससे शास्त्रोक्त पुरुषार्थसे कुछनहीं होने से शास्त्रहीको आनर्थक्य प्राप्तहुआ अर्थात् किसीका स्वभाव जबअन्यथा होही नहींसक्ता तौ शास्त्रका पढ़नासुनना निष्फलहुआ ऐसाप्राप्तहुआतिससेकहते हैं कि [इन्द्रियस्येति] हे अर्जुन इन्द्रियइन्द्रिय के विषय में अर्थात् सब इन्द्रियोंके शब्दादि विषयोंमें जो शब्दादि विषय अपना को प्रियहोने से अभीष्टहै उसमें तौ रागहोता है नाम प्रीतिहोतीहै और जो अनिष्ट अर्थात् अप्रियहै उसमें द्वेषहुआ करताहै इसप्रकार सबइन्द्रियोंके विषयोंमें रागद्वेष अवश्य होनेवालेहैं तहांशास्त्रोक्त पुरुषार्थका यहकृत्य है कि जो शास्त्रोक्त अर्थमें श्रद्धाकरके प्रवृत्तजो पुरुषसो पहिलेही रागद्वेषोंके वशीभूतनहीं होताहै और जो पुरुषकी प्रकृति है सो तौराग द्वेषपूर्वकही अपने कार्य्यमें पुरुषको प्रवृत्तकरती है जिससमयमें तौ अपने धर्मकात्याग और परधर्मका अनुष्ठान होताहै और जिससमयमें धर्मकीप्रवृत्तिमें प्रतिबन्धले रागद्वेष तिनको शत्रुजानके पुरुष इनका नियमन करताहै अर्थात् अपने वशमें करताहै उससमयमें वहपुरुष शास्त्रदृष्टिहीं होताहै और प्रकृतिके वशनहींहोता अर्थात् प्रकृतिने तौ अपनाकाम इतनांही किया जो राग और द्वेषइनकीं उत्पत्तिकिया और शास्त्र और सत्संगका यहफलहुआ जो रागद्वेषके वेगको बढ़ते देखके उसको रोकके उन्होंको अपनेवशमेंकरलेना तिससे हेअर्जुन विवेकी पुरुषराग और द्वेषइनके वशप्राप्तनहोय क्योंकि जिसकारणसे तेरागद्वेष इसपुरुषके मोक्षमार्गमें विघ्नकरनेवाले चोरहैं॥३४॥

श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ ३५॥

शङ्करभाष्यम्।

तत्र रागद्वेषप्रयुक्तो मन्यते शास्त्रार्थमप्यन्यथा परधर्मोऽपि धर्मत्वादनुष्ठेय एवेति तदसत् श्रेयानिति श्रेयान् प्रशस्यतरः स्वधर्मः स्वकीयधर्मो विगुणोऽपि विगतगुणोऽपि अनुष्ठीयमानः परधर्मात् स्वनुष्ठितात् साद्गुण्येन सम्पादितादपि स्वधर्मे स्थितस्य निधनं मरणमपि श्रेयः परधर्मे स्थितस्य जीवितात् कस्मात् परधर्मो भयावहः नरकादिलक्षणं भयमावहति यतः॥ ३५॥

आनन्दगिरिकृतटीका।

रागद्वेषयोः श्रेयो मार्गप्रतिपक्षत्वं प्रकटयतुं परमतोपन्यासद्वारा समनन्तरश्लोकमवतारयति तत्रेत्यादिना व्यवहारभूमिः सप्तम्यर्थः शास्त्रार्थस्यान्यथा प्रतिपत्तिमेव प्रत्याययति परधर्मोऽपीति स्वधर्मादित्यपेरर्थः अनुमानं दूषयन्नुत्तरत्वेन श्लोकमुत्थापयति तदसदिति स्वधर्मादवद्यादद्दुरनुष्ठानात् परिव्राट् धर्मस्य भिक्षाशनादिलक्षणस्य स्वानुष्ठितः [illegible] श्रेयानिति [illegible] प्रश्नपूर्वकं हेतुमाह

कस्मादित्यादिना स्वधर्ममवधूय परधर्ममनुतिष्ठतः स्वधर्मातिक्रमकृतदोषस्य दुष्परिहरत्वा व्रतत्यागः साधीयानित्यर्थः ॥ ३५ ॥

स्वामिकृतटीका।

तर्हि स्वधर्मस्य युद्धादेर्दुःखरूपस्य यथावत् कर्तुमशक्यत्वात् परधर्मस्य चाहिंसादेः सुकरत्वाद्धर्मत्वाविशेषाच्च तत्र प्रवर्तितुमिच्छन्तं प्रत्याह श्रेयानिति किञ्चिदंगहीनोऽपि स्वधर्मः श्रेयान् प्रशस्यतरः स्वनुष्ठितात् सकलांगसंपूर्त्या कृतादपि परधर्मात् सकाशात् तत्र हेतुः स्वधर्मे युद्धादौ प्रवर्तमानस्य निधनं मरणमपि श्रेष्ठं स्वर्गादिप्रापकत्वात् परधर्मात्तु परस्य भयावह निषिद्धत्वेन नरकप्रापकत्वात् ॥ ३५ ॥

नवलभाष्य।

तहां रागद्वेष करके प्रेराहुआ मनुष्य ऐसामानताहै कि शास्त्रका अर्थ भी विपरीतहै अर्थात् कुछठौर ठीकनहीं और परधर्म औरका धर्मभी आ- स्वरधर्महीं है इससे उसको करनाही चाहिये सो सबरागद्वेषी पुरुषका कथ- नमिथ्या है इसआशयसे भगवान् कहतेहैं कि [श्रेयानिति] हे अर्जुन अपना धर्म अनुष्ठान कियागया कुछविगुण भी होय अर्थात् अंगहीनहोने से गुणों करकेहीन भी होय और बिरानाधर्म अच्छीतरह से अनुष्ठानकिया गुणयुक्तभी हो तौभी अपना विगुण धर्महीं उसपरधर्म से श्रेष्ठहै क्योंकि अ- पनाधर्म सेवन करते करते मरणभी होजाय तौ वहश्रेष्ठहीहै जिससे वह मृ- त्युभी स्वर्गकी देनेवालीहै और बिराने धर्ममें राज्यादि लाभयुक्त जीवनभी होय तौभी वहभय कादेनेवालाहै अर्थात् अन्त्यमें नरकका देनेवालाहै ३५॥

अथ केन प्रयुक्तोऽयं पापञ्चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय ब

स्वामिकृतटीका ।

तयोर्न वशमागच्छेदित्युक्तं तदेतदशक्यं मन्वानोऽर्जुन उवाच अथेति वृष्णिवंशेऽवतीर्णो वार्ष्णेयः हे वार्ष्णेय अनर्थरूपं पापं कर्तुमनिच्छन्नपि केन प्रयुक्तः प्रेरितोऽयं पुरुषः पापं चरति कामक्रोधौ विवेकबलेन निरुन्धतोऽपि पुरुषस्य पुनः पापे प्रवृत्तिदर्शनात् अन्योऽपि तयोर्मूलभूतः कश्चित् प्रवर्तको भवेदिति सम्भावनायाः प्रश्नः ॥ ३६ ॥

नवलभाष्य ।

यद्यपि भगवान् ने दूसरे अध्यायमें [ध्यायतोविषयान्पुंसः] इसश्लोकमें सब अनर्थोंका मूलविषयों का ध्यानकहाही है और इस अध्याय में भी [रागद्वेषौह्यस्यपरिपन्थिनौ] इस पीछेके श्लोकमें सकल अनर्थ के कारण रागद्वेषोंकोकहा तौफिर अबअर्जुनकोअनर्थके विषयमेंप्रश्नकरनेका अवकाशनथा तौभी भगवान्ने अनेकजगह उस वार्त्ताकोकहा और बीचमें प्रसंग वशसे और भी कहा इससे अर्जुनने अच्छीतरह उसकानिश्चय नहीं करपाया और जो कहा सोभी संक्षेपकरके कहा इससे यहीनिश्चय करके है ऐसा जानने को इच्छाकरताहुआ अर्जुन बोलताहुआ क्योंकि जब अनर्थ मूल अच्छीतरह जानाजाय तब उसके नाशकेलिये में यत्नकरौं इस आशयसे पूछताहै कि [अथेति] हे भगवन् जैसे राजा किसी भृत्यको किसी कार्य्यके लिये प्रेरणाकरै तौ वह भृत्य अपनी इच्छाके विनाभी अवशहुआ राजाके कर्मको करताहै तैसे किसकारण करके प्रेराहुआ यहपुरुष भीतर से इच्छा नहींभी होयतौभी जबरदस्ती कोई करावै तैसे पापको करता है अर्थात् यहजानताभी है कि यहपाप कर्महै मेरे करनेके योग्यनहीं तौभी उस पापकर्म से छूटने नहींपाता करनेही परताहै जैसे राजाका बेगारीकैसेभी नहीं बचनेपाता चाहे राजीसे करौ चाहे बेराजी से परंतु राजाका कर्म करताहीहै तैसे वहकौन अनर्थ कारण है जिसका प्रेराहुआ पाप कर्मसे यह पुरुष नहीं बचसक्ता ॥ ३६ ॥

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिहवैरिणम् ॥ ३७ ॥

शङ्करभाष्यम् ।

शृणु त्वं तं वैरिणं सर्वानर्थकरं यं त्वं पृच्छसि भगवानुवाच "ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः। वैराग्यस्याथ मोक्षस्य षण्णां भग इतीङ्गना" ऐश्वर्य्यादि षट्कं यस्मिन् वासुदेवे नित्यमप्रतिबद्धत्वेन सामस्त्येन च वर्त्तते" उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं। वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति" उत्पत्त्यादि विषयञ्च विज्ञानं यस्य स वासुदेवोऽत्र भगवानिति वाच्यः इति काम एष सर्वलोकशत्रुः यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित् क्रोधत्वेनापरिणमते अतः क्रोधोऽप्येष एव रजोगुणसमुद्भवः रजश्च तद्गुणश्च रजोगुणः स समुद्भवो यस्य स कामो रजोगुणसमुद्भवः रजोगुणस्य वा समुद्भवः कामो ह्युद्भूतः रजः प्रवर्तयन् पुरुषं प्रवर्तयति तृष्णया ह्यहं कारित इति दुःखिनां रजःकार्ये से

वादौ महत्वात् मल्लापः श्रूयते महाशनो महदशनमस्येति महाशनोऽतएव महापाप्मा कामेन मे रितो जन्तुः पापं करोति अतो विद्धयेनं काममिह संसारे वैरिणम् ॥ ३७ ॥

आनंदगिरिकृतटीका।

सम्प्रतिपत्तिवचनं प्रत्नोति अविवति तस्य वैपरीत्यं स्फोरयति सर्वेति अप्रस्तुतं कि मिति प्रस्तूयते तत्राह यं त्वमिति भगवच्छब्दार्थं निर्द्धारयितुं पौराणिकं वचनमुदाह रति ऐश्वर्यस्येति समग्रस्येत्येतत् प्रत्येकं विशेषणं संबध्यते अथ शब्दस्तथा शब्दपर्यायः समुच्चयार्थः मोक्षशब्देन तदुपायो ज्ञानं विवक्ष्यते उदाहृतवचसस्तात्पर्यमाह ऐश्वर्या दीति स वाच्यो भगवानिति सम्बन्धः तत्रैव पौराणिकं वाक्यान्तरं पठति उत्पत्तिमि ति नूनानामिति प्रत्येकमुत्पत्त्यादिभिः सम्बध्यते कारणार्थौ चोत्पत्तिप्रलयशब्दौ क्रिया मात्रस्य पुरुषान्तरगोचरत्वसम्भवादगतिर्गतिश्चेत्यागामिन्यौ सम्पदापदौ सूच्येते वाक्या न्तरस्यापि तात्पर्यमाह उत्पत्त्यादीति वेत्तीत्युक्तःसाक्षात्कारो विज्ञानमित्युच्यते सम ग्रैश्वर्यादिसम्पत्ति समुच्चयार्थश्चकारः उक्तलक्षणो भगवान् किमुक्तवानिति तदाह काम इति कामस्य सर्वलोकशत्रुत्वं विपदयति यन्निमित्तेति तथापि कथं तस्यैव क्रोधत्वं त दाह स एष इति कामक्रोधयोरेव हेयत्वद्योतनार्थं कारणंकथयति रजोगुण इति कारण द्वारा कामादेरेव हेयत्वमुक्त्वा कार्यद्वारापि तस्य हेयत्वं सूचयति रजोगुणस्येति कामस्य पुरुषप्रवर्तकत्वमेव न रजोगुणजनकत्वमित्याशङ्क्याह कामो हीति तत्रैवानुभवानुसारिणीं लोकप्रसिद्धिं प्रमाणयति तृष्णया हीति तस्य योग्यायोग्यविभागमन्तरेण बहुविषत्वं दं र्शयति महाशन इति बहुविषयत्वप्रयुक्तं कर्म निर्दिशति अन इति सर्वविषयत्वेऽपि कु तोऽस्य पापत्वमित्याशङ्क्याहकामेनेति कामस्योक्तविशेषणवत्त्वे फलितमाहअतइति॥३७॥

स्वामिकृतटीका।

अत्रोत्तरं श्रीभगवानुवाच काम एष क्रोध एष इत्यादि यस्त्वया पृष्टो हेतुरेव काम एव ननु क्रोधोऽपि पूर्वं त्वयोक्त इन्द्रियस्येन्द्रियस्यार्थे इत्यत्र सत्यं नासौ ततः पृथक् किन्तु क्रोधोऽप्येष काम एव हि केनचित् प्रतिहतः क्रोधात्मना परिणमते पूर्वं पृथक्त्वे नोक्तोऽपि क्रोधः कामज एवेत्यभिप्रायीकृत्योच्यते रजोगुणात् समुद्भवतीति तथा अनेन सत्वववृद्ध्या रजसि क्षयं नीते सति कामो न जायत इति सूचितम् एनं काममिह मोक्षमार्गे वैरिणं विद्धि अयंच वक्ष्यमाणक्रमेण हन्तव्य एव यतो नासौ दानेन सन्धातुं शक्य इत्याह महाशनो महदशनं यस्य दुष्पूर इत्यर्थः नच साम्ना सन्धातुं शक्योयतो महापाप्मा अत्युग्रः ॥ ३७ ॥

नवलभाष्य।

अब श्रीभगवान् अर्जुनसे कहते हैं कि हे अर्जुन जिसको तू पूछता है उस सब अनर्थकरने वाले वैरीको सुन अब यहां व्यासजीने श्रीकृष्णमहाराजको भगवान् ऐसा कहाहै तिसका अर्थ प्रसंगवशसे भाष्यकार कहतेहैं तहां भगवान् शब्दके अर्थके कहनेवाले ऋषियोंके कहेहुए प्रमाणभूत दोश्लोकलिखते हैं [ऐश्वर्य्यस्यसमग्रस्य धर्मस्ययशसः श्रियः । वैराग्यस्याथ मोक्षस्यषण्णांभगइतींगना ॥ १ ॥ उत्पत्तिंप्रलयंचैवभूतानामागतिंगतिम् वेत्तिविद्यामविद्यांच सवाच्योभगवानिति २] अर्थ ॥ संपूर्ण ऐश्वर्य्य १

औरधर्म २ औरयश ३ औरलक्ष्मी ४ और वैराग्य ५ औरमोक्ष ६ इनछः
वस्तुओंको नामभगहै ॥ १ ॥ और जोसब भूतोंकी उत्पत्तिकोजाने और
सबके प्रलयको जानताहोय और जो सबभूतोंके आगमनको जानताहोय
अर्थात् पहिले इसयोनिमें और इसलोकमें यहप्राणीरहा और अबवहांसे
इसयोनिमें और इसलोकमें प्राप्तहुआहै ऐसा जो जानताहोय और जो
सबभूतों की गतिको जानताहोय अर्थात् अबइसलोकको यहजायगा ऐसा
जो जानताहोय और जो विद्या और अविद्या इनको जानताहोय उसको
भगवान् कहतेहैं तहां ऐश्वर्यादि छःपदार्थ जिसवासुदेवमें नित्य प्रतिबन्ध
रहित और संपूर्णभावकरके रहतेहैं और उत्पत्तिको आदि लेकेजे छःपदार्थ
तिनकाज्ञान जिसको सदारहाकरताहै सो वासुदेव शब्दवाच्य अर्थात् शब्द
से कहागया भगवान्है सो भगवान् अर्जुनसे कहतेहैं कि हे अर्जुन यहका-
मसबलोंको अपनेवशमें करताहुआ परमशत्रु है जिसके कारणसे सब
अनर्थोंकी प्राप्ति प्राणियोंको हुआ करतीहै और यहकामही किसी मनुष्या-
दिकरके प्रतिहतहोजाय मनाकिया जाय तौ क्रोधरूपकरके विपरिणामको
प्राप्तहोताहै अर्थात् किसी पुरुषको किसी बातकी कामनाम इच्छा उत्पन्न
हुई कि यह वस्तुहम भोजनकरेंगे वा किसीको देवेंगे और उसी समयमें
किसीने उसइच्छा को वारण करदिया नामनहीं होनेदिया तो वहइच्छाही
क्रोधरूप होजातीहै इस अभिप्रायसे भगवान्ने कहा कि यहकामही क्रोधरूपे
क्रोधरूपको धारण करताहै और यहकाम रजोगुण समुद्भवहै अर्थात् रजो-
गुणसे उत्पन्नहुआ है अथवारजोगुण इसकामसे उत्पन्नहोता है इससे यह
कामही रजोगुणका समुद्भवहै अर्थात् उत्पत्ति कारणहै क्योंकि जिससमय
में काम उत्पन्नहोता है अर्थात् किसी वस्तुकी प्राप्तिकी अभिलाष होती
तो वह अभिलाष रजोगुणको प्रवृत्त करतीहुई पुरुषको कर्ममें प्रवृत्तकरती
है फिर जबकर्ममें प्रवृत्तहुआ तब उसको तृष्णाबढ़ती है फिरजब तृष्णाकी
वृद्धिहुई तो अहंकारयुक्त रजोगुणके दुःखसे दीनहुआ धनादि लाभके लि-
[illegible] सेवादिकर्ममें प्रवृत्तहुए पुरुषोंको अनर्थक [illegible]
अर्थात् जबतक [illegible] किसी वस्तुकी कामनानहोय तो किसका [illegible]
[illegible] कर्ममें प्रवृत्तहोय इससे कामही रजोगुणका [illegible]
[illegible] और यहकाम महाशनहै अर्थात् बहुतभोजन [illegible]
[illegible] किसीभी [illegible] तृप्ति नहीं और यहकाम [illegible]
[illegible]
[illegible] ॥ ३७ ॥

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

शङ्करभाष्यम्।

कथं वैरीति दृष्टान्तैः प्रत्याययति धूमेनेति धूमेन सहजेनाव्रियते वह्निः प्रकाशात्मकोऽप्रकाशात्मकेन यथा चादर्शो मलेन च यथोल्बेन गर्भवेष्टनेन जरायुणा आवृत आच्छादितो गर्भस्तथा तेनेदमावृतम् ॥ ३८ ॥

आनन्दगिरिकृतटीका।

उत्तरश्लोकमवतारयति कथमिति अनेकदृष्टान्तोपादानं प्रतिपत्तिसौकर्यार्थं सहजस्य धूमस्य प्रकाशात्मकवह्निंप्रति आवरणत्वसिद्ध्यर्थं विशिनष्टि अप्रकाशात्मकेनेति ॥ ३८ ॥

स्वामिकृतटीका।

कामस्य वैरित्वं दर्शयति धूमेनेति धूमेन सहजेन यथा वह्निराव्रियत आच्छाद्यते यथा चादर्शो मलेन आगन्तुकेन यथा चोल्बेन गर्भवेष्टनचर्मणा गर्भः सर्वतो निरुद्ध्य आवृतस्तथा तेन कामेनावृतमिदम् ॥ ३८ ॥

नवलभाष्य।

कैसे काम वैरीहै इसअर्थको अनेक दृष्टान्तों करके निश्चय करातेहैं (धूमेनेति) हे अर्जुन जैसेसंग उत्पन्नहुआ जो अप्रकाशरूप धूमतिसकरके प्रकाशस्वरूप अग्नि आवृत आच्छादित होताहै और जैसे आदर्श जो दर्पण सो आगन्तुक पीछेसे होनेवालेमल करके आवृत मलिनहुआ स्पष्टमुख को नहीं दिखलाइसकाहै और जैसे उल्व जो गर्भको चारोंतरफसे आच्छादनकरनेवाला चर्म तिसकरके गर्भस्थबालक लपिटाहुआ अन्यथाही और तरहसेही प्रतीतहोताहै तैसेही कामकरके यहआच्छादित होरहाहै ॥ ३८ ॥

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥ ३९ ॥

शङ्करभाष्यम्।

किं पुनस्तदिदं शब्दवाच्यं यत् कामेनावृतमित्युच्यते आवृतमिति आवृतमेतेन ज्ञानं ज्ञानिनो नित्यवैरिणा ज्ञानी हि जानात्यनेन अहमनर्थेप्रयुक्तः पूर्वमेवातः दुःखी च भवति नित्यमेव अतोऽसौ ज्ञानिनो नित्यवैरी नतु मूर्खस्य स हि कामं तृष्णाकाले मित्रमिव पश्यंस्तत्कार्ये दुःखे प्राप्ते जानाति तृष्णयाहं दुःखित्वमापादित इति न पूर्वमेवातो ज्ञानिन एव नित्यवैरी किं रूपेण काम इच्छैव रूपमस्येति कामरूपस्तेन दुष्पूरेण दुःखेन पूरणमस्येति दुष्पूरेण दुःखेन पूरणमस्येति दुःपूरोऽनलस्तेनानलेन नास्यालं पर्याप्तिर्विद्यत इत्यनलस्तेन ॥ ३९ ॥

आनंदगिरिकृतटीका।

सामान्यतो निर्दिष्टं विशेषतो निर्दे[illegible] [illegible] अनन्तर[illegible] [illegible]वतारयति किं पुनरिति कामस्य ज्ञानं [illegible] विशेषणं प्रतीकमादाय व्याचष्टे [illegible] [illegible]मित्याह [illegible] [illegible]ति [illegible]नर्थप्राप्तिमन्तरेण [illegible] [illegible] [illegible] प्राप्यते [illegible] [illegible] कामा[illegible]

त्मता न प्रशस्तेति कामो नित्यवैरी भवति ततः कुतो ज्ञानिविशेषणमित्याशङ्क्याह न त्विति अज्ञस्य नासौ नित्यवैरीत्येतदुपपादयति सहीति कार्यप्राप्तिप्रागवस्था पूर्वमित्युक्ता अज्ञंप्रति वैरित्वे सत्यपि कामस्य नित्यवैरित्वाभावे फलितमाह अत इति स्वरूपतो नित्यवैरित्वाविशेषेऽपि ज्ञानाज्ञानाभ्यामवान्तरभेदसिद्धिरित्यर्थः आकांक्षाद्वारा प्रकृतं वैरिणमेव स्फोरयति किं रूप्येणेत्यादिना ॥ ३९ ॥

स्वामिकृतटीका ।

इदं शब्दनिर्दिष्टं दर्शयन् वैरित्वं स्फुटयति आवृतमिति इदं विवेकज्ञानं एतेनावृतम् अज्ञस्य खलु भोगसमये कामःसुखहेतुरेव परिणामे तु वैरित्वं प्रतिपद्यते ज्ञानिनः पुनस्तत्कालमप्यनर्थानुसन्धानाद् दुःखहेतुरेवेति नित्यवैरिणेत्युक्तं किञ्च विषयैः पूर्यमाणोऽपि यो दुष्पूरः अपूर्यमाणस्तु शोकसन्तापहेतुत्वादनलतुल्यः अनेन सर्वान् प्रतिवैरित्वमुक्तम् ॥ ३९ ॥

नवलभाष्य ।

न कहौ कामकरके यहआच्छादित होरहाहै यहां स्पष्टनहीं कहा वहकौनपदार्थ है जो आच्छादित होरहाहै इसआकांक्षामें कहते हैं (आवृतमिति) हे अर्जुन ज्ञानीका नित्यवैरी जो यहकाम तिसकरके ज्ञान आवृत होरहा है अर्थात् आच्छादित होरहाहै नामढकिरहा है काहेसे यहज्ञानीका नित्यवैरीहै जिससे ज्ञानीपुरुष पहिलेही यहजानताहै कि मुझको यहकाम अनर्थमें प्रेरणा करताहै इसीसे दुःखित होताहै इसकारणसे यहकाम ज्ञानीका नित्यवैरी है और मूर्खका नहीं है क्योंकि वह मूर्खपुरुष तृष्णाहोने के समय में कामको मित्ररूप करके देखताहै और पीछे जब दुःखप्राप्त होताहै तो जानता है कि इसतृष्णाहीने मुझको दुःखितकिया है और पहिले वहमूर्ख नहीं जानसक्ता है कि कामही मेरावैरीहै इससे ज्ञानीहीका नित्यवैरीकाम है और यहकौनरूप का कामहै कि कामजो इच्छा सोईहै स्वरूप जिसका ऐसाहै और फिर यहकामदुष्पूरहै अर्थात् दुःखकरके इसकी पूर्तिहोती है इससे यहदुष्पूर कहाताहै और फिरयहकाम अनलहै अर्थात् नहीं कभीपरिपूर्णता इसकी होती है इससे यहअनल है ऐसे कामकरके ज्ञानआच्छादित होरहा है ॥ ३९ ॥

इन्द्रियाणि मनोबुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥ ४० ॥

शङ्करभाष्यम् ।

किमधिष्ठानः पुनः कामो ज्ञानस्यावरणत्वेन वैरी सर्वस्य लोकस्येत्यपेक्षायामाह ज्ञाते हि शत्रोरधिष्ठाने सुखेन निबर्हणं कर्तुं शक्यत इति इन्द्रियाणीति इन्द्रियाणि मनो बुद्धिश्चास्य कामस्याश्रय उच्यते एतैरिन्द्रियादिभिराश्रयैर्विमोहयति विविधं मोहयत्येष कामो ज्ञानमावृत्याच्छाद्य देहिनं शरीरिणम् ॥ ४० ॥

स्वामिकृतटीका।

यस्मादेवं तस्मादिति तस्मादादौ विमोहात् पूर्वमेवेन्द्रियाणि मनो बुद्धिञ्च नियम्य पाप्मानं पापरूपमेनं कामं हि स्फुटं प्रजहि घातय यद्वा प्रजहि परित्यज ज्ञानमात्मविषयं विज्ञानं शास्त्रीयं तयोर्नाशनं यद्वा ज्ञानं शास्त्राचार्योपदेशजं विज्ञानं निदिध्यासजं तमेव धीरो विज्ञाय प्रज्ञां कुर्वीतेति श्रुतेः ॥ ४१ ॥

नवलभाष्य।

जिससे ऐसाहै तिसकारणसे हे अर्जुन तुमप्रथम इन्द्रियोंको नियमनकरके अर्थात् वशमें करके पापका आचरणकरानेवाला जो यहकामहै तिसको त्यागदेउ जिससे यहकाम वैरीहै और ज्ञानविज्ञानका नाशनहै अर्थात् शास्त्रद्वारा और गुरूकी द्वाराजो आत्मादि पदार्थोंका जानना है उसको ज्ञान कहतेहैं और विशेषकरके अपने हृदयमें उसका अनुभव होनाहै उसको विज्ञान कहतेहैं तिनदोनों का यहनाशरूपही है इससे इसकामका परित्याग करौ ॥ ४१ ॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेः परतस्तु सः॥ ४२॥

शङ्करभाष्यम्।

इन्द्रियाणि आदौ नियम्य कामं शत्रुं जहि इत्युक्तं तत्र किमाश्रयः कामं जह्यादित्युच्यते इन्द्रियाणीति इन्द्रियाणि श्रोत्रादीनि पञ्च देहं स्थूलं बाह्यं परिच्छिन्नं चापेक्ष्य सौक्ष्म्यान्तरत्वव्यापित्वाद्यपेक्ष्य पराणि प्रकृष्टान्याहुः पण्डितास्तथेन्द्रियेभ्यः परं मनः सङ्कल्पात्मकं तथा मनसस्तु परा बुद्धिर्निश्चयात्मिका तथा यः सर्वदृश्येभ्यो बुद्ध्यन्तेभ्योऽभ्यन्तरोऽयं देहिनं इन्द्रियादिभिराश्रयैर्युक्तः कामो ज्ञानावरणद्वारेण मोहयतीत्युक्तं बुद्धेः परतस्तु सः स बुद्धेर्द्रष्टा परमात्मा ॥ ४२ ॥

आनन्दगिरिकृतटीका।

पूर्वोक्तमनूद्य कामत्यागस्य दुष्करत्वं मन्वानोऽप्यन्येत्यत्रोक्तमेव स्पष्टीकर्तुं प्रश्नपूर्वकं श्लोकान्तरमवतारयति इन्द्रियाणीत्यादिना पञ्चेति ज्ञानेन्द्रियवत् कर्मेन्द्रियाण्यपि वागादीनि गृह्यन्ते किमपेक्षया तेषां परत्वं तत्राह देहमिति तथापि केनप्रकारेण परत्वं तत्राह सौक्ष्म्येति आदिशब्देन कारणत्वादि गृह्यते इन्द्रियापेक्षया सङ्कल्पेत्यादिना मनसः स्वरूपोक्तिपूर्वकं परत्वं कथयति तथेति मनसि दर्शितं न्यायं बुद्धावतिदिशति तथा मनसः [illegible] यो बुद्धेरित्यादि व्याचष्टे तथेत्यादिना आत्मनो यथोक्तविशेषणस्य [illegible] [illegible] च [illegible] ॥ ४२ ॥

स्वामिकृतटीका।

[illegible] सर्वोत्तमः स आत्मा तं विमोहयति देहिनमिति [illegible] [illegible] आत्मा स इति [illegible] ॥ ४२ ॥

नवलभाष्य ।

प्रथम इन्द्रियादिकों को वशकरके कामरूप शत्रुका त्यागकरो यह कहा तहां किसके आश्रयसे कामको त्यागकरै इसआकांक्षामें कहते हैं कि [इन्द्रियाणीति] हे अर्जुन परिच्छिन्नजो अर्थात् इतनाहै ऐसे प्रमाणमें आनेवाला जो वाह्यस्थूल देहंतिसकी अपेक्षा करके श्रोत्रादिकजे इन्द्रियांते श्रेष्ठहैं क्योंकि इन्द्रीसूक्ष्म हैं और भीतर रहनेवाली हैं इससे और इन्द्रियोंसे भी मनश्रेष्ठहै जिससे इन्द्रियोंकी प्रवृत्तिमनके आधीनहै और संकल्प विकल्प करने वालेमनसे भी बुद्धिश्रेष्ठहै क्योंकि बुद्धिनिश्चय करानेवाली है और विना निश्चयकोई कार्यवनतानहीं इससे श्रेष्ठहै और बुद्धिपर्यन्त जितनेदृश्य पदार्थ हैं तिनसवोंके भीतर जोहै और जिसको इन्द्रियादि आश्रयकरके युक्तकाम ज्ञानकेआवरण द्वारा मोहकराता है ऐसा कहिआये हैं और जो बुद्धिसे भी परेहै और बुद्धिका देखने वालाहै सो परमात्माहै ॥ ४२ ॥

एवं बुद्धेः परं बुध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ॥ ४३ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां भीष्मपर्वणि श्रीभगवद्गीता सूपनिपत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मयोगो नाम तृतीयोऽध्यायः ॥ ३ ॥

शङ्करभाष्यम् ।

ततः किं एवमिति एवं बुद्धेः परमात्मानं बुध्वा ज्ञात्वा संस्तभ्य सम्यक् संस्तम्भनं कृत्वा स्वेनैवात्मना संस्कृतेन मनसा सम्यक् समाधायेत्यर्थः जहीनं शत्रुं महाबाहो कामरूपं दुरासदं दुःखेनासदः आसादनं प्राप्तिर्यस्य तं दुरासदं दुर्विज्ञेयानेकविशेषमिति ॥ ४३ ॥

इति भाष्ये तृतीयोऽध्यायः ॥ ३ ॥

आनंदगिरिकृतटीका ।

इन्द्रियादि समाधानपूर्वकमात्मज्ञानात् कामजयो भवतीत्युपसंहरति एवमित्यादिना संस्कृतं मनो मनःसमाधाने हेतुरिति सूचयति संस्तभ्येति प्रकृतं शत्रुमेव विशिनष्टि कामरूपमिति तस्य दुरासदत्वे हेतुमाह दुर्विज्ञेयेति अनेके विशेषास्तृष्णा मनोरथादयोऽस्येति दृष्ट्वा तदनेनोपायभूता कर्मनिष्ठा प्राधान्येनोक्ता उपेयात्तु ज्ञाननिष्ठा गुणत्वेनेति विवेक्तव्यम् ॥ ४३ ॥

इति आनन्दगिरिकृतटीकायां तृतीयोऽध्यायः ॥ ३ ॥

स्वामिकृतटीका।

उपसंहरति एवमिति बुद्धेरेव विषयेन्द्रियादिजन्याः कामादिविक्रियाः आत्मा तु निर्विकारस्तत्साक्षीत्येवं बुद्धेः परमात्मानं बुद्ध्वा आत्मना एवंभूतया निश्चयात्मिकया बुद्ध्या आत्मानं मनः संस्तभ्य निश्चलं कृत्वा कामरूपिणं शत्रुं जहि मारय दुरासदं दुःखेनासादनीयं दुर्विज्ञेयमित्यर्थः॥ स्वधर्मेण यमाराध्य भक्त्या मुक्तिमिता बुधाः। तं कृष्णं परमानन्दं तोषयेत् सर्वकर्मभिः॥ ४३॥

इति श्रीधरस्वामिकृतटीकायां तृतीयोऽध्यायः॥ ३॥

नवलभाष्य।

तिसके अनन्तर फिरक्या करना चाहिये इस अपेक्षामें कहतेहैं कि (एवमिति) हे अर्जुन इसप्रकार बुद्धिसे परे इसआत्माको जानके और संस्कारयुक्त जोमन तिसकरके आपही संस्तंभनकरके अर्थात् समाधानकरके हे महाबाहो हे लम्बायमानभुज यह जो दुरासदनाम दुष्प्राप अर्थात् दुःखसे जाननेयोग्य ऐसाजो कामरूप शत्रुतिसको नाशकरो॥ ४३॥

इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णार्जुनसंवादेकर्मयोगाख्यतृतीयाध्याये श्रीस्वर्गवास्युमादत्तकृत नवलभाष्ये तत्त्वविवेकामृतेतृतीयोध्यायःसमाप्तः॥ ३॥

श्रीमद्भगवद्गीतासटीक ॥

चतुर्थाध्यायः ।

श्रीभगवानुवाच ।

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

शङ्करभाष्यम् ।

श्रीभगवानुवाच योऽयं योगोऽध्यायद्वयेनोक्तो ज्ञाननिष्ठालक्षणः स सन्न्यासः स कर्म्मयोगोपायः यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता अतः परिसमाप्तं वेदार्थं मन्वानस्तं वंशकथनेन स्तौति भगवान् इमम् अध्यायद्वयेनोक्तं योगं विवस्वते आदित्याय सर्गादौ प्रोक्तवान् अहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय तेन योगबलेन युक्तास्ते समर्था भवन्ति ब्रह्म परिरक्षितुं ब्रह्मक्षत्रे परिपालिते जगत्परिपालयितुमलम् अव्ययमव्ययफलत्वाद्यस्य सम्यक् दर्शननिष्ठालक्षणस्य मोक्षाख्यं फलं व्येति स च विवस्वान् मनवे प्राह मनुरिक्ष्वाकवे स्वपुत्रायादिराजायाब्रवीत् ॥ १ ॥

आनन्दगिरिकृतटीका ।

पूर्वाभ्यामध्यायाभ्यां निष्ठाद्वयात्मनो योगस्य गीतत्वात् वेदार्थस्य च समाप्तत्वात् वक्तव्याशेषाभावात् उक्तयोगस्य कृतिमत्त्वशङ्कानिवृत्तये वंशकथनपूर्विकां स्तुतिं भगवान् व्याजहारेत्याह श्रीभगवानिति तदेतद्भगवद्वचनं वृत्तानुवादद्वारेण प्रस्तौति योऽयमिति ज्ञानेति संन्यासेनेति कर्तव्यतया सहितस्य ज्ञानात्मनो योगस्य कर्माख्यो योगो हेतुरुपायो ऽविद्भूतं निष्ठाद्वयं प्रतिष्ठापितमित्यर्थः उक्ते योगद्वये प्रमाणमुपन्यस्यति यस्मिन्निति अथवा ज्ञानयोगस्य कर्मयोगोपायत्वमेव स्फुटयति यस्मिन्निति प्रवृत्त्या लक्ष्यते ज्ञाने कर्मयोगो निवृत्त्या च लक्ष्यते ज्ञानयोग इति विभागः यद्यपि पूर्वस्मिन्नध्यायद्वये यथोक्तं निष्ठाद्वयमाख्यातं तथापि वक्ष्यमाणाध्यायेषु [illegible] गीतासु वे[illegible] ति [illegible] दर्शितं [illegible] इति वंशकथनं [illegible] मः [illegible] [illegible] [illegible]

त्यसम्भवाद्भगवतस्तथाविधप्रवृत्तिदर्शनात् कृतार्थता कल्पनीयेत्याह विवस्वत इति अव्ययवेदमूलत्वादव्ययत्वं योगस्य गमयितव्यं किमिति भगवता कृतार्थेनापि योगप्रवचनं कृतमिति तदाह जगदिति कथं यथोक्तेन योगेन क्षत्रियाणां बलाधानं तदाह तेनेति युक्ताः क्षत्रिया इति शेषः ब्रह्मशब्देन ब्रह्मणत्वजातिरुच्यते यद्यपि योगप्रवचनेन क्षत्रं रक्षितं तेन च ब्राह्मणत्वं तथापि कथं रक्षणीयं जगदशेषं रक्षितमित्याशङ्क्याह ब्रह्मेति ताभ्यां हि कर्मफलभूतं जगदनुष्ठानद्वारा रक्षितुं शक्यमित्यर्थः योगस्याव्ययत्वे हेत्वन्तरमाह अव्ययफलत्वादिति ननुकर्मफलवदुक्तयोगफलस्यापि साध्यत्वेन क्षयिष्णुत्वमनुमीयते नेत्याह नहीति अपुनरावृत्ति श्रुतिप्रतिहतमनुमानं न प्रमाणीभवतीति भावः भगवता विवस्वते प्रोक्तो योगस्तत्रैव पर्यवस्यतीत्याशङ्क्याह स चेति स्वपुत्रायेत्युभयत्र सम्बध्यते आदिराजायेतीक्ष्वाकोः सूर्यवंशप्रवर्त्तकत्वेन वैशिष्ट्यमुच्यते ॥ १ ॥

स्वामिकृतटीका ।

आविर्भावतिरभावाविष्कर्त्तुं स्वयं हरिः तत्त्वम्पदविवेकार्थं कर्मयोगं प्रशंसति एवं तावदध्यायद्वयेन कर्मयोगोपायकज्ञानयोगो मोक्षसाधनत्वेनोक्तस्तमेव ब्रह्मार्पणादिगुणविधानेन तत्त्वं पदार्थविवेकादिना च प्रपञ्चयिष्यन् प्रथमं तावत् परम्पराप्राप्तत्वेन स्तुवन् श्रीभगवानुवाच इममिति त्रिभिः अव्ययफलत्वादव्ययं इमं योगं पुराहं विवस्वते आदित्याय कथितवान् स च स्वपुत्राय मनवे श्राद्धदेवाय प्राह स च मनुः स्वपुत्रायेक्ष्वाकवेऽब्रवीत् ॥ १ ॥

नवलभाष्य ।

अब यहदो अध्यायकरके कहागया जो संन्याससहित ज्ञानलक्षणयोग तिसकाकर्म योगउपाय है अर्थात् साधनहै जिसमें संपूर्णवेदार्थ समाप्तहै सो वहदो प्रकारकाहै एक प्रवृत्तिलक्षण एक निवृत्तिलक्षण और यहीयोग भगवान्को सवगीतामें कहनेको इष्टहै इससे सववेदोंका अर्थभगवान् इसमें समाप्तमानके इसकी वंशपरंपरा कथनद्वारा स्तुतिकरतेहुए अर्जुनसे कहते हैं कि [इममिति] हे अर्जुन यह जो दोअध्यायकरके कहा जो योगतिसको सृष्टिकी आदिमें मैंविवस्वान् जो सूर्य तिनकेअर्थ कहताहुआ सो जगत्की रक्षाकरनेवाले जे क्षत्रिय तिनमें वलके धारण करनेको कहा तिसयोगवलकरके युक्तहुए वे क्षत्रिय ब्राह्मणों की रक्षाकरनेको सामर्थ्य युक्तहोतेहुए और ब्राह्मणक्षत्रियों की रक्षाहोनेसे सवजगत्की रक्षाकरने को समर्थ हुए फिर यह कैसायोगहै कि अव्ययहै नाशरहितहै अर्थात् इसकाफलनाशरहितहै इससे योगभी नाशरहितहै क्योंकि नहीं कभी सम्यग्दर्शन निष्ठारूप योगका मोक्षरूप फलनाशको प्राप्तहोताहै और सूर्यअपना पुत्रजो वैवस्वतमनु तिससे इसयोगको कहतेहुए और मनुभी अपनापुत्रजो सवराजाओंमें प्रथमराजा इक्ष्वाकु तिसके अर्थकहतेहुए ॥ १ ॥

एवं परंपराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥

वहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

शङ्करभाष्यम्।

या वासुदेवे अनीश्वरा सर्वज्ञा शङ्का मूर्खाणां तां परिहरन् श्रीभगवानुवाच यदर्थो ह्यर्जुनस्य प्रश्नः बहूनीति बहूनि मे मम व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन तान्यहं वेद जाने सर्वाणि नत्वं वेत्थ न जानीषे परन्तप धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वादहं पुनर्नित्यशुद्धबुद्धमुक्तसत्यस्वभावत्वादनावरणज्ञानशक्तिरिति वेदाहं हे परन्तप ॥ ५ ॥

आनन्दगिरिकृतटीका।

भगवत्यज्ञानां मनुष्यत्वशंकां वारयितुं प्रतिवचनमवतारयति या वासुदेव इति अन्यथा प्रश्ने कथमाशंकान्तरं परिहर्तुं भगवद्वचनमित्याशंक्य प्रतिवचनयोरेकार्थत्वमाह यदर्थोहीति यस्य शंकितस्य विरोधस्य परिहारार्थः तस्य प्रश्नस्तमेव परिहारं वक्तुम् भगवद्वचनमित्यर्थः अतीतानेकजन्मवत्त्वम् ममैव नासाधारणं किन्तु सर्वप्राणिसाधारणमित्याह तवचेति तानि प्रमाणाभावान्नप्रतिभान्तीत्याशंक्याह तानीति ईश्वरस्यानावृतज्ञानत्वादित्यर्थः किमिति तर्हि तानि मम न प्रतीयन्ते तयावृतज्ञानत्वादित्याह नत्वमिति परान् परिकल्प्य तत्परिभवार्थं प्रवृत्तत्वात् तवज्ञानावरणं विज्ञेयमित्याह परन्तपेति अर्जुनस्य भगवता सहातीतानेकजन्मवत्त्वे तुल्येऽपि ज्ञानवैषम्ये हेतुमाह धर्मेति आदिशब्देन रागलोभादयो गृह्यन्ते ईश्वरस्यातीतानागतवर्तमानसर्वार्थविषयज्ञानत्वे हेतुमाह अहमिति ॥ ५ ॥

स्वामिकृतटीका।

रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरम् श्रीभगवानुवाच बहूनीति तान्यहंवेद वेद्मि शक्तित्वात् त्वन्तु न वेत्थ वेत्सि अविद्यावृतत्वात् ॥ ५ ॥

नवलभाष्य।

अब वसुदेवके पुत्र जो कृष्ण तिसमें अनीश्वर और असर्वज्ञत्वकी शंका जो मूर्खोंको अर्थात् कृष्ण ईश्वरनहीं और सर्वज्ञभी नहीं हैं किन्तु जैसे और मनुष्य होते हैं तैसेही हैं यहशंका जो कृष्णभगवान् में मूर्खोंको होरही है तिसको दूरकरतेहुए श्रीभगवान् कहते हैं कि [बहूनीति] हे अर्जुन मेरे जन्म बहुत व्यतीतहुए और तेरे भी जन्म बहुत व्यतीतहुए तिनसबजन्मों को मैं जानताहूं और हे परन्तप शत्रुतापन तू नहींजानताहै अर्थात् अधर्म और धर्म इत्यादिकर्मों करके प्रतिबद्ध अर्थात् रुकी हुई ज्ञानशक्ति जिसकी ऐसा तू है इसकारणसे नहींजानसक्ताहै और मैं तो फिर नित्य शुद्धबुद्धमुक्तसत्यस्वभाव होनेसे नहीं आच्छादित नहीं ढकीहुई ज्ञानशक्ति जिसकी ऐसाहूं इसकारणसे जानताहूं ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोपि सन्।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

युद्ध्या प्रीतिमत्तया गुरुतोनिःशङ्कममर्षस्य भक्तो मित्रचितः समानवयः स्निग्धः सर्वदनुव ते एतदिति कथं योगोविशेष्यते तत्राह प्राग्मिति ॥ ३ ॥

स्वामिकृतटीका ।

स एवायमिति स एवायंयोगोयोगपरिच्छिन्ने सम्प्रदायेमति पुनश्च मयाते तुभ्यमुक्त यतस्त्वं मम भक्तोऽसि सखा च अन्यस्मै मया नोच्यते हि यस्मादेतदुत्तमं रहस्यम् ॥ ३ ॥

नवलभाष्य ।

तो हे अर्जुन इसप्रकार अजितेन्द्री और दुर्बलपुरुषों को प्राप्तहोके इस योगको नष्टदेखके और परमेश्वरके भजनसे विमुख इसमनुष्य लोककोभी देखके सोई प्राचीन अर्थात् पहिलेका योगमैंने तेरे अर्थकहा और तूमेरा भक्तहै और सखाहै यहज्ञानके रहस्यनामगुप्त और उत्तमश्रेष्ठ ज्ञानरूपहै जो यह योग सो कहा ॥ ३ ॥

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥

शङ्करभाष्यम् ।

भगवता विप्रतिषिद्धमुक्तमिति माभूत् कस्यचित् बुद्धिरिति परिहारार्थं चोद्यमिव कुर्वन् अर्जुन उवाच अपरमिति अपरमर्वाक् वसुदेवगृहे भगवतो जन्म परं पूर्वं सर्गादौ जन्मोत्पत्तिर्विवस्वत आदित्यस्य तत् कथमेतद्विजानीयामविरुद्धार्थतया यस्त्वमेवादौ प्रोक्तवानिमं योगं स एव त्वमिदानीं मह्यं प्रोक्तवानसीति ॥ ४ ॥

आनंदगिरिकृतटीका ।

भगवति लोकस्यानीश्वरत्वशंकां निवर्तयितुम् चोद्यमुद्भावयति भगवतेति) परिहारार्थं भगवतो मनुष्यवदवस्थितस्यानीश्वरत्वमुपेत्य तद्वचने शंकितविप्रतिषेधस्येतिशेषः भगवतोनिजरूपमुपेत्य वेदंचोद्यं किन्तु लीलाविग्रहं गृहीत्वेति वक्तुम् चोद्यमिवेत्युक्तं एतच्छब्दार्थमेव स्फुटयति यस्त्वमिति ॥ ४ ॥

स्वामिकृतटीका ।

भगवतो विवस्वन्तं प्रति योगोपदेशासम्भवं पश्यन्नर्जुन उवाच अपरमिति अपरं अर्वाचीनं तव जन्म परं प्राक्कालीनं विवस्वतोजन्म तस्मात्त्वाधुनातनत्वाच्चिरन्तनाय विवस्वते त्वमादौ योगं प्रोक्तवानित्येतत् कथमहं जानीयां ज्ञातुंशक्नुयाम् ॥ ४ ॥

नवलभाष्य ।

अब भगवान् का यहकथन विरुद्धहै क्योंकि इसशरीरसे देवताओं को उपदेश सृष्टिकी आदिमेंकैसे संभवहोता है ऐसीबुद्धि किसी मनुष्यकी कहीं भगवान्में न होय इसकारण से अर्जुन प्रश्नकरताहै कि [अपरमिति] हे कृष्ण आपका जन्म तो वसुदेवके गृहमें अवहुआ और सूर्यका जन्मसृष्टि के आदिमेंहुआ तो विरोध रहित यहमें कैसे जानों कि जो तुमपहिले सूर्य के अर्थ इसयोगको कहतेहुएहो सोई अवमुझसे कहतेहुए ॥ ४ ॥

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

शङ्करभाष्यम्।

या वासुदेवे अनीश्वरा सर्वज्ञा शङ्का मूर्खाणां तां परिहरन् श्रीभगवानुवाच यदर्थो ह्यर्जुनस्य प्रश्नः बहूनीति बहूनि मे मम व्यतीतानि अतिक्रान्तानि जन्मानि तव च हे अर्जुन तान्यहं वेद जाने सर्वाणि नत्वं वेत्थ न जानीषे परन्तप धर्माधर्मादिप्रतिबद्धज्ञानशक्तित्वादहं पुनर्नित्यशुद्धबुद्धमुक्तसत्यस्वभावत्वादनावरणज्ञानशक्तिरिति वेदाहं हे परन्तप ॥ ५ ॥

आनन्दगिरिकृतटीका।

भगवत्यज्ञानां मनुष्यत्वशंकां वारयितुं प्रतिवचनमवतारयति या वासुदेव इति अन्यथा प्रश्ने कथमाशंकान्तरं परिहर्तुं भगवद्वचनमित्याशंक्य प्रतिवचनयोरेकार्थत्वमाह यदर्थोहीति यस्य शंकितस्य विरोधस्य परिहारार्थः तस्य प्रश्नस्तमेव परिहारं वक्तुम् भगवद्वचनमित्यर्थः अतीतानेकजन्मवत्त्वम् ममैव नासाधारणं किन्तु सर्वप्राणिसाधारणमित्याह तवचेति तानि प्रमाणाभावान्नप्रतिभान्तीत्याशंक्याह तानीति ईश्वरस्यानावृतज्ञानत्वादित्यर्थः किमिति तर्हि तानि मम न प्रतीयन्ते तयावृतज्ञानत्वादित्याह नत्वमिति परान् परिकल्प्य तत्परिभवार्थं प्रवृत्तत्वात् तवज्ञानावरणं विज्ञेयमित्याह परन्तपेति अर्जुनस्य भगवता सहातीतानेकजन्मवत्त्वे तुल्येऽपि ज्ञानवैषम्ये हेतुमाह धर्मेति आदिशब्देन रागलोभादयो गृह्यन्ते ईश्वरस्यातीतानागतवर्तमानसर्वार्थविषयज्ञानत्वे हेतुमाह अहमिति ॥ ५ ॥

स्वामिकृतटीका।

रूपान्तरेणोपदिष्टवानित्यभिप्रायेणोत्तरम् श्रीभगवानुवाच बहूनीति तान्यहंवेद वेद्मि लुप्तविद्यत्वात् त्वन्तु न वेत्थ वेत्सि [illegible] ॥ ५ ॥

शङ्करभाष्यम् ।

कथं तर्हि तव नित्येश्वरस्य धर्माधर्माभावेऽपि जन्मेत्युच्यते अजोपीति अजोऽपि जन्मरहितोऽपि संस्तथाऽव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोऽपि सन् तथाभूतानां ब्रह्मादिस्तम्बपर्यन्तानाम् ईश्वरईशनशीलोऽपिसन् प्रकृतिम् मायां मम वैष्णवीं त्रिगुणात्मिकां यस्यावशे सर्वं जगद्वर्त्तते यया मोहितः सन् स्वमात्मानं वासुदेवं न जानाति तां प्रकृतिं स्वामधिष्ठाय वशीकृत्य सम्भवामि देहवानिव भवामि जात इवात्ममायया न परमार्थतो लोकवत् ॥ ६ ॥

आनन्दगिरिकृतटीका ।

ईश्वरस्य कारणाभावात् जन्मैवायुक्तमतीतानेकजन्मवत्वन्तु दूरोत्सारितमिति शंकते कथमिति वस्तुतो जन्माभावेऽपि मायावशाज्जन्मसम्भवतीत्युत्तरमाह उच्यत इति [illegible] मायिकजन्मायोगे कारणं पूर्वार्द्धेनानूद्य प्रातिभासिकजन्मसम्भवेकारणमाह प्रकृतिमिति प्रकृतिशब्दस्य स्वरूपविषयत्व प्रत्यादेष्टुमात्ममाययेत्युक्तं वस्तुतो जन्माभावे कारणप्रद दभागं विवृणोति अजोऽपीत्यादिना प्रातिभासिकजन्मसम्भवे कारणकथनं परमुत्तरार्द्धं भजते प्रकृतिमित्यादिना प्रकृतिशब्दस्य स्वरूपशब्दपर्य्यायत्वं वारयति मायामिति तस्याः स्वातन्त्र्यं निराकृत्य भगवदधीनत्वमाह ममेति तस्याश्च अधिकरणद्वारेणाभिव्यक्तिं सूचयति वैष्णवीमिति मायाशब्दस्यापि प्रज्ञानाम सुपाठात्तद्विज्ञानशक्तिविषयत्वमाशङ्क्याह त्रिगुणात्मिकामिति तस्याः कार्यलिंगकमनुमानं सूचयति यस्या इति जगतो मायावशवर्तित्वमेव स्फुटयति ययेति यथा लोके कश्चिज्जातो देहवानालक्ष्यते एवमहमपि मायामाश्रित्यतया स्ववशया सम्भवामि तेन मायामयमीश्वरस्य जन्मेत्याह तां प्रकृतिमि त्यादिना सम्भवामि इत्युक्तमेव विभजते देहवानिति अस्मदादेरिव तथापि परमार्थत्वाभिमानो जन्मादिविषये स्यादित्याशङ्क्य प्रागुक्तस्वरूपपरिज्ञानत्वादीश्वरस्य मैवमिति चाह न परमार्थत इति आवृत ज्ञानवतो लोकस्य जन्मादिविषये परमार्थत्वाभिमानः सम्भवतीत्याह लोकवदिति ॥ ६ ॥

स्वामिकृतटीका ।

ननु अनादेस्तव कुतो जन्म अविनाशिनश्च कथं पुनः पुनर्जन्म येन बहूनि मे व्यतीतानीत्युच्यते ईश्वरस्य तव पुण्यपापविहीनस्य कथं वा जीववज्जन्मेत्यत आह अजोऽपीति सत्यमेवं तथापि अजोऽपि जन्मशून्योऽपि सन्नहं तथाऽव्ययात्मापि अनश्वरस्वभावोऽपि सन् तथा ईश्वरोऽपि कर्मपारतन्त्र्यरहितोऽपि सन् स्वमायया सम्भवामि [illegible] भवामि ननु तथापि [illegible] कथं जन्म तत्राह प्रकृतिं स्वां शुद्धसत्त्वात्मिकां प्रकृतिमधिष्ठाय स्वीकृत्य विशुद्धोर्जित [illegible] स्वेच्छयावतरामीत्यर्थः ॥ ६ ॥

नवलभाष्य ।

[illegible] कि तब नित्य ईश्वर आपके जो धर्माधर्मादि नहीं हैं तो जन्म कैसे हुआ इस आशंका पर कहते हैं [अजोपि] [illegible] अर्थात् जन्मरहित भी हूं और अव्ययात्मा और [illegible] [illegible] भी हूं और [illegible] [illegible] ईश्वर [illegible] भी [illegible] अपनी त्रिगुणात्मक

वैष्णवीमाया जिसके वशमें सबजगत् वर्त्तिरहाहै और जिसकरके मोहित जीव अपनाको वासुदेवस्वरूप नहींजानताहै तिस अपनी मायाको आश्रय णकरके अर्थात् वशमें करके देहवान् के सदृश और उत्पन्नहुएकेसदृश प्रकट होताहूं सोभी मायाहीकरके कुछपरमार्थमें नहीं जैसे लोकउत्पन्नहोताहै ६॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७॥

शङ्करभाष्यम्।

तच्च जन्म कदा किमर्थं वेत्युच्यते यदेति यदा यदा हि धर्मस्य ग्लानिर्हानिर्वर्णाश्रमादिल क्षणस्य प्राणिनामभ्युदयनिःश्रेयससाधनस्य अभावो भवति भारत अभ्युत्थानम् समुद्भवोऽध र्मस्य तदा तदात्मानं सृजाम्यहं मायया ॥ ७ ॥

आनंदगिरिकृतटीका।

यदीश्वरस्य माया निबन्धनं जन्मेत्युक्तं तस्य प्रश्नपूर्वकं कालं कथयति तच्चेत्या दिना चातुर्वर्ण्ये चातुराश्रम्ये च यथावदनुष्ठीयमाने नास्ति धर्महानिरिति मन्वानो वि शिनष्टि वर्णेति वर्णाश्रमैस्तदाचारैश्च लक्ष्यते ज्ञायते धर्मः तस्येति यावत् धर्महानौ समस्तपुरुषार्थभंगी भवतीत्यभिप्रेत्याह प्राणिनामिति नच यथोक्तसर्वधर्मस्य हानिं सो ढुं शक्तो भवानित्याह भारतेति न केवलं प्राणिनां धर्महानिरेव भगवतो मायाविग्रहस्य परिग्रहे हेतुरपि तु तेषामधर्मप्रवृत्तिरपीत्याह अभ्युत्थानमितियदायदेति पूर्वेणसम्बन्धः॥७॥

स्वामिकृतटीका।

कदासम्भवसीत्यपेक्षयामाह यदा यदेति ग्लानिर्हानिः अभ्युत्थानमाधिक्यम् ॥ ७ ॥

नवलभाष्य।

फिर वह जन्मकब होताहै और किसवास्ते होताहै इसआकांक्षामें कह- तेहैं कि [यदेति]हेभारत हेभरतवंशोद्भव अर्जुन जबजब भोग और मोक्ष को साधनभूतप्राणियोंके वर्णाश्रम धर्मकी ग्लानिहोत्ती है अर्थात् हानि होतीहै नामनाश होताहै और अधर्मकी उत्पत्तिहोतीहै तबतब मायाकरके अपने आत्माको मनुष्यादि रूपकरके उत्पन्नकरताहूं ॥ ७॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ ८॥

शङ्करभाष्यम्।

किमर्थं परित्राणायेति परित्राणाय परिरक्षणाय साधूनां सन्मार्गस्थानां विनाशायच दुष्कृ ताम् पापकारिणाम् किञ्च धर्मस्य संस्थापनार्थाय सम्यक् स्थापनं तदर्थम् सम्भवामि युगे युगे प्रतियुगम् ॥ ८ ॥

आनंदगिरिकृतटीका।

यथोक्ते काले कृतकृत्यस्य भगवतो माया कृते जन्मनि प्रश्नपूर्वकं प्रयोजनमाह कि

मर्थमित्यादिना यथा साधूनां रक्षणमसाधूनां निग्रहश्च भगवदवतारफलं तथा फलान्तरमपि तस्यास्तीत्याह किञ्चेति धर्मे हि स्थापिते जगदेव स्थापितं भवत्यन्यथा भिन्नमर्यादं जगदसंगतमापद्यतेत्यर्थः ॥ ८ ॥

स्वामिकृतटीका।

किमर्थमित्यपेक्षामाह परित्राणायेति साधूनां स्वधर्मवर्तिनां रक्षणाय दुष्टं कर्म कुर्वन्तीति दुष्कृतस्तेषां वधाय च एवं धर्मसंस्थापनार्थाय साधुरक्षणेन दुष्टवधेन च धर्मं स्थिरीकर्तुं युगे युगे तत्तदवसरे सम्भवामीत्यर्थः नचैवं दुष्टनिग्रहं कुर्वतोऽपि नैर्घृण्यं शङ्कनीयमथाहुः लालने ताड़ने मातुर्नाकारुण्यं यथार्भके तद्वदेव महेशस्य नियन्तुर्गुणदोषयोरिति ॥ ८ ॥

नवलभाष्य।

और हे अर्जुन साधुजे सन्मार्गमें स्थितपुरुष तिनके रक्षणकेलिये और पापीजे पुरुषहैं तिनके विनाशके अर्थ और धर्मका जो सम्यक् प्रकारकरके स्थापन तिसके अर्थ युगयुगमें मैं अवतार धारण करताहूं ॥ ८ ॥

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

शङ्करभाष्यम्।

जन्मेति तत् जन्म मायारूपम् कर्म च साधूनां परित्राणादि मे मम दिव्यम् अप्राकृतमैश्वरमेवं यथोक्तम् यो वेत्ति तत्त्वतः तत्त्वेन यथावत्त्यक्त्वा देहमिमं पुनर्जन्म पुनरुत्पत्तिम् नैति न प्राप्नोति मामेवागच्छति स मुच्यते अर्जुन ॥ ९ ॥

आनन्दगिरिकृतटीका।

मायामयमीश्वरस्य जन्म न वास्तवं तस्यैव च जगत्परिपालनं कर्म नान्यस्येति ज्ञानतः श्रेयोवाप्तिं दर्शयन् विपक्षे प्रत्यवायं सूचयति तज्जन्मेत्यादिना यथोक्तं मायामयं कल्पितमिति यावत् वेदनस्य यथावत्त्वं वेद्यस्य जन्मादेस्तत्त्वरूपानतिवर्तित्वं यदि पुनर्भगवतो वास्तवं जन्मसाधुजनपरिपालनादि चान्यस्यैव कर्म क्षत्रियस्येति विपर्ययते तदा तत्त्वापरिज्ञानप्रयुक्तो जन्मादिः संसारो दुर्वारः स्यादिति भावः ॥ ९ ॥

स्वामिकृतटीका।

स्वविधानामीश्वरजन्म कर्मणां ज्ञाने फलमाह जन्मेति स्वेच्छया कृतं मम जन्म कर्म च धर्मपालनरूपं दिव्यमलौकिकं तत्त्वतः परानुग्रहार्थमेवेति यो वेत्ति स देहाभिमानं त्यक्त्वा पुनर्जन्म संसारं नैति न प्राप्नोति किन्तु मामेव प्राप्नोति ॥ ९ ॥

नवलभाष्य।

और हे अर्जुन इसप्रकार मायारूप जो मेराजन्म और साधुओंका रक्षणादिरूप जो दिव्य अलौकिक मेराकर्म तिसको जो पुरुष तत्त्वकरके अर्थात् संदेह रहित यथावत् जानताहै सो इसदेहको त्यागकरके फिर जन्मको नहींप्राप्त होता और मुझको प्राप्तहोताहै अर्थात् मुक्तहोताहै ॥ ९ ॥

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः।
बहवो ज्ञानतपसा पूता मद्भावमागताः॥ १०॥

शङ्करभाष्यम्।

नैष मोक्षमार्ग इदानीम् प्रवृत्तः किं तर्हि पूर्वमपि वीतरागभयक्रोधा रागश्च भयञ्च क्रोधश्च रागभयक्रोधाः वीता विगता येभ्यस्ते वीतरागभयक्रोधा मन्मया ब्रह्मविद ईश्वराभेददर्शिनो मामेव च परमेश्वरमुपाश्रिताः केवल ज्ञाननिष्ठा इत्यर्थः बहवोऽनेके ज्ञानतपसा ज्ञानमेव च परमात्मविषयम् तत्तपस्तेन ज्ञानतपसा पूताः परां शुद्धिम् गताः सन्तो मद्भावमीश्वरभावं मोक्षमागताः समनुप्राप्ताः इतरतपोनिरपेक्षा ज्ञाननिष्ठा इत्यस्य लिंगम् ज्ञानतपसेति विशेषणम् १०॥

आनन्दगिरिकृतटीका।

सम्प्रति प्रस्तुतमोक्षमार्गस्य नूतनत्वेनाव्यवस्थिततत्वमाशङ्क्य परिहरति नैषइति मन्मयत्वस्य मद्भावगमनेनापौनरुक्त्यं दर्शयति ब्रह्मविद् इति आत्मनो भिन्नत्वेन वा ब्रह्मणोवेदनं व्यावर्त्तयति ईश्वरेति अभेददर्शनेन समुच्चित्य कर्म्मानुष्ठानां प्रत्याचष्टे मामेवेति तदुपाश्रयत्वमेव विषदयति केवलेति मामुपाश्रिता इति केवलं ज्ञाननिष्ठत्वमुक्त्वा ज्ञानतपसा पूता इति किमर्थं पुनरुच्यते तत्राह इतरेति॥ १०॥

स्वामिकृतटीका।

कथं जन्म कर्म ज्ञानेत्वत्प्राप्तिः स्यादित्यतआह वीतरागेति अहं शुद्धसत्वावतारैर्धर्मपालनं करोमीति मदीयं परमकारुणिकत्वं ज्ञात्वा वीता विगता रागभयक्रोधा येभ्यस्तेचित्तविक्षेपाभावान्मन्मया मदेकचित्ता भूत्वा मामेवोपाश्रिताः सन्तो मत्प्रसादलब्धं यदात्मज्ञानञ्च तपश्च तत्परिपाकहेतुः स्वधर्मः द्वन्द्वैकवद्भावः तेन ज्ञानतपसा पूताः शुद्धा निरस्ताज्ञानतत्कार्यमला मद्भावं मत्सायुज्यं प्राप्ता बहवः नत्वधुनैव प्रवृत्तोऽयं मद्भक्तिमार्ग इत्यर्थः तदेवं तान्यहं वेद सर्वाणीत्यादिना विद्याविद्योपाधिभ्यां तत्वं पदार्थावीश्वरजीवौ प्रदर्श्य ईश्वरस्य चाविद्याभावेन नित्यशुद्धतत्वाज्जीवस्य चेश्वरप्रसादलब्धज्ञानेनाज्ञाननिवृत्तेः शुद्धस्य स्वतश्चिदंशेन तदैक्यमुक्तमिति द्रष्टव्यम्॥ १०॥

नवलभाष्य।

और यहमोक्षमार्ग इसीसमय में प्रवृत्तहुआ होय सो नहीं है किन्तु पहिलेभीथा इसआशयसे कहतेहैं [वीतरागेति.] और हेअर्जुन विगतहुए हैं राग नामविषय प्रीति औरभय औरक्रोध जिन्होंसे औरजे मन्मयहुए नामब्रह्मवित् अर्थात् अपनासे अभेदकरके ईश्वरको देखनेवाले औरमैं जो परमेश्वर तिसीको आश्रयण करनेवाले अर्थात् ज्ञाननिष्ठ ऐसेबहुत से ज्ञानरूपजो परमात्मविषयक तप तिसकरके पूतनाम परमशुद्धिको प्राप्तहुए मेराभाव जो ईश्वरभाव अर्थात् मोक्ष तिसको प्राप्तहोतेहुए और यहांज्ञानतपसा यहकहनेसे ज्ञानसे औरभिन्न जो कृच्छ्रचान्द्रायणादिरूपतप तिसकी अपेक्षा नहीं करतेहुए केवल ज्ञानरूपही तपसे मोक्षको प्राप्तहुए यह सूचन किया॥ १०॥

ये यथा मां प्रपद्यन्ते तां स्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

शङ्करभाष्यम् ।

तव तर्हि रागद्वेषौस्तः येन केभ्यश्चिदेवात्मभावं प्रयच्छसि न सर्वेभ्य इत्युच्यते ये यथेति ये यथा येन प्रकारेण येन प्रयोजनेन यत् फलार्थितया मां प्रपद्यन्ते तांस्तथैव तत् फलदानेन भजाम्यहमनुगृह्णाम्यहम् इत्यतः तेषां मोक्षं प्रत्यक्षं प्रत्यनर्थित्वात् तान्ह्येकस्य मुमुक्षुत्वं फलार्थित्वञ्च युगपत् सम्भवति अतो ये यत् फलार्थिनः तान् तत् फलप्रदानेन ये यथोक्तकारिणस्तत् फलार्थिनो मुमुक्षवश्च तान् ज्ञानप्रदानेन ये ज्ञानिनः संन्यासिनो मुमुक्षवश्च तान् मोक्षप्रदानेन तथा आर्त्तानार्त्तिहरणेत्येवं यथा येन प्रकारेण मां प्रपद्यन्ते ये तां स्तथैव भजामीत्यर्थः न पुनः रागद्वेषानिमित्तंमोहनिमित्तंवा किञ्चिद् भजामि सर्वथापि सर्वावस्थस्य ममेश्वरस्य वर्त्ममार्गमनुवर्त्तन्ते मनुष्याःयत् फलार्थितया यस्मिन् कर्मण्यधिकृताः ये प्रयतन्ते ते मनुष्या अत्र उच्यन्ते हे पार्थ सर्वशःसर्वप्रकारैः ॥ ११ ॥

आनंदगिरिकृतटीका ।

ईश्वरः सर्वेभ्यो भूतेभ्यो मोक्षं प्रयच्छति चेत् प्रागुक्तविशेषणवैयर्थ्यं यदि तु केभ्यश्चिदेव मोक्षं प्रयच्छेत्तर्हि तस्य रागादिमत्त्वादनीश्वरत्वापत्तिरिति शंकते तव तर्हीति ये मुमुक्षवस्तेभ्यो मोक्षमीश्वरोज्ञानसम्पादनद्वारा प्रयच्छति फलान्तरार्थिभ्यस्तु तत्तदुपायानुष्ठापनेन तत्तदेव ददातीति नास्य रागद्वेषाविति परिहरति उच्यतइति मुमुक्षूणामीश्वरानुसारित्वेपि फलान्तरार्थिनां कुतस्तदनुसारित्वमित्याशंक्य फलमत उपपत्तेरिति न्यायेन तत्फलस्येश्वरायत्तत्वात्तदनुवर्तितमावश्यकमित्याह ममेति भगवद्वचनभागिनां द्वेषामेव कैवल्यमेकरूपं किमिति नानुगृह्यते तत्राह तेषामिति अभ्युदयनिःश्रेयसार्थित्वप्रार्थनावैचित्र्यादेकस्यैव किं न स्यादित्याशंक्य पर्यायेण तदनुपपत्तिं साधयति न हीति मुमुक्षूणां फलार्थिनाञ्च विभागे स्थिते सत्यनुग्रहविभागं फलितमाह अत इति फलप्रदानेनानुगृह्णामीतिसम्बन्धः नित्यनैमित्तिककर्मानुष्ठायिनामेव फलार्थित्वाभावे सति मुमुक्षुत्वे कथन्तेष्वनुग्रहः स्यादिति तत्राह ये यथोक्तेति ज्ञानप्रदानेन भजामीत्युत्तरत्र सम्बध्याः सन्ति केचित्त्यक्तसर्वकर्माणोज्ञानिनो मोक्षमेवापेक्ष्यमाणास्तेष्वनुग्रहप्रकारं दर्शयति ये ज्ञानिन इति केचिदार्त्ताः सन्तो ज्ञानादिसाधनान्तररहिता भगवन्तमेवार्त्तिनिवृत्त्यर्थमनुवर्तन्ते तेषु भगवतोऽनुग्रहविशेषं दर्शयति तथेति पूर्वार्द्धव्याख्यानमुपसंहरति इत्येवमिति भगवतोऽनुग्रहे निमित्तान्तरं निवारयति न पुनरिति फलार्थित्वे मुमुक्षुत्वे च यततां भगवदनुसरणमावश्यकमित्युत्तरार्द्धं विभजते सर्वथापीति सर्वावस्थत्वं तेन तेनात्मना परमेश्वरस्यावस्थानं मार्गो ज्ञानकर्मलक्षणः मनुष्यग्रहणादितरेषामीश्वरमार्गानुवर्तित्वमप्युदासः स्यादित्याशंक्याह यत् फलेति सर्वप्रकारैर्मम मार्गमनुवर्तन्ते इति पूर्वेण सम्बन्धः ॥ ११ ॥

स्वामिकृतटीका ।

ननु तर्हि किं त्वय्यपि वैषम्यमस्ति यस्मादेवं त्वदेकशरणानामेवात्मभावं ददासि नान्येषां सकामानामित्यत आह ये इति यथा येन प्रकारेण सकामतया निष्कामतया वा ये मां भजन्ति तानहं तथैव तदपेक्षितफलदानेन भजामि अनुगृह्णामि न तु सकामा मामपहाय इन्द्रादीनेव ये भजन्ते तानहमुपेक्ष इति मन्तव्यं यतः सर्वशः सर्वप्रकारैरिन्द्रादि

यक्ता अपि ममैव वर्त्म भजनमार्गमनुवर्तन्त इन्द्रादिरूपेणापि ममैव सेव्यत्वात् ॥ ११ ॥

नवलभाष्य ।

अब कदाचित् अर्जुनकहे क्याआपको भी रागद्वेषहै जिससे कि कोईआत्मभावदेते हो और सबको नहीं इसदोषको दूरकरतेहुए कहतेहैं कि (येय थेति) हेअर्जुन जेपुरुष जिसप्रकार करके और जिसप्रयोजन से औरजिस फलकी इच्छाकरके मेरेशरण प्राप्तहोते हैं तिनको तैसेही तिसफलके दान करके मैं उनका भजन करताहूं अर्थात् अनुग्रहकरताहूं इससे उनपुरुषों को मोक्षके प्रतिअर्थित्व नहीं होनेसे अर्थात् वेपुरुषमोक्ष चाहतेही नहीं हैं इसकारणसे और दूसरे एकपुरुष को एकहीकालमें मोक्षकी इच्छा और कर्मफलकी इच्छा ये दोनों विरुद्धहोनेसे संभवही नहींहोती हैं इससेजेपुरुष जिसफलकी इच्छाकरके मेरा भजन करतेहैं तिनको तिसफलके दानकरके और जेमुमुक्षुफल की तो इच्छाकरते नहीं और जैसाकहा है तैसाकर्म करतेहैं तिनको ज्ञानके दानकरके और जेज्ञानी संन्यासी हैं अथवा मुमुक्षुही संन्यासी हैं तिनको मोक्षप्रदान करके और जेआर्त्त रोगशत्रु आदि करके दुःखितहो रहेहैं और उसदुःखकी निवृत्तिकेलिये मेराभजन करतेहैं तिनको उस दुःखके हरणकरके इसप्रकार जैसे जैसेभावकरके और जिस जिसकामनासे मेराभजन करतेहैं तिनको तैसे तैसे भावसे और तिस तिसफलके देनेकरके मैंभी उनका भजन करताहूं औरनतो रागद्वेषके कारणसे औरन मोहके कारणसे मैं किसी प्राणीका भजन करताहूं और सबप्रकार करके सबअवस्थामें स्थितईश्वर जो मैंहूं तिसीका मार्ग सब अनुवर्त्तन करते हैं तिनमें जेमनुष्यहैं तेजिसकर्ममें अधिकारयुक्त हैं और जिसफलकी इच्छा करतेहुएहैं उसीकर्म में उसफलके लिये इच्छा करतेहुये यत्नमें तत्परहोते हैं वेमनुष्य कहातेहैं अर्थात् कर्मश्रद्धा परायणोंकी मनुष्यसंज्ञाहै इसप्रकार सबमेरे मार्गको अनुसरण करते हैं ॥ ११ ॥

काङ्क्षन्तः कर्मणां सिद्धिं यजन्त इह देवताः ।
क्षिप्रंहि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

शङ्करभाष्यम् ।

यदि तवेश्वरस्य रागादिदोषाभावः सदा सर्वप्राणिषु अनुजिघृक्षायां तुल्यायां सर्वफलप्रदानसमर्थे च त्वयि सति वासुदेवः सर्वमिति ज्ञानेनैव मुमुक्षवः सन्तः कस्मात्त्वामेव सर्वे न प्रतिपद्यन्ते इति शृणु तत्र कारणं काङ्क्षन्त इति अभिलषन्तः कर्मणां सिद्धिं फलनिष्पत्तिं प्रार्थयन्तो यजन्ते इहास्मिन् लोके देवता इन्द्राग्न्याद्याः अथ योन्यां देवतामुपास्तेऽन्योऽसावन्योहमस्मीति न स वेद यथा पशुरेवं स देवानामितिश्रुतेः तेषां हि भिन्नदेवतायाजिनां फलकाङ्क्षिणां क्षिप्रं शीघ्रं हि यस्मात् मानुषे लोके मनुष्यलोके हि शास्त्राधिकारः क्षिप्रं हि मानुषे लोके इति विशेषणादन्येष्वपि कर्मफलसिद्धिं दर्शयति भगवान् मानुषे लोके वर्णाश्रमादिकर्माणीति विशेषः तेषाञ्च वर्णाश्रमाधिकारिणां कर्मणां फलसिद्धिः क्षिप्रं भवतिकर्मजा कर्मणो जाता ॥ १२ ॥

आनन्दगिरिकृतटीका ।

अनुग्राह्याणां ज्ञानकर्मानुरोधेन भगवता तेष्वनुग्रहविधानात्तस्य रागद्वेषौ यदि न भ
वतस्तर्हि तस्य रागाद्यभावादेव सर्वेषु प्राणिष्वनुग्रहेच्छा तुल्या प्राप्ता नच तस्यां सत्यामि
फलस्याल्पीयसः संपादने सामर्थ्यं नतु भगवतोमहतोमोक्षाख्यस्य फलस्य प्रदानेऽस्ति
रिति युक्तमप्रतिहतज्ञानेच्छा क्रियाशक्तिमतस्तव सर्वफलप्रदानसामर्थ्यात्तथाच यथोक्तानु
जिघृक्षायां सत्यां त्वयि च यथोक्तसामर्थ्यवति सति सर्वे फलगुफलादभ्युदयात् विमुखामो
क्षमेवापेक्षमाणा ज्ञानेन त्वामेव किमिति न प्रतिपद्येरन्निति चोदयति यदीति मोक्षापेक्षा
भावात्तदुपायभूतज्ञानादपि वैमुख्याद्भगवत्प्राप्त्यभावे हेतुमभिदधानः समाधत्ते कांक्ष
न्ति कर्मफल सिद्धिमिच्छता किमिति मानुषे लोके देवतापूजनमिष्यते तत्राह क्षिप्रंहीति
कर्मफलसंप्रत्यर्थिनां यष्टृयष्टव्यविभागदर्शिनां तद्दर्शने कारणमात्माज्ञानमित्यत्र बृहदार
ण्यकश्रुतिमुदाहरति अथेति अविद्याप्रकरणोपक्रमार्थमथेत्युक्तं उपायनं भेददर्शनमित्यु
द्य कारणमात्माज्ञानं न तत्रेति दर्शयति नेति यथास्मदादीनां हलवहनादिना पशुरुपक
रोत्येवमज्ञोदेवादीनां यागादिभिरुपकरोतीत्याह यथेति किमिति ते फलाकाङ्क्षिणोभि
न्नदेवतायाजिनोज्ञानमार्गं नापेक्षन्ते तत्रोत्तरार्द्धमुत्तरत्वेन योजयति तेषामित्यादिना य
स्मादयथोक्तानामधिकारिणां कर्मप्रयुक्तं फलं लोकविशेषे झटिति सिध्यति तस्मात्तेषां मो
क्षमार्गादस्ति वैमुख्यमित्यर्थः । मानुषलोकविशेषणं किमर्थमित्याशंक्याह मनुष्यलोके
हीति लोकान्तरेषु तर्हि कर्मफलसिद्धिर्नास्तीत्याशंक्य क्षिप्रविशेषणस्यतात्पर्यमाह क्षिप्रमि
ति क्वचित् कर्मफलसिद्धिरविलम्बेन भवत्यन्यत्र तु विलम्बेनेति विभागे को हेतुरित्याशं
क्य सामग्रीभावाभावाभ्यामित्याह मानुष इति मनुष्यलोके कर्मफलसिद्धेः शैघ्र्यात्तदभि
मुखानां ज्ञानमार्गवैमुख्यं प्रायिकमित्युपसंहरति तेषामिति ॥ १२ ॥

स्वामिकृतटीका ।

तर्हि मोक्षार्थमेव किमिति सर्वे त्वां न भजन्तीत्यत आह कांक्षन्त इति कर्मणां सि
द्धिं कर्मफलं कांक्षन्तः प्रायेणेह मनुष्यलोके इन्द्रादिदेवता एव यजन्ते नतु मां साक्षा
देव हि यस्मात् कर्मजा सिद्धिः कर्मजं फलं शीघ्रं भवति नतु ज्ञानफलं कैवल्यं दुष्प्राप्य
त्वात् ज्ञानस्य ॥ १२ ॥

नवलभाष्य ।

अब कदाचित् अर्जुन कहै कि ईश्वर जो आप तिनको रागद्वेषका
अभाव है और अनुग्रहकी इच्छाभी सबप्राणियोंमें तुल्यहै तो सबफलके
देनेमें समर्थ तुम्हारे विद्यमानहुए [illegible] सब वासुदेवस्वरूपही है ऐसाज्ञान
काहे [illegible] काहेसे सबप्राणी तुम्हारे ही शरणमें नहीं प्राप्तहोते हैं
तो इसका कारण सुनो कि [कांक्षन्तइति] हे अर्जुन कर्मोंके फलोंकी
इच्छाकरनेहारे जे पुरुष ते इसलोकमें इन्द्र अग्नि आदिकजे देवता
तिनहींका पूजनकरते हैं इसीअर्थको वेदश्रुतिभी कहतीहै [अथयोन्यां
देवतामुपास्तेऽन्योसावन्योहमस्मीति नस वेद यथा पशुरेवं स देवानामिति बृहदा
रण्यकश्रुतिः] अर्थ जो पुरुष परमात्माको भिन्नजानि और देवताकी उपास
नाकरता है अर्थात् [illegible] अग्निआदि देवताकी उपासना करता है

और यहमानताहै कि यह देवतामेंगन्यामी अन्यहै+और मैंइसका सेवकअ-न्यहीहूँ ऐसीदृष्टिसे उपासना करनेवाला जो वहपुरुष सो नहीं आत्मस्व रूपको जानताहै जैसेपशु नहीं जानता ऐसे वहदेवताओं का पशुहै यहवृ-हदारण्यके श्रुतिके प्रमाणसे न्यारेन्यारे देवताओं का यजन करतेहुए और नानाफलों की इच्छा करतेहुए जेवेकर्मी पुरुषतिनको क्षिप्रअर्थात् शीघ्रही जिससे इसमनुष्यलोक में वर्णाश्रम कर्मोंसे उत्पन्नहुई सिद्धिहोतीहै और यहां मानुषेलोके यह विशेषण सामर्थ्यसे कर्मफलकी सिद्धिऔर लोकोंमें भी होतीहै यह भगवान् सूचनकरते हैं परन्तु वर्णाश्रम कर्म मनुष्यलोक हीमें होतेहैं इतनाही विशेषहै क्योंकिवर्णाश्रम दृष्टिकरके शास्त्रका अधिका रमनुष्यलोकहीमें है ॥ १२ ॥

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्त्तारमपि मां विद्ध्यकर्त्तारमव्ययम् ॥ १३ ॥

शङ्करभाष्यम् ।

मानुष एव लोके वर्णाश्रमादि कर्म्माधिकारोनान्येषु लोकेष्विति नियमः किं निमित्त इति अथवा वर्णाश्रमादिप्रविभागोपेता मनुष्या मम वर्त्मानुवर्त्तन्ते सर्वश इत्युक्तं कस्मात् पुनः कारणा त् नियमेन तवैव वर्त्मानुवर्त्तन्ते नान्यस्येत्युच्यते चातुर्वर्ण्यमिति चातुर्वर्ण्यं चत्वार एववर्णाश्चा तुर्वर्ण्यं मयेश्वरेण सृष्टमुत्पादितं ब्राह्मणोऽस्य मुखमासीदित्यादि श्रुतेः गुणकर्मविभागशः गुण विभागशः कर्म्म विभागशश्च गुणाः सत्त्वरजस्तमांसि तत्र सात्त्विकस्य सत्त्वप्रधानस्य ब्राह्मण स्य शमोदमस्तप इत्यादीनि कर्म्माणि सत्त्वोपसर्ज्जनरजःप्रधानस्य क्षत्रियस्य शौर्य्यतेजः प्रभृ तीनि कर्माणि तम उपसर्ज्जनरजः प्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि रजउपसर्ज्जन तमः प्रधानस्य शूद्रस्य शुश्रूषैव कर्मेत्येवं गुणकर्मविभागशः चातुर्वर्ण्यंमया सृष्टमित्यर्थः तच्चेदं चातुर्वर्ण्यं नान्येषुलोकेषु अतोमानुषेलोकेइति विशेषण हन्ततर्हि चातुर्वर्ण्यस्य सर्गादेः कर्म्मणःक र्तृत्वात् तत्फलेषु युज्यसे अतो नत्वं नित्यमुक्तो नित्येश्वरइत्युच्यते यद्यपि मायासंव्यवहारेण

+ इस प्रकरणका अभिप्राय यहहै कि यद्यपिभगवान्को रागद्वेषनहीं और सबप्राणि-योंके ऊपर अनुग्रहकी इच्छाभीतुल्यहै तोभी इसमनुष्य लोकमें कर्मफलकी सिद्धिशीघ्रहो तीहै इसकारण से कोईज्ञानकी इच्छासे भगवान्की प्रार्थनाही नहीं करता जैसे कल्पवृक्ष के समीपजाके जोपदार्थकी इच्छाकरै वहीपदार्थ मिलताहै और कल्पवृक्षको किसीसे राग द्वेषनहीं जो अपनाहोयतिसको अच्छापदार्थदेवै और जो शत्रु होय तिसको बुरापदार्थदेवै तैसेही परमेश्वर काभीस्वभावहै जो जिसपदार्थकी इच्छा करकेपरमेश्वरकाभजन करता है यह उसीपदार्थको प्राप्तहोताहै कदाचित् कोई कहै कि परमेश्वर सबओंबुद्धि काप्रेरकहै तो ऐसीबुद्धि क्योंनहीं प्रेरता जिससे सबको मुक्ति होय तो इसका यह उत्तरहै कि पर-मेश्वरकोई भक्तप्रेरकहै यहजानके हे परमेश्वर मेरीबुद्धिको ऐसी प्रेरणा कीजिये जि-ससे दुःखसों निवृत्तहोउं ऐसीइच्छासे परमेश्वर का भजनकोई करै और दुःखसे निवृत्त न होय तो परमेश्वर को उलहना भी देनाठीकहै और जो आपही कर्तृत्व के अभिमानसे जिसफलकी इच्छासे कर्ममें प्रवृत्तहोवै तौतो उसी कर्मफलकी प्राप्ति उसकोहोगी परमेश्वर की वयाविषमता है ॥

तस्य कर्मणः कर्त्तारमपि सन्तं तथापि मां परमार्थतो विद्ध्यकर्त्तारमत एवाव्ययमसंसारिण्च मां विद्धि ॥ १३ ॥

आनन्दगिरिकृतटीका।

मनुष्यलोके चातुर्वर्ण्यं चातुराश्रम्यमित्यनेन द्वारेण कर्माधिकारनियमे कारणं पृच्छति मानुष एवेति आदिशब्देन वस्थाविशेषा विवक्ष्यन्ते प्रकारान्तरेण वृत्तानुवादपूर्वकं चोद्यमुत्थापयति अथवेत्यादिना प्रश्नद्वयं परिहरति उच्यत इति तर्हि तव कर्तृत्व भोक्तृत्व सम्भवादस्मदादि तुल्यत्वेनानीश्वरत्वमित्याशङ्क्याह तस्येति ईश्वरस्य विश्वसृष्टिं विदधतस्य सृष्टि वैषम्यनिर्वाहकं कथयति गुणेति गुणविभागेन कर्मविभागस्तेन चातुर्वर्ण्यस्य सृष्टमेवापदिष्टं स्पष्टयति तत्रेत्यादिना प्रश्नद्वयं प्रतिविधानं प्रकृतमुपसंहरति तद्वदिमिति मनुष्यलोके परं वर्णाश्रमादिपूर्वके कर्मण्यधिकारस्तत्रैव वर्णादेरीश्वरेण सृष्टत्वाल्लोकान्तरेषु तत्र वर्णाद्यभावादीश्वरमेव चातुर्वर्ण्याश्रमादिविभागभागिनोऽधिकारिणोऽनुवर्तन्ते तेनैव वर्णादेस्तद्व्यापारस्य च सृष्टत्वात्तदनुवर्तनस्य युक्तत्वादित्यर्थः तस्येत्यादि द्वितीयभागापाद्यचोद्यमनुद्रवति हन्तेति यदि चातुर्वर्ण्यादिकर्तृत्वादीश्वरस्य प्रागुक्तो नियमोऽभिमतस्तर्हि तद्विपयसृत्याटेस्तन्निष्ठव्यापारस्य च धर्मादेर्निवर्तकत्वात् फलस्य कर्तृत्वभोक्तृत्वयोस्त्वयि प्रसंगात् नित्यमुक्तत्वादि तेन स्यादित्यर्थः मायया कर्तृत्वं परमार्थतस्त्वकर्तृत्वमित्यभ्युपगमान्नित्यमुक्तत्वादि सिध्यतीत्युत्तरमाह उच्यत इति मायाप्रवृत्तेन संव्यवहारेण चातुर्वर्ण्यादेस्तत् कर्मणश्च यद्यपि कर्ताहं तथापि तथाविधं मां परमार्थतोऽकर्तारं विद्धीति योजना अकर्तृत्वादेवाभोक्तृत्वसिद्धिरित्याह अतएवेति ॥ १३ ॥

स्वामिकृतटीका।

ननु केचित् सकामतया प्रवर्तन्ते केचिन्निष्कामतयेति कर्म वैचित्र्यं तत्कर्तृणांच ब्राह्मणादीनामुत्तममध्यमादिवैचित्र्यं कुर्वतस्तव कथं वैषम्यं नास्तीत्याशंक्याह चातुर्वर्ण्यमिति चत्वारो वर्णा एवेति चातुर्वर्ण्यं स्वार्थे ष्यञ्प्रत्ययः अयमर्थः सत्त्वप्रधाना ब्राह्मणास्तेषां शमदमादीनि कर्माणि सत्त्वरजःप्रधानाःक्षत्रियास्तेषां शौर्ययुद्धादीनि कर्माणि रजस्तमःप्रधाना वैश्यास्तेषांच कृषिवाणिज्यादीनि कर्माणि तमःप्रधानाः शूद्रास्तेषांच त्रैवर्णिक शुश्रूषादीनि कर्माणीत्येवं गुणानां कर्मणांच विभागैश्चातुर्वर्ण्यं मयैव सृष्टमिति सत्यं तथाप्येवं तस्य कर्तारमपि फलतोऽकर्तारमेव मां विद्धि तत्र हेतुरव्ययम् आसक्तिराहित्येन श्रमरहितम् ॥ १३ ॥

नवलभाष्य।

अब यहविचारकरते हैं कि मनुष्यलोकही में वर्णाश्रम कर्मोंका अधिकारहै और लोकोंमें नहींहै इसमें क्याकारणहै अथवा वर्णाश्रमादि विभागयुक्त सबमनुष्य मेरेमार्गका अनुसरण करतेहैं अर्थात् मेरेकहेहुए कर्ममार्गमें चलतेहैं यहतुमने कहा तहांयह आशंका होतीहै नियमकरके तुम्हारेमार्गकाही आश्रयणकरतेहैं औरका नहीं इसमें क्याहेतु है इसका समाधान करतेहैं कि (चातुर्वर्ण्यमिति) हे अर्जुन (ब्राह्मणोऽस्यमुखमासीत्) ब्राह्मण परमेश्वरके मुखसे होताहुआ इत्यादि श्रुतियोंके प्रमाणसे गुणविभागकरके और कर्मोंके विभागकरके ब्राह्मण और क्षत्रिय औरवैश्य और

शूद्रयेचारि वर्णमैंनेरचे तहांगुणकौनहुए सत्त्वरजतम तिसमें सत्त्वगुणप्रधानजो ब्राह्मण तिसके शमदमादि कर्मरचे और सत्त्वगुण जिसमें अप्रधान होय और रजोगुण जिसमें प्रधानहोवै ऐसा जो क्षत्रिय तिसके शौर्यतेजआदिकर्मरचे और तमोगुण जिसमें अप्रधान होय और रजोगुण जिसमें प्रधानहोय उसको वैश्यकहते हैं उसके कृष्यादि कर्मरचे और रजोगुण है अप्रधान जिसमें और तमोगुण जिसमें प्रधान होय उसको शूद्रकहते हैं उसको शुश्रूषाही कर्मरचा इसप्रकारकरके गुणकर्म विभागों करके सहित ब्राह्मणादि चारवर्ण मैंनेरचे सो यह चारिवर्णोंका विभाग और लोकोंमें नहींहै इससे मानुषेलोके यहविशेषणकहा है तो फिर चातुर्वर्ण्यादिसृष्टि के करनेसे आपभी उसके फलकरके युक्तहुए इससे तुम नित्य मुक्त नित्य ईश्वर नहींहो ऐसा दोषप्राप्त हुआ तिससे कहतेहैं कि हे अर्जुन यद्यपिमायाके व्यवहारकरके जगत्कर्त्ताभी मैंहौं तोभी परमार्थ अकर्त्ताही मैंहूं इसीसे अव्यय विकाररहित असंसारी मैंहूं ऐसातू मुझकोजान ॥ १३ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

शङ्करभाष्यम्।

येषान्तु कर्मणां कर्त्तारं मां मन्यसे परमार्थतस्तेषामकर्त्तैवाहं यतः नेति न मां तानि कर्माणि लिम्पन्ति देहाद्यारम्भकत्वेनाहङ्काराभावान्नचतेषां कर्मणां फलेषु मे स्पृहा तृष्णा तेषान्तु संसारिणमहं कर्तेत्यभिमानः कर्मसु स्पृहा तत्फलेषु च तान् कर्माणि लिम्पन्तीति युक्तं तदभावान्न मां कर्माणि लिम्पंतीत्येवं योऽन्योऽपि मामात्मत्वेनाभिजानाति नाहं कर्त्ता न मे कर्म फले स्पृहेति स कर्मभिर्न बध्यते तस्यापि न देहाद्यारम्भकाणि कर्माणि भवन्तीत्यर्थः ॥ १४ ॥

आनन्दगिरिकृतटीका।

ईश्वरस्य कर्तृत्वभोक्तृत्वयोर्वस्तुतोऽभावे कर्म तत्फलसम्बन्धवैधुर्यं फलतीत्याह येषान्त्विति कर्म तत्फल संस्पर्श शून्यमीश्वरं मां पश्यतो दर्शनानुरूपं फलं दर्शयति न मामिति तानि कर्माणीति येषां कर्मणामहं कर्ता त्वयाभिमतस्तानीति यावत् देहेन्द्रियाद्यारम्भकत्वेन तेषां कर्मणामीश्वरे संस्पर्शाभावे तस्य तत्कारणावस्थायामहंकाराभावं हेतुं करोति अहंकाराभावादिति कर्मफलतृष्णाभावाच्चेश्वरं कर्माणि न लिंपन्तीत्याह नचेति उक्तमेव प्रपंचयति येषान्त्विति तदभावात् कर्मस्वहं कर्तेत्यभिमानस्य तत्फलेषु स्पृहायाश्चाभावादित्यर्थः ईश्वरस्य कर्मनिर्लेपेऽपि क्षेत्रज्ञस्य किमायातमित्याशंक्योत्तरार्द्धं व्याचष्टे इत्येवमिति अभिज्ञान प्रकारमभिनयति नाहमिति ज्ञानफलं कथयति सकर्मभिरिति कर्मासम्बन्धं विदुषि विशदयति तस्यापीति ॥ १४ ॥

स्वामिकृतटीका।

तदेव दर्शयन्नाह न मामिति कर्माणि विश्वसृष्ट्यादीन्यपि मां न लिम्पन्ति आसक्तं न कुर्वन्ति निरहंकारत्वादाप्तकामत्वेन मम कर्मफले स्पृहा नास्ति मां न लिम्पन्तीति किं वक्तव्यं यतः कर्मलेपराहित्येन मां योऽभिजानाति सोऽपि कर्मभिर्न बध्यते मम निरह

त्वकारणं निरहंकारत्वनिस्पृहत्वादिकं जानतस्तस्याप्यहंकारादिशैथिल्यात् ॥१४॥

नवलभाष्य।

और हे अर्जुन जिनसृष्ट्यादि कर्मोंका तूमुझको कर्त्तामानि रहा है तिन कर्मोंका वास्तवमें जिससे मैं अकर्त्ताहीहूं इसीसे जे सृष्ट्यादि कर्ममुझको लिप्त नहीं करते क्योंकि देहादिकोंके आरम्भकत्वरूप करके मुझको अहंकारका अभावहै इस हेतुसे अर्थात् जैसे प्राकृतअज्ञपुरुषकर्म करत हैं तो वे अविवेकसे इन्द्रियादिकों का कर्त्तापना आपनेमें मानिके अहंकारवशते मैं इसकर्मका करनेवाला हूं ऐसामानते हैं तो उस अहंकारके कारणते उत पुण्यपापरूप कर्मफलके भोगनेको उनको और देहधारण करनेपड़ताहै तो वहां वह अहंकारही उनअज्ञपुरुषों का देहादिकोंका आरम्भक नामरचने वाला कहाजाता है तैसे ईश्वर जबसृष्टिआदि कर्म करताहै तो उसकाले केही समयमें प्रकृतिसेन्यारा अपने असंगरूपके जाननेसे अपनामें ऐसाक र्त्तापनाका अहंकारनहीं होता जो ईश्वरको उसकर्मके फलभुगाने को और देहादिकोंका आरम्भक होय इसकारणसे ईश्वरको कोई कर्मलिपायमान नहींकरते और जीवोंको तो कर्मकरने के समयमें विवेकके नहीं होनेते ऐसाज्ञान होता नहीं इससे कर्मउनको लिप्तकरतेही हैं और दूसरा कारन बन्धनका औरभी जो कर्मफलके भोगनेकी इच्छा होना सोभी परमेश्वर को आप्तकामहोने से नहींहोती इसआशयसे भगवान् कहतेहैं कि हेअर्जुन नमुझको कर्मोंकेफलों में स्पृहा अर्थात् तृष्णा नहींहै इससेभी मुझको कर्म लिप्तनहीं करते और संसारी जीवोंको तो [अहंकर्त्ता] मैं करनेवालाहूं ऐसा अभिमान और कर्मफलके भोगनेकी इच्छा येदोनों होतेहैं इसते उनको कर्मलिप्तकरें यहयुक्तहीहै और मुझको अहंकारके और कर्मफलकी तृष्णाके नहीं होनेसे कर्मलिप्तनहीं करतेहैं इसप्रकार जो और भी कोई पुरुष आत्मस्वरूपकरके अर्थात् अपनाही वास्तवरूपमुझको जानताहै सो नमैं कर्त्ताहूं और न मुझको कर्मफलकी इच्छाहै ऐसाजानके फिर और [illegible] रके बन्धनको प्राप्तनहीं होताहै अर्थात् ऐसेज्ञानी पुरुषके भी कर्म संसार कोदेहादिके आरम्भक उत्पत्तिकराने वालेनहीं होतेहैं किन्तु जीवन्मु क्तको प्राप्तहोताहै ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥१५॥

[illegible]।

[illegible]

आनन्दगिरिकृतटीका।

तव कर्म तत्फलसम्बन्धाभावे तथा ज्ञानवतश्च तदसम्बन्धे ममापि किं कर्मणेत्याशंक्य कर्मणि कर्तृत्वाभिमानं तत् फले स्पृहांचाकृत्वा मुमुक्षुवत् त्वया कर्म कर्तव्यमेवेत्याह नाहमित्यादिना एवमिति नाहं कर्तेत्येवमादि परामृश्यते तेन पूर्वैर्मुमुक्षुभिरनुष्ठितत्वेन हेतुनेत्यर्थः कर्मैवेत्येवकारार्थमाह नेत्यादिना त्व शब्दस्य क्रियापदेन सम्बन्धः तस्मादित्युक्तमेव स्फुटयति पूर्वैरिति यदुक्तं किं मम कर्मणेति तत्र त्वमज्ञो वा तत्त्वविद्वान् यद्यज्ञस्तदा चित्तशुद्ध्यर्थं कुरु कर्मेत्याह यदीति द्वितीयं प्रत्याह तत्त्वविदिति कुरु कर्मेति सम्बन्धः पूर्वमूढैराचरितमित्येतावता किमिति विवेकवता मया तत् कर्तव्यमित्याशंक्याह जनकादिभिरिति ते तदेव संपाद्य कर्म कृतवन्तो न तदिदानीमप्रामाणिकत्वादनुष्ठेयमित्याशंक्याह पूर्वतरमिति ॥ १५ ॥

स्वामिकृतटीका।

ये यथा मामित्यादि चतुर्भिः श्लोकैः प्रासंगिकमीश्वरस्य वैषम्यं परिहृत्य पूर्वोक्तमेव कर्मयोगं प्रपंचयितुमनुस्मारयति एवमिति अहंकारादिराहित्येन कृतं कर्म बन्धकं न भवतीत्येवं ज्ञात्वा पूर्वैर्जनकादिभिरपि मुमुक्षुभिः सत्वशुद्ध्यर्थं पूर्वतरं युगान्तरेष्वपि कृतं तस्मात्त्वमपि कृतं तस्मात्त्वमपि प्रथमं कर्मैव कुरु ॥ १५ ॥

नवलभाष्य।

और हे अर्जुन न मैंकरताहूं औरन मेरेफलकी इच्छाहै इसीप्रकार ज्ञानके पहिलेके होगये जेमुमुक्षु अर्थात् मोक्षकी इच्छा करनेवाले तिन्होंने भी कर्मकिया है तिसीरीतिसे तूभी कर्महीकर और न तो तूमौन होके स्थितहो और नसंन्यासधारणकर और जिससे यहकर्म पूर्वोंकरके कियाहुआतिससे तूजो अपनाको आत्मवित् नजानताहोय तो अन्तःकरणकी शुद्धिकेलिये कर और जो तू अपनाको तत्त्ववेत्ता जानता होय तो लोकसंग्रहके अर्थ जैसे पहिलेके जनकादि ज्ञानियोंने कर्मकिया है तैसेही पूर्वतर अर्थात् पहिलेही का कियाहुआ कुछ अभी नहीं किया है ऐसा जो कर्म तिसको कर ॥ १५ ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

शङ्करभाष्यम्।

तत्र कर्मचेत् कर्तव्यं त्वद्वचनादेव करोम्यहं किं विशेषितेन पूर्वैः पूर्वतरं कृतमित्युच्यते यस्मान महद्वैषम्यं कर्मणि कथं [illegible] कर्मेति कवयो मेधाविनोऽपि अत्र [illegible] कर्मादि विवेके [illegible] तत्ते कर्माऽकर्म च प्रवक्ष्यामि यत् ज्ञात्वा [illegible] विशेषता कर्मादि [illegible] त्वया [illegible] न देहादिचेष्टा [illegible] साम[illegible] [illegible]

आनन्दगिरिकृतटीका।

कर्म विशेषणमाक्षिपति तच्चेति मनुष्यलोकः सम्यग्यर्थः कर्मणि महत् वैषम्यस्य वि द्यमानत्वात् तस्य पूर्वैरनुष्ठितत्वेन पूर्वतरं येन च विशेषितत्वे तस्मिन् प्रवृत्तिस्तव युक्तेति युक्तं विशेषणमिति परिहरति उच्यत इति कर्मणि देहादिचेष्टारूपे लोकप्रसिद्धे नास्ति वैषम्यमिति शंकते कथमिति विज्ञानवतामपि कर्मादिविषये व्यामोहोपपत्तेः सुतरामेव तव तद्विषये व्यामोहसम्भवात्तदपोहार्थमाप्तवाक्यापेक्षणादस्ति कर्मणि वैषम्य मित्युत्तरमाह किं कर्मेति तत्ते कर्मेत्यत्राकारानुबन्धेनापि पदच्छेतव्यं कर्मादिप्रवचनस्य प्रयोजनमाह यज्ज्ञात्वेति तत्कर्माकर्मचेति सम्बन्धः अतो मेधाविनोऽपि यथोक्ते विषये व्यामोहस्य सत्वादित्यर्थः कर्मणोऽकर्मणश्च प्रसिद्धत्वात्तद्विषये न किञ्चिद्वोद्धव्यमितिचोद्यमनूद्य निरस्यति न चेति ॥ १६ ॥

स्वामिकृतटीका।

तच्च तत्त्वविद्भिः सह विचार्य कर्तव्यं न लोक परम्परामात्रेणेत्याह किं कर्मेति किं कर्म कीदृशं कर्मकरणं किमकर्म कीदृशं कर्माकरणं इत्यस्मिन्नर्थे विवेकिनोऽपि मोहिताः अतो यज्ज्ञात्वा यदनुष्ठायाशुभात् संसारान्मोक्ष्यसे मुक्तो भविष्यसि तत् कर्माकर्म च तुभ्यमहं प्रवक्ष्यामि तच्छृणु ॥ १६ ॥

नवलभाष्य।

तहां अर्जुन कदाचित् यहकहै कि जो कर्मकरनाही है तो मैं आपहीके वचनसे कर्मकरताहूं फिरआप इतना बड़ाइकै विशेषण किसवास्ते कहते हैं कि [पूर्वैःपूर्वतरंकृतम्] अर्थात् पहिले मुमुक्षुओं का कियाहुआ जो पहिलेका कर्महै तिसीकोकर तो इसका उत्तर यहकहा जाताहै तिसको सुन कि हेअर्जुन कर्म और अकर्ममें बड़ाभारी वैषम्यहोरहा है अर्थात् बड़ीकठिनताहै सहजनहीं इसकाजाननाहै कैसे कि क्या तो कर्महै औरक्या अकर्महै इसप्रकार इसकर्माकर्मकेविषयमें बड़े२ बुद्धिमान्पुरुष मोहितहो रहेहैं अर्थात् मोहकोप्राप्तहोरहे हैं इससे तेरेअर्थ कर्म और अकर्ममेंकहताहूं जिसकर्मादिक को तूजानके अशुभ संसारसे तूछूटजायगा और हेअर्जुन जो कदाचित् तू कहै कि इसमें कठिनताही क्याहै क्योंकि शरीरादिकका चेष्टा रूप जो व्यापारहै उसको कर्म कहतेहैं सो लोकमें प्रसिद्धही है और कुछ नहीं करना अर्थात् मौनहोके बैठना उसको अकर्म कहतेहैं तो यह कभी नहीं मानना चाहिये क्योंकि ऐसे कर्माकर्म के जाननेसे थोड़ेही अशुभसंसारसे कोई छूटसक्ता है ॥ १६ ॥

कर्मणो ह्यपि बोद्धव्यंबोद्धव्यंच विकर्म्मणः।
अकर्म्मणश्च बोद्धव्यं गहना कर्मणोगतिः ॥ १७ ॥

शङ्करभाष्यम्।

कस्मात् उच्यते कर्म्मणामपि कर्म्मणः शास्त्रविहितस्य हि यस्मात् अस्त्यपि बोद्धव्यं बोद्धव्यं

ऽप्यस्त्येवविकर्म्मणः प्रतिसिद्धस्य तथा अकर्म्मणश्च तूष्णीम्भावस्य बोद्धव्यमस्तीति त्रिष्वप्य ध्याहारः कर्त्तव्यो यस्मात् गहनाविषमा दुर्ज्ञेया कर्म्मण इत्युपलक्षणार्थं कर्मादीनां कर्म्माकर्म विकर्मणांगतिर्याथात्म्यं तत्त्वमित्यर्थः ॥ १० ॥

आनन्दगिरिकृतटीका।

तत्र हेत्वाकाङ्क्षापूर्वकमनन्तरं श्लोकमवतारयति कस्मादिति त्रिष्वपि कर्माकर्म विकर्मसु बोद्धव्यमस्तीति यस्मादध्याहारस्तस्मान्मदीयं प्रवचनमर्थवदिति योजना बोद्ध व्यमद्भावे हेतुमाह यस्मादिति त्रितयं प्रकृत्यान्यतमस्य गहनत्व वचन मयुक्त मित्या शङ्क्यान्यतमगहनस्योपलक्षणार्थत्वमुपेत्य विवक्षितमर्थमाह कर्मादीनामिति ॥ १० ॥

स्वामिकृतटीका।

ननु लोकप्रसिद्धमेव कर्मदेहादि व्यापारात्मकं अकर्म च तदव्यापारात्मकम् अतः क थमुच्यते कवयोऽप्यत्र मोहं प्राप्ता इति तत्राह कर्मण इति कर्मणो विहितव्यापारस्या पि तत्त्वं बोद्धव्यमस्तिनतुलोकप्रसिद्धमात्रमेव अकर्मणो विहितव्यापारस्यापितत्त्वं बोधव्यमस्ति विकर्मणो निषिद्धव्यापारस्यापि तत्त्वं बोद्धव्यमस्ति यतः कर्मणो गति गहना कर्म इत्युपलक्षणार्थं कर्माकर्मविकर्मणां तत्त्वं दुर्विज्ञेयमित्यर्थः ॥ १० ॥

नवलभाष्य।

न कहोकि फिर क्यामानना चाहिये तिसआशयसे भगवान् कहते हैं कि [कर्मणइति] हे अर्जुन कर्म जो शास्त्रविहित तिसकास्वरूप जानने योग्यहै और विकर्म जो निषिद्ध कर्महै तिसकाभी स्वरूपजानने योग्यहै और अकर्म जो कुछ नहीं करना अर्थात् मौनहोके स्थितरहना तिसका भी स्वरूप जानने योग्यहै जिससे कर्मकी गतिगहन है बड़ी दुर्ज्ञेयहै यहां कर्म शब्द अकर्मादिकोंका भी उपलक्षण है अर्थात् जताने वालाहै तिससे यह अर्थहै कि कर्म और विकर्म और अकर्म इनकी जो गति अर्थात् ठीकठीक इनकेस्वरूपका जानना सो बड़ादुर्ज्ञेयहै दुःखकरके जानवेयोग्यहै ॥ १७ ॥

कर्म्मण्यकर्म यः पश्येदकर्माणि च कर्म यः।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्न कर्मकृत् ॥ १८ ॥

शङ्करभाष्यम्।

किं पुनस्तत्त्वं कर्मादेर्यद्बोद्धव्यं वक्ष्यामीति प्रतिज्ञातमुच्यते कर्म्मणीति कर्म्मणि कर्म्म क्रियत इति व्यापारमात्रं तस्मिन् कर्म्मणि अकर्म्म कर्म्माभावं यः पश्येदकर्म्मणि च कर्माभावे कर्तृ तन्त्रत्वात् प्रवृत्तिनिवृत्त्योर्वस्त्वप्राप्यैव हि सर्व एव क्रियाकारकादिव्यवहारोऽविद्याभूमावेव कर्म्म यः पश्येत् पश्यति स बुद्धिमान् मनुष्येषु स युक्तो योगी च कृत्स्नकर्म्मकृत् समस्त

कर्म्मकृच्च स इति स्तूयते … ननु किमिदं विरुद्धमुच्यते कर्मण्यकर्म

यः पश्येदकर्मणि च … र्म वा कर्म न तत्र विरुद्धं कथं पश्येद्द्रष्टा

नन्वकर्मैव … र्मवत् यथाभूतदर्शना

[illegible] … पत्त्याद्युपपत्तेश्च बोद्धव्य-

[illegible] … स्यात् यत् ज्ञात्वा मोक्ष्यसेऽशु

भादितिचोक्तं तस्मात् कर्म्माकर्म्मणी विपर्य्ययेण गृहीते प्राणिभिस्तद्विपर्य्ययप्रहाणार्थं भगवतोवचनं कर्म्मण्यकर्म्म य इत्यादि नचात्र कर्म्माधिकरणमकर्म्मास्ति कुण्डेबदराणीव प्यकर्माधिकरणं कर्मास्ति कर्माभावत्वादकर्म्मणोऽतो विपरीते गृहीते एव कर्माकर्मणी लोकैः यथा मृगतृष्णिकायामुदकं शुक्तिकायां वा रजतं ननु कर्म्म कर्मैव सर्वेषां न क्वचित् व्यभिचरतीति तत्र नौस्थस्य नावि गच्छन्त्यां तटस्थेष्वगतिकेषु नगेषु प्रतिकूलगतिदर्शनात् दूरेषु चक्षुषाऽसन्निकृष्टेषुगच्छत्सु गत्यभावदर्शनादेवमिहाप्यकर्म्मणि अहं करोमीति कर्मदर्शनं विपरीतदर्शनं कर्म्मणि चाकर्म्मदर्शनं येन तन्निराकरणार्थमुच्यते कर्म्मण्यकर्मयः पश्येदित्यादि तदेवमुक्तो वचनमप्यसकृदसन्तविपरीतदर्शनाभावितया मोमुह्यमानोलोकः श्रुतमप्यसकृत्तत्त्वं विस्मृत्य विस्मृत्य मिथ्याप्रसङ्गमवतार्य्यावतार्य्य चोदयतीति पुनः पुनरुत्तरमाह भगवान् दुर्विज्ञेयत्वञ्चालक्ष्य वस्तुनः अव्यक्तोयमचिन्त्योयं न जायते म्रियते इत्यादिनात्मनि कर्म्माभावः श्रुतिस्मृतिन्यायप्रसिद्ध उक्तो वक्ष्यमाणश्च तस्मिन्नात्मनि कर्म्माभावे अकर्मणि कर्म्मविपरीतदर्शनमत्यन्तनिरूढं यतः किं कर्म्म किमकर्मेति कवयोऽप्यत्र मोहिता देहाद्याश्रयं कर्म्मात्मन्यध्यारोप्याहं कर्ता मम एतत् कर्म मयास्य कर्म्मणः फलम्भोक्तव्यमिति च तथाहं तूष्णीं भवामि येनाहं निरायासोऽकर्म्मा सुखी स्यामिति कार्य्यकरणाश्रयव्यापारो परमं कर्मैव तत् कृतञ्च सुखित्वमात्मन्यध्यारोप्य न करोमि किञ्च तूष्णीं सुखमासमित्यभिमन्यते लोकस्तत्रेदं लोकस्य विपरीतदर्शनापनयाय आह भगवान् कर्म्मण्यकर्म यः पश्येदित्यादि अत्र च कर्म्म कर्मैव सत्कार्य्यकरणाश्रयं कर्मरहितेऽविक्रिये आत्मनि सर्वैरध्यस्तं यतः पण्डितोप्यहं करोमीति मन्यते अत आत्मसमवेततया सर्वजनप्रसिद्धे कर्मणि नदी कूलस्थेष्विव वृक्षेषु गतिः प्रातिलोम्ये नातोऽकर्म कर्माभावं यथाभूतं गतिभाव वृक्षेषु यः पश्येत् अकर्मणि च कार्य्यकरणव्यापारोपरमे कर्मवत् आत्मन्यध्यारोपिते तूष्णीं अकुर्वन् सुखमासे इत्यहङ्काराभिसन्धिहेतुत्वाचास्मिन् अकर्मणि च कर्म यः पश्येत् य एवं कर्माकर्मविभागज्ञः स बुद्धिमान् पण्डितो मनुष्येषु स युक्तो योगी कृत्स्नकर्मकृच्च सोऽशुभान्मोक्षितः कृतकृत्यो भवतीत्यर्थः ।

अयं श्लोकोन्यथा व्याख्यातः कैश्चित् कथं नित्यानां किल कर्मणामीश्वरार्थेऽनुष्ठीयमानानां तत्फलाभावादकर्माणि तान्युच्यन्ते गौण्यावृत्त्यातेषाञ्चाकरणमकर्म तच [illegible] प्रत्यवाये [illegible] नित्ये कर्म्माणि अकर्म्म यः पश्येत् फलाभावात् यथा धेनुरपि [illegible] [illegible] फलं न प्रयच्छतीति तद्वत् तथा नित्याकरणे कर्माणि त्वकर्म यः पश्येत् [illegible] [illegible] प्रयच्छतीति नैतत् युक्तं व्याख्यानमेवं ज्ञानादशुभान्मोक्षानुपपत्तेः [illegible] [illegible] निरूपणं [illegible] नित्यानामनुष्ठानादशुभात्स्यात् [illegible]

[illegible]

न्योभवति सर्वत्र च प्रशस्तं सुबोद्धव्यञ्च कर्तव्यमेव न निष्प्रयोजनं बोद्धव्यमित्युच्यते नच मि थ्याज्ञानं बोद्धव्यं भवति तत्प्रत्युपस्थापितञ्चावस्त्वाभासं नापि निरासानामकरणादभावात् प्रसत्वा दोत्पत्तिर्नामतो विद्यते भाव इति वचनात् कथमसतः सज्जायेतेति च दर्शितं असतः सज्जन्मप्र तिषेधात् असतः सदुत्पत्तिं ब्रुवता असदेव सद्भवेत् सच्चाप्यसद्भवेदित्युक्तं स्यात् तच्चाप्ययुक्तं सर्व प्रमाणविरोधाच्च निष्फलं विदध्यात् कर्मशास्त्रं दुःखस्य च बुद्धिपूर्वकतया कार्यत्वानुपपत्तेः तदकरणे च नरकपाताभ्युपगमे अनर्थायैवोभयथापि करणे अकरणे च शास्त्रं निष्फलं कल्पितं स्यात् स्वाभ्युपगमविरोधश्च नित्यं निष्फलं कर्मेत्यभ्युपगम्यते मोक्षफलायेति ब्रुवतः तस्माद्यथाश्रु त एवार्थः कर्मण्य कर्मइत्यादेस्तथाच व्याख्यातोऽस्माभिः श्लोकः ॥ १८ ॥

आनन्दगिरिकृतटीका।

उत्तरश्लोकमाकांक्षापूर्वकमुपादत्ते किं पुनरिति प्रथमपादस्याक्षरोत्थमर्थं कथयति क र्मणीत्यादिना द्वितीयपादस्यापि शब्दप्रकाशितमर्थं निर्दिशति अकर्मणि चेति कर्माभावे यः कर्म पश्यतीति सम्बन्धः प्रवृत्तेरेव कर्मत्वान्निवृत्तेस्तदभावत्वात्तत्र कथं कर्मदर्शनमि त्याशङ्क्य द्वयोरपि कारकाधीनत्वेनाविशेषमभिप्रेत्याह कर्तृतन्त्रत्वादिति प्रवृत्ताविव नि वृत्तावपि कर्मदर्शनमविरुद्धमिति शेषः ननु निवृत्तेर्वस्त्वधीनत्वात् कारकनिबन्धनाभावा न्न तत्र कर्मदर्शनं युज्यते तत्राह वस्त्विति क्रियाकारकफलव्यवहारस्य सर्वस्याविद्याव स्थायामेव प्रवृत्तत्वाद्वस्तुसंस्पर्शशून्यत्वात् प्रवृत्ताविव निवृत्ताव पि यः कर्म पश्यति स मनु ष्येषु बुद्धिमानिति सम्बन्धः कर्मण्यकर्म अकर्मणि च कर्म पश्यतोबुद्धिमत्त्वं युक्तं समस्त कर्म कृतश्च कथमित्याशङ्क्याह इति स्तूयत इति श्लोकस्य शब्दोत्थेर्थे दर्शिते तात्प र्यार्थापरिज्ञानान्मिथोऽविरोध शङ्कते नन्विति कथमिदं विरुद्धमित्याशङ्क्याह कर्मणीति विषयसप्तमी वा स्यादधिकरणसप्तमी वेति विकल्प्याद्येऽन्याकारं ज्ञानमन्यावलम्बनमि ति स्पष्टोविरोधः स्यादित्याह नहीति अन्यस्यान्यात्मतायोगात् कर्माकर्मणोरभेदासम्भ वादकर्माकारं कर्मावलम्बनं ज्ञानमयुक्तमित्यर्थः द्वितीयं दूषयति तत्रेति कर्मण्यधिकरणे ततो विरुद्धमकर्म कथमाधेयं दृष्टादृष्टमौष्ण्य हि कर्माकर्मणोर्मिथोविरुद्धयोराधाराधेयभा वः सम्भवतीत्यर्थः विषय सप्तमीमुपेत्य सिद्ध [illegible] हरति नन्वकर्मेति लोकस्य मूढ़ दृष्टेर्विवेकवर्जितस्य परमार्थतो प्रवृत्ताकर्मा [illegible] क्रियावदिव प्रतिभातीत्यक्षरार्थः परस्पराध्यासमुपेत्यो [illegible] कर्मवदुपलभ्य ते तथा कर्म सक्रियमेव द्वैत [illegible] प्रयोजनाकर्म कर्मणोरितरेतराध्यासे सिद्धे [illegible] मित्याह तत्रेति यथा यदिदं रजतमिति [illegible] भ्रममिद्धर- विषय नुवादेन तदधिष्ठ [illegible] द्या देन तद धष्टानं कर्मा [illegible] विरुद्धमित्याह अत [illegible] ह्रितस्य निर्विशेषस्य [illegible] त्याह बुद्धिमतः [illegible] द्धिमत्त्वयुक्तत्व [illegible] त् प्रमज्ञानाश्वतद्भु [illegible] स्य सम्यग्ज्ञाने प्रस [illegible]

नोपदेशस्य विवक्षितत्वादपि कूटस्थं ब्रह्मात्राभिप्रेतमित्याह बोद्धव्यमिति फलवचनप
र्यालोचनायामपि कूटस्थं ब्रह्मात्राभिप्रेतं प्रतिभातीत्याह न चेति सम्यग्ज्ञानाधीनत्व
मत्र न श्रुतमित्याशङ्क्याह यत् ज्ञात्वेति अध्यारोपापवादार्थं भगवद्वचनमविरुद्धमित्यु
पादितमुपसंहरति तस्मादिति तद्विपर्ययेत्यत्र तच्छब्देन प्राणिनो गृह्यन्ते विपर्ययग्रहणे
परिग्रहेण प रिहारमभिधायाधिकरणासम्भवपक्षे दर्शितं दूषणमंगीकारेण परिहरति न चेति
व्यवहरभू मरत्रेत्युच्यते योग्यत्वे सत्यनुपलब्धेरित्यर्थः अकर्माधिकरणं कर्म न सम्भवती
त्यत्र हेत्वन्तरमाह कर्माभावत्वादिति न हि तुच्छस्याधिकरणत्वं क्वचिद्दृष्टमिष्टंवेत्यर्थः
निरूप्यमाणे कर्माकर्मणोरविकरणाधिकर्त्तव्य भावासम्भवे फलितमाह अतइति शास्त्र
परिचयविरहिणामध्यारोपमुदाहरति यथेति कर्माकर्मणोरारोपितत्वमुक्तमुपदर्श्यमानः श्रु
कते ना॰वति कर्म कर्मैवेत्यत्राकर्मचाकर्मैवेति द्रष्टव्यं विमतं सत्यमव्यभिचारित्वात् ब्र
ह्मवदित्यर्थः तत्र कर्म तत्त्वतो नाव्यभिचारि कर्मत्वान्नौस्थस्य तटस्थवृक्षगमनवदित्य
व्यभिचारित्वं कर्मण्यसिद्धमिति परिहरति तत्रेति अकर्म च तत्त्वतो नाव्यभिचारि क
र्माभावत्वात् दूरप्रदेशे चैत्रमैत्रादिषु गच्छत्स्वेव चक्षुषा सन्निधान विधुरेषु दृश्यमानग
त्यभावादित्याह दूर इति दूरत्वादेव विशेषतः सन्निकर्षविरहितेषु तेषु स्वरूपेण चक्षुस
न्निकृष्टेषु चक्षुषागत्यभावदर्शनादिति योजना गतिरहितेषु तरुषु गति दर्शनवत् प्रकृते
ब्रह्मण्यविक्रिये कर्म दर्शनं सक्रिये च द्वैतप्रपञ्चे चितिमत्सु चैत्रादिषु गत्यभावदर्शनव
त् कर्माभावस्य विपरीतदर्शनं येन हेतुना सम्भवति तेन तस्य विपरीतदर्शनस्य निरस
नार्थं भगवद्वचनमिति दार्ष्टान्तिकं निगमयति एवमित्यादिना ननु कर्म तदभावयोरारो
पितत्वादविक्रियस्य ब्रह्मणो ज्ञानमात्राभिप्रेतं चेदव्यक्तोयमचिन्त्योऽयं न जायते म्रिय
ते वेत्यादिना पौनरुक्त्यं प्राप्तं तत्रैव ब्रह्मात्मनो निर्विकारत्वस्योक्तत्वादिति तत्राह त
देतदिति तदेतदात्मनि शंकितं सक्रियत्वमसकृदुक्तं प्रतिवचनमपि निर्विकारात्मवस्त्व
पेक्षयात्यन्तविपरीतदर्शनं मिथ्याज्ञानं तेन भावितत्वं तत् संस्कारप्रचयवत्त्वं ततोऽति
शयेन मोहमापाद्यमानो लोकः श्रुतेरपि तत्त्वं विस्मृत्य पुनर्यत् किंचित् प्रसंगमापाद्य
सक्रियत्वमेवात्मनश्चेदयतीति पुनः पुनस्तत्त्वभूतमुत्तरं भगवानभिधत्ते वस्तुतश्चदुर्विज्ञे
यत्वात् पुनःपुनः प्रतिपादनं तत्तद् भ्रमनिराकरणार्थमुपयुज्यते तया च नास्ति पुनरु
क्तिरित्यर्थः असदुक्तप्रतिवचनमेवानुवदति अव्यक्तोयमिति कर्माभाव उक्त इति मन्त्र
न्यः उत्तम्य न जायते म्रियते वा विपश्चिदित्यादि श्रुतौ प्रकृतस्मृतावसंगत्यादिना
येन च प्रसिद्धत्वमस्तीत्याह श्रुतीति न केवलमुक्तः कर्माभावः किन्तु सर्वकर्माणि म
नसा संन्यस्येत्यादौ वक्ष्यमाणश्चेत्याह वक्ष्यमाणश्चेति ननु कर्मणां देहादिनिर्वर्त्यत्वे
न तत् त्रैविध्यात् कूटस्थ स्वभावस्यात्मनोऽसंगत्वात्तद्व्यापाररूपस्य कर्मणोऽप्रसिद्धत्वात्
न तस्मिन् कर्मणि विपरीतस्य कर्मणो दर्शनं मिथ्येत्याशंक्याह तस्मिन्निति कर्मवि
परीतं तस्य दर्शनमिति यावत् अहं करोमीत्यात्मसमानाधिकरणस्य व्यापारस्यानुभ
वसिद्धत्वादात्मन्यत्यन्तदृष्टमित्यर्थः आत्मनि कर्मविभ्रमोस्तीत्यत्र हेतुमाह य
ति आत्मनो निःक्रियस्य कुतस्तस्मिन् कर्मविभ्रमः सम्भवेदित्याशंक्याह इति
दानीमात्मन्यकर्मसमुदाहरति तथेत्यादिना यथात्मनि स्वाभाविकमकर्म कर्म
[illegible] तद्भावस्य [illegible] तथात्मनोपि स्वाभाविकमविक्रियत्वं पुनरध्यस्तं
[illegible] कर्माभावोऽध्यस्त [illegible] [illegible] [illegible] आत्मनि क
[illegible] [illegible] [illegible] [illegible] [illegible] भगवानुवाच

र्थः सम्प्रत्यक्तोऽर्थे श्लोकाक्षरसमन्वयं दर्शयितुं कर्मणीत्यादि व्याचिख्यासुः भूमिकां क
रोति अत्रचेति व्यवहारभूमौ कार्यकारणाधिकरणं कर्म स्वेनैव रूपेण व्यवस्थितं सदात्म
न्यविक्रिये कार्यकरणारोपणद्वारेण सर्वैरारोपितमित्यत्र हेतुमाह यत इति अविवेकिना
न्तु कर्तृत्वाभिमानः सुतरामिति वक्तुमपिशब्दः आत्मनि कर्मरहिते कर्मारोपे दृष्टान्त
माह नदीति एवमात्मनि कर्मारोपमुपपाद्य प्रथमपादं व्याचष्टे अतइति आरोपवशादा
त्मनिष्ठत्वेन कर्मणि सर्वलोकप्रसिद्धे कर्माभावं यः पश्येत् स बुद्धिमानिति सम्बन्धः अ
कर्मदर्शनस्य यथाभूतत्वं सम्यक्त्वं तत्र दृष्टान्तमाह गत्यभावमिवेति द्वितीयपादं व्या
करोति अकर्मणि चेति अध्यारोपमभिनयति तूष्णीमिति अकर्मणि कर्मदर्शने युक्तिमाह
अहंकारेति पूर्वार्द्धेनोक्तमनूद्योत्तरार्द्धं विभजते य एवमिति आत्मनि कार्यं करणसंघात
समारोपद्वारेण तद्व्यापारमात्रे कर्मणि शुक्तिकायामिव रजतमारोपिते विषये तदभाव
मकर्मवस्तुतोयोरजताभाववदनुभवति अकर्मणि च संघातव्यापारोपरमे तद्द्वारा स्वात्म
न्यहं तूष्णीमासे सुखमित्यारोपिते गोचरे कर्माहंकारहेतुक यस्तत्त्वतोमन्यते सत्यद
भावविभावहीनशुक्तिमात्रवदात्ममात्रं कर्म तदभावविभागशून्यं कूटस्थं परमार्थतोव
गच्छन् बुद्धिमानित्यादि स्तुतियोग्यताम् गच्छतीत्येवं स्वाभिप्रायेण श्लोकं व्याख्याय अ
त्र वृत्तिकारव्याख्यानमुत्थापयति अथमिति अन्यथा व्याख्यानमेव प्रश्नद्वारा प्रकटयति
कथमित्यादिना ईश्वरार्थेनानुष्ठाने फलाभाववचनं व्याहतमिति मत्वाह किलेति नित्या
नामकर्मत्वमप्रसिद्धमित्याशंक्य फलराहित्यगुणयोगात्तेष्वकर्मत्वव्यवहारः सिध्यतीत्याह
गौण्येति नित्यानामकरणं मुख्यवृत्त्यैवाकर्मशब्दवाच्यमित्याह तेषांचेति तत्र कर्मशब्द
स्य प्रत्यवायाख्यफलहेतुत्वं गुणयोगात् गौण्यैव वृत्त्या प्रवृत्तिरित्याह तच्चेति पातनि
कामेवं कृत्वा श्लोकाक्षराणि व्याचष्टे तत्रेत्यादिना अकर्मणिचेत्यादिव्याकरोति तथेति
स बुद्धिमानित्यादि पूर्ववत् परकीयं व्याख्यानं व्युदस्यति नैतदिति नित्यं कर्माकर्मनि
त्याकरणं कर्मेति ज्ञानात् दुरितनिवृत्त्यनुपपत्तेर्भगवद्वचनं वृत्तिकारमते बाधितं स्या
दित्यर्थः धर्मेण पापमपनुदतीति श्रुतेर्नित्यनुष्ठानात्। दुरितनिबर्हणप्रसिद्धेस्तदनुष्ठानस्य
फलान्तराभावात् तदकर्मेति ज्ञात्वानुष्ठाने क्रियमाणे कथमशुभक्षयो नेति शंकते कथ
मिति येत्रज्ञान्येश्वरज्ञानाद्विशुद्धिः परमामतेति स्मरणात् कर्मणात्यन्तिकाशुभक्षयाभावे
ऽप्यंगीकृत्य परिहरतिनित्यानामिति नित्यानुष्ठानादशुभक्षयेऽपिनास्मिन् प्रकरणे तद्विवक्षि
तं यत् ज्ञात्वा मोक्ष्यसेऽशुभादिति ज्ञानादशुभक्षयस्य प्रतिज्ञानान्यावच तज्ज्ञानफलाभा
वविषयमेषितव्यमित्याह नहिवेति अशुभस्य फलाभावज्ञानकार्यत्वाभावात् न फलाभा
वज्ञानात्क्षयः सिध्यतीत्यर्थः किंचातीन्द्रियोर्थः शास्त्रादिवगम्यते नच नित्यकर्मणां फला
भावज्ञानादशुभनिवृत्तिरित्यत्र शास्त्रमस्तीत्याह नहीति नित्याकरणं कर्मेतिज्ञानमपि ना
शुभनिवृत्तिफलत्वेन चोदितमस्तीत्याह नित्यकर्मेति भगवद्वचनमेवात्र प्रमाणमित्याश
ङ्क्याह नचेति साधारणमेव यत् ज्ञात्वेत्यादि भगवतो वचनं ननु नित्यानां फलाभावं ज्ञा
त्वेति विशेषविषयमित्यर्थः अशुभमोक्षणासम्भवप्रदर्शनेन कर्मण्यकर्मदर्शननिराकरणान्न्या
येनाकर्मणि कर्मदर्शनं निराकरोति एतेनेति नामादिषु फलाय ब्रह्मदृष्टिवदकर्मण्यपि फ
लाय कर्मदृष्टिविधानाशुभमोक्षणानुपपत्तिरित्याशङ्क्याह नहीति अत्र हि श्लोके नित्य
स्य कर्तव्यतामात्रं परमत्र विवक्षितमतश्चाकर्मणि कर्मेति कर्मदर्शनं विधीयते तत् क
लायेति कल्पनामात्रं सिद्धान्तविरुद्धमित्याह नित्यस्यैवेति कस्मिन्नपि नित्यस्य कर्तव्यता
चास्य श्लोके न विवक्षितं किन्तु नित्यानुष्ठाने प्रवृत्तिविरुद्धार्थं नित्याकरणात् प्रत्यवा

यो भवतीति ज्ञानमपि कर्त्तव्यत्वेनात्र विवक्षितमेवेत्याशंक्याह नचेति न ताव
रस्य विज्ञानस्य फलं नियोगादेव तदुपपन्नेनापि फलान्तरमनुपलम्भादतोऽफल
णात् प्रत्यवायो भवतीति ज्ञानं नात्र कर्तव्यत्वेन विवक्षितमित्यर्थः क्रियाक
हार्द्विधावकरणस्यालम्बनत्वेन प्रधानत्वात् ज्ञेयत्वं वक्तव्यं तच्च तुच्छत्वादनु
त्याह नापीति अकरणस्याऽसतो नामादिवदाश्रयत्वेन दर्शनासम्भवेपि सामानाधि
वनेदं रजतमितिवद्दर्शनं भविष्यतीत्याशंक्याह नापि कर्मेति आदिशब्देन स्वप्न
दि गृह्यते फलवत्त्व स्तुतिर्वा सम्यग् ज्ञानस्य युक्तं न मिथ्याज्ञानस्यानुपपत्तेः
स्वप्ने मिथ्याज्ञानमपि फलवदुपलब्धमित्याशङ्क्य मिथ्याज्ञानस्याशुभाविरोधित्वान्न
त् तन्निवृत्तिरित्याह मिथ्याज्ञानमेवेति अशुभादेवाशुभनिवृत्तौ दृष्टान्तेनाह नहीति
वकपूर्वकमिदं रजतमिति सदसतोः सामानाधिकरण्यान् मिथ्याज्ञानं युक्तं कर्मा
स्तद्विवेकेन भासतो सामानाधिकरण्याधीनं ज्ञानं सिंहदेवदत्तयोरिव गौणं न मि
नं इति शंकते नन्विति कर्माकर्मेति दर्शने फलाभावो गुणः अकर्म कर्मेति दर्शने
लाभावो गुणस्तन्निमित्तमिदं ज्ञानं गौणमित्याह फलेति यथोक्तज्ञानस्य गौणत्वेऽ
माणिकफलाभावापत्र तद्गौणतोचितेति दूषयति नेत्यादिना कर्माकर्मेति दर्शने
भावो गुणः अकर्मकर्मेति दर्शने तु फलाभावो गुणस्तन्निमित्तमिदं ज्ञानं गौणमि
फलेति यथोक्तज्ञानस्य गौणत्वेऽपि प्रामाणिकफलाभावापत्तद्गौणतोचितेति दू
नेत्यादिना कर्माकर्मेत्यादि गौणविज्ञानोपन्यासव्याजेन नित्यकर्मकर्तव्यतया वि
त्वाद्गौणज्ञानस्याफलत्वमदूषणमित्याशङ्क्याह नापीति ज्ञानादशुभमोक्षणस्य श्रुतस्य
निरस्तस्य नित्यानुष्ठानस्य कल्पनेत्यनेन व्यापारगौरवेण न कश्चिद्विशेषः सिध्यती
वक्तमेव प्रपञ्चयति स्वशब्देनेति नरकपातः स्यादतो विधेरेवानुष्ठेयानि तानीति
कवाचकशब्दप्रयोगादेवापेक्षितार्थसिद्धिसम्भवे भगवतो व्याजवचनकल्पनमनुचितमि
तन्नेति प्रकृते श्लोके वृत्तिकृतां व्याख्यानेन परमाप्तस्यैव भगवतो विप्रलम्भकत्वमाप
मिति तदीयं व्याख्यानमुपेक्षितव्यमिति फलितमाह तत्रैवमिति नित्यकर्मानुष्ठानमि
यं व्याजरूपमिति भगवद्वचनमुचितमित्याशङ्क्य स्वशब्देनापीत्यादि प्रागुक्तपरिपाट्यापि
नुष्ठानबोधनसम्भवान्नैवमित्याह नचेत्दृति यस्तुशब्देन नित्यकर्मानुष्ठानमुच्यते यथा
प्रतिपादनं सुबोधत्वमिद्ध्यर्थं पौनःपुन्येन क्रियते तथा नित्यानामपि कर्मणामनुष्ठानं
मयकर्मेत्यादि शब्दान्तरेणोच्यमानं सुबोधं स्यादिति भगवतः शब्दान्तरं युक्तमित्या
त च नित्यानुष्ठानशास्त्रकल्पाभावान्नैवमित्याह नापीति किञ्च पूर्वमेव नित्यानुष्ठान
स्पष्टमुपदिष्टस्य तस्य सुबोधनार्थं शब्दान्तरमपेक्षितमित्याह कर्मण्येवेति कर्माकर्मे
विज्ञानव्याजेन नित्यकर्मानुष्ठानकर्तव्यतायां तात्पर्यं मित्येतन्निराकृत्य कर्माकर्मे
दर्शनं गौणमिति पक्षे दूषणान्तरमाह मयेव चोक्तेति यथा प्रत्यक्षेण दि [illegible]
[illegible] नाहं [illegible] तदेव बोद्धव्यमित्युपपन्ने न निष्फले [illegible]
[illegible] पश्यति च कर्मदर्शनं गौणत्वादेव [illegible]
[illegible] किञ्चकर्मदर्शनमापन्नं गौणमपि तद्रूपं ज्ञानं [illegible]
[illegible] मिथ्याज्ञानस्य [illegible]
[illegible]
[illegible]
[illegible]

र्मभिदधाति असत इति असतः सद्रूपेण भवनमभवनञ्च निःस्वरूपत्वादनुपपन्नं निरस्तम सततत्त्वस्य किञ्चित् तत्तत्वाभ्युपगमे सर्वप्रमाणानामप्रामाण्यप्रसंगादित्याह तच्चेतियन नित्यानां फलराहित्यं तत्राकर्मशब्दप्रयोगे निमित्तमितितन्निरस्यति नचेतिनकेवलं विध्युद्दे शोस्वफलाभावान्नित्यानां विध्यनुपपत्तिरपितु धात्वर्थस्य क्लेशात्मकत्वात् तत्र श्रुतफलभा वे नैव विधिरवकाशमासादयेदित्याह दुःखेति दुःखरूपस्यापि धात्वर्थस्य साध्यत्वेन काम्य त्वात् तद्विषयो विधिः स्यादिति चेन्नेत्याह दुःखस्य चेति स्वर्गादिफलाभावेऽपि नित्या नामकरणनिमित्तनिरयनिवासार्थं दुःखरूपाणामपि स्यादनुष्ठेयत्वमित्याशङ्क्याह तदकरणे चेति फलान्तराभावेऽपि मोक्षसाधनत्वात् मुमुक्षुणा नित्यानि कर्माणि अनुष्ठेयानि इत्याशङ्क्याह स्वाभ्युपगमेति वृत्तिकारव्याख्यानासम्भवे फलितमुपसंहरति तस्मादिति कोऽसौ यथा श्रुतोऽर्थः श्लोकस्येत्याशङ्क्याह तथाचेति ॥ १८ ॥

स्वामिकृतटीका।

मनुष्येषु कर्मकुर्वाणेषु स एव बुद्धिमान् व्यवसायात्मकबुद्धिमत्ताच्छ्रेष्ठः तं प्रस्तौति स युक्तो योगी तेन कर्मणा ज्ञानयोगावाप्तेः स एव कृत्स्नकर्मकर्ता च सर्वतः संप्लुतोदक स्थानीये च तस्मिन् कर्मणि सर्वकर्मफलानामन्तर्भावात् तदेवमारुरुक्षोः कर्मयोगाधि कारावस्थायां न कर्मणामनारम्भादित्यादिनोक्तः एव कर्मयोगः स्पष्टीकृतस्तत्प्रपंचरूप त्वाच्चास्य प्रकरणस्य न पौनरुक्त्यदोषः अनेनैव योगरूढावस्थायां यस्त्वात्मरतिरेवस्यादि त्यादिना यः कर्मानुपयोगउक्तस्तस्याप्यर्थात् प्रपंचकृतोवेदित्यव्यः तदारुरुक्षोरपि कर्म बन्धकं न भवति तदारूढस्य कुतो बन्धकं स्यादित्यत्रापि श्लोकोयुज्यते यद्वा कर्मणि देहेन्द्रियादिव्यापारे वर्त्तमानेऽप्यात्मनो देहादिव्यतिरेकानुभवेन अकर्म स्वाभाविकं नैष्कर्म्यमेव यः पश्येत् तथा अकर्मणि च ज्ञानरहिते दुःखबुद्ध्या कर्मणांत्यागे कर्म यः पश्येत्तस्य प्रयत्नसाध्यत्वेन मिथ्याचारत्वात् तदुक्तं कर्मेन्द्रियाणि संयम्येत्यादिना य एवं भूतः स तु सर्वेषु मनुष्येषु बुद्धिमान् पण्डितः तत्र हेतुर्यतः कृत्स्नानि सर्वाणि यदृ च्छया प्राप्तानि आहारादीनि कर्माणि कुर्वन्नपि स युक्त एव अकर्त्तात्मज्ञानेन समाधिस्थ यतस्तथ्यः अनेनैव ज्ञानिनः स्वभावादापन्नं फलंच भक्षणादिकं न दोषाय अज्ञस्य तु राग तः कृतं दोषायेति विकर्मणोऽपि त[illegible] [illegible]पितं द्रष्टव्य[illegible] ॥ १८ ॥

अब कौनसा क[illegible] जानिवे योग्य है जिस की भगवान्ने अ[illegible] इसआकांक्षा में कहते हैं कि [कर्मणीति [illegible]त देहेन्द्रियादि[illegible] की चेष्टा तिसमें जो [illegible] [illegible] और अकर्मजो [illegible]र्म जो प्रवृत्ति नि[illegible] [illegible]को विनाही मानदुष्[illegible] इस हेतुसे जो कर्म द[illegible] कर्म तिसमें तो जो परम[illegible] और देहेन्द्रिया- दिरोरा[illegible] [illegible]तो उनका कर्म

तीहै जैसेकहा कि पात्रमें घृतहै तो यहांपात्र आधारहै और घृतआधेयहै परन्तुदोनों की भिन्नभिन्न प्रतीति होतीहै पात्रभी कोई वस्तुहै औरउसमें रहनेवाला घृतभी कोई पदार्थहै ऐसीप्रतीति होतीहै और जो घृतके आतेही पात्रनष्ट होजाय फिरपात्रमें घृतहै ऐसा कोई कहिसक्ताहै तैसेही कर्ममें जो उसके स्वरूपका नाशकरने वाला अकर्मआके स्थितहुआ तो अकर्मयही व्यवहाररहा और कर्मयह व्यवहारनष्ट होगया तो कर्ममें स्थित अकर्मको देखताहै यहअर्थ कैसेसंभव होताहै ऐसेही अभावरूप अकर्मउसमें भावरूप कर्मकी स्थिति कैसे संभव होतीहै और जो उसमें भावरूप कर्मस्थित है ऐसी प्रतीति होय तो अकर्म यहव्यवहारही नष्टहोजाय तिससे औपश्लेषिक अधिकरण दोनों भावरूप पदार्थहोयं तहांही होताहै भावाभाव पदार्थोंका नहींहोता इससे विषयसप्तमीही करके जो अर्थ निर्दोषहै सो प्रतिपादन किया जाताहै कि लौकिक मनुष्योंने कर्म और अकर्म येविपरीतही ग्रहणकियेथे जैसे मृग तृष्णामें जल और सीपी में चांदी भ्रान्तिही से सत्य कीनाईं प्रतीतहोवें तैसेही भ्रान्त पुरुषोंने कर्म अकर्मादि व्यवहारभी सत्य हीमानरक्खाथा नकहो कोई तो कर्मादियुक्त जगत्को सत्यमानके ऐसा कहतेहैं कि कर्म कर्मही सदासबको प्रतीत होताहै कभीव्यभिचार को प्राप्तनहींहोता अर्थात् सबकी दृष्टिमें जैसा कुछकर्मका स्वरूप है वैसाही बनारहता है यहनहीं कि कर्मकभी अकर्मरूपसे प्रतीत होय और अकर्म कर्मरूपसे सो यह उनका कथन असंगतहै अर्थात् मिथ्याहै क्योंकि जबनौकामें कोई पुरुषबैठा और नौकाजबचलती है तबनदीके तटके वृक्षवास्तव में चलतेनहीं हैं और कितने मनुष्योंको यहप्रतीति होतीहै कि वृक्षभीचलतेहैं और चलनेवाले दूरस्थ मनुष्योंमें यहप्रतीत होताहै कि जेचलते नहीं हैं किन्तु खड़े हैं ऐसी प्रतीति होतीहै और वास्तवमें तो वे चलतेहीहैं तो फिरसबकी दृष्टिमें कर्मकास्वरूप एकसाकहांरहा कदाचित् कहो भ्रान्तिकर के ऐसाजाना तो भ्रान्तिभी बुद्धिहीका कर्महै उसमेंभी व्यभिचारहै किसी को भ्रान्ति होतीहै और किसीको नहीं ऐसे यहांभी परमार्थमें कर्मरहित हीआत्माहै तिसमें मैंकरताहूं यहमिथ्याही प्रतीति होरहीहै और कर्मयुक्त में भी नेत्रकी दृष्टिसे दूरस्थितमनुष्यमें अकर्म देखनाभी प्रसिद्धहै और आप हीजिस समयमें मौनहोके बैठताहै तो कहताहै किमैं इससमयमें कुछनहीं करताहूं सो भी झूंठही कहताहै क्योंकि बाहरकी इन्द्रियोंसे नहीं कियातो मनसे तो कुछविचारादि कररहारहाहै तो कर्ममें अकर्मका देखना उसविपरीतदर्शीको सिद्ध हुआ तो जिसकारणसे ऐसा विपरीतदर्शन अर्थात् उलटा देखना इसमूढपुरुषको होरहा है तिस विपरीतदर्शनरूप दोषके दूरकरने को भगवान् कहतेहैं कि जो कर्ममें भी आत्माको अकर्म कर्मरहितही देखताहै यद्यपि यहआत्मज्ञान अर्जुनके प्रश्नके प्रसंगसे प्रत्युत्तर द्वाराभगवान् ने बारम्बार कहाभी है तोभी अत्यन्त विपरीतदर्शनकी भावनाकरके धारं

वार मोहकोप्राप्त होनेवाला जो मनुष्य सो वारम्वार कहाहुआ भी जो तत्त्वहै तिसको भूलकरके झूठेप्रसंगोंको डालके वारम्वार पूछता है इससे भगवान्भी कृपाकरके परमात्मरूप वस्तुकी दुर्ज्ञेयताको विचारके अर्थात् परमात्मस्वरूप का जानना वड़ामुशकिल है ऐसाजानके वारम्वार उत्तर कहतेहैं और दयालुताके वशसे यहनहीं अपने मनमें लाते कि इसप्रसंग को हमकईवार अर्जुनसे कहिचुके हैं और उसीको यह वारम्वार पूछता है तो उसकी उपेक्षाकरदेना चाहिये किन्तु प्रीतिपूर्वक उसको कहतेही हैं इसीसे [अव्यक्तोयमचिन्त्योयं नजायतेम्रियतेइत्यादि] यहआत्माअव्यक्तहै अर्थात् अप्रकटहै और अचिन्त्य है और नकभी उत्पन्नहोता है और नकभी मरताहै ऐसे पूर्वोक्तश्लोकों में श्रुतिस्मृति न्यायप्रसिद्ध आत्मा में विकारोंका अभावकहा और अगाड़ी कहेंगे भी फिर तिस आत्मामें कर्मका अभावहोत सन्ते कर्मरहित आत्मामें विपरीतदर्शन अत्यन्तास्थित होरहा है जिससे इसीसे कहा क्याकर्महै क्याअकर्म है इसमें पण्डितलोगभी मोहकोप्राप्त होरहेहैं और इसीसे यहमनुष्यलोक आत्मामें देहादिकोंमें होनेवाला कर्मका आरोपण करके मैंकरताहूं मेरायह कर्महै मुझको इसकर्मका फल अवश्य भोगनाहै और कोई तो ऐसा कहताहै किमैं मौनहोताहूं सब क्लेशोंको त्यागकरके कर्मरहितहुआ सुखीहोउंगा इसप्रकार वाह्यकर्मेन्द्रियोंके व्यापाररूप कर्मकी निवृत्तिजोहै सोईहुआ कर्मतिसकर्मको आत्मामें आरोपण करके और सुखित्वधर्म आत्मामें आरोपण करके में कुछ नहीं करताहूं और मौनहोके सुखपूर्वक स्थितहूं ऐसा अभिमान करताहै तहां यहलोकके विपरीत दर्शनका दूरकरनेको भगवान् उपदेश करतेहैं कि [कर्मण्यकर्मयःपश्येदित्यादि] अवइस श्लोकका जो वास्तव निश्चित अर्थहै तिसको कहतेहैं कि यहां कर्मशब्द करके जो प्रसिद्धदेहेन्द्रियों का व्यापार उसीका ग्रहणहै जोकि कर्मरहित और विकाररहित आत्मामें सबअज्ञमनुष्योंने आरोपण कररक्खाहै जिस अध्यासरूप मिथ्या आरोपणसे पण्डित भी ऐसा अभिमान कररहाहै कि मैं कर्मकरताहूं इसप्रकार आत्माके संबन्धकरके अर्थात् आत्माहीमें प्रतीयमान जो सकललोकप्रसिद्ध देहेन्द्रियादिव्यापाररूप कर्मतिसके होनेमें भी जैसेकोई नौकाके ऊपर स्थितबुद्धिमानपुरुष नौकाके चलनेमें नदीके किनारेके वृक्षोंमें गतिका अभाव अपनी बुद्धिके निश्चयसे देखताहै अर्थात् और मूढ़पुरुषोंको नौकाके चलने में किनारे के वृक्षोंकाभी चलना प्रतीत होता है और बहुबुद्धिमान् पुरुष तो अपनीबुद्धिसे यहनिश्चय करके जानताहै कि नौकाही चलतीहै वृक्षनहीं चलतेहैं तैसेही जो विवेकी पुरुषआत्मामें कर्मका अभावही देखताहै अर्थात् वह विवेकी पुरुषअपनी विवेकवती बुद्धिके निश्चयसे यहजाने कियहव्यापाररूप कर्म अन्तःकरण सहितदेह इन्द्रियोंकाही है आत्मा तो क्रियादिरहितविशेष निर्मल अर्थात् शुद्धज्ञान स्वरूपही है और कर्मके मध्यआत्मा

अब यह सम्यग्दर्शन रूप ज्ञानयज्ञ दैवयज्ञादिकोंकेभी न इसवास्ते कि जिससे [श्रेयान्द्रव्यमयाद्यज्ञात्] इसश्लोक करके भगवान् सब से ज्ञानयज्ञकी श्रेष्ठता कहैंगे उसकी सिद्धिहोवै अब संयमादि यज्ञ कहैं कि[श्रोत्रेति] और हे अर्जुन और जे योगीलोगहैं ते तौ श्रोत्रादिक इंद्रि का संयमरूप अग्नियों में हवन करते हैं अर्थात् विषयोंसे इन्द्रियों को के मनकरके उन्होंको संयम करतेहैं सम्यक्प्रकारसे विषयोंसे निवृत्तिहा अपने वशमें रखते हैं यद्यपि संयम एकहीप्रकारका है तौभी इंद्रियोंके भे से संयमका भी भेदमानिके [संयमाग्निषु] यहां बहुवचनकहा और सं म रूप अग्निमें हवन कहनेसे यह सूचनकिया कि जैसे हवनकीहुई व की भस्महोजातीहै तौ वह वस्तु और कार्य्यको नहीं करसक्ती तैसेही जन की इंद्रियां भी फिर अनर्थकरने को समर्थ नहीं रहतीहैं और लोग तौ शब्दादि विषयों को इंद्रियरूप अग्नियोंमें हवनकरते हैं अर्थ श्रोत्रादिक इंद्रियों करके अविरुद्ध विरोधरहित विषय ग्रहणरूप होम करते हैं क्योंकि यहां विषयसेवनही को भगवान् ने यज्ञरूप वर्णनकरने यह सूचन किया कि जैसे वेदके मन्त्रोंकरके संस्कार की हुई अग्निमें पवित्र वस्तुको देवताका ध्यानकरके शास्त्रकी विधिसे हवन कियाजाता तब वह यज्ञकहाता है तैसे यहां भी अध्ययनादि संस्कारयुक्त इंद्रियरू अग्निमें अतिथि ब्राह्मणादिकों को निवेदनकरने से और न्यायोपार्जि धनादिकों से सिद्धहोनेसे और विवाहकी विधिसे संस्कारयुक्त स्त्र के ग्रहणकरने से अतिपवित्र शब्दादि विषयोंका परमेश्वरका ध्यानक हुआ गृहस्थ धर्मशास्त्रकी विधिसे निषिद्ध विषयोंको छोड़िके हवना उस गृहस्थ को भी इसप्रकारका विषयोंका सेवन यज्ञरूपहीहोताहै और निष्काम कियाजाय तौ अन्तःकरण शुद्धिद्वारा ज्ञानयज्ञके अधिकारी [illegible] ॥ २६ ॥

सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे ।
आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥ २७ ॥

[illegible]

[illegible]

नाग्निदीपिते स्नेहेनेव प्रदीपिते विवेकविज्ञानेनोज्ज्वलभावमापादिते जुह्वति प्रविलापयन्ति इत्यर्थः ॥ २० ॥

आनन्दगिरिकृतटीका।

यज्ञान्तरं कथयति किञ्चेति इन्द्रियाणां कर्माणि श्रवणवदनादीनि आत्मनि संयमो धारणा ध्यानसमाधिलक्षणः सर्वमपि व्यापारं निरुध्य आत्मनि चित्तसमाधानं कुर्वन्तीत्याह विवेकेति ॥ २० ॥

स्वामिकृतटीका।

किञ्च सर्वाणीति अपरेध्याननिष्ठा बुद्धीन्द्रियाणां श्रोत्रादीनां कर्माणि श्रवणदर्शनादीनि कर्मेन्द्रियाणां वाक्पाण्यादीनां कर्माणि वचनोपादानादीनि प्राणानांच दशानां कर्माणिप्राणस्य वहिर्गमनं अपानस्याधोगमनं व्यानस्य व्यायनाकुञ्चन प्रसारणादीनि समानस्याशितपीतादीनां समुन्नयनं उदानस्योर्द्ध्वनयनं उद्गारे नाग आख्यातःकूर्म उन्मीलने स्मृतः कृकरः चुत्करोज्ञेयो देवदत्तोविजृम्भने न जहाति मृतंचापि सर्वव्यापी धनंजयः इत्येवं रूपाणि जुह्वति आत्मनि संयमोध्यानैकाग्र्यं स एव योगः स एवाग्निस्तस्मिन् ज्ञानेन ध्येयविषयेन दीपिते प्रज्वलिते ध्येयं सम्यग्ज्ञात्वा तस्मिन्मनः संयम्य तानि सर्वाणि कर्माणि उपरमयन्तीत्यर्थः ॥ २० ॥

नवलभाष्य।

और हे अर्जुन और जे राजयोगके सेवनकरनेवाले योगी हैं ते तौ सब इंद्रियोंके जे कर्म्म हैं दर्शन स्पर्शनादिक और प्राणवायुके जे कर्म्म आकुंचन प्रसारणादि अर्थात् समेटना और फैलादेना आदि जे कर्म्म तिनसबोंको आत्मामें जो संयम अर्थात् चित्तकी स्थिरता सोई हुआ योगाग्नि नाम ध्यान धारणा समाधिरूप अग्नि फिर कैसा वह अग्निहोय ज्ञानदीपित होय अर्थात् जैसे घृतकरके अग्नि प्रकाशित होताहै तैसे आत्मानात्म विवेकज्ञान करके जो दीपित प्रकाशित होरहा ऐसे आत्मसंयम योगरूप अग्निमें हवन करते हैं अर्थात् सब कर्म्मोंका लय करते हैं ॥ २७ ॥

द्रव्ययज्ञास्तपो ... स्तथाऽपरे।
स्वाध्य ... ॥ २८ ॥

द्रव्येति ... द्रव्ययज्ञास्तपोयज्ञास्तपो
यज्ञो येषां ... णो योगो यज्ञो येषां
ते ... येषां
ते स्वा
यज्ञाश्च
येषां ते ... नि

यत्र ... तीर्थेष्वि

ति तपस्विनां यज्ञबुद्ध्या तपोनुतिष्ठतां नियमवताम् इत्यर्थः प्रत्याहारादीत्यादिग्रहणेन यमनियमासनध्यानधारणा समाधयो गृह्यन्ते यथा विधिप्राङ्मुखत्वपवित्रपाणित्व द्यज्ञविधिमनतिक्रम्येति यावत् व्रतानां तीक्ष्णीकरणमतिदृढत्वम् ॥ २८ ॥

स्वामिकृतटीका ।

किञ्च द्रव्ययज्ञा इत्यादि द्रव्यदानमेव यज्ञोयेषां ते द्रव्ययज्ञाः कृच्छ्रचान्द्रायणादि तप एव यज्ञोयेषां ते तपोयज्ञाः योगश्चित्तवृत्तिनिरोधलक्षणसमाधिः स एव यज्ञोयेषां ते योगयज्ञाः स्वाध्यायेन वेदेन श्रवणमननादिना यत् तदर्थज्ञानं तदेव यज्ञो येषां ते ग द्वा वेदपाठयज्ञास्तदर्थज्ञानयज्ञाश्चेति द्विविधा यतयः प्रयत्नशीलाः सम्यक् शितं निशि तीक्ष्णीकृतं व्रतं येषां ते ॥ २८ ॥

नवलभाष्य ।

और हे अर्जुन कोई पुरुष द्रव्ययज्ञकरते हैं अर्थात् जिससमय में कोई पात देनेके योग्य ब्राह्मण प्राप्तहुआ उसमें दानविधिसे धनरूपआहुति क यज्ञबुद्धिसे त्यागकरते हैं तौ वेपुरुष यज्ञ करने वाले कहाते हैं और कोईत यज्ञहोतेहैं अर्थात् मनसहित इन्द्रियों का निग्रहवशकरना यहीतप जिन्हे का ऐसे जे तपस्वी वे तपयज्ञहोते हैं और कोई योगयज्ञहोते हैं अर्थात् प्रा णायाम प्रत्याहारादि आठप्रकारका योगहीयज्ञ जिन्होंका वेयोगयज्ञ कहाते और कोई स्वाध्याय यज्ञहोते हैं अर्थात् स्वाध्याय जो विधिपूर्वक ऋग्वेदा दिकों के पठनका अभ्याससोईहै यज्ञजिन्हों का वे स्वाध्याययज्ञ कहाते और किन्होंको यथावत् शास्त्रोंके अर्थका परिज्ञानरूपही यज्ञहै अर्थात् शा दिवसशास्त्रोंके अर्थके विचारहीमें जिन्होंकी यज्ञकी भावनाहोरही वे ज्ञा यज्ञ कहातेहैं और जे दोनोंप्रकारके यज्ञकरनेवाले संशितव्रतहैं अर्थात् स म्यक्प्रकार करके शितनाम तीक्ष्णहै ब्रह्मचर्य्यादि व्रत जिन्होंका ऐसे और यत्नकरने का है स्वभाव जिन्होंका इससे यती कहाते हैं ॥ २८ ॥

अपाने जुह्वति प्राणं प्राणेऽपानं तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणाः ।
अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति ॥ २९

नियताहाराः सन्तः प्राणान् वायुभेदान् प्राणभेदेष्वेव जुह्वति यस्य यस्य वायोर्जयः क्रियते इतरान् वायुभेदांस्तस्मिन् जुह्वति ते तत्र प्रविष्टा इवभवन्ति ॥ २६ ॥

आनन्दगिरिकृतटीका।

प्राणायामाख्यं यज्ञमुदाहरति किंचेति प्राणायामपरायणाः सन्तो रेचकं पूरकंच कृत्वा कुम्भकं कुर्वन्तीत्याह प्राणेति प्राणापानयोर्गतौ श्वासप्रश्वासौ निरुध्य किं कुर्वन्तीत्यपेक्षायामाह किंचेति प्राणापानगतिनिरोधरूपं कुम्भकं कृत्वा पुनः पुनर्वायुजयं कुर्वन्तीत्यपेक्षायामाह किंचेति प्राणापानगतिनिरोधरूपं कुम्भकं कृत्वा पुनः पुनर्वायुजय कुर्वन्तीत्यर्थः आहारस्य परिमितत्वं हि तत्त्वमेध्यत्वोपलक्षणार्थं प्राणानांप्राणेषु होममेव विभजते यस्येति जितेषु वायुभेदेष्वजितानां तेषां होमप्रकारं प्रकटयति ते तत्रेति॥२६॥

स्वामिकृतटीका।

किंच अपाने इति अपानेऽधोवृत्तौ प्राणमूर्ध्ववृत्तिं पूरकेन जुह्वति पूरककाले प्राणमपानेनैकी कुर्वन्ति तथा कुम्भकेन प्राणापानयोरूर्ध्वाधोगती रुध्वा रेचककालेऽपानं प्राणे जुह्वति एव पूरककुम्भकरेचकैः प्राणायामपरायणा अपरे इत्यर्थः किंच अपरे इति प्रपरेत्वाहारसंकोचमभ्यस्यन्तः स्वयमेव जीर्यमाणेष्विन्द्रियेषु तत्तदिन्द्रिय वृत्तिलयं होमं भावयन्तीत्यर्थः यद्वा अपाने जुह्वति प्राणं प्राणेपानं तथापर इत्यनेन पूरक रेचकयोरवतप्य मानयोर्हंसः सोहमित्यनुलोमतः प्रतिलोमतश्चाभिव्यज्यमानेनाजपामन्त्रेणात त्वं पदार्थैक्यं व्यतीहारेण भावयन्तीत्यर्थः तदुक्तं योगशास्त्रे सकारेण बहिर्याति हकारेण विशेत् पुनः प्राणस्तत्र स एवाहमहं स इति चिन्तयेदिति प्राणापानगतीरुध्वेत्यनेन श्लोकेन प्राणायाम यज्ञा अपरे कथ्यन्ते यत्रायमर्थः द्वौभागौ पूरयेदन्नैर्जलैरेकं प्रपूरयेत् मारुतस्य प्रचारार्थं चतुर्थमवशेषयेत् इत्येवमादिवचनोक्तनियतआहारा येषां ते कुम्भकेन प्राणापानगती रुध्वा प्राणसंयमन परायणाः सन्तः प्राणा इति इन्द्रियाणि प्राणेषु जुह्वति कुम्भके हि सर्वप्राणा एकी भवन्ति तत्रैव लीयमानेष्विन्द्रियेषु होमं भावयन्तीत्यर्थः तदुक्तं योगशास्त्रे यथा यथा सदाभ्यासान्मनसः स्थिरता भवेत् वायुवाक्काय दृष्टीनां स्थिरता च तथा तथेति ॥ २६ ॥

नवलभाष्य।

और हे अर्जुन कोई अपान वृत्ति पवनमें अर्थात् अधोमार्गकरके जानेवाले पवनमें प्राण वृत्ति पवनका हवन करते हैं अर्थात् मुख नासिका मार्ग करके निकलनेवाले पवनको अपानवायुमें स्थापनकरके बाहर नहीं निकलनेदेते हैं इसरीतिसे पूरकनाम प्राणायाम करते हैं और कोई प्राणवायु में अपानवृत्ति पवनका हवनकरते हैं अर्थात् नीचेमार्गकरके जानेवाले अपानवायु को प्राणवायुमें मिलाके मुख और नासिकाके मार्ग करके दोनोंको निकालते हैं इसप्रकारसे रेचकनाम प्राणायामको करते हैं और इसप्रकार प्राणायाममें तत्परजे पुरुष ते मुख नासिका मार्ग करके जानेवाला जो प्राणवायु और नीचेके मार्गकरके जानेवाला जो अपानवायु इनदोनों की गतिको रोककरके कुम्भकरूप जो प्राणायाम तिसकोकरतेहैं ॥

और तो परिमित भोजनको करतेहुए प्राणवायुके जे अपानादि
भेदहैं तिनको उन्हींहीं में हवनकरते हैं अर्थात् जिस जिस पवन
करके जीतते हैं उस जीतेहुए पवनमें और जो विनाजीते हैं तिनस्था
पनकरके फिर नहीं कहीं जानेदेते हैं यही उनका हवनहुआ जैसे हृ
प्राणवायु का स्थानहै १ और गुदामें अपान २ और नाभिमें समान
और कण्ठमें उदान ४ और सबशरीरमें व्यान रहता है ५ और
देवदत्त पवन ६ और उदरमें नागनाम पवन ७ और सब कोशोंमें
नाम पवन ८ और छींककरानेवाला नासिकामें कृकल ९ और
खोलने में कूर्म्म पवन१०रहताहै इसप्रकार जिसस्थानका पवनप्रथम
जाताहै तौ उसी जीतेहुए पवनके स्थानमें योगी और स्थानों से भी
नोंको खैंचिकै उसस्थानमें स्थापनकरताहै जैसे नाभिचक्रमें
जीतिके योगी उसीस्थानमें सब पवनोंको स्थिरकर फिर हृदयादि स्था
स्थापनकरता है तौ उस योगीका यही हवनकरनाहुआ जो जीतेहुए
में और पवनों का स्थापनकरना ॥ २९ ॥

सर्वेऽप्येते यज्ञविदो यज्ञक्षयितकल्मषाः ।
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ॥ ३० ॥

शङ्करभाष्यम् ।

सर्व इति सर्वेऽप्येते यज्ञविदो यज्ञक्षयितकल्मषाः यज्ञैर्यथोक्तैः क्षयितो नाशितो कल्मषो
षां ते यज्ञक्षयितकल्मषाः एवं यथोक्तान् यज्ञान् निर्वर्त्य यज्ञशिष्टामृतभुजो यज्ञानां शिष्ट
शिष्टं यज्ञशिष्टञ्च तदमृतञ्च यज्ञशिष्टामृतं तत् भुञ्जतइति यज्ञशिष्टामृतभुजो यथोक्तान् यज्ञान्
कृत्वा तच्छिष्टेन कालेन यथा विधिचोदितमन्नममृताख्यं भुञ्जत इति यज्ञशिष्टामृतभुजो
गच्छान्ति ब्रह्म सनातनं चिरंतनं मुमुक्षवश्चेत् कालातिक्रमापेक्षणायोविशब्द सामर्थ्या
गम्यते ॥ ३० ॥

आनन्दगिरिकृतटीका ।

प्रकृतान् यज्ञानुपसंहरति सर्वेपीति यथोक्तयज्ञनिर्वर्तनानन्तरं क्षीणे कल्मषे कि
दित्याशङ्क्याह एवमिति यथोक्तानां मध्ये केनचिदपि यज्ञेन विशेषितस्य पुरुषस्य
वायं दर्शयति नायमिति पादान्तरेण कथं यथोक्तयज्ञानुष्ठायिनामवशिष्टेन कालेन
तान्नभुजां ब्रह्मप्राप्तिरित्याशङ्क्य मुमुक्षुत्वे सति चित्तशुद्धिद्वारेत्याह मुमुक्षवश्चेदिति
किमिदानीं साक्षादेव मोक्षो विवक्षितः तथाच गतिश्रुतिविरोधः स्यादित्याशङ्क्य
निर्देशसामर्थ्यात् क्रममुक्तिरत्राभिप्रेतेत्याह कालातीति ॥ ३० ॥

स्वामिकृतटीका ।

तदेव मुक्तानां द्वादशानां यज्ञविदां फलमाह सर्वेप्येते इतियज्ञान् विन्दन्ति
यज्ञ[illegible] या यज्ञैः क्षयितं नाशितं कल्मषं यैः यज्ञान्कृत्वा
[illegible]ति तथा ते सनातनं नित्यं ब्रह्मज्ञानद्वारेण प्र[illegible]

नवलभाष्य।

और हे अर्जुन जे सब यज्ञोंके जाननेवाले पुरुष अपने अपने अधिकार के अनुरोधकरके इन बारह प्रकारके यज्ञोंके मध्यमें कोई प्रकारके यज्ञके करनेसे नाशको प्राप्तहुए पाप जिन्होंके और अपना यज्ञकरके उसके अनन्तरकालमें अमृतरूप अन्नको भोजनकरते हुए सब पापोंसे छूटजाते हैं और जो मोक्षमें इच्छा होय तौ सनातन जो ब्रह्म तिसको ज्ञान प्राप्ति द्वारा प्राप्त होतेहैं ॥ ३० ॥

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥ ३१ ॥

शङ्करभाष्यम्।

नायमिति नायं लोकाः सर्वप्राणिसाधारणोऽप्यस्ति यथोक्तानां यज्ञानामेकोपि यज्ञो यस्य नास्ति सोऽयज्ञस्तस्य कुतोऽन्यो विशिष्टसाधनसाध्यः कुरुसत्तम ॥ ३१ ॥

आनंदगिरिकृतटीका।

तृतीयं पादंव्याचष्टे नायमिति विवक्षितं कैमुतिकन्यायमाह कुत इति साधारणलोकाभावे पुनरसाधारणलोकप्राप्तिर्दूरनिरस्तेत्यर्थः यथोक्तेऽर्थे बुद्धिसमाधानं कुरुकुलप्रधानस्य अर्जुनस्य अनायासलभ्यमिति वक्तुं कुरुसत्तमेत्युक्तम् ॥ ३१ ॥

स्वामिकृतटीका।

तदकरणे दोषमाह नायमिति अयमल्पसुखोपि मनुष्यलोको अयज्ञस्य यज्ञानुष्ठानरहितस्य नास्ति कुतोऽन्यो बहुसुखः परलोकः अतो यज्ञाः सर्वथा कर्तव्या इत्यर्थः ॥ ३१ ॥

नवलभाष्य।

और हे अर्जुन इन बारह प्रकारके यज्ञोंमें से जो पुरुष कोई प्रकारका यज्ञनहीं करताहै तिस अयज्ञ पुरुषका अर्थात् यज्ञरहित जो पुरुष तिसका सर्वसाधारण जो यह मनुष्य लोक सो भी नहीं है अर्थात् यज्ञानुष्ठान रूप मेरी आत्मासे+वहिर्मुख उसमूर्ख पुरुषका वृथाइसकर्मलोकमें जीवनहै और यही लोक न हुआ तौ सुकृतसाध्य और लोककी कौन आशाहै ॥ ३१ ॥

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान् विद्धि तान् सर्वानेवं ज्ञात्वा विमोक्ष्यसे ३२ ॥

शङ्करभाष्यम्।

एवमिति एवं यथोक्ता बहुविधा बहुप्रकारा यज्ञा वितता विस्तीर्णा ब्रह्मणो वेदस्य मुखे द्वारे वेदद्वारेणावगम्यमानाः ब्रह्मणोमुखे वितता उच्यन्ते तद्यथा वाचि हि प्राणं जुहुमइत्यादयः कर्मजान् कायिकवाचिकमानसकर्मोद्भवान् विद्धितान् सर्वाननात्मजान् निर्व्यापारो ह्यात्मा अत एवं ज्ञात्वा मोक्ष्यसेऽशुभात् न मद्व्यापारा इमे निर्व्यापारोऽहमुदासीन इत्येवं ज्ञात्वास्मात् सम्यग्दर्शनात् मोक्ष्यसे संसारबन्धनादित्यर्थः ॥ ३२ ॥

+ उसका करना मेरी इच्छा से

आनंदगिरिकृतटीका ।

उक्तानां यज्ञानां वेदमूलत्वेनोत्प्रेक्षा निबन्धनत्वं निरूपयति एवमिति आत्मव्यापारमाध्यस्थमुक्तकर्मणामाशङ्का दूषयति कर्मजानिति आत्मनो निर्व्यापारत्वज्ञाने फलमाह एवमिति कथं यथोक्तानां यज्ञानां वेदस्य मुखे विस्तीर्णत्वमित्याशङ्क्याह वेदद्वारेणेति आत्मनोऽवगमसमानत्वमेवोदाहरति तद्यथेति एतद्धस्मवैतत्पूर्वे विद्वांस आहुतिस्तुक्रमाध्ययनाद्याक्षिप्य हेत्वाकांक्षायामुक्तं वाचिहोति ज्ञानशक्तिमद्विषये क्रियाशक्तिमदुसंहारोऽत्र विवक्षितः प्राणे वा वाचं यो होवप्रभवः स एवाप्यय इति वाक्यमादिशब्दार्थः ज्ञानशक्तिमतां क्रियाशक्तिमतांवान्योन्योत्पत्तिप्रलयत्वात्तद्भावेनाध्ययनादिसिद्धिरित्यर्थः कर्मणामात्मव्यापारजन्यत्वाभावे हेतुमाह निर्व्यापारोहीति तस्य च निर्व्यापारत्वं फलवत्त्वाज्ज्ञातव्यमित्याह अत इति एवं ज्ञानमेव ज्ञापयन् उक्तं व्यनक्ति नेत्यादिना ॥ ३२ ॥

स्वामिकृतटीका ।

ज्ञानयज्ञं स्तोतुमुक्तान् यज्ञानुपसंहरति एवं बहुविधा इति ब्रह्मणो वेदस्य मुखे वितता वेदेन साक्षाद्विहिता इत्यर्थः तथापि तान् सर्वान् वाङ्मनः कायकर्म जनितान् स्वरूपसंस्पर्शरहितान् विद्धि जानीहि आत्मनः कर्मणोऽगोचरत्वात् एवं ज्ञात्वा ज्ञाननिष्ठः सन् संसाराद्विमुक्तो भविष्यसि ॥ ३२ ॥

नवलभाष्य ।

इसप्रकार पूर्वोक्त बहुतप्रकारके यज्ञ वेदके मुखमें अर्थात् वेदकी द्वार विस्तारको प्राप्तहुए हैं सो वेदमें इसप्रकार कहाहै कि [वाचिहिप्राणंजुहुम इति] वाणीके विषे प्राणोंको हवन करते हैं इत्यादि प्रकारसे बहुतसेकहे परन्तु हे अर्जुन तिन सब यज्ञोंको तुम कर्म सों उत्पन्नजानो अर्थात् कायिक वाचिक मानस कर्मोंसे उत्पन्नहुएहैं ऐसाजानो अर्थात् अनात्मजजानो क्योंकि जिससे निर्व्यापार आत्माहै इससे एवंज्ञात्वा इसप्रकार जानकर अर्थात् मेरे ये व्यापारनहीं मैं तौ व्यापाररहित उदासीन हौं इसप्रकारजानके इससम्यग्दर्शनज्ञानरूप हेतुसे तुम मोक्षकोप्राप्तहोउगे अथवा इससंसारवन्धनसे छूटजाउगे यह अर्थ है ॥ ३२ ॥

श्रेयान् द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥

शङ्करभाष्यम् ।

ब्रह्मार्पणमित्यादिश्लोकेन सम्यग्दर्शनस्य यज्ञत्वं संपादितं यज्ञाश्च अनेकविधा उपदिष्टास्तैः सिद्धिपुरुषार्थप्रयोजनैर्ज्ञानं स्तूयते कथं श्रेयानिति श्रेयान् द्रव्यमयात् द्रव्यसाधनसाध्यात् यज्ञात् ज्ञानयज्ञः हे परन्तप द्रव्यमयोहि यज्ञः फलस्यारम्भको न ज्ञानयज्ञः फलस्यारम्भकोऽतः श्रेयान् प्रशस्यतरः कथं यतः सर्वं कर्म समस्तमखिलं अप्रतिबद्धं पार्थ ज्ञाने मोक्षसाधने सर्वतः संप्लुतोदकस्थानीये परिसमाप्यतेऽन्तर्भवतीत्यर्थः यथा कृतायविजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किञ्चित् प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेदेति श्रुतेः ॥ ३३ ॥

आनन्दगिरिकृतटीका।

कर्म योगेनैकधाभिहिते सर्वस्य श्रेयः साधनस्य कर्मात्मकत्वप्रतिपत्त्या केवलं ज्ञान मनाद्रियमाणमर्जुनमालक्ष्य वृत्तानुवादपूर्वकमुत्तरश्लोकस्य तात्पर्यमाह ब्रह्मेत्यादिना सिद्धेति सिद्धं पुरुषार्थभूतं पुरुषापेक्षितलक्षणं प्रयोजनं येषां यज्ञानां तैरनन्तरोपदिष्टैरिति यावत् प्रश्नपूर्वकं स्तुतिप्रकारं प्रकटयति कथमित्यादिना ज्ञानयज्ञस्य द्रव्ययज्ञात् प्रश स्यतरत्वे हेतुमाह श्रेयानिति द्रव्यसाधनसाध्यादित्युपलक्षणं स्वाध्यायादेरपि ततोऽपि ज्ञानयज्ञस्य श्रेयस्त्वाविशेषात् द्रव्यमयादियज्ञेभ्यो ज्ञानयज्ञस्य प्रशस्यतरत्व प्रपंचयति द्रव्यमयो हीति फलस्याभ्युदयस्येत्यर्थः न फलारम्भको न कस्यचित् फलस्योत्पादकः किन्तु नित्यसिद्धस्य मोक्षस्य अभिव्यञ्जक इत्यर्थः तस्य प्रशस्यतरत्वे हेत्वन्तरमाह य त इति समस्तं कर्मेत्यग्निहोत्रादिकमुच्यते अखिलमविद्यमानं खिलं शेषोऽस्येत्यनल्प म हत्तरमिति यावत् सर्वमखिलमिति पदद्वयोपादानमसंकोचार्थं सर्वं कर्म ज्ञानेन्तर्भवतीत्यत्र छान्दोग्यश्रुतिं प्रमाणयति यथेति चतुरायश्चे हि द्यूते कश्चिदायः चतुरंगः सन् कृतशब्देनोच्यते तस्मै विजिताय कृताय तादर्थ्येनाधरेयास्तस्मादधस्ताद्भाविनस्त्रिद्व्येकांकास्त्रेता द्वापरकलिनामानः सयस्त्वायाःसंगच्छन्ति चतुरंके खल्वाये त्रिद्व्येकां कानामन्तर्भावो भवति महासंख्यायामवान्तरसंख्यान्तर्भावावश्यं भावादेवमेनं विद्याव न्तं पुरुषं सर्वं तदाभिमुख्येन समेति संगच्छति किं तत् सर्वं यद्विद्वपि पुरुषेन्तर्भवति त दाह यत्किञ्चिदिति प्रजाः सर्वा यत् किमपि साधुकर्म कुर्वन्ति तत्सर्वमित्यर्थः एनमभि समेतीत्युक्तं तमेव विद्यावन्तं पुरुषं विशिनष्टि यस्तदिति किं तदित्युक्तं तदेव विशदय ति यत्स इति स रैक्वोयत्तत्वंवेदतत्त्वं योन्योऽपि जानाति तमेनं सर्वं साधुकर्माभिसमेतीति योजना ॥ ३३ ॥

स्वामिकृतटीका।

ज्ञानयज्ञस्तु श्रेष्ठ इत्याह श्रेयानिति द्रव्यमयादनात्मव्यापारजन्याद्दैवादियज्ञात् ज्ञानयज्ञःश्रेष्ठः यद्यपिज्ञानस्यापि मनो व्यापाराधीनत्वमस्त्येव तथाप्यात्मस्वरूपस्य ज्ञानस्य मनः परिणामे अभिव्यक्तिमात्रं तज्जन्यत्वमिति द्रव्यमयाद्विशेषः श्रेष्ठत्वे हेतुः सर्वं कर्मा खिलं फलसहितं ज्ञाने परिसमाप्यते अन्तर्भवतीत्यर्थः सर्वं तदभिसमेति यत्किंचि प्रजाः साधु क[illegible]तीति श्रुतेः ॥ ३३ ॥

नवलभाष्य।

पंण[illegible] लोककरके सम्यग्दर्शनरूपज्ञानको यज्ञत्व सिद्ध कि-
[illegible]ीत[illegible] सिद्धकीगई और अनेकप्रकार के यज्ञभीकहे तिन
[illegible]रके ज्ञान[illegible] किया जाता है अर्थात् सर्वों से अ-
[illegible]न[illegible] [illegible]यानिति] हे परन्तप हे शत्रुओंके
[illegible]व्रीह्यादि [illegible]धनसे सिद्धहोनेवाला जो यज्ञतिससे
[illegible]जलने[illegible] [illegible]फलकी उत्पति करनेवालाहै और ज्ञान
इससे [illegible]र्जुन जिससंप्रतिबन्धरहित सम्पूर्णकर्म
[illegible] मोक्षसाधनज्ञान तिसमें समाप्त होता
[illegible] है इसमें प्रमाणभूतछान्दोग्य की श्रुति

को कहते हैं [यथाकृतायविजितायाधरेयाःसंयन्त्येवमेनंसर्वंतदभिसमेतियत्किञ्चित्प्रजाःसाधुकुर्वन्तियस्तद्वेदयत्सवेदेतिश्रुतेः] अर्थ जिसद्यूतमें अर्थात् जुआमें चारपांसे होतेहैं और चारदाउँ भी होतेहैं तिसमें ऐसा संकेतहै कि जिसमें एकका अंक होताहै उसको कलियुग कहते हैं और जिसमें दो अंक होयँ उसको द्वापर कहते हैं और जिसमें तीन अंकहोयँ उसको त्रेताकहते हैं और जिसमें चार अंकहोयँ उसको सतयुग कहतेहैं तहां चारिके अंकका पांसापरे तौ वह सतयुगको जीतताहै उसके जीतनेसे कलियुगको आदि लके सबयुग जीतेजाते हैं तौ उसपुरुषका पूरा पूरा दाउं होताहै यहव्यवस्था है अब श्रुतिका अर्थ कहते हैं कि जैसे सतयुगके अंकके जीतनेसे नीचे के जे कलियुगादिक अंकहैं वे भी उसमें आके मिलजाते हैं अर्थात् जीते जातेहैं क्योंकि बहुत संख्यामें थोड़ी संख्याका अन्तर्भावहोना युक्त ही है तैसेही जो कुछ प्रजा पुण्यकरती हैं सो सबपुण्य इसविद्यायुक्त पुरुषकोप्राप्त होताहै कौनसे पुरुषको कि जिसविद्याको रैक्कऋषि जानते हैं उसविद्याको जो और जानताहै तौ उस पुरुषको वह सब सुकृत होताहै जोकि सबप्रजा करती हैं तब इसश्रुतिके प्रमाणसे ज्ञानयज्ञमें सब यज्ञों का फल समात होताहै ॥ ३३ ॥

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४॥

शाङ्करभाष्यम् ।

तदेतद्विशिष्टं ज्ञानं तर्हि केन प्राप्यत इत्युच्यते तद्विद्धीति तद्विद्धि विजानीहि येन विधिना प्राप्यत इत्याचार्य्यानभिगम्य प्रणिपातेन प्रकर्षेण नीचैः प्रपतनं प्रणिपातो दीर्घनमस्कारः तेन कथं बन्धः कथं मोक्षः का विद्या का चाविद्येति परिप्रश्नेन सेवया गुरुशुश्रूषयैवमादिना प्रश्रयेणावर्जिता आचार्य्या उपदेक्ष्यन्तिकथयिष्यन्ति ते ज्ञानं यथोक्तविशेषणं ज्ञानिनो ज्ञानवन्तोऽपि केचिद्यथावत्तत्त्वदर्शनशीलाश्च नभवन्ति अपरे तुभवन्त्यतो विशिनष्टि तत्त्वदर्शिन इति ये सम्यग्दर्शिनस्तैरुपदिष्टं ज्ञानं कार्य्यक्षमं भवति नेतरदिति भगवतो मतम् ॥ ३४ ॥

आनन्दगिरिकृतटीका ।

यद्येवं प्रशस्यतरमिदं ज्ञानं तर्हि केनोपायेन तत्प्राप्तिरिति पृच्छति तदेतदिति ज्ञान प्राप्तौ प्रत्यासन्नमुपायमुपदिशति उच्यत इति तद्विज्ञानं गुरुभ्यो विद्धि गुरवश्च प्रणि पातादिभिरुपायैरावर्जितचेतसो वदिष्यन्तीत्याह तद्विद्धीति उपदेष्टृत्वमुपदेशकर्तृत्वं ज्ञा ज्ञानमात्रेण न भवतीत्याह उपदेक्ष्यन्तीति तदिति प्रेक्षितं ज्ञानसाधनं गृह्यते येन वि धिनेति विशेषदर्शनात् यद्वा येनाचार्याभिगमनप्रकारेण तदुपदेशवशादपेक्षितं ज्ञानं लभ्यं तथा तज्ज्ञानमाचार्येभ्यो लभस्वेत्यर्थः तदेव स्फुटयति आचार्यानिति नमस्कारेत्यादि [illegible] नमस्कारो गृह्यते नमस्कारेण विद्धीति पूर्वेण सम्बन्धः इतश्च [illegible] [illegible] [illegible] यथोक्त विशेषणं [illegible] [illegible] [illegible] कथयन्ति [illegible] [illegible] [illegible] [illegible] भगवतोऽभिप्रायमाह [illegible]

गिति बहुवचनञ्चैतदाचार्यविषयं बहुभ्यः श्रोतव्यं बहुधा चेति सामान्यन्यायाभ्यनुज्ञानार्थं नत्वात्मज्ञानमधिकृत्य आचार्यबहुत्वं विवक्षितं तस्य तत्त्वसाक्षात्कारवदाचार्यमात्रोपदेशादेवोदयसम्भवात् ॥ ३४ ॥

स्वामिकृतटीका ।

एवंभूतात्मज्ञाने साधनमाह तदिति तज्ज्ञानं विद्धि जानीहि प्राप्नुहीत्यर्थः ज्ञानिनां प्रणिपातेन नमस्कारेण ततः परिप्रश्नेन कुतोऽयंमम संसारः कथं वा निवर्तते इति परिप्रश्नेन सेवया गुरुशुश्रूषया च ज्ञानिनः शास्त्रज्ञास्तत्त्वदर्शिनो परोक्षानुभवसम्पन्नाश्च ते तुभ्यं ज्ञानमुपदेशेन सम्पादयिष्यन्ति ॥ ३४ ॥

नवलभाष्य ।

वह ज्ञान किस उपायकरके प्राप्तहोताहै इसआकांक्षामें कहते हैं कि हे अर्जुन सो ज्ञान आचार्य के संमुखजाके और अपनामें नैच्यानुसन्धानसे अर्थात् अपनाको छोटामानके साष्टांग दण्डवत्प्रणाम करनेसे और हेभगवन् हे गुरो कैसे संसारमें बन्धनहोताहै और कैसे मोक्षहोताहै और कौनविद्या है और कौन अविद्याहै इसप्रकार प्रश्नकरनेसे और निष्कपट गुरूकी शुश्रूषाकरने से इत्यादि नम्रताके भावसे प्रसन्नहुए जेतत्त्वदर्शी आचार्यतेतुझको ज्ञानका उपदेश करेंगे और ज्ञानवान्भी होतेहैं तिन्होंमें कोई तो यथावत् तत्त्वदर्शीहोते हैं कोई नहीं होतेहैं इससे भगवान्ने तत्त्वदर्शी और ज्ञानी इनदोनों पदोंको कहा अर्थात् जेतत्त्वदर्शी सम्यग्दर्शी अनुभवरूप रूपज्ञान सम्पन्न जेज्ञानी तिन्होंकरके उपदेश किया जो ज्ञानसो संसाररूप बन्धनके नाशकरने को समर्थ होताहै और का उपदेश किया नहीं होता यहभगवान्का अभिप्राय है ॥ ३४ ॥

यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव ।
येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि ॥ ३५ ॥

शङ्करभाष्यम् ।

तथा च सतीदमपि समर्थं वचनं यदिति यत् ज्ञात्वा यत् ज्ञानं तैरुपदिष्टमधिगम्य प्राप्य पुनर्भूयो मोहमेवं यथेदानीं मोहं गतोऽसि पुनरेवं न यास्यसि हे पाण्डव किञ्च येन ज्ञानेन भूतान्यशेषेण ब्रह्मादीनि स्तम्बपर्यन्तानि द्रक्ष्यसि साक्षादात्मनि प्रत्यगात्मनि मत्संस्थानीमानि भूतानीति अथो अपि मयि वासुदेवे परमेश्वरे चेमानीति क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

आनन्दगिरिकृतटीका ।

विशिष्टैराचार्यैरुपदिष्टे ज्ञाने कार्यक्षमे प्राप्ते सति समनन्तरवचनमपि योग्यविषयम् एवंभवतीत्याह तथाचेति अतस्तस्मिन् विशिष्टे ज्ञाने त्वदीयमोहापोहहेतौ निष्ठावता भवता भवितव्यमिति शेषः तत्र निष्ठा प्रतिष्ठार्थं तदेव ज्ञानं पुनर्विशिनष्टि येनेति यज्ज्ञात्वेत्युक्तं ज्ञानायोगादित्याशङ्क्य प्राप्त्यर्थस्याधिपूर्वस्य गमेर्गीकृत्य व्याकरोति अधिगम्येति इतश्चाचार्योपदेशलभ्ये ज्ञाने फलवति प्रतिष्ठावता भवितव्यमित्याह किञ्चेति

धीये चेश्वरे चोभयत्र भूतानां प्रतिष्ठितत्वप्रतिनिर्देशो भेदधीहानुमतिः स्यादित्याशङ्क्याह चेत्रज्ञेति मूलप्रमाणाभावे कथं तदेकत्वदर्शनं स्यादित्याशङ्क्याह सर्वेति ॥ ३५ ॥

स्वामिकृतटीका।

ज्ञानफलमाह यज्ज्ञात्वेति सार्द्धैस्त्रिभिः यज्ज्ञानं ज्ञात्वा प्राप्य पुनरेवंभूतबन्धादिनिमित्तं मोहं न प्राप्स्यसि तत्र हेतुर्येन ज्ञानेन भूतानि पितृपुत्रादीनि स्वाविद्या विजृम्भितानि आत्मन्येवाभेदेन द्रक्ष्यसि अथो अनन्तरम् आत्मानं मयि परमात्मन्यभेदेन द्रक्ष्यसीत्यर्थः ॥ ३५ ॥

नवलभाष्य।

अवतैसे होनेमें यह भी वचनसमर्थ है इससे कहते हैं [यदिति] हे अर्जुन जिस तत्त्वदर्शियों करके उपदिष्ट ज्ञानको प्राप्तहोके जैसे इससमयमें मोहको प्राप्तहुआ है ऐसे फिर मोहको प्राप्त नहींहोगा और हेपाण्डव जिस ज्ञानकरके ब्रह्माकोआदिलेके तृणपर्य्यन्त जे सवभूत प्राणी तिनको साक्षात् अपने आत्मस्वरूपहीमें देखैगा और में जो वासुदेव परमेश्वर तिसमें भी देखैगा इसप्रकार सवउपनिषदोंमें प्रसिद्ध जो जीव ईश्वरका अभेद तिसको देखैगा ॥ २५ ॥

अपि चेदसि पापिभ्यः सर्वेभ्यः पापकृत्तमः।
सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ॥ ३६ ॥

शङ्करभाष्यम्।

किञ्चैतस्य ज्ञानस्य माहात्म्यं अपीति अपि चेदसि पापिभ्यः पापकृद्भ्यः सर्वेभ्यः सकाशादतिशयेन पापकृत् पापकृत्तमः यद्यसि भवसि सर्वं ज्ञानप्लवेनैव ज्ञानमेव प्लवं ज्ञानप्लवं कृत्वा वृजिनं वृजिनार्णवं पापं सन्तरिष्यसि धर्म्मोऽपि मुमुक्षोः पापमुच्यते ॥ ३६ ॥

आनन्दगिरिकृतटीका।

ज्ञानस्य प्रकारान्तरेण प्रशंसां प्रस्तौति किञ्चेति पापकारिभ्यः सर्वेभ्यः सकाशादतिशयेन पापकारित्वमेकस्मिन्नसम्भावितमपि ज्ञानमाहात्म्यप्रसिद्ध्यर्थमंगीकृत्य ब्रवीति अपिचेदिति ब्रह्मात्मैक्यज्ञानस्य सर्वपापनिवर्तकत्वेन माहात्म्यमिदानीं प्रकटयति सर्वमिति अधर्मे निवृत्तेऽपि धर्मरूपप्रतिबन्धाज्ज्ञानवतोऽपि मोक्षः सम्भवतीत्याशङ्क्याह धर्मोपीति इहेत्यध्यात्मशास्त्रं गृह्यते ॥ ३६ ॥

स्वामिकृतटीका।

किञ्च अपिचेदिति सर्वेभ्योऽपि पापकारिभ्यो यद्यप्यतिशयेन पापकारीत्वमसि तथापि सर्वं पापसमुद्रं ज्ञानप्लवेनैव ज्ञानपोतेनैव सम्यगनायासेन तरिष्यसि ॥ ३६ ॥

नवलभाष्य।

अव और ज्ञानका माहात्म्यकहते हैं [अपीति] अव हेअर्जुन जो कदाचित तू जितने पापकरनेवाले मनुष्य हैं तिनसवोंसे अपनाको अधिकपाप करनेवाला भी मानताहोय तो भी ज्ञानरूपी जो प्लवअर्थात् काष्ठादिनिर्मित

स्वल्पनौका जो पन्नयनाम प्रसिद्ध तिसकरके अथवाप्लव करके यहां व
नौकाका ग्रहणहै जिसको जहाज कहतेहैं तिसकरके तू पापरूप समुद्र
पारहोजायगा और धर्मभी यहांमुमुक्षुको पापकहा जाताहै ॥ ३६ ॥

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा ॥ ३७

शङ्करभाष्यम् ।

ज्ञानं कथं नाशयति पापमिति सदृष्टान्तमुच्यते यथेति यथा एधांसि काष्ठानि समिद्धः स
म्यक् इद्धो दीप्तोऽग्निर्भस्मसात् भस्मीभावं कुरुते अर्जुन एवं ज्ञानमेव अग्निः ज्ञानाग्निः सर्व
कर्माणि भस्मसात् कुरुते तथा निर्बीजं करोतीत्यर्थः नहि साक्षादेव ज्ञानाग्निः तानि कर्माणि
इन्धनवद् भस्मीकर्त्तुं शक्नोति तस्मात् सम्यक्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणमित्यभिप्रा
सामर्थ्यात् येन कर्म्मणा शरीरमारब्धं तत् प्रवृत्तफलत्वादुपभोगेनैव क्षीयते अतो यान्यप्रवृत्त
फलानि ज्ञानोत्पत्तेः प्राक् कृतानि ज्ञानसहभावीनि चातीतानेकजन्मकृतानि च तान्येव सर्वाणि
भस्मसात् कुरुते ॥ ३७ ॥

आनंदगिरिकृतटीका।

ज्ञाने सत्यपि धर्माधर्मयोरुपलम्भात् कुतस्तयोस्ततो निवृत्तिरित्याशङ्क्य ज्ञानस
धर्माधर्मनिवर्त्तकत्वं दृष्टान्तेन दर्शयितुमनन्तरश्लोकमवतारयति ज्ञानमिति योग्या
ऽयोग्यविभागेन निवर्तकत्वानिवर्तकत्वविभागमुदाहरति यथेति दृष्टान्तानुरूपं दार्ष्टान्तिकम
चष्टे ज्ञानाग्निरिति योग्याविषयेऽपि दाहकत्वमग्नेरप्रतिबन्धापेक्षयेति विवक्षित्वा विशि
नष्टि सम्यगिति दार्ष्टान्तिकं व्याचष्टे ज्ञानमेवेति ननु ज्ञानं साक्षादेव कर्मदाहकं किमिति
नोच्यते निर्बीजं करोति कर्मेति किमिति व्याख्यानमित्याशङ्क्याह नहीति ज्ञानस्य
प्रमेयावरणाज्ञानापाकरणे सामर्थ्यस्य लोके दृष्टत्वादविक्रियब्रह्मात्मज्ञानमपि तदपि
दज्ञानं निवर्तयत् तज्जन्यकर्तृत्वभ्रमं कर्मबीजभूतं निवर्तयति तन्निवृत्तौ च कर्माणि
स्थातुं पारयन्ति नतु साक्षात् कर्मणां निवर्तकं ज्ञानम् अज्ञानस्यैव निवर्तकमिति
प्रसक्तदनिवृत्तौ तु पुनरपि कर्मोद्भवसम्भवादित्यर्थः ज्ञानस्य साक्षात् कर्मनिवर्तकत्व
भावे फलितमाह तस्मादिति सम्यग्ज्ञानं मूलभूताज्ञाननिवर्तनेन कर्मनिवर्तकमिष्टं चेद्
रब्धफलस्यापि कर्मणो निवृत्तिप्रसङ्गात् ज्ञानोदयसमकालमेव शरीरपातः स्यादित्या
ङ्क्याह सामर्थ्यादिति ज्ञानोदयसमसमयमेव देहपाते तत्त्वदर्शिभिरुपदिष्टं ज्ञानं फल
इति भगवदभिप्रायस्य बाधितत्वप्रसङ्गादाचार्यलाभान्यथानुपपत्त्या प्रवृत्तफलकर्मणः
दकमज्ञानलेशं न नाशयति ज्ञानमित्यर्थः कथं तर्हि प्रारब्धफलं कर्म नश्यतीत्याशङ्क्य
ह येनेति तर्हि कथं ज्ञानाग्निः सर्वकर्माणि भस्मसात् करोतीत्युक्तं तत्राह अत इति
ज्ञानादारब्धफलानां धर्माणां निवृत्त्यनुपपत्तेरनारब्धफलानि यानि कर्माणि पूर्वं ज्ञान
[illegible] नेन च सह वर्तमानानि प्रवेशेषु जन्मसु [illegible]
[illegible] निवर्तनेन निवर्तयतीत्यर्थः ॥ ३७ ॥

टीका।

[illegible]

नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति ॥ ३८ ॥

शङ्करभाष्यम्।

यत एवमतः नहीति नहि ज्ञानेन सदृशं तुल्यं पवित्रं पावनं शुद्धिकरमिह विद्यते हि यस्मात् तत् ज्ञानं स्वयमेव योग संसिद्धो योगेन कर्मयोगेन समाधियोगेन च संसिद्धः संस्कृतो योग्यतामापन्नो मुमुक्षुः कालेन महता आत्मनि विन्दति लभत इत्यर्थः ॥ ३८ ॥

आनन्दगिरिकृतटीका।

नन्वन्येनैव परमपरिशुद्धिकरेण केनचिदश्वमेधादिना परमपुरुषार्थसिद्धेरन्यमात्मज्ञाने नेत्याशङ्क्याह यत इति पूर्वोक्तेन प्रकारेण ज्ञानमाहात्म्यं यतः सिद्धमतस्तेन ज्ञानेन तुल्यं परिशुद्धिकरं परमपुरुषार्थोपयिकमिह व्यावहारभूमौ नास्तीत्यर्थः तत् पुनरात्म विषयं ज्ञानं सर्वेषां किमिति झटिति नोत्पद्यते तत्राह तत् ज्ञानं स्वयमिति महता कालेन यथोक्तेन साधनेन योग्यतामापन्नः तदधिकृतः स्वयं तदात्मनि ज्ञानं विन्दतीति योजना सर्वेषां झटिति ज्ञानमनुदयो योग्यता वैधुर्यादिति भावः ॥ ३८ ॥

स्वामिकृतटीका।

तत्र हेतुमाह नहीति पवित्रं शुद्धिकरं इह तपोयोगादिषु मध्ये ज्ञानतुल्यं नास्त्येव तर्हि सर्वेऽपि किमिति आत्मज्ञानमेव नाभ्यस्यन्तीत्यत आह तत् स्वयमिति सार्द्धेन तदात्मविषयं ज्ञानं कालेन महता कर्मयोगेन संसिद्धो योग्यतां प्राप्तः सन् स्वयमेवानायासेन लभते न तु कर्मयोगविनेत्यर्थः ॥ ३८ ॥

नवलभाष्य।

और हे अर्जुन जिससे ऐसाहै इससे ज्ञानके सदृश पवित्र पावन शुद्धि करनेवाला कोईपदार्थ नहीं है तिससे इसज्ञानको आपही योगसंसिद्ध अर्थात् कर्मयोगकरके अथवा समाधियोग करके संस्कारयुक्त पुरुष बड़ेकाल करके अपने आत्माही में प्राप्त होताहै ॥ ३८ ॥

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानंलब्ध्वा परांशान्तिमचिरेणाऽधिगच्छति ॥ ३९ ॥

शङ्करभाष्यम्।

येनैकान्तेन ज्ञानप्राप्तिर्भवति स उपाय उपदिश्यते श्रद्धावानिति श्रद्धावान् श्रद्धालुर्लभते ज्ञानं श्रद्धालुत्वेऽपि भवति कश्चित् मन्दप्रस्थानोऽत आह तत्परो गुरूपासनादावभियुक्तो ज्ञानलब्ध्युपाये श्रद्धावान् तत्परो ऽजितेन्द्रियः स्यादित्यत आह संयतेन्द्रियः संयतानि विषयेभ्यो निवर्तितानि यस्येन्द्रियाणि स संयतेन्द्रियो योगी य एवम्भूतः श्रद्धावांस्तत्परः संयतेन्द्रियश्च सोऽवश्यं ज्ञा[illegible] प्रणिपातादिस्तु बाह्योऽनैकान्तिकोऽपि भवति मायावित्वादिसम्भवात् न तु तथा श्रद्धावत्त्वा[illegible]न्ततो ज्ञानलब्ध्युपायः किं पुनर्ज्ञानलाभात् स्यादित्युच्यते ज्ञानं लब्ध्वा परां मोक्षा[illegible] उपरतिमचिरेण क्षिप्रमेवाधिगच्छति सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्व[illegible] सुनिश्चितोऽर्थः ॥ ३९ ॥

आनंदगिरिकृतटीका।

कर्मयोगेन समाधियोगेन च सम्पन्नस्य ज्ञानोत्पत्तावन्तरंगसाधनमुपदिशति येनेति ज्ञा
नलाभे प्रयोजनमाह ज्ञानमिति न केवलं श्रद्धालुत्वमेव सहायं ज्ञानलाभे हेतुरपि तु ता
त्पर्यमपीत्याह श्रद्धालुत्वेऽपीति मन्दप्रस्थानत्वं तात्पर्यविधुरत्वं नच तस्यापि दृष्टमदृष्टं
ज्ञानमुत्पत्तुमीष्टे तेन तात्पर्यमपि तत्र कारणं भवतीत्याह अत आहेति अभियुक्तो नि
ष्ठावान् उपासनादावित्यादिशब्देन श्रवणादि गृह्यते न केवलं श्रद्धा तात्पर्यं चेत्युभयमेव
ज्ञानकारणं किन्तु संयतेन्द्रियत्वमपि तदभावे श्रद्धादेरकिंचित्करत्वादित्याशयेनाह श्र
द्धावानिति उक्तसाधनानां ज्ञानेन सहैकान्तिकत्वमाह य एवम्भूत इति तद्विद्धि प्रणिपा
तेनेत्यादौ प्रागेव प्रणिपातादेर्ज्ञानहेतोरुक्तत्वात् किमितीदानीं हेत्वन्तरमुच्यते तत्रा
प्रणिपातादिस्त्विति तद्धि वहिरंगमिदं पुनरन्तरंगं नच तत्र ज्ञानेन प्रतिनियमो मनस्य
न्यथा कृत्वा वहिरन्यथा प्रदर्शनात्मनो मायावित्वस्य सम्भवाद्विप्रलम्भकत्वादेरपि स
म्भावनोपनीतत्वादित्यर्थः मायावित्वादेः श्रद्धावत्त्वात् तात्पर्यादावपि सम्भवादनैका
न्तिकत्वमविशिष्टमित्याशङ्क्याह नत्विति नहि मायया विप्रलम्भेन वा श्रद्धा तात्पर्ये
यमानि योगतो निष्ठातुमर्हतीत्यर्थः उत्तरार्द्धं प्रश्नपूर्वकमवतार्य व्याकरोति किं पुनरित्या
दिना सम्यग्ज्ञानादभ्यासादिसाधनानपेक्षान्मोक्षो भवतीत्यत्र प्रमाणमाह सम्यग्दर्शना
दिति शास्त्रशब्देन तमेव विदित्वा ज्ञानादेव तु कैवल्यमित्यादि विवक्षितं न्यायन्तु ज्ञा
नादज्ञाननिवृत्ते रज्ज्वादौ प्रसिद्धत्वात् आत्मज्ञानादपि निरपेक्षादज्ञानतत्कार्यप्रक्षयलक्षणो
मोक्षः स्यादित्येवं लक्षणम् ॥ ३९ ॥

स्वामिकृतटीका।

किंच श्रद्धावानिति श्रद्धावान् गुरूपदिष्टेऽर्थे आस्तिक्यबुद्धिमान् तत्परस्तदेकनिष्ठः सं
यतेन्द्रियश्च तज्ज्ञानं लभते नान्यः अतः श्रद्धादिसम्पत्त्या ज्ञानलाभात् प्राक् कर्मयोग
एव शुद्ध्यर्थमनुष्ठेयः ज्ञानलाभानन्तरन्तु न तस्य किंचित्कर्तव्यमित्याह ज्ञानं लब्ध्वा तु
मोक्षमचिरेण प्राप्नोति ॥ ३९ ॥

नवलभाष्य।

अब जिस एकान्तउपायसे ज्ञानकी प्राप्तिहोतीहै सो उपाय उपदेशकि
याजाताहै [श्रद्धावानिति] हे अर्जुन जो पुरुष श्रद्धावान् श्रद्धालुहै अर्थात्
आचार्य और शास्त्र इनके वचनमें विश्वासयुक्त है सो ज्ञानको प्राप्तहोता
है और श्रद्धावान् तो है परन्तु आलस्ययुक्त है और उसउपायको नहीं
जानताहै जिससे गुरू प्रसन्नहोके उपदेशकरे तो फिर कैसे ज्ञानको प्राप्तहो
सक्ताहै इससे कहते हैं कि तत्परहोय अर्थात् ज्ञानकी प्राप्तिमें उपायभूत जो
गुरूकी उपासनादिक तिसमें तत्परहोय सावधान रहै और श्रद्धावान् भी है
और तत्परभी है और जो जितेन्द्रिय न होयगा तो उसज्ञानकी निश्चयता
नहीं होगी इससे कहते हैं कि संयतेन्द्रियः सम्यक्प्रकार करके वशकी हैं
इन्द्रियां जिसने ऐसा होय तो जो पुरुष श्रद्धावान् होय और ज्ञानप्राप्ति
के उपायमें तत्परहोय और विषयोंसे निवृत्त करनेवाला योगीभी होय सो
अवश्य ज्ञानको प्राप्तहोताहै यह वाक्यार्थ सिद्धहुआ और पूर्वोक्तप्रणिपा-

दिक अर्थात् गुरूके पास जाके दण्डवत्करना और प्रश्नकरना ऐसा जो पहिले ज्ञानका उपाय कहाथा सो तो बाह्यहै और स्थिरहै क्योंकि दण्डवत् प्रणाम और प्रश्नादिक मायावी पुरुषभी दम्भकरके करसक्ताहै और मायावी पुरुषको ज्ञानी पुरुष उपदेशहो कैसे करसक्ते हैं और श्रद्धावान् पुरुषको तो मायादिदोष नहीं सम्भवहोता है इससे यह उपाय व्यभिचार रहितहोनेसे स्थिरहै फिर ज्ञानके लाभसे क्या होताहै इस आशयसे कहते हैं कि हे अर्जुन ज्ञानको प्राप्तहोके पराउत्कृष्टा जो मोक्षरूपा शान्ति तिसकोशीघ्रही प्राप्तहोताहै अर्थात् सम्यग्दर्शनरूप जो ज्ञान तिससे शीघ्रही मोक्षहोता है यह सकलशास्त्र प्रसिद्ध निश्चयकिया हुआ अर्थ है॥ ३९॥

अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
नायं लोकोऽस्ति न परो न सुखं संशयात्मनः॥ ४०॥

शङ्करभाष्यम्।

अत्र संशयो हि न कर्त्तव्यः पापिष्ठो हि संशयः कथमित्युच्यते अज्ञश्चेति अज्ञश्चानात्मज्ञो ऽश्रद्दधानश्च संशयात्मा च विनश्यति अज्ञाऽश्रद्दधानौ यद्यपि विनश्यतः तथापि न तथा यथा संशयात्मा सतु पापिष्ठः सर्वेषां कथं नायं साधारणोपि लोकोऽस्ति तथा न परलोको न सुखं तत्रापि संशयोपपत्तेः संशयात्मनः संशयचित्तस्य तस्मात् संशयो न कर्त्तव्यः॥ ४०॥

आनन्दगिरिकृतटीका।

उत्तरश्लोकस्य पातनिकां करोति अत्रेति यथोक्तसाधनवानुपदेशमपेक्ष्याचिरेण ब्रह्म साक्षात् करोति साक्षात् कृतब्रह्मत्वेऽचिरेणैव मोक्षं प्राप्नोतीत्ययमर्थः सप्तम्या परामृश्यते संशयस्याकर्तव्यत्वे हेतुमाह पापिष्ठोहीति उक्तं हेतुं प्रश्नपूर्वकमुत्तरश्लोकेन साधयति कथमित्यादिना अज्ञादश्रद्दधानाच्च संशयचित्तस्य विशेषमादर्शयति नायमिति द्वितीयभागविभजनार्थं भूमिकां करोति अत्रेति अज्ञादीनां मध्ये संशयात्मनो यत्पापिष्ठत्वं तत् प्रश्नद्वारा प्रकटयति कथमिति श्लोकद्वयस्य तत्प्रयुक्तसुखस्य चाभावे हेतुमाह तत्रापीति संशयचित्तस्य सर्वत्र संशयप्रवृत्तेर्दुर्निवारत्वादित्यर्थः संशयस्यानर्थहेतुत्वमुक्तं फलितमाह तस्मादिति॥ ४०॥

स्वामिकृतटीका।

ज्ञानाधिकारिणमुक्त्वा तद्विपरीतमनधिकारिणमाह अज्ञश्चेति अज्ञो गुरूपदिष्टार्थानभिज्ञः कथंचिज्ज्ञातेऽपि तत्राश्रद्दधानश्च जातायामपि श्रद्धायां ममेदं सिध्येन्न वेति संशयाक्रान्तचित्तश्च विनश्यति स्वार्थात् भ्रश्यति एतेषु त्रिष्वपि संशयात्मा सर्वथा नश्यति यतस्तस्यायं लोको नास्ति धनार्जनविवाहाद्यसिद्धेः नच परलोको धर्मस्यानिष्पत्तेः न च सुखं संशयेनैव भोगस्याप्यसम्भवात्॥ ४०॥

नवलभाष्य।

और हे अर्जुन इसज्ञानके विषयमें संशय नहीं करनाचाहिये जिससे यहसंशय बड़ापापीहै काहेसे ऐसाहै इस आकांक्षामें कहतेहैं कि [अज्ञइति] हे अर्जुन अज्ञ जो अनात्मज्ञ पुरुष अर्थात् आत्मस्वरूप का नहीं जानने-

दत्याज्यत्वं शंकितव्यमित्याह छद्दीति शोकमोहाभ्यामभिभूतस्य पुन
तः संशयस्य प्रबलप्रतिबन्धकाभावेनैव प्रध्वंसः सिद्धदित्याशंक्येदित्य
नेति स्वाश्रयस्य संशयस्य स्वाश्रयेणैव ज्ञानेन समुच्छेदसम्भवात् किमि
पणमित्याशंक्याह आत्मविषयत्वादिति स्थान्यादिविषयः संशयः तदेक
वदननिष्ठेन तन्निष्ठोव्यावर्त्यते प्रकृतत्वात्मविषयस्तदाश्रयश्च संशयः
अपनीयते तेन विशेषणमर्थवदित्यर्थः तदेव प्रपंचयति नहीति
येसिद्धत्वेनाविवक्षितत्वात् तद्विषयस्य तद्विषयेणैव तस्य तेन निवृत्ति
अत इति संशयसमुच्छित्त्यनन्तरं कर्त्तव्यमुपदिशति छित्वेति
भगवदाज्ञया क्रमेण करिष्यामि युद्धात् पुनरुपरिरंसैवेत्याशंक्याह उत्तिष्ठति
हति क्षत्रियवंशे प्रसूतस्य समुपस्थितसमरविमुखत्वमनुचितमिति भवत
तेति तदनेन योगस्य कृत्रिमत्वं भगवतोऽनीश्वरत्वञ्च निराकृत्य कर्मद्वारा
दात्मनः सम्यग्ज्ञानात् प्रणिपातादेर्बहिरंगाच्च श्रद्धादेरङ्गभूतादशेषानर्थ
भावमभिदधता सर्वस्मादुत्कृष्टे तस्मिन्नसंशयानस्याधिकारादशेषदोषवत्वं
मस्य ज्ञाननिष्ठापरस्य कर्मनिवृत्तिः स्थापितम् ॥ ४२ ॥

इति आनन्दगिरिकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

स्वामिकृतटीका।

तस्मादज्ञानेति यस्मादेवं तस्मादात्मनोऽज्ञानेन सम्भूतं हृदि स्थितं
कादिनिमित्तं देहात्मविवेकज्ञानखड्गेन छित्वा कर्मयोगमातिष्ठ आश्रय
प्रस्तुताय युद्धायोत्तिष्ठ हे भारतेति क्षत्रियत्वेन युद्धस्य धर्म्यत्वं दर्शितं
कर्मज्ञानमयीद्विधा निष्ठोक्ता येन तं वन्दे शौरिं संशयसञ्छिदम् ॥ ४२ ॥

इति श्रीधरस्वामिकृतटीकायां चतुर्थोऽध्यायः ॥ ४ ॥

नवलभाष्य।

और हे अर्जुन जिससे कर्म योगके अनुष्ठानसे अन्तःकरण
क्षयमें कारणभूत ज्ञानकरके कटिगयाहै संशय जिसका ऐसा
कर्मोकरके बन्धनको नहीं प्राप्तहोता है क्योंकि ज्ञानरूप अ
भस्महोगयेहैं इसहेतुसे और जिससे ज्ञान और कर्म इनकेअनु
जो संदेह तिसकरके युक्त पुरुष नाशको प्राप्तहोताहै तिस
नानमविवेक से उत्पन्नहुआ और अत्यन्तपापी ऐसा जो
शय तिसको ज्ञानखड्गकरके अर्थात् शोक मोहादि दोषोंका
ज्ञानसो हुआ खड्ग तिसकरके निजअपने संशय को काट
करके जो कर्म योग तिसकेलिये युद्ध करने को उठ और
है नहीं काटाजाताहै इसमें आत्मनः ऐसा कहा ॥ ४२ ॥

इति श्री [illegible]
[illegible] ॥ ४ ॥

श्रीमद्भगवद्गीतासटीक॥

पञ्चमोऽध्यायः ।

अर्जुनउवाच ।

संन्यासं कर्मणां कृष्ण पुनर्योगंच शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥ १ ॥

शङ्करभाष्यम् ।

कर्मण्यकर्म यः पश्येदित्यारभ्य स युक्तः कृत्स्नकर्मकृत् ज्ञानाग्निदग्धकर्माणं शारीरं केवलं कर्म कुर्वन् यदृच्छालाभसन्तुष्टो ब्रह्मार्पणं ब्रह्महविः कर्मजान् विद्धि तान् सर्वान् सर्वं कर्माखिलं पार्थ ज्ञानाग्निः सर्वकर्माणि योगसंन्यस्तकर्माणमित्यन्तैर्वचनैः सर्वकर्मसंन्यासमवोचद्भगवान् छित्त्वैनं संशयं योगमातिष्ठेत्यनेन वचनेन पुनर्योगञ्च कर्मानुष्ठानलक्षणमनुतिष्ठेत्युक्तवान् तयोरुभयोश्च कर्मानुष्ठानकर्मसंन्यासयोः स्थितिगतिवत् परस्परविरोधादेकेन सह कर्तुमशक्यत्वात् कालभेदेन चानुष्ठानविधानाभावादर्थादेतयोरन्यतरकर्त्तव्यतायां प्राप्तौ सत्यां यत् प्रशस्यतरमेतयोः कर्मानुष्ठानकर्मसंन्यासयोः तत् कर्त्तव्यं नेतरदित्येवं मन्यमानः प्रशस्यतरबुभुत्सया अर्जुनउवाच संन्यासं कर्मणां कृष्णेत्यादिना ननु चात्मविदो ज्ञानयोगेन निष्ठां प्रतिपादयिष्यन् पूर्वोदाहृतैर्वचनैर्भगवान् सर्वकर्मसंन्यासमवोचन्न त्वनात्मज्ञस्यातश्च कर्मानुष्ठानकर्मसंन्यासयोर्भिन्नपुरुषविषयत्वादन्यतरस्य प्रशस्यतरत्वबुभुत्सया प्रश्नोऽनुपपन्नः सत्यमेवं त्वदभिप्रायेण प्रश्नो नोपपद्यते प्रष्टुः स्वाभिप्रायेण पुनः प्रश्नो युज्यत एवेति वदामः कथं पूर्वोदाहृतैर्वचनैर्भगवता कर्मसंन्यासस्य कर्त्तव्यतया विवक्षितत्वात् प्राधान्यमन्तरेण च कर्त्तारं तस्य कर्त्तव्यत्वासम्भवादनात्मविदपि कर्त्तापक्षे प्राप्तोऽनूद्यत इति न पुनरात्मवित्कर्तृकत्वमेव संन्यासस्य विवक्षितमित्येवं मन्वानस्यार्जुनस्य कर्मानुष्ठानकर्मसंन्यासयोरविद्वत्पुरुषकर्तृकत्वमप्यस्तीति पूर्वोक्तेन प्रकारेण तयोः परस्परविरोधादन्यतरस्य कर्त्तव्यत्वे प्राप्ते प्रशस्यतरञ्च कर्त्तव्यं नेतरदिति प्रशस्यतरविविदिषया प्रश्नो नानुपपन्नः प्रतिवचनवाक्यार्थनिरूपणेनापि प्रष्टुरभिप्राय एवमेवेति गम्यते कथं संन्यासकर्मयोगौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते इति प्रतिवचनं निर्देशरूपं किमनेनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोर्निःश्रेयसकरत्वं प्रयोजनमनुक्त्वा तयोरेव तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते आहोस्विदनात्मवित्कर्तृकयोः संन्यासकर्मयोगयोस्तदुभयमुच्यत इति किञ्चातो यद्यात्मवित्कर्तृकयोः कर्मसंन्यासकर्मयोगयोर्निःश्रेयसकरत्वं तयोस्तु कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वमुच्यते यदि वानात्मवित्कर्तृकयोः संन्यासकर्म

योगयोस्तदुभयमुच्यत इति अत्रोच्यते आत्मवित्कर्तृकयोः संन्यासकर्म्मयोगयोरम्भावात्तयोर्निःश्रे
यसकरत्ववचनं तदीयाच्च संन्यासात् कर्म्मयोगस्य विशिष्टत्वाभिधानमित्येतदुभयमनुपपन्नं यद्यना
त्मविदः कर्म्मसंन्यासः तत्प्रतिकूलञ्च कर्म्मानुष्ठानलक्षणः कर्म्मयोगः सम्भवेतां तदा तयोर्निःश्रे
यसकरत्वोक्तिः कर्म्मयोगस्य च कर्म्मसंन्यासाद्विशिष्टत्वाभिधानमित्येतदुभयमुपपद्येत आत्मवि
दस्तु संन्यासकर्म्मयोगयोरसम्भावात्तयोर्निःश्रेयसकरत्वाभिधानं कर्म्मसंन्यासाच्च कर्म्मयोगो वि
शिष्यत इति चानुपपन्नमत्राह किमात्मविदः संन्यासकर्म्मयोगयोरप्यसम्भव आहोस्विदन्यतरस्या
सम्भवः यदा चान्यतरस्यासम्भवस्तदा किं कर्म्मसंन्यासस्योत कर्म्मयोगस्येत्यसम्भवे कारणञ्च
वक्तव्यमिति अत्रोच्यते आत्मविदो निवृत्तमिथ्याज्ञानत्वाद्विपर्य्ययज्ञानमूलस्य कर्मयोगस्यासम्भ
वः स्याद् जन्मादिसर्वविक्रियारहितत्वेन निष्क्रियमात्मानमात्मत्वेन यो वेत्ति तस्यात्मविदः
सम्यग्दर्शनेनास्तमिथ्याज्ञानस्य निष्क्रियात्मस्वरूपावस्थानलक्षणं सर्वकर्मसंन्यासमुक्त्वा तद्विपरी
तस्य मिथ्याज्ञानमूलककर्तृत्वाभिमानपुरःसरस्य सक्रियात्मस्वरूपावस्थानरूपस्य कर्मयोगस्येह शास्त्रे
तत्र तत्रात्मस्वरूपनिरूपणप्रदेशेषु सम्यग्ज्ञानतत्कार्य्यविरोधादभावः प्रतिपाद्यते यस्मात् तस्मा
दात्मविदो निवृत्तमिथ्याज्ञानस्य विपर्य्ययज्ञानमूलः कर्मयोगो न सम्भवतीति युक्तमुक्तं क्व क्व
केषु २ पुनरात्मस्वरूपनिरूपणप्रदेशेष्वात्मविदः कर्माभावः प्रतिपाद्येत इत्यत्रोच्यते अविनाशि तु
तद्विद्धि प्रक्रम्य य एनं वेत्ति हन्तारं वेदाविनाशिनं नित्यमित्यादौ तत्र तत्रात्मविदः कर्माभाव उच्य
ते ननु च कर्मयोगोऽप्यात्मस्वरूपनिरूपणप्रदेशे तत्र तत्र प्रतिपाद्यत एव तद्यथा तस्माद्युध्यस्व
स्व भारत स्वधर्ममपि चावेक्ष्य कर्मण्येवाधिकारस्ते इत्यादावतश्च कथमात्मविदः कर्मयोगस्यास
म्भवः स्यादिति अत्रोच्यते सम्यग्ज्ञानमिथ्याज्ञानतत्कार्यविरोधात् ज्ञानयोगेन सांख्यानामित्यने
न सांख्यानामात्मतत्त्वविदामनात्मवित्कर्तृककर्मयोगनिष्ठातो निष्क्रियात्मस्वरूपावस्थानलक्षणा
याः ज्ञानयोगनिष्ठायाः पृथक्करणात् कृतकृत्यत्वेनात्मविदः प्रयोजनान्तराभावात् तस्य कार्यं न
विद्यत इति कर्त्तव्यान्तराभाववचनाच्च न कर्म्मणामनारम्भात् । संन्यासस्तु महाबाहो दुःखमाप्तु
मयोगतः इत्यादिवचनाच्चात्मज्ञानाङ्गत्वेन कर्मयोगस्य विधानात् योगारूढस्य तस्यैव शमः कारण
मुच्यत इत्यनेन चोत्पन्नसम्यग्दर्शनस्य कर्म्मयोगाभाववचनात् शारीरं केवलं कर्म कुर्वन्नाप्नोति
किल्बिषमिति च शरीरस्थितिकारणातिरिक्तस्य कर्मणो वारणात् नैव किञ्चित् करोमीति युक्तो
मन्येत तत्त्वविदित्यनेन च शरीरस्थितिमात्रप्रयुक्तेष्वपि दर्शनश्रवणादि कर्म्मस्वात्मयाथात्म्य
विदः करोमीति प्रत्ययस्य समाहितचेतस्तया सदा कर्त्तव्यत्वोपदेशादात्मतत्त्वविदः सम्यग्दर्श
नेन विरुद्धो मिथ्याज्ञानहेतुकः कर्मयोगः स्वप्नेऽपि न सम्भावयितुं शक्यते यस्मात् तस्मादनात्म
वित्कर्तृकयोरेव संन्यासकर्म्मयोगयोर्निःश्रेयसकरत्ववचनं तदीयाच्च कर्मसंन्यासाल्लक्षणत
पूर्वोक्तात्मवित्कर्तृकसर्वकर्म्मसंन्यासविलक्षणात् सत्येककर्तृत्वविज्ञाने कर्मैकदेशविषयत्वात् दम
नियमादिसहितत्वेन च दुरनुष्ठेयत्वात् सुकरत्वेन च कर्म्मयोगस्य विशिष्टत्वाभिधानमित्येवं प्रति
वचनवाक्यार्थनिरूपणेनापि पूर्वोक्तः प्रष्टुरभिप्रायो निश्चीयते इति स्थितं ज्यायसी चेत् कर्मणस्ते
इत्यत्र ज्ञानकर्मणोः सहासम्भवं यच्छ्रेय एतयोस्तन्मे ब्रूहि इत्येवं पृष्टोऽर्जुनेन भगवान् ज्ञानयोगेन
सांख्यानां निष्ठा पुनः कर्म्मयोगेन योगिनां निष्ठा प्रोक्तेति निर्णयञ्चकार न च संन्यसनादेव
केवलात् सिद्धिं समधिगच्छतीति वचनात् ज्ञानसहितस्य तस्य सिद्धिसाधनत्वमिष्टं कर्मयोगस्य
च विधानात् ज्ञानरहितस्य संन्यासः श्रेयान् किंवा कर्मयोगः श्रेयानित्येतयोर्विशेषबुभुत्सया
अर्जुन उवाच संन्यासं परित्यागं कर्मणां शास्त्रीयाणामनुष्ठानविशेषाणां शंससि प्रथमं [illegible]
[illegible] पुनर्योगञ्च तेषामेवानुष्ठानलक्षणं कर्तव्यं शंससि मे कतरत् श्रेय इति संशयः किं कर्मानु
ष्ठानं श्रेयः किं वा तद्धानमिति प्रशस्यतरं [illegible] प्रशस्यतरमेतयोः कर्मानु
[illegible] अनुष्ठानात् श्रेयोऽवाप्तिरिति [illegible] तदेकमन्यतरत् [illegible]
[illegible] ॥ १ ॥

आनन्दगिरिकृतटीका।

पूर्वोत्तराध्याययोः सम्बन्धमभिदधानो वृत्तानुवादपूर्वकमर्जुनप्रश्नस्याभिप्रायं प्रदर्श यितुं प्रक्रमते कर्मण्येत्यादिना इत्यारभ्य कर्मण्यकर्मदर्शनमुक्त्वा तत्प्रशंसा प्रसारितेत्या ह स युक्त इति ज्ञानवन्तं सर्वाणि कर्माणि लोकसंग्रहार्थं कुर्वन्तं ज्ञानलक्षणेनाग्निना द ग्धसर्वकर्माणं कर्मप्रयुक्तफलसम्बन्धविधुरं विवेकवन्तो वदन्तीति ज्ञानवतो ज्ञानफलभूतं संन्यासं विवक्षन् विविदिषोः साधनरूपमपि संन्यासं भगवान् विवक्षितवानित्याह ज्ञाना ग्नीति निराशीरित्यारभ्य शरीरस्थितिमात्रकारणं कर्म शरीरस्थितावपि संगरहितः सन् समाचरन् धर्माधर्मफलभागी न भवतीत्यपि पूर्वोत्तराभ्यामध्यायाभ्यां द्विविधं संन्यासं सूचितवानित्याह शारीरमिति यदृच्छेत्यादावपि संन्यासः सूचितः तद्धर्मफलायोपदेशा दित्याह यदृच्छेति ज्ञानस्य यज्ञत्वसम्पादनपूर्वकं प्रशंसावचनादपि कर्मसंन्यासो दर्शितो ज्ञाननिष्ठस्येत्याह ब्रह्मार्पणमिति ज्ञानयज्ञस्तुत्यर्थं विहितान्नानाविधान् यज्ञाननूद्य तेषां देहादिव्यापारजन्यत्ववचनेनात्मनो निर्व्यापारत्वविज्ञानफलाभिलापादपि यथोक्तमा त्मानं विविदिषोः सर्वकर्मसंन्यासेऽधिकारोऽध्वनित इत्याह कर्मजानिति समस्तस्यैवाव शेषवर्जितस्य कर्मणो ज्ञाने पर्यवसानाभिधानाच्च जिज्ञासोः सर्वकर्म संन्यासः सूचित इ त्याह सर्वमिति तद्विद्धीत्यादिना ज्ञानप्राप्त्युपाय प्रणिपातादिप्रदर्श्य प्राप्तेन ज्ञानेनाति शयमाहात्म्यवता सर्वकर्मणां निवृत्तिरेवेति वदता च ज्ञानार्थिनः संन्यासेऽधिकारी दर्शि तो भवतीत्याह ज्ञानाग्निरिति ज्ञानेन समुच्छिन्नसंशयं तस्मादेव ज्ञानात् कर्माणि संन्यस्य व्यवस्थितमप्रमत्तं वशीकृतकार्यकरणसंघातवन्तं प्रातिभासिकानि कर्माणि न निबध्नन्ति इत्यपि द्विविधः संन्यासो भगवतोक्त इत्याह योगेति कर्माणीत्यारभ्य योगसंन्यस्तकर्मा णमित्यन्तैरुदाहृतैर्वचनैरुक्तं संन्यासमुपसंहरति इत्यन्तैरिति तर्हि कर्मसन्यासस्यैव जि ज्ञासुना ज्ञानवता चादरणीयत्वात् कर्मानुष्ठानमनादेयमापन्नमित्याशङ्क्योक्तमर्थान्तरमनु वदति छित्त्वैनमिति कर्म तत्त्यागयोरुक्तयोरेकेनैव पुरुषेणानुष्ठेयत्वसम्भावात्त्रविरोधो ऽस्तीत्याशङ्क्य युगपद्वा क्रमेण वानुष्ठानमिति विकल्प्याद्यं दूषयति उभयश्चेति द्वितीयं प्रत्याह कालभेदेनेति उक्तयोर्द्वयोरेकेन पुरुषेणानुष्ठेयत्वाऽसम्भवे कथं कर्तव्यत्वमिद्धिरि त्याशङ्क्याह अर्थादिति द्वयोरुक्तयोरेकेन युगपत् क्रमाभ्याम् अनुष्ठानानुपपत्तेरित्यर्थः अ न्यतरस्य कर्तव्यत्वेकतरस्येति कुतो निर्णयो द्वयोः सन्निधानाविशेषादित्याशङ्क्याह यत् प्रशस्यतरमिति भगवता कर्मणां संन्यासो योगश्चोक्तो नच तयोः समुच्चित्यानुष्ठानं तेना न्यतरस्य श्रेष्ठस्यानुष्ठेयत्वे तद्बुभुत्सया प्रश्नोपपत्तिरित्युपसंहरति इत्येवमिति नायं प्र ष्टुरभिप्रायः कर्मसंन्यासकर्मयोगयोर्भिन्नपुरुषानुष्ठेयतत्त्वस्योक्तत्वादेकस्मिन् पुरुषे प्राप्त्यभा वादिति शंकते नन्विति चोद्यमंगीकृत्य परिहरति सत्यमेवमिति कीदृशस्तर्हि प्रष्टुरभि प्रायो येन प्रश्नप्रवृत्तिरिति पृच्छति कथमिति एकस्मिन् पुरुषे कर्म तत्त्यागयोरस्ति प्रा प्तिरिति प्रष्टुरभिप्रायं प्रतिनिर्दिष्टं प्रारभ्यते पूर्वोदाहृतैरिति यथा स्वर्गकामो यजेतेति स्वर्ग कामोद्देशेन यागो विधीयते नतेतस्यैवाधिकारो नान्यस्येत्यपि प्रतिपाद्यते वाक्यभेदप्र संगात् तथा नात्मवित् कर्ता संन्यासपक्षे प्राप्तोऽनूद्यते नचात्मवित् कर्तृकस्यैव संन्या सस्य नियम्यते वैराग्यमात्रेणाज्ञस्यापि संन्यासविधिदर्शनात् तस्मात् कर्म तत्त्यागयोः विद्वत्कर्तृकत्वमस्तीति मन्वानस्य अर्जुनस्य प्रश्नः सम्भवतीति भावः भवतु संन्यासते कर्तव्यत्वविषयतयापि कथमेकस्मिन् पुरुषेनयोरप्राप्तानुवादाभिप्रायेदप्रश्नवचनं सम्भवते

तत्र अनात्मविदिति आत्मविदो विद्या सामर्थ्यात् कर्मत्यागध्रौव्यवदितरस्यापि सति वैराग्ये तत्त्यागस्यावश्यकत्वात् तत्र कर्तासौ प्राप्नोत्रानूद्यते तथा च कर्मतत्त्यागयोरे स्मिन् विदुषि प्राप्ते व्यक्तत्वादुक्ताभिप्रायेण प्रश्नप्रवृत्तिरविरुद्धेत्यर्थः संन्यासस्यात्मवित्‌ कर्तृकत्वमेवात्र विवक्षितं किं न स्यादित्याशंक्य कर्त्रन्तरपर्युदासः संन्यासविधिवेत्यां भेदे वाक्यभेदप्रसंगान्नैवमित्याह न पुनरिति इति शब्दो वाक्यभेदप्रसंगहेतुद्योतनार्थः ततः किमित्याशङ्क्य फलितमाह एवमिति कर्मानुष्ठानकर्मसंन्यासयोरविद्वत् कर्तृकत्वम स्त्यस्तीत्येवं मन्वानस्यार्जुनस्य प्रशस्यतरविविदिषया प्रश्नो नानुपपन्न इति सम्बन्धः त योः समुच्चित्यानुष्ठानसम्भवे कथं प्रशस्यतरविविदिषेत्याशङ्क्याह पूर्वोक्तेनेति उभयोरेत्या दावुक्तप्रकारेण कर्म तत्त्यागयोर्मिथोविरोधान्न समुच्चित्यानुष्ठानं सावकाशमित्यर्थः भव तु तर्हि यस्य कस्यचिदन्यतरस्यानुष्ठेयत्वमिति कुतो यथोक्ताभिप्रायेण प्रश्नप्रवृत्तिरित्या शङ्क्याह अन्यतरस्येति उभयप्राप्तौ समुच्चयानुपपत्तावन्यतरपरिग्रहे विशेषस्यान्वेष्टव्यत्वादु क्ताभिप्रायेण प्रश्नोपपत्तिरित्यर्थः इतश्चाविद्वत् कर्तृकयोः संन्यासकर्मयोगयोः कर्तुः प्र यानिति प्रष्टुरभिप्रायो भातीत्याह प्रतिवचनेति किं तत् प्रतिवचनं कथं वा तन्निरूपण मिति पृच्छति कथमिति तत्र प्रतिवचनं दर्शयति संन्यासेति तन्निरूपणं कथयति इत्य दिति तदुभयं निःश्रेयसकरत्वं कर्मयोगस्य श्रेष्ठत्वञ्चेत्यर्थः गुणदोषविभागविवेकार्थं पृ च्छति किञ्चेति अतोऽस्मिन्नाद्ये पक्षे किं दूषणम् अस्मिन् वा द्वितीये पक्षे किं फलमिति प्रश्नार्थः तत्र सिद्धान्ती प्रथमपक्षे दोषमादर्शयति अत्रेत्यादिना तदेवानुपपन्नं व्यतिरेकद्वारा विवृणोति यदीत्यादिना निःश्रेयसकरत्वोक्तिरित्यत्र पारम्पर्येणेति द्रष्टव्यं विशिष्टत्वाभिधानमिति प्रतियोगिनोऽसहायत्वादस्य च शुद्धिद्वारा ज्ञानार्थत्वादित्यर्थः आत्मज्ञस्य कर्मसंन्यासकर्मयोगयोरसम्भवे दर्शिते चोदयति अत्राहेति चोदयता निरा सार्थं विमृशति किमित्यादिना अन्यतरासम्भवेऽपि सन्देहात् प्रश्नोऽयतरतीत्या यदा चेति यस्य कस्यचिद् अन्यतरस्याऽसम्भवो भविष्यतीत्याशंक्य कारणमन्तरेणासम्भवे वत्नातिप्रसंगः स्यादिति मन्यानः सन्नाह असम्भव इति आत्मविदः सकारणं कर्मयोगा सम्भवं सिद्धान्ती दर्शयति अत्रेति संग्रहवाक्यं विवृण्वन्नात्मवित्त्वं विवृणोति कस्मादि ति तस्य तदुक्तं निवृत्तमिथ्याज्ञानत्वं तदिदानीं व्यनक्ति सम्यगिति विपर्ययज्ञानम् स्येत्यादिनोक्तं प्रपंचयति निष्क्रियेति यथोक्त संन्यासमुक्त्वा ततो विपरीतस्य कर्म गम्याभावः प्रतिपाद्यत इति सम्बन्धः वैपरीत्यं स्फोरयन् कर्मयोगमेव विशिनष्टि मिथ्या ज्ञानेति मिथ्या च तदज्ञानञ्चेत्यनाद्यनिर्वाच्यमज्ञानं तन्मूलोऽहं कर्तेत्यात्मनि कर्तृ त्वाभिमानस्तत्पूर्वकस्तस्येति यावत् यथोक्तं संन्यासमुक्त्वा यथोक्तकर्मयोगाभावस्य प्रतिपादने हेतुमाह सम्यग्ज्ञानेति कुत्र तदभावप्रतिपादनं तदाह इहेति उक्तं हि स्यात्मज्ञस्य कर्मयोगासम्भवे फलितमाह यस्मादिति इह शास्त्रे तत्र तत्र [illegible] मेव [illegible] कर्तुं इष्यते [illegible] तानेव प्रदेशान् दर्शयति अत्रेति [illegible] [illegible] संन्यासो [illegible] तर्हि [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

वतीत्यर्थः आत्मज्ञस्य कर्मयोगासम्भवे हेत्वन्तरमाह ज्ञानयोगेनेति इतश्चात्मवि
ज्ञानादूर्ध्वं कर्मयोगो न युक्तिमानित्याह कृतकृत्यत्वेनेति ज्ञानवतो नास्ति कर्मेत्यत्र
णान्तरमाह तस्येति तर्हि ज्ञानवता कर्मयोगस्य हेयत्ववज्जिज्ञासुनापि तस्य त्या
त्वं ज्ञानप्राप्त्या तस्यापि पुरुषार्थसिद्धेरित्याशङ्क्य जिज्ञासोरस्ति कर्मयोगापेक्षा इत्याह
कर्मणामिति स्वरूपोपकार्यंगमन्तरेणांगिस्वरूपानिष्पत्तेर्ज्ञानार्थिना कर्मयोगस्य शुद्ध्या
द्वारा ज्ञानाहेतोरादेयत्वमित्यर्थः तर्हि ज्ञानवतामपि ज्ञानफलोपकारित्वेन कर्मयोगो
यतामित्याशङ्क्याह योगारूढस्येति उत्पन्नसम्यग्ज्ञानस्य कर्माभावे शरीरस्थितिहेतो
कर्मणोऽसम्भवान्न तस्य शरीरस्थितिस्तदस्थितौ च कुतो जीवन्मुक्तिस्तदभावे च क
पदेष्टृत्वम् उपदेशाभावे च कुतो ज्ञानोदयः स्यादित्याशङ्क्याह शरीरमिति विदुषोऽ
शरीरस्थितिरास्थिता चेत् तन्मात्रप्रयुक्तेषु दर्शनश्रवणादिषु कर्तृत्वाभिमानोऽपि त
स्यादित्याशंक्याह नैवेति तत्त्वविदित्यनेन च समाहितचेतस्तया करोमीति प्रत्य
य सदैव कर्तृत्वोपदेशादिति सम्बन्धः यत्तु विदुषः शरीरस्थितिनिमित्तकर्माभ्यनु
ने तस्मिन् कर्तृत्वाभिमानोऽपि स्यादिति तत्राह शरीरेति आत्मयाथात्म्यविदः ते
पि नाहंकरोमीति प्रत्ययस्य नैव किञ्चित् करोमीत्यादावकर्तृत्वोपदेशान्न कर्तृत्वा
भिमानसम्भावनेत्यर्थः यथोक्तोपदेशानुसन्धानाभावे विदुषोऽपि करोमीति स्वाभाविक प्र
त्ययद्वारा कर्मयोगः स्यादित्याशंक्याह आत्मतत्त्वेति यद्यपि विद्वान् यथोक्तमुपदेशं क
दाचिन्नानुसन्धत्ते तथापि तत्त्वविद्याविरोधात् मिथ्याज्ञानं तन्निमित्तं कर्म वा तस्य स
म्भावयितुमशक्यमित्यर्थः आत्मवित्कर्तृकयोः संन्यासकर्मयोगयोरयोगात् तयोर्निश्रेयस
करत्वमन्यतरस्य विशिष्टत्वमित्येतदयुक्तमिति सिद्धत्वात् द्वितीयं पक्षमंगीकरोति यस्मा
दित्यादिना तदीयाच्च कर्मसंन्यासात् कर्मयोगस्य विशिष्टत्वाभिधानमिति सम्बंधः ननु
कर्मयोगेन शुद्धबुद्धेः संन्यासो जायमानस्तस्मादुत्कृष्यते कथं तस्मात् कर्मयोगस्योत्कृ
ष्टत्व वाचोयुक्तिर्युक्तेति तत्राह पूर्वोक्तेति वैलक्षण्यमेव स्पष्टयति सत्येति स्वाश्रमविहि
तश्रवणादौ कर्तृत्वविज्ञाने सत्येव पूर्वाश्रमोपात्तकर्मैकदेशविषयसंन्यासात् कर्मयोगस्य श्रे
ष्ठत्ववचनं नैतादृशं ब्राह्मणस्यास्ति वित्तमित्यादि स्मृतिविरुद्धमित्याशङ्क्याह यमनिय
मादीति ॥ आनृशंस्यं क्षमा सत्यमहिंसा दम आर्जवं। प्रीतिः प्रमादो माधुर्यमक्रोधश्च
यमा दश ॥ दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहौ। व्रतोपवासो मौनञ्च स्नान
ञ्च नियमा दश ॥ इत्युक्तैर्यमनियमैरन्यैश्चाश्रमधर्मैर्विशिष्टत्वेनानुष्ठातुमशक्यत्वाद्दुष्करसं
न्यासात् कर्मयोगस्य विशिष्टत्वोक्तिर्युक्तेत्यर्थः नहि कश्चिदिति न्यायेन कर्मयोगस्येतरा
पेक्षयासुकरत्वाच्च तस्य विशिष्टत्ववचनं श्लिष्टमित्याह सुकरत्वेन चेति प्रतिवचनवा
क्यार्थालोचनात् सिद्धमर्थमुपसंहरति इत्येवमिति संन्यासकर्मयोगयोर्मिथोविरुद्धयोः
समुच्चित्यानुष्ठातुमशक्ययोरन्यतरस्य कर्तव्यत्वे प्रशस्यतरस्य तद्भावात्तद्भावस्य चानि
र्धारितत्वात्तन्निर्धारयिषया प्रश्नः स्यादिति प्रश्नवाक्यार्थपर्यालोचनया प्रष्टुरभिप्रायो य
थापूर्वमुपदिष्टस्तथा प्रतिवचनार्थनिरूपणेनापि तस्य निश्चितत्वात् प्रश्नोपपत्तिः सिद्ध्ये
त्यर्थः ननु तृतीये यथोक्तप्रश्नस्य भगवता निर्णीतत्वात् अत्र प्रश्नप्रतिवचनयोः मा[illegible]
त्वमित्याशंक्य विस्तरेणोक्तमेव सम्बन्धं पुनः संक्षेपतो दर्शयति ज्यायसी चेदिति सां
ख्ययोगयोर्भिन्नपुरुषानुष्ठेयत्वेन निर्णीतत्वात् पुनः प्रश्नयोः[illegible]त्यर्थः इतोऽपि न त
योः [illegible]त्वमित्याह नचेति [illegible] सिद्धमादनस्य
भगवतोऽभिमतं छित्त्वैनं संशयं योगमातिष्ठेति च कर्मयोग[illegible]विधानात्तस्यापि सिद्ध

साधनत्वमिष्टं ततश्च निर्णीतत्वान्न प्रश्नस्तद्विषयः सिद्ध्यतीत्यर्थः केनाभिप्रायेण तर्हि प्रश्नः स्यादित्याशंक्य ज्ञानरहितसंन्यासात् कर्मयोगस्यप्रशस्यतरत्वबुभुत्सयेत्याह ज्ञान रहित इति प्रष्टुरभिप्रायमेवं प्रदर्श्य प्रश्नोपपत्तिमुक्त्वा प्रश्नमुत्थापयति संन्यासमिति द्वि द्वयं त्वयानुष्ठेयमित्याशंक्य तदशक्तेरुक्तत्वात् प्रशस्यतरस्यानुष्ठानार्थं तदिदमिति विचत्य वक्तव्यमित्याह यच्छ्रेय इति काम्यानां प्रतिषिद्धानाञ्च कर्मणां परित्याग योच्यते न सर्वेषामित्याशङ्क्य कर्मण्यकर्मेत्यादौ विशेषदर्शनान्नैवमित्याह शास्त्रीय र्माति अस्तु तर्हि शास्त्रीयाशास्त्रीययोरुभयोरपि कर्मणास्त्यागो नेत्याह पुनरिति त कर्मत्यागस्तद्योगश्चेत्युभयमादर्शितव्यमित्याशङ्क्य विरोधान्नैवमित्यभिप्रेत्याह अत द्वयोरेकेनानुष्ठानायोगस्योक्तत्वात् कर्त्तव्यत्वोक्तेश्च संशयो जायते तमेव संशयं विवृ कि कर्मेति प्रशस्यतरबुभुत्सा किमर्थेत्याशङ्क्याह प्रशस्यतरञ्चेति तस्यैवानुष्ठेयत्व सावकाशत्वमाह अतश्चेति तदेव प्रशस्यतरं विशिनष्टि यदनुष्ठानादिति तदेकमन्य मस्मै ब्रूहीति सम्बन्धः उभयोरुक्तत्वे सति किमित्येकं वक्तव्यमिति नियुज्यते तत्र सहेति कर्मतत्त्यागयोर्मिथो विरोधादित्यर्थः ॥ १ ॥

स्वामिकृतटीका।

येषां ज्ञानेन नाशितमात्मनोऽज्ञानं ते पण्डिताः कथं तत्त्वं पश्यन्तीत्युच्यते विद्याविनयसम्पन्ने विद्या च विनयश्च विद्याविनयौ विद्यात्मनो बोधो विनयश्च उपशमः ताभ्यां विद्याविनयाभ्यां सम्पन्नो विद्वान् विनीतश्च यो ब्राह्मणस्तस्मिन् ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च पण्डिताः समदर्शिनो विद्याविनयसम्पन्ने उत्तमसंस्कारवति ब्राह्मणे सात्त्विके मध्यमायाञ्च राजस्यां गवि संस्कारहीनायामत्यन्तमेव केवलतामसे हस्त्यादौ च सत्त्वादिगुणैस्तज्जैश्च संस्कारैस्तथा राजसैस्तथा तामसैश्च संस्कारैरत्यन्तमेवास्पृष्टं समपेकमविक्रियं ब्रह्म द्रष्टुं शीलं येषां ते पण्डिताः समदर्शिनः ॥ १८ ॥

आनंदगिरिकृतटीका ।

यत्पुनरावृत्तिसाधनं तत्त्वज्ञानं तदेव प्रश्नद्वारेण विवृणोति येषामित्यादिना विद्या वेदार्थविज्ञानमित्यंगीकृत्य विनयं व्याचष्टे विनय इति उपशमो निरहंकारत्वमनौद्धत्य पदार्थमेवमुक्त्वा वाक्यार्थं दर्शयति विद्वानिति गवीत्याद्यनूद्य वाक्यार्थं कथयति [illegible] ति हस्त्यादौ पण्डिताः समदर्शिन इत्युत्तरत्र सम्बन्धः तत्र तत्र प्राणिभेदेषु तत्तद्गुणैस्तन्निमित्तसंस्कारैश्च संस्पृष्टत्वमस्पृष्टत्वं ब्रह्मणः समत्वमित्याशङ्क्याह [illegible] सत्त्वेश्चेत्यत्र तच्छब्देन सत्त्वमेव गृह्यते सात्त्विकसंस्कारैरिव राजससंस्कारैरपि [illegible] चैवासंस्पृष्टं ब्रह्मेत्याह तथेति राजसैरिव तामसैरपि संस्कारैरस्पृष्टत्वमित्याह [illegible] च तथा तामसैरिति ब्रह्मणोऽद्वितीयत्वं कूटस्थत्वमसंगत्वञ्चोक्तंऽर्थे [illegible] शब्दार्थमाह समानिति समदर्शित्वमेव पाण्डित्यं तद्व्याचष्टे ब्रह्मेति ॥ १८ ॥

स्वामिकृतटीका ।

[illegible]

नवलभाष्य।

जिन पुरुषोंका ज्ञानकरके आत्मविषयक अज्ञान अर्थात् अपनेस्वरूप का अज्ञान नाशको प्राप्तहुआ वे पण्डित कौनप्रकार करके तत्त्वको देखतेहैं इसआशयसे कहते हैं [विद्येति] और हेअर्जुन विद्याजो आत्मबोध और बिनय जो उपशम अर्थात् मनको वशकरना तिनदोनों उत्कृष्टगुणों करके युक्तब्राह्मण अर्थात् ब्राह्मण तो आपही उत्तमहै तिसपै विद्याज्ञान और विनय इनकरके युक्तसात्त्विकहोनेसे अतिउत्तमहुआ और गौमध्यम पदार्थमेंहुई राजसहोनेसे और हाथी और कुत्ता और चाण्डाल ये तामसहोने से अधमहुए तो विद्याविनय युक्त ब्राह्मणमें और गौमें और हाथी कुत्ता चाण्डालमें जे पुरुष सत्त्वादि गुणोंकरके और इनके संस्कारों करके और तैसेही राजसतामस संस्कारोंसे अत्यन्तनहीं स्पर्श कियागया औरसम एक अविक्रिय विकाररहित ब्रह्महीको देखतेहैं ऐसे समदर्शीपण्डितकहातेहैं १८॥

इहैव तैर्जितः स्वर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः॥१९॥

शङ्करभाष्यम्।

नन्वभोज्यान्नास्ते दोषवन्तः समासमाभ्यां विषमसमे पूजात इति स्मृतेर्न ते दोषवन्तः कथं इहेति इहैव जीवद्भिरेव तैः समदर्शिभिः पण्डितैर्जितो वशीकृतः सर्गो जन्म येषां साम्ये सर्वभूतेषु ब्रह्मणि समभावे स्थितं निश्चलीभूतं मनोऽन्तःकरणं निर्दोषं यद्यपि दोषवत्सु श्वपाकादिषु मूढैस्तद्दोषैर्दोषवदिव विभासते तथापि तद्दोषैरसंस्पृष्टमिति निर्दोषं हि दोषवर्जितं हि यस्मान्नापि स्वगुणभेदभिन्नं निर्गुणत्वाच्चैतन्यस्य वक्ष्यति च भगवानिच्छादीनां क्षेत्रधर्मत्वमनादित्वान्निर्गुणत्वादिति च नाप्यन्त्यादिविशेषा आत्मनो भेदकाः सन्ति प्रतिशरीरं तेषां सत्त्वे प्रमाणानुपपत्तेरतः समं ब्रह्मैकञ्च तस्माद् ब्रह्मण्येव ते स्थिताः तस्मान्न दोषगन्धमात्रमपि तान् स्पृशति देहादिसंघातात्मदर्शनाभिमानाभावात् तेषां देहादिसंघातात्मदर्शनाभिमानवद्विषयन्तु तत् सूत्रं समासमाभ्यां विषम समे पूजात इति पूजाविषयत्वविशेषणात् दृश्यते हि ब्रह्मवित् षडङ्गवित् चतुर्वेदवित् इति पूजादानादौ गुणविशेषसम्बन्धः कारणं ब्रह्म तु सर्वगुणदोषसम्बन्धवर्जितमित्यतो ब्रह्मणि ते स्थिता इति युक्तं॥ १९॥

आनन्दगिरिकृतटीका।

सात्त्विकेषु राजसेषु तामसेषु चासमत्वेषु समत्वदर्शनमनुचितमिति शंकते नन्विति सर्वत्र सम[illegible] तच्छब्देन [illegible] न्ते तेषां दोषवत्त्वादभोज्यान्नत्वादभोज्यान्नत्व [illegible] सम॰ [illegible] त समानामध्ययनादिभिः समानधर्मकाणां वस्त्रा [illegible] मि [illegible] क्रियमा [illegible] मानांचाससमानधर्मकाणां कन्या [illegible] आदि [illegible] या पूजया समे प्रतिपत्तिविशे [illegible] दुर्म्माच्च हीयते तेन सात्त्विके [illegible] वन् [illegible] तत्त्वेनेतरश्लोकमवतारयति न ते [illegible] दर्शिनां दोष [illegible] कथं नाप्नोति [illegible] कृते [illegible] गतिमये [illegible] त्वं समत्वद

र्शिनां विपश्यति इहैवेति सर्वेषां चेतनानां साम्ये प्रवणमनसां ब्रह्मलोकगमनमन्तरेण अस्मिन्नेव देहे परिभूतजन्मनामशेषदोषराहित्ये हेतुमाह निर्दोषं हीति वर्तमानो देहः सम्यग्दर्शिना परिगृह्यते तानेव समदर्शिनो विशिनष्टि येषामिति ननु ब्रह्मणो निर्दोषत्वमुक्तं दोषवत्सु श्वपाकादिषु तद्दोषैर्दुष्टत्वं सम्भवतीत्याह यद्यपीति यस्मात्तत्र दोषं तस्मात्तस्मिन् ब्रह्मणि स्थिता निर्दोषैः सर्गो जित इति सम्बन्धः ब्रह्मणो गुणवत्त्वादल्पीयान् दोषोऽपि स्यादित्याशंक्याह नापीति चेतनस्य गुणविशेषे विशिष्टत्वमनिष्टं निर्गुणत्वश्रवणादित्ययुक्त बुद्धिसुखादीनां परिशेषादात्मधर्मत्वस्य कैश्चिदिष्ट त्वादित्याशंक्याह वक्ष्यति चेति आत्मनो निर्गुणत्वे वाक्यशेषं प्रमाणयति अनादित्वादिति चकारो वक्ष्यतीत्यनेन सम्बन्धार्थः गुणदोषवशादात्मनो भेदाभावेऽपि भेदोऽन्त्य विशेषेभ्यो भविष्यतीति प्रसंगादाशंक्य दूषयति नापीति प्रतिशरीरमात्मभेदसिद्धौ तद्तुत्वेन तेषां सत्त्वं तेषांच सत्त्वे प्रतिशरीरमात्मनो भेदसिद्धिरिति परस्पराश्रयत्वमभिप्रेत्य हेतुमाह प्रतिशरीरमिति आत्मनो भेदकाभावे फलितमाह अत इति समत्वमेव व्याकरोति एकञ्चेति ब्रह्मणो निर्विशेषत्वेनैकत्वाज्जीवानाञ्च भेदकाभावेनैकत्वात् सत्त्वादेकलक्षणत्वादेकत्वं जीव ब्रह्मणोरैक्यमित्याह तस्मादिति जीव ब्रह्मणोरैक्ये जीवानां ब्रह्मवन्निर्दोषत्वं सिध्यतीत्याह तस्मान्नेति तच्छब्दार्थमेव स्फोरयति देहादीति यदि सर्वसत्त्वेषु समत्वदर्शनमदुष्टमिष्टं तर्हि कथं गौतमसूत्रमित्याशंक्याह देह संघातेति सूत्रस्य तथोक्ताभिमानवद्विषयत्वे गमकमाह पूजेति यदि चतुर्वेदानामेव सतां पूजया वैषम्यं यदि वा चतुर्वेदानां षडंगविदां ब्रह्मविदांच पूजया साम्यं तदा तेषामुक्ता पूजा विषयाणां केषांचिन्मनोविकारसम्भवं कर्ता प्रत्यवैतीत्यविद्वद्विषयत्वं सूत्रस्य प्रतिभातीत्यर्थः तत्रैव चानुभवमनुभवमनुकूलत्वेनोदाहरति दृश्यते हीति देहादिसंघाताभिमानवतां गुणदोषसम्बन्धसम्भवात्तद्विषयं सूत्रमित्युक्तमिदानीं ब्रह्मात्मदर्शनाभिमानवतां गुणदोषासम्बन्धान्न तद्विषयं सूत्रमित्यभिप्रेत्याह ब्रह्मविदिति ॥ १६ ॥

स्वामिकृतटीका।

ननु विषमेषु समदर्शनंनिषिद्धं कुर्वन्तोऽपि पण्डिताः यथाह गौतमः समासमाभ्यां विषमे पूजात इति अस्यार्थः समाय पूजायां विषमे प्रकारे कृते सति विषमाय च समे प्रकारे कृते सति स पूजक इह लोकात् परलोकाच्च हीयत इति तत्राह इहैवेति इहैव जीवद्भिरेव तैः सज्यत इति सर्गसंसारो जितो निरस्तः कैः येषां मनः साम्ये समत्वे स्थितं तत्र हेतुः हि यस्माद् ब्राह्म समं निर्दोषंच तस्मात्ते समदर्शिनो ब्रह्मण्येव स्थिता ब्राह्मभावं प्राप्ता इत्यर्थः गौतमोक्तस्तु दोषो ब्रह्मभावप्राप्तेः पूर्वमेव पूजात इति पूजकावस्था श्रवणात् ॥ १६॥

नवलभाष्य।

न कहो धर्मशास्त्रमें तो ऐसाकहा कि जे पुरुष विषम पुरुषमें सम दृष्टि से पूजन करतेहैं और सममें विषमदृष्टिसे पूजनकरते हैं अर्थात् जो उत्तम पूजाके योग्य नहींहैं ऐसे अधम पुरुषमें उत्तम पूजाके करनेवाले हैं और जो उत्तम पूजाके योग्य विद्वान् तिसमें निकृष्ट अधम पूजाकरते हैं वेपुरुष उसदोष करके अभोज्यान्न होजातेहैं अर्थात् ऐसेपुरुषों का अन्नभोजनकर-

पूजनहीं करतेहैं और यहां कहा कि विद्याविनययुक्त ब्राह्मणको और चांडालको एकसा देखने वालेही श्रेष्ठहैं तो धर्मशास्त्रसे बड़ाविरोधहुआ तिसपै कहतेहैं कि वहदोषज्ञानका अवस्थामें नहींहै किन्तुलौकिकदृष्टिहीकरके भेददृष्टिपुरुषों को धर्मशास्त्रने एकसा देखनेमें दोषकहाहै इसआशयसे कहते हैं कि [इहैवेति] हेअर्जुन वे समदर्शी पण्डितलोगोंने इसीजन्ममें अर्थात् जीवतेही सर्ग जो जन्मसो अपना जीतलिया है जिनपुरुषों का समभाव जो ब्रह्म तिसमेंमन अन्तःकरण निश्चलहुआ है क्योंकि ब्रह्मनिर्दोष हैं यद्यपि दोषयुक्त चांडालादिकोंमें मूढ़पुरुषोंकरके दोषयुक्तकी नाईं ब्रह्मभी प्रतीत होताहै तो भी तिनदोषोंकरके नहीं स्पर्श कियागया निर्दोष दोषवर्जितहीहै जिससे अपनेगुणोंकरके कभी जुदानहीं होताहै क्योंकि वास्तव में उसब्रह्ममें कोई गुणहैही नहीं जिससे जुदाहोय जिससे चैतन्य जो ब्रह्म तिसको निर्गुणत्वहै और आगे भगवान् तेरहवें अध्यायमें इच्छादि धर्मोंको क्षेत्रके धर्मोंमें अर्थात् शरीरहीके धर्मोंमेंकहेंगे और आत्माकोतो [अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः] इसको आदिलेकै अनेक श्लोकों करके निर्गुणत्वही कहेंगे और चांडालादि विशेष धर्मभी आत्माको भिन्ननहींकरसक्ते अर्थात् न्यारानहीं करसक्ते हैं क्योंकि सबशरीरों में एकएक शरीरके प्रति चांडालादि धर्मोंके होनेमें प्रमाणका अभावहै इससे अर्थात् जैसे आत्मा प्रतिशरीर अर्थात् एकएक शरीरके भेदसे सबमें व्याप्तहोरहाहै तैसे चांडालादि धर्मभी होते तो आत्माको भिन्नकरसक्ते जबये कभी कहींहोते हैं कभी नहीं ऐसे आगमापायी हैं तो आत्माको कैसे भिन्नकरसक्ते हैं तिससे ब्रह्मसमहै और एकहै इससे ब्रह्महीके विषे वेज्ञानीस्थितहैं तिससे दोष का गन्धमात्रभी उनको स्पर्शनहीं करसक्ताहै क्योंकि तिनको देहादि संघातमें अर्थात् देहइन्द्रियादिकों के समूहमें आत्माका देखनेका अभिमानही नहींहै इससे जो कदाचित् ज्ञानीलोग देहादि समूहको अपनास्वरूप मानें तो देहादिकों के उत्तम मध्यम निकृष्ट व्यवहारके करनेवाले गुणदोषोंकरके भी युक्तहोवैं सो अभिमान तो उनकोहैही नहीं फिर कैसे दोषों करके स्पर्शको प्राप्तहोते हैं और पूर्वोक्त धर्मशास्त्रका [समासमाभ्यां विषमसमे पूजातः] अर्थात् विषममें नीचपुरुषमें श्रेष्ठपूजनसे और श्रेष्ठपुरुषमें हीन पूजनकरने से मनुष्य दोषयुक्तहोता है अर्थात् उसका अन्न अभोजनीयहोताहै यहगौतम सूत्रतो जो देहादि समूहमें आत्माको देखताहै उसीके अर्थ है क्योंकि उस देहात्मदर्शी पुरुषको गुणदोषदृष्टि बनीहै जबतक तबतक गुणवान् पुरुषको जानके उसका यथोचित पूजन करनाही योग्यहै और उसके विपरीत करनेमें दोषभी है क्योंकि पूजादानादि विषयशास्त्रमें देखतेही हैं कि जो वेदवित् ब्राह्मण होय और शिक्षादि छःअंगोंको जानताहोय और जो चारोंवेदों को जानता होय ऐसे ब्राह्मण का पूजनकरै और उस को दानदेइ तो इसप्रकार पूजादानादिकोंहीं में यह विशेष सम्बन्ध कारण

है और ब्रह्म तो सब गुण दोष सम्बन्ध करके वर्जितहै इससे वे ज्ञानी ब्रह्म हीमें स्थित हैं यह कहना युक्तहीहै ॥ १९ ॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ २० ॥

शङ्करभाष्यम् ।

कर्म्मिविषयञ्च समासमाभ्यामित्यादि इदन्तु सर्वकर्म्मसंन्यासिविषयं प्रस्तुतं सर्वकर्माणि मनसेत्यारभ्याध्यायपरिसमाप्तेः यस्मान्निर्दोषं समं ब्रह्मात्मा तस्मात् नेति न प्रहृष्येत् न हर्षं कुर्यात् प्रियमिष्टं प्राप्य लब्ध्वा नोद्विजेत् प्राप्यैव चाप्रियमनिष्टं लब्ध्वा देहमात्रात्मदर्शिनां हि प्रियाप्रियप्राप्ती हर्षविषादौ कुर्वाते न केवलात्मदर्शिनः तस्य प्रियाप्रियप्राप्त्यसम्भवात् किञ्च सर्वभूतेष्वेकः समो निर्दोष आत्मेति स्थिरा निर्विचिकित्सा बुद्धिर्यस्य स स्थिरबुद्धिरसंमूढः संमोहवर्जितश्च स्यात् यथोक्तब्रह्मवित् ब्रह्मणि स्थितोऽकर्म्मकृत् सर्वकर्म्मसंन्यासीत्यर्थः ॥ २० ॥

आनन्दगिरिकृतटीका ।

इतश्च नेदं सूत्रं ब्रह्मविद्विषयमित्याह कर्मीति तत्रैव पूजापरिसम्भवादित्यर्थः ननु यत्र समत्वदर्शनं तत्रैव त्विदं सूत्रं नतु कर्म्मिणो वेति विभागोऽस्ति तत्राह इदं त्विति समत्वदर्शनस्य संन्यासिविषयत्वे तेन प्रस्तुतत्वे हेतुमाह सर्वकर्माणीति अध्यायपरिसमाप्तेः सर्वकर्माणीत्यारभ्य तत्र सर्वकर्म्म संन्यासाभिधानात्तद्विषयमिदमसत्वदर्शनं गम्यते तत्र च निरहंकारे निरवकाशं सूत्रमित्यर्थः ननु इष्टानिष्टप्राप्तिभ्यां हर्षविषादौ विदुषामपि कुर्वन्निर्दोषे ब्रह्मणि कथं स्थितिं लभेतेत्याशंक्याकांक्षितं पूरयन्नुत्तरश्लोकमुत्थापयति यस्मादिति आत्मज्ञाननिष्ठावतो विदुषो हर्षविषादनिमित्ताभावान्न तावुचितावित्याह स्थिरबुद्धिरिति ननु हर्षविषादनिमित्तत्वं प्रियाप्रिययोः सिद्धमिति कथं तत्प्राप्त्या हर्षोद्वेगौ न कर्तव्याविति नियुज्यते तत्राह देहेति विदुषोऽपि प्रियाप्रियप्राप्तिसामर्थ्याद्धर्षविषादौ दुर्वारावित्याशंक्याह न केवलेति अद्वितीयदर्शनशीलस्य व्यतिरिक्तप्रियाप्रियप्राप्त्ययोगान्न तन्निमित्तौ हर्षविषादावित्यर्थः इतोऽपि विदुषो हर्षविषादावसम्भावितावित्याह किञ्चेति निर्दोषे ब्रह्मणि प्रागुक्ते दृढप्रतिपत्तिः संमोहेन हर्षादिहेतुना रहितो यथोक्ते सर्वदोषरहिते ब्रह्मण्यहमस्मीति विद्यावानशेषदोषशून्ये तस्मिन्नेव ब्रह्मणि स्थितस्तदनुरोधात् कर्माण्यपृष्यमाणो नैव हर्षविषादभागी भवितुमलमित्यर्थः ॥ २० ॥

स्वामिकृतटीका ।

ब्रह्मप्राप्तस्य लक्षणमाह न प्रहृष्येदिति ब्रह्मविद्भूत्वा ब्रह्मण्येव यः स्थितः स प्रियं प्राप्य न प्रहृष्येत् न प्रहृष्टो हर्षवान् स्यात् अप्रियं प्राप्य च नोद्विजेत् न विषीदेदित्यर्थः यतः स्थिरबुद्धिः स्थिरा निश्चला बुद्धिर्यस्य तत् कुतः यतोऽसंमूढः निवृत्तमोहः ॥ २० ॥

नवलभाष्य ।

और यहभी कारण है कि (समासमाभ्याम्) इत्यादि पूर्वोक्त गौतमसूत्र कर्मकाण्ड विषयक है अर्थात् कर्मकाण्ड के प्रकरण में कहा है और विद्याविनयसम्पन्ने इत्यादि श्लोक सब कर्मोंके संन्यास विषयमें कहा है क्योंकि सर्वकर्माणि मनसा यहांसे लेकर अध्यायकी समाप्ति पर्य्यन्त संन्यासही

का प्रकाशकहै और जिसने निर्दोषसम ब्रह्महीं आत्माहै इसआशयसे कह-
तेहैं कि [नेति] हेअर्जुन संन्यासी अपने आत्माको निर्दोष दोषरहितसम
सबजगह समान ब्रह्मरूप जानके प्रिय जो इष्टवस्तु तिसको प्राप्तहोके हर्ष
को प्राप्तनहोय और अप्रिय जो अनिष्टवस्तु तिसको प्राप्तहोके चित्तके उद्वेग
को नकरे क्योंकि देहमात्रमें आत्मदर्शी अर्थात् आत्माके देखनेवाले जे
पुरुष तिन्हींको प्रिय और अप्रियवस्तुकी प्राप्तिहर्ष विषादको करतीहै और
केवल आत्मदर्शीको नहींकरती क्योंकि तिस आत्मदर्शी को प्रिय पदार्थ
और अप्रिय पदार्थ की प्राप्तिही का असम्भव है इससे और सब भूतों में
एकसम और निर्दोष आत्मा है ऐसीस्थिर और सन्देह रहित है बुद्धिजिस
की और मोहरहित ऐसा जो ब्रह्मवित् ब्रह्मके जाननेवाला पुरुष सोब्रह्महीं
में स्थित है अर्थात् कर्ममें स्थित नहीं है अर्थात् अकर्मकृत् नहीं कर्मके क-
रनेवाला संन्यासी है ॥ २० ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥ २१ ॥

शङ्करभाष्यम् ।

किञ्च ब्रह्मणि स्थितः बाह्ये बाह्यस्पर्शेषु बाह्याश्च ते स्पर्शाश्च बाह्यस्पर्शाः स्पृश्यन्ते इति स्पर्शाः शब्दादयो विषयास्तेषु बाह्यस्पर्शेषु असक्त आत्मान्तःकरणं यस्य सोऽयमसक्तात्मा विषयेषु प्रीतिवर्जितः स विन्दति लभते आत्मनि यत् सुखं तद्विन्दतीत्येतत् स ब्रह्मयोगयुक्तात्मा ब्रह्मणि योगः समाधिर्ब्रह्मयोगस्तेन ब्रह्मयोगेन युक्तः समाहितस्तस्मिन् व्यापृत आत्मान्तःकरणं यस्य स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते प्राप्नोति तस्माद्बाह्यविषयप्रीतेःक्षणिकाया इन्द्रियाणि निवर्त्तयेदात्मन्यक्षयसुखार्थीत्यर्थः ॥ २१ ॥

आनन्दगिरिकृतटीका ।

शब्दादिविषयप्रीतिप्रतिबन्धान्न कस्यचिदपि ब्रह्मणि स्थितिः सिध्येदित्याशंक्याह किंचेति न केवलं पूर्वोक्तरीत्या ब्रह्मणि स्थितो हर्षविषादरहितः किन्तु विद्यान्तरेणापीत्यर्थः यावद्यावद्विषयेषु रागरूपमावरणंनिवर्त्ततेतावत्तावदात्मस्वरूपसुखमभिव्यक्तं भवतीत्याह बाह्येति न केवलमसक्तात्मा शमवशादेव सुखं विन्दते किन्तु ब्रह्मसमाधिना समाहितान्तःकरणः सुखमनन्तं व्याप्नोतीत्याह स ब्रह्मेति तत्र पूर्वार्द्धं व्याचष्टे बाह्याश्चेति समाधानाधीनसम्यग्ज्ञानद्वारा निरतिशयसुखप्राप्तिमुत्तरार्द्धव्याख्यानेन कथयति ब्रह्मणीत्यादिना शब्दादिविषयविमुखस्यानन्तसुखाप्तिसम्भवानदर्थिना प्रयत्नेन विषयवैमुख्यं कर्तव्यमिति शिष्यशिक्षार्थमाह तस्मादिति ॥ २१ ॥

स्वामिकृतटीका ।

मोहनिवृत्त्या बुद्धिस्थैर्यहेतुमाह बाह्येति इन्द्रियैः स्पृश्यन्त इति स्पर्शा विषयाः बाह्येन्द्रियविषयेष्वसक्तात्मा अनासक्तचित्तः आत्मन्यन्तःकरणे यदुपशमात्मकं सात्त्विकं सुखं तद्विन्दति लभते स चोपशमसुखं लब्ध्वा ब्रह्मणि योगेन समाधिना युक्तस्तदैक्यं प्राप्त आत्मा यस्य सोऽक्षयं सुखमश्नुते प्राप्नोति ॥ २१ ॥

नवलभाष्य।

और हे अर्जुन ब्रह्ममेंस्थित जो पुरुष सो वाह्यनाम वाहिरके जे शब्दा-
दि विषय तिन्हों में असक्त अर्थात् प्रीतिरहित है अन्तःकरण जिसका ऐसा
जो पुरुष अर्थात् विषयों में प्रीति रहित आत्मामें जो सुख तिसको प्रा-
होता है इससे सो विषय प्रीति रहितही पुरुष ब्रह्मसमाधि करके अर्थात्
ब्रह्माकार वृत्तिकरके समाहित स्थिर है अन्तःकरण जिसका ऐसा पुरुष अ-
क्षयसुख अर्थात् नाशरहित नित्य सुखको प्राप्तहोताहै इससे जो नित्य सु-
खकी इच्छाकरैतो क्षणिक थोरेकालका होनेवाला जो विषयसुख तिस
इन्द्रियों को निवृत्त करै यह अभिप्राय है ॥ २१ ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२॥

शङ्करभाष्यम्।

इतश्च निवर्तयेत् येहीति ये हि यस्मात् संस्पर्शजा विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा भुक्त-
यो दुःखयोनय एव तेऽविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्ये-
व यथेहलोके तथा परलोकेऽपीति गम्यते एव शब्दात् संसारे सुखस्य गन्धमात्रमपि नास्ती-
ति बुद्ध्वा विषयमृगतृष्णिकाया इन्द्रियाणि निवर्तयेत् केवलं दुःखयोनय आद्यन्तवन्तश्च आदि-
र्विषयेन्द्रियसंयोगो भोगानामन्तश्च तद्वियोग एवात आद्यन्तवन्तोऽनित्या मध्यक्षणभाविन इत्य-
र्थः कौन्तेय न तेषु रमते बुधो विवेकी अवगतपरमार्थतत्त्वोऽत्यन्तमूढानामेव हि विष-
येषु रतिर्दृश्यते यथा पशुप्रभृतीनां ॥ २२ ॥

स्वामिकृतटीका।

ननु प्रियविषयभोगानामपि निवृत्तेः कथं मोक्षः पुरुषार्थः स्यात्तत्राह ये हीति संस्पृश्यन्त इति संस्पर्शा विषयाः तेभ्यो जाता ये भोगाः सुखानि ते हि वर्तमानकालेऽपि स्पर्द्धाऽसूयादिव्याप्तत्वाद् दुःखस्यैव योनयः कारणभूताः तथादिमन्तोऽन्तवन्तश्च अतो विवेकी तेषु न रमते ॥ २२ ॥

नवलभाष्य।

और हे अर्जुन इसकारणसेभी इन्द्रियों विषयों से निवृत्त करना चाहियें जिससे विषय और इन्द्रियों के संयोग से उत्पन्नहुये जे भोगते केवल दुःखही के उत्पत्तिके कारण हैं अर्थात् दुःखके बीज हैं क्योंकि जिसते अविद्या करके आवृत होरहे हैं अर्थात् ढकरहे हैं देखनेमें तो जे भोगसुखरूप मालूम पड़ते हैं और भीतर से दुःखरूपही होरहे हैं जैसे विषवृक्षकी लता देखनेमें तो बड़ी कोमल सुकुमार प्रतीत होती है और सूंघतेही प्राणहर लेती है तैसेई इन्द्रियों के सुखभी हैं और लोकमें देखनेमेंभी आतेहैं कि विषयी पुरुषोंकी आध्यात्मिकादि तीनों दुःखोंसे निवृत्ति नहींहोती कभीदैव योगसे किसी दुःखकी निवृत्तिभी हुई परन्तु इनमें कोईनकोई बनाही रहता है आत्यन्तिक दुःख निवृत्ति किसीकी नहींदेख पड़ती तब जो देखनेमें सुखकेकरनेवाले नानाप्रकार के विषय भोगवान् बड़ेबड़े धनिक राजाओं कोभी दुःख दिखाई पड़ता है इससे विदितहुआ किजे भोगही दुःखके निमित्त हैं और प्रत्यक्ष में देखने में आताहै कि जैसे कोई रोगीपुरुष जिह्वा के स्वादसे कुपथ्यवस्तु भोजनकरै तो उससमयमें तो क्षणमात्र सुखप्रतीत होता है परन्तु उसके परिपाकदशा में बड़ादुःख होताहै तैसेही जबसंसार रूप रोगसेग्रस्त यह पुरुष होरहा है तब विषय भोगरूप कुपथ्य कैसे नहीं दुःखदायी होवैंगी इसीदृष्टान्तसे परलोकके स्वर्गादि भोगभी दुःखहीके कारणभूत हैं और यहां (दुःखयोनयएवते) इसवाक्यमें एव इसपदके कहनेसे भगवान् ने यह सूचनकिया कि संसारमें सुखका लेशभी नहीं है ऐसा जानके विषयरूपी मृगतृष्णा से इन्द्रियोंको निवृत्तकरै और केवल दुःखही के कारण भूत जे विषय भोग नहीं है किन्तु आदि और अन्त इनकरके युक्तभी हैं तिसमें विषय और इन्द्रिय इनका संयोगही भोगोंको यादि है और विषयेन्द्रिय संयोगका वियोगही भोगोंका अन्त है और जिससे आद्यन्तयुक्त हैं इसीसे अनित्य हैं अर्थात् जे भोग पहिलेभी न थे और अन्त में भी नहींरहेंगे केवल मध्यक्षण में प्रतीत होतेहैं इससे मिथ्या हैं इससे हे कौन्तेय हे कुन्तीकेपुत्र अर्जुन जिसने परमार्थ तत्त्वजाना है ऐसा जो विवेकी पुरुष सो इन अनित्य भोगोंमें नहींरमण करता है अर्थात् जैसे पशुओं को विषयों में प्रीतिहै तैसे अत्यन्त मूढ़ पुरुषोंकोही विषय भोगोंमें प्रीति दिखाई पड़ती है विवेकी जे पण्डित तिनकी प्रीतिनहींहोती है ॥ २२ ॥

नवलभाष्य।

और हे अर्जुन ब्रह्ममेंस्थित जो पुरुष सो बाह्यनाम बाहिरके जे शब्दादि विषय तिन्हों में असक्त अर्थात् प्रीतिरहित है अन्तःकरण जिसका ऐसा जो पुरुष अर्थात् विषयों में प्रीति रहित आत्मामें जो सुख तिसको प्राप्त होता है इससे सो विषय प्रीति रहितही पुरुष ब्रह्मसमाधि करके अर्थात् ब्रह्माकार वृत्तिकरके समाहित स्थिर है अन्तःकरण जिसका ऐसाहुआ अक्षयसुख अर्थात् नाशरहित नित्य सुखको प्राप्तहोताहै इससे जो नित्य सुखकी इच्छाकरैतौ क्षणिक थोरेकालका होनेवाला जो विषयसुख तिससे इन्द्रियों को निवृत्त करै यह अभिप्राय है ॥ २१ ॥

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।
आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः ॥ २२॥

शङ्करभाष्यम्।

इतश्च निवर्त्तयेत येहीति ये हि यस्मात् संस्पर्शजा विषयेन्द्रियसंस्पर्शेभ्यो जाता भोगा भुक्तयो दुःखयोनय एव तेऽविद्याकृतत्वात् दृश्यन्ते ह्याध्यात्मिकादीनि दुःखानि तन्निमित्तान्यैव यथेह लोके तथा परलोकेऽपीति गम्यते एव शब्दान्न संसारे सुखस्य गन्धमात्रमप्यस्तीति बुद्ध्वा विषयमृगतृष्णिकायां इन्द्रियाणि निवर्त्तयेन्न केवलं दुःखयोनय आद्यन्तवन्तश्च आदिर्विषयेन्द्रियतत्संयोगो भोगानामन्तश्च तद्वियोग एवात आद्यन्तवन्तोऽनित्या मध्यक्षणभावित्वादित्यर्थः कौन्तेय न तेषु रमते बुधो भोगेषु विवेकी अवगतपरमार्थतत्त्वेऽत्यन्तमूढानामेव हि विषयेषु रतिर्दृश्यते यथा पशुप्रभृतीनां ॥ २२ ॥

आनंदगिरिकृतटीका।

तत्रैव हेत्वन्तरपरत्वेनोत्तरश्लोकमुदाहरति इतश्चेति विषयेभ्यः सकाशादिन्द्रियाणीति शेषः वैराग्यार्थमेव वैषयिकानि सुखानि दूषयति ये हीति ननु विषयेन्द्रियसंयोगसम्भूतेषु भोगेषु जन्तूनामभिरुचिदर्शनात् कुतस्तेषां दुःखयोनित्वमित्याशङ्क्याविवेकिनां तत्त्वासंगेऽपि न विवेकिनामित्याह आद्यन्तवन्त इति यस्मादाधिव्याधिजरामरणादिमद्भ्यः समागमनादिक्लेशरूपभागिभ्यश्च विषयेन्द्रियसम्बन्धेभ्यो भोगाः सुखानुभवा जायन्ते तस्मात्ते दुःखहेतवो भवन्तीति योजना अविद्याकार्यत्वाद्दुःखानां कुतो भोगजन्यत्वमित्याशङ्क्य भोगानामविद्याप्रयुक्तत्वात्तन्निबन्धनत्वं दुःखानां युक्तमित्यभिप्रेत्याह अविद्येति भोगानां दुःखयोनित्वे मानमनुभवमुपन्यस्यति दृश्यन्त इति ऐहिकानां भोगानां दुःखनिमित्तत्वेऽपि नामुष्मिकाणां तथात्वमनुभवादिमानाभावादिति [illegible] सामर्थ्यसिद्धमर्थमाह यथेति पूर्वार्द्धस्याक्षरार्थमुक्त्वा तात्पर्यार्थमाह नेत्यादिना [illegible] विषयेभ्यः सकाशादिन्द्रियाणि निवर्तयितव्यानीत्याह न केवलमिति [illegible] व्यवधानेन क्षणभंगुरत्वाद्दुःखयोनय भोगानां सिध्यति अपि हि तेषां [illegible] [illegible] [illegible] मन्यानः सत्याह [illegible] इति [illegible] [illegible] विवेकिनां भोगैरैहिकैरामुष्मिकैश्च तेषामाभासत्वं प्रतिभातीत्याह न तेष्विति [illegible] [illegible] पुनर्व्याख्यानमिति न पुनरुक्तिः ननु केषांचिद्भोगेष्वपि [illegible] [illegible] तत्राह अत्यन्तेति ॥ २२ ॥

नवलभाष्य।

और जो अगाड़ीके श्लोकमें कहाजायगा सो दोष यहमोक्षमार्ग काशत्रु इसीसे बड़ा कष्टरूप दोषहै उसको निवारण करना चाहिये और इसके दूरकरने में अधिक यत्नकरना चाहिये इसआशयसे भगवान् कहते हैं कि (शक्नोतीति) हे अर्जुन जो पुरुष शरीर के छूटनेके पूर्वकालमें अर्थात् मरण से पाहिले नाम मरण पर्य्यन्त काम और क्रोध इनसे उत्पन्नहुआ जो चित्त का वेग तिसके सहने को समर्थ है अर्थात् उत्साह करता है सोईतौ योगी और वही पुरुष संसार में सुखी है अर्थात् जो जीवतेही काम क्रोधके वेग को सहने को समर्थ न हुआ वह योगीभी नहीं है और सुखीभी नहींहोस-का और यहां मरण पर्य्यन्त जो मर्य्यादा भगवान्ने कही अर्थात् जबतक मरणहोय तिसके पहलेइससे यह सूचनकिया कि जबतक मनुष्य जीवताहै तबतक काम क्रोध का वेग अवश्य होता है क्योंकि इसके होनमें बहुतसे निमित्त हैं इससे जबतक जीवै तबतक यह विश्वास करनेयोग्य नहींहै अ-र्थात् यह न जाने कि एकबार तौ हमने काम और क्रोधको जीतही लियाहै अब क्या करैगा किन्तु सबसे अधिक शत्रुजानके इस काम क्रोधके वेगको सहनेमें नित्य उद्योगयुक्तहै तहां काम उसको कहते हैं कि जो अपना को इष्ट प्रत्यक्ष इन्द्रियोंका विषय शब्दादिकों में कोईप्राप्तहोय अथवा सुननेमें आवै कि फलाने यह पदार्त्थ खाने पीनेमें बहुत अच्छाहोताहै औ उसकी स्त्री बड़ीसुन्दरीहै अथवा पहिले आपही जो पदार्त्थ भोगाहै और उसमें सुखभी हुआहोय फिर उसका स्मरणहोय इसप्रकार इनतीनों प्रकार के इष्ट विषयों में भोगनेकी बड़ी उत्कट जो इच्छा जिसको तृष्णा कहते हैं वह काम कहाताहै और इसतिरह तीनप्रकारके जे अपनाको जे प्रतिकूल विषय अर्थात् जिन्होंमें दुःखकी प्रतीति हुईहोय अथवा होतीहोय अथवा दुःखकी जिन्होंमें सम्भावना होय ऐसे प्रतिकूल विषयोंमें जो द्वेष अर्थात् यह हमारे नेत्रोंके सामनेसे जुदाहोजाय और दुःखदायी वस्तुकी प्राप्ति किसवास्ते हुई इसको आदि लेके जो प्रतिकूल अन्तःकरणकी वृत्ति उस को क्रोध कहते हैं ऐसे जे काम और क्रोध तेहैं उत्पत्ति कारण जिसके ऐसा जो मनकावेग उसको कामक्रोधोद्भव वेगकहते हैं तहां रोमावलीका खड़ा होना और नेत्रोंकी प्रसन्नता होना अर्थात् प्रीतिसे देखना और मुखकी प्रसन्नता होना इनको आदिलेके चिह्नोंसे जो अन्तःकरण का क्षोभहोना अर्थात् आत्मस्वरूपसे अलगहोके बाह्यविषयकी चाहहोना इसको कामो-द्भववेग कहते हैं और शरीरका कांपना और पसीने का आना और ओठ का दांतोंसे काटना और लालनेत्र होना इनको आदिलेके चिह्नहोते हैं जिसमें उसको क्रोधोद्भववेग कहतेहैं ऐसे कामोद्भव और क्रोधोद्भववेग को जो धीर पुरुष सहनेका उत्साहकरताहै वही योगी है और वही इसलोकमें

शङ्करभाष्यम् ।

किञ्च लभन्त इति लभन्ते ब्रह्मनिर्व्वाणं मोक्षं ऋषयः सम्यग्दर्शिनः संन्यासिनः क्षीणकल्मषाः क्षीणपापादिदोषाः छिन्नद्वैधाः छिन्नसंशयाः यतात्मानः संयतेन्द्रियाः सर्वभूतहितेरताः सर्वेषां भूतानां हिते आनुकूल्ये रता अहिंसका इत्यर्थः ॥ २५ ॥

आनंदगिरिकृतटीका।

मुक्तिहेतोर्ध्यानस्य साधनान्तरमाह किञ्चेति यज्ञादि नित्यकर्मानुष्ठानात्पापादिलक्षणं कल्मषं क्षीयते ततश्च श्रवणाद्यावृत्तेः सम्यकदर्शनं जायते ततो मुक्तिरप्रयत्नेन भवतीत्याह लभन्त इति ज्ञानप्राप्त्युपायान्तरं दर्शयति छिन्नेति श्रवणादिना संशयनिरसनं कार्यं कारणनियमनञ्च दयालुत्वेनाहिंसकत्वमित्येतदपि सम्यक्ज्ञानप्राप्तौ कारणमित्यर्थः अक्षरव्याख्यानं स्पष्टत्वान्न व्याख्यायते ॥ २५ ॥

स्वामिकृतटीका ।

किञ्च लभन्त इति ऋषयः सम्यग्दर्शिनः क्षीणं कल्मषं येषां छिन्नं द्वैधं संशयो येषां यतः संयत आत्मा चित्तं येषां सर्वेषां भूतानां हितेरताः ये कृपालवस्ते ब्रह्मनिर्वाणं मोक्षं लभन्ते ॥ २५ ॥

नवलभाष्य ।

और हेअर्जुन क्षीणहुएहैं नाशको प्राप्तहुएहैं पापादि दोष जिन्होंके और छिन्ननाम कटिगयाहै द्वैधसंशय जिन्होंका और वशकरीहैं इन्द्रियां जिन्होंने और सबभूतोंके हितमें प्रीतियुक्त अर्थात् सबभूतोंके आनुकूल्यमें रत किसी प्राणीके हिंसानहीं करतेहुए ऐसे जे ऋषितम्यग्दर्शी पुरुष अर्थात् परमार्थ ज्ञानयुक्त पुरुष ते ब्रह्मनिर्वाण जो मोक्ष तिसको प्राप्त होतेहैं॥ २५ ॥

कामक्रोध विमुक्तानां यतीनां यतचेतसां ।
अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां ॥ २६ ॥

शङ्करभाष्यम् ।

किञ्च कामेति कामक्रोधविमुक्तानां कामश्च क्रोधश्च कामक्रोधौ ताभ्यां विमुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानां अभित उभयतो जीवतां मृतानाञ्च ब्रह्मनिर्वाणं मोक्षो वर्त्तते विदितात्मनां विदितो ज्ञात आत्मा येषां ते विदितात्मानस्तेषां विदितात्मनां सम्यग्दर्शिनामित्यर्थः ॥ २६ ॥

आनंदगिरिकृतटीका ।

एवं कामक्रोधयोर्वेगः सोढव्यो दर्शितः सम्प्रति तानेव [illegible] किंचेति ननु देहपातादूर्ध्वमुक्तानां मोक्षो न तु जीवतामिति चेन्नेत्याह अभित इति सम्यग्दर्शिनामपि तर्हि प्रभूतकामादिप्रभावविधुराणां किमिति मोक्षो न भवतीत्याशङ्क्य [illegible] विदितेति [illegible] दिना ॥ २६ ॥

स्वामिकृतटीका।

किंच कामेत्यादि कामक्रोधाभ्यां विमुक्तानां यतीनां संन्यासिनां संयतचित्तानां ज्ञातात्मतत्वानामभित उभयतो जीवतां मृतानांच न देहान्त एव तेषां ब्रह्मनिर्वाणमपितु जीवतामपि वर्त्तत इत्यर्थः ॥ २६ ॥

नवलभाष्य।

और हेअर्जुन काम औरक्रोध इनकरके रहित और वशकराहै अन्तःकरण जिन्होंने औरजानाहै आत्मा जिन्होंने ऐसे जो संन्यासी तिनको जीवतेभी मोक्षहै और मरेहुएभी मोक्षहै अर्थात् जीवतेमें जीवन्मुक्त दशाको प्राप्तहैं मरणके अनन्तर मोक्षको प्राप्तहोतेहैं ॥ २६ ॥

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥२७॥

शङ्करभाष्यम्।

सम्यग्दर्शननिष्ठानां संन्यासिनां सद्योमुक्तिरुक्ता कर्म्मयोगश्च ईश्वरार्पितसर्वभावेनेश्वरेण्याधाय क्रियमाणः सत्त्वशुद्धिज्ञानप्राप्ति सर्वकर्म संन्यासक्रमेण मोक्षायेति भगवान् पदे पदेऽवोचद्वक्ष्यति च अथ इदानीं ध्यानयोगं सम्यग्दर्शनस्यान्तरङ्गं विस्तरेण वक्ष्यामीति तस्य सूत्रस्थानीयान् श्लोकानुपदिशति स्म भगवान् वासुदेवः स्पर्शानिति स्पर्शान् शब्दादीन् कृत्वा बहिर्बाह्यान् श्रोत्रादिद्वारेणान्तर्बुद्धौ प्रवेशिताः शब्दादयो विषयास्तानचिन्तयतः शब्दादयो बाह्या बहिरेव कृता भवन्ति तानेवं बहिः कृत्वा चक्षुश्चैवान्तरे भ्रुवोः कृत्वेत्यनुषज्यते तथा प्राणापानौ नासाभ्यन्तरचारिणौ समौ कृत्वा ॥ २७ ॥

आनन्दगिरिकृतटीका।

वृत्तमनूद्योत्तरश्लोकत्रयस्य तात्पर्यार्थमाह सम्यग्दर्शनेति ईश्वरार्पितसर्वभावेनेति भगवति परस्मिन्नीश्वरे समर्पितः सर्वेषां देहेन्द्रियमनसां भावश्चेष्टाविशेषो न कर्त्तव्यबुद्धिस्तेषां व्यापारस्तेनेत्यर्थः कर्मयोगस्य तत्फलस्य चाभिधानानन्तरमित्यर्थः प्रविश्यतो बाह्यानां विषयाणां कुतो बहिष्करणमित्याशंक्याह श्रोत्रादीति तेषां बहिष्करणे कीदृगित्याशंक्याह तानिति ॥ २७ ॥

स्वामिकृतटीका।

स योगी ब्रह्मनिर्वाणमित्यादिषु योगी मोक्षमवाप्नोतीत्युक्तं तमेव योगं संक्षेपेणाह स्पर्शानिति द्वाभ्यां बाह्या एव स्पर्शा रूपरसादयो विषयाश्चिन्तिताः सन्तोऽन्तः प्रविशन्ति तांस्तच्चिन्तात्यागेन बहिरेव कृत्वा चक्षुश्चान्तरे भ्रुवोर्भ्रूमध्य एव कृत्वा अत्यन्तं नेत्रयोर्निमीलने हि निद्रया मनो लीयते उन्मीलने च बहिः प्रसरति तदुभयदोषपरिहारार्थमर्द्धनिमीलनेन भ्रूमध्ये दृष्टिं निधायेत्यर्थः उच्छ्वासनिःश्वासरूपेण नासिकयोरभ्यन्तरे चरन्तौ प्राणापानावूर्ध्वाधोगतिनिरोधेन समौ कृत्वा कुम्भकं कृत्वेत्यर्थः यद्वा [illegible] यथा न [illegible] तदा वा [illegible] [illegible] [illegible] समौ कुर्यात् ॥ २७ ॥

नवलभाष्य।

अब जेसम्यग्दर्शन अर्थात् विवेककरके इन्द्रियादिकों से परेजो आत्मा का दर्शननाम ज्ञानतिसमें स्थित जे संन्यासी तिनकी शीघ्रही मुक्तिकही और परमात्मा जो भगवान् ईश्वर तिसमें समर्पितकी जो सबइन्द्रियोंकी चेष्टा अर्थात् सिवाय ईश्वरके बाहर फलादिककेलिए इन्द्रियोंकी चेष्टाका न होना ऐसीरीतिसे कियागया जो कर्मयोग सो प्रथमतो अन्तःकरण की शुद्धि फिरज्ञान फिर सबकर्मोंका त्याग इसक्रमकरके मोक्षके अर्थ होताहै इससिद्धान्त को भगवान् बहुत जगहकहिआए हैं और आगेभी कहेंगे अब इसके उपरांत सम्यग्दर्शनका अन्तरंग साधन ध्यानयोगको विस्तार पूर्वक कहेंगे इससे उसयोगके सूत्रके तुल्यश्लोकोंका उपदेश करतेहैं भगवान् (स्पर्शानिति) हेअर्जुन बाहिरके जेशब्दादि विषयते श्रोत्रादि इन्द्रियोंके द्वारा बुद्धिमें प्रवेश कराएगएहैं अर्थात् जब कोई मनुष्य श्रोत्रादि इन्द्रियोंकरके शब्दादि विषयोंका सेवनकरता है तबरागादि वशसे जबबुद्धिका संयोगउन शब्दादि विषयोंमें होताहै तबवे शब्दादि विषय बुद्धि में प्रविष्टहोजाते हैं और जो किसी सत्संगादि कारणसे उनविषयोंमें दोषदृष्टिके निश्चयसेउन का चिन्तन नकरे तो वेबुद्धिसे निकलजाते हैं जैसे किसीने कोई व्यवहारादि विषयकी वार्त्तासुनी वा कोई प्रत्यक्षनेत्रादिकोंसे अतिसुन्दर तरुणीरूप का दर्शन किया अथवा अतिस्वादु वस्तुका भोजनकिया तो उससमयमें विषय इन्द्रियोंके संयोगमें जो मन उनविषयों में लगजाताहै तो वेबाहरके विषयमन और बुद्धिमें प्रवेशकरजाते हैं इसीसे उनविषयों का यहपुरुषरातिदिवस स्मरण करता है फिर जबपुण्य वशसे सत्संगहोनेसे विवेकज्ञान होताहै तो उन विषयों को अत्यन्त झूंठाजान स्मरणनहीं करता अर्थात् यादि नहीं करताहै तो वे विषय आपहीमनसे बाहर निकलजाते हैं तो विषयोंके बाहर निकालनेका यहीयत्न है जो इनका स्मरण न करना इस से हेअर्जुन इसीयत्नसे जो योगी विषयोंको अपनेमनसे बाहरकरके और नेत्रको भौंहोंके बीचमें करके अर्थात् भौंहोंके मध्यमें नेत्रकी दृष्टिकोकरके और तैसेही नासिकाके भीतर चलनेवाले जो प्राणवायु और अपानवायु इनको समानकरके अर्थात् नासिकासे बाहर निकलने वाला जो प्राणवायु तिसको बाहर न निकलनेदेय और नासिकाके द्वाराभीतर जानेवाला जो अपान पवन तिसकोभी रोकके प्राणवायुमें मिलाकर दोनोंकी गतिरोक के समानकरे अर्थात् इनदोनों पवनोंको योगी वशकरके अपने आधीन रक्खे॥ २७॥

यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छा भयक्रोधो यः सदा मुक्त एव सः॥ २८॥

शङ्करभाष्यम्।

यतेन्द्रिय इति यतेन्द्रियमनोबुद्धिः संयतानि इन्द्रियाणि मनो बुद्धिश्च यस्य सः संयतेन्द्रियमनोबुद्धिर्मननात् मुनिः संन्यासी मोक्षपरायणः एवं देहसंस्थानो मोक्षपरायणो मोक्ष एव परमायनं परा गतिर्यस्य सोऽयं मोक्षपरायणो मुनिर्भवेत् विगतेच्छाभयक्रोधः इच्छा च भयञ्च क्रोधश्च इच्छाभयक्रोधास्ते विगता यस्मात् स विगतेच्छाभयक्रोधः य एवं वर्त्तते सदा संन्यासी मुक्त एव सन् तस्य मोक्षोऽन्यः कर्त्तव्यो नास्ति ॥ २८ ॥

आनन्दगिरिकृतटीका।

विषयप्रावण्यं परित्यज्य चक्षुरपि भ्रुवोर्मध्ये विक्षेपपरिहारार्थं कृत्वा प्राणापानौ नासाभ्यन्तरचरणशीलौ समौ न्यूनाधिकवर्जितौ कुम्भकेन निरुद्धौ कृत्वा करणानि सर्वाण्येवं संयम्य प्राणायामपरो भूत्वा किं कुर्यादित्यपेक्षायामाह यतेन्द्रियेति इन्द्रियादि संयमं कृत्वा मोक्षमेवापेक्षमाणो मननशीलः स्यादित्यर्थः ज्ञानातिशयनिष्ठस्य सर्वदेच्छादिशून्यस्य संन्यासिनो मुक्तेरनायाससिद्धत्वान्न तस्य किंचिदपि कर्त्तव्यमस्तीत्याह विगतेति पूर्वार्द्धाक्षराणि व्याकरोति यतेत्यादिना द्वितीयार्द्धस्थानि व्याचष्टे विगतेत्यादिना ॥

स्वामिकृतटीका।

यत इति अनेनोपायेन यताः संयता इन्द्रिय मनो बुद्धयो यस्य मोक्ष एव परमयं प्राप्यं यस्य अतएव विगता इच्छाभयक्रोधा यस्य एवंभूतो यो मुनिः स सदा जीवन्मुक्त एवेत्यर्थः ॥ २८ ॥

नवलभाष्य।

फिर इनदोनोंके वशहोने में और पवन औरमन इन्द्रिय जे सवआपही वशहोजाते हैं क्योंकि प्राणके आधीन सवइन्द्रियां हैं यह अत्यन्त प्रसिद्ध है और इसीसे वशकरीहैं सवइन्द्रियां औरमन और बुद्धि जिसने और मुनिहोय अर्थात् मनन करनेकाहै स्वभाव जिसका नाम अहर्निश ब्रह्म तत्त्व विचारमें तत्पर और मोक्षही परम अयनगति जिसकी और दूरहुई है किसी पदार्थकी इच्छा औरभय और क्रोध जिससे ऐसा जो संन्यासी सो सदामुक्तही है ॥ २८ ॥

भोक्तारं यज्ञतपसां सर्वलोक महेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ २९ ॥

इतिश्रीभगवद्गीतायांयोगशास्त्रेश्रीकृष्णार्जुनसम्वादे
संन्यासयोगोनामपंचमोऽध्यायः ॥ ५ ॥

शङ्करभाष्यम्।

एवं समाहितचित्तेन किं विज्ञेयमिति चोच्यते भोक्तारमिति भोक्तारं यज्ञानां तपसाञ्च कर्तृरूपेण देवतारूपेण च यस्तं सर्वलोकमहेश्वरं सर्वेषांलोकानां महान्तं ईश्वरं सर्वलोकमहेश्वरं

सर्वभूतानां सर्वप्राणिनामत्युपकारनिरपेक्षतयोपकारिणं सर्वभूतानां हृदयेशयं सर्वकर्म्मफला सर्वप्रत्ययसाक्षिणं मां नारायणं ज्ञात्वा शान्तिं सर्वसंसारोपरतिमृच्छतिप्राप्नोति ॥ २९ ॥

इति श्रीमद्भगवद्गीताभाष्ये पञ्चमोऽध्यायः ॥ ५ ॥

आनन्दगिरिकृतटीका।

अधिकारिणो यथोक्तस्य कर्तव्याभावे ज्ञातव्यमपि नास्तीत्याशंक्य परिहरति एवमि दिना प्रसिद्धं भोक्तारं व्यवच्छिनत्ति सर्वलोकेति ततो ह्यस्य बन्धविपर्ययाविति न्या सर्वफलदातृत्वं दर्शयति सुहृदमिति उक्तेश्वरज्ञाने फलं कथयति ज्ञात्वेति यज्ञेषु सुच द्विधा भोक्तृत्वं व्यनक्ति कर्तृरूपेणेति हिरण्यगर्भादिव्यवच्छेदार्थं विशिनष्टि म तमिति स्वपरिकरोपकारिणं राजानं व्यावर्त्तयति प्रत्युपकारेति ईश्वरस्य ताटस्थ्यं स्यति सर्वभूतानामिति तर्हि तत्र तत्र व्यवस्थितकर्म तत्फलसंसर्गित्वं स्यादित्या याह सर्वकर्मेति नच तस्य बुद्धितद्वृत्तिसम्बन्धोऽपि वस्तुतोऽस्तीत्याह सर्वप्रत्ययेति तेक्तेश्वरपरिज्ञानफलमभिदधाति मां नारायणमिति तदेवं कर्मयोगस्यामुख्यसंन्यासा या प्रशस्तत्वेऽपि ततो मुख्यसंन्यासस्याधिक्यात्तद्वतो बुद्धिशुद्ध्यादियुक्तस्य कामक्रो द्भवं वेगमिहैव सोढुं शक्तस्य शमदमादिमतो योगाधिकृतस्य त्वं पदार्थाभिज्ञस्य मात्मानं प्रत्यक्त्वे न जानतो मुक्तिरिति सिद्धम् ॥ २६ ॥

इति आनन्दगिरिकृतटीकायां पंचमोऽध्यायः ॥ ५ ॥

स्वामिकृतटीका।

न्यैर्वामिन्द्रियादिसंयममात्रेण कथं मुक्तिः स्यान्न तावन्मात्रेण किन्तु ज्ञानद्वारेणेत्या भोक्तारमिति यज्ञानां तपसांचैव मम भक्तैः समर्पितानां यदृच्छया भोक्तारं पालकमि त वा सर्वेषां लोकानां महान्तमीश्वरं सर्वभूतानां सुहृदं निरपेक्ष्योपकारिणं मन्तर्यामिणं मां ज्ञात्वा मत्प्रसादेन शान्तिं मोक्षमृच्छति प्राप्नोति ॥ विकल्पशंकापोहेन येनैवं योग सांख्ययोः समुच्चयः क्रमेणोक्तः सर्वज्ञं नौमि तं गुरुं ॥ २६ ॥

इति श्रीधरस्वामिकृतटीकायां पंचमोऽध्याय: ॥ ५ ॥

नवलभाष्य।

अब कहतेहैं कि इसप्रकार समाधिस्थ चित्तजो योगी तिसको कौनज्ञान- बेयोग्य है इसआकांक्षामें कहतेहैं. कि [भोक्तारमिति] हेअर्जुन कर्त्तारूप करके और देवतारूप करके जो यज्ञ औरतप इनके भोगनेवाला है और सबलोकों का जो बड़ाभारी ईश्वरहै अर्थात् जिसके ऊपर कोई दूसरानहीं है और जो सबप्राणियोंका सुहृदहै अर्थात् कोई मेरेसंग इसके बदलेका

उपकारकरे ऐसी नहीं इच्छाकरके सबप्राणियों का उपकारकरते हैं यद्यपि लोकमें माता पिताभी पुत्रसे प्रत्युपकार अर्थात् बदलेका नहीं चाहतेहैं और पुत्रका भरणपोषणरूप उपकारकरते हैं इसीसे कहाते हैं तो कदाचित् माता पिता वृद्धावस्थामें अशक्तावस्था में प्रत्युपकारके भी चाहेंइच्छा किसीतरह से करतेहोयं परमेश्वर तो क्से भी अपनी भेंटपूजाकी अभिलाषा करके कुछ किसीका करताहै जिससे वह आप्तकाम हैं किन्तु अपनी सहजदयालुताही से की रक्षाकरताहै इससे सत्यसुहृद् सबका परमेश्वरही होसका है हेअर्जुन सबप्राणियोंके हृदयमें शयन करनेवाला औरसब कर्म स्वामी और सबप्राणियोंके न्यारे न्यारे निश्चय कासाक्षी ऐसा यण तिसको जानके यहपुरुष शांतिको प्राप्तहोता है अर्थात् दुःखकी निवृत्तिको प्राप्तहोता है ॥ २९ ॥

इ[illegible] ता [illegible] स्वर्गवा[illegible]
तत्त्वविवेकामृताख्येनवलभाष्येपञ्चमोध्यायःसमाप्तः॥ ५॥

श्रीमद्भगवद्गीतासटीक॥

श्रीभगवानुवाच।

अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः।
स संन्यासी च योगी च न निरग्निर्नचाक्रियः॥ १ ॥

शङ्करभाष्यम्।

अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यन्तरङ्गस्य सूत्रभूताः श्लोकाः स्पर्शा न्कृत्वा बहिरित्यादयउपदिष्टास्तेषां वृत्तिस्थानीयोऽयं षष्ठोऽध्याय आरभ्यते तत्र ध्यानयो गस्य बहिरङ्ग कर्मेति यावद्ध्यानयोगारोहणासमर्थस्तावद्गृहस्थेनाधिकृतेन कर्त्तव्यं कर्मेति अत स्तत् स्तौति अनाश्रित इति ननु किमर्थं ध्यानयोगारोहणसीमाकरणं यावतानुष्ठेयमेव विहितं कर्म यावज्जीवं नारुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति विशेषादारूढस्य च शमेनैव सम्बंध करणादारुरुक्षोरारूढस्य च शमः कर्म चोभयं कर्त्तव्यत्वेनाभिप्रेतञ्चेत् स्यात्तदारुरुक्षोरारूढस्ये ति शमकर्मविषयभेदेन विशेषणं विभागकरणञ्चानर्थकं स्यात् तत्राश्रमिणां कश्चित् योगमारु रुक्षुर्भवत्यारूढश्च कश्चिदन्येऽनारुरुक्षवो नचारूढास्तानपेक्ष्या रुरुक्षोरारूढस्यचेति विशेषणवि भागकरणञ्चोपपद्यत एवेति चेन्न तस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारूढस्येति य आसीत् पूर्वयोगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्त्तव्यं कारणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्त्तव्यत्वप्राप्तिः कस्यचिदपि ... ...प्रवचनाच्च गृहस्थस्य चेत् कर्मिणो योगोविहितः षष्ठे ऽध्याये स योगविभ्रष्टोपि ... ...प्नोतीति तस्य नाशांकानुपपन्ना स्यादवश्यंहि कृतं कर्म्मकाम्यं नित्यंवा ... ...य कर्म्मणो वेद

...र्थक्यप्रसंगादिति नच कर्म्मणि

...कर्म्मकृतमीश्वरे संन्यस्येत्यतः

कर्त्तरि ... ...न्तरफलहेतुत्वोपपत्तेर्म्मोक्षायैवेतिचेत् स

...य योगसहितः योगाच्च विभ्रष्ट इत्यतस्तं

...ब्रह्मचारिव्रते स्थित इति

भाते ... ...ने नच गृहस्थस्य

...। कर्मिण एव

...योगित्वञ्चेति चेन्न

...त्वान्न केवलं निरग्निरपि

कर्म्मयोगमनुतिष्ठन् सत्त्वशु-

द्यर्थ संन्यासी योगी च भवतीति स्तूयते नानेकेन वाक्येन कर्मफलासंगसंन्यासस्तुतिरचतुर्थाश्रमप्रतिषेधकोपपद्यते नन प्रसिद्धनिरग्नेरक्रियस्य परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रेषु विहितं संन्यासित्वं योगित्वञ्च प्रतिषेधति भगवान् स्ववचनविरोधाच्च सर्वकर्माणि मनसा संन्यस्य नैव कुर्वन्नकारयन्नास्ते मौनी सन्तुष्टो येनकेनचिदनिकेतनः स्थिरमतिर्विहाय कामान् यः सर्व्वान् पुमांश्चरति निस्पृहः सर्व्वारम्भपरित्यागीति च तत्र तत्र भगवता स्ववचनानि दर्शितानि तैर्विरुध्येत चतुर्थ्याश्रमविप्रतिषेधस्तस्मात् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादिकर्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वबुद्धिशुद्धिद्वारेण प्रतिपद्यत इति स संन्यासी च योगी चेति स्तूयते अनाश्रित इति अनाश्रित न आश्रितोऽनाश्रितः किं कर्मणः फलं यत्तदनाश्रितः कर्म्मफलः तृष्णा रहित इत्यर्थः यो हि कर्म्मफले तृष्णावान् स कर्मफलमाश्रितो भवति अयन्तु तद्विपरीतोऽनाश्रितः कर्मफलं एवम्भूतः सन् कार्यं कर्त्तव्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति यः कश्चित् य ईदृशः कर्म्मी स कर्म्यन्तरेभ्यो विशिष्यत इत्येवमर्थमाह स संन्यासी च योगी चेति संन्यासः परित्यागः स यस्यास्ति स संन्यासी च योगी च योगश्चित्तसमाधानं स यस्यास्ति स योगी चेत्येवं गुणसम्पन्नोऽयं मन्तव्यो न केवलं निरग्निर्निरक्रिय एव संन्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्माङ्गभूता यस्मात् स निरग्निरक्रियश्च अनग्निसाधनाप्यविद्यमाना क्रियास्तपोदानादिका यस्यासावक्रियः ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं योगित्वञ्च प्रसिद्धं कथमिह साग्नेः सक्रियस्य संन्यासित्वं योगित्वञ्चाप्रसिद्धमुच्यते इति नैष दोषः कयाचिद् गुणवृत्त्योभयस्य सम्पिपादयिषितत्वात्तत् कथं कर्मफलसंकल्पसंन्यासात् संन्यासित्वं योगाङ्गत्वेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वञ्चेति ॥ १ ॥

आनंदगिरिकृतटीका ।

ध्यानयोगप्रस्तावानन्तरं तद्योग्यताहेतुकर्मणःस्तुतिं भगवानुक्तवानित्याह श्रीभगवानिति पूर्वोत्तराध्याययोः संगतिमभिदधानो वृत्तमनूद्याध्यायान्तरमवतारयति अतीतेति सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसंगाभावं व्युदस्यति सम्यगिति संग्रहविवरणयोरतीतानन्तराध्याययोर्युक्तं हेतुहेतुमत्त्वमिति भावः अध्यायसम्बन्धमभिधायानाश्रितः कर्मफलमित्यादिश्लोकद्वयस्य तात्पर्यमाह तत्रेति कर्मयोगस्य संन्यासहेतोर्मर्य्यादां दर्शयितुं सांगञ्च योगं विचारयितुमध्याये प्रवृत्ते सतीति सप्तम्यर्थः संन्यासिना कर्तव्यं कर्मास्त्येवं प्रतिभासं व्युदस्यति गृहस्थेनेति कर्त्तव्यत्वं स्तुतियोग्यत्वमतः शब्दार्थः समुच्चयवादो सीमाकरणमाक्षिपति नन्विति यावज्जीवश्रुतिवशात् ध्यानारोहणसामर्थ्ये सत्यपि कर्मानुष्ठानस्य दुर्वारत्वादिति हेतुमाह यावतेति भार्यावियोगादिप्रतिबन्धाद्यावज्जीवश्रुतिचोदितकर्मानुष्ठानवत् वैराग्यप्रबन्धादपि तदननुष्ठानसम्भवाद्भगवतो विशेषवचनाच्च न यावज्जीवं कर्मानुष्ठानप्रसक्तिरिति परिहरति नारुरुक्षोरिति उक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति आरुरुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुरत्रारोहणेच्छाविशेषणमारोहणं कृतवानित्यत्र पुनरिच्छाविषयभूतमारोहणं विशेषणमेवं शमकर्म विषययोर्भेदेन विशेषणं मर्य्यादाकरणानंगीकरणे विरुद्धमापद्येत तयोरेवं विभागकरणञ्च भगवतस्तौमानंगीकारेण युज्येतेत्यर्थः विशेषणविभागकरणयोरन्यथोपपत्तिमाशंकते तत्रेति व्यवहारभूमिः सप्तम्यर्थः षष्ठी निर्द्धारणे भवत्वधिकारिणां त्रैविध्यं तथापि प्रकृते विशेषणादौ किमायातमित्याशङ्क्य तृतीयापेक्षया तदुपपत्तिरित्याह तानपेक्षेति आरुरुक्षोरारूढस्य च भेदे तस्यैवेति प्रकृतपरामर्शानुपपत्तिरिति दूषयति न तस्येति यद्यनारुरुक्षुं पुरुषमपेक्ष्याऽऽरुरुक्षोरिति विशेषणं तस्य च कर्मारोहणकारणमनारूढञ्च पुरुषमपेक्ष्यारूढस्येति

विशेषणं तस्य च शमः संन्यासो योगफलप्राप्तौ कारणमिति विशेषणविभागकरणयोरुप पत्तिस्तदारुरुक्षोरारूढस्य च भिन्नत्वात् प्रकृतपरामर्शिनः तच्छब्दस्यानुपपत्तेर्न युक्तमित्यं विशेषणाद्युपपादनमित्यर्थः किंच योगमारुरुक्षोस्तदारोहणे कारणं कर्मेत्युक्त्वा पुनर्योगारूढस्येति योगशब्दप्रयोगात् यो योगं पूर्वमारुरुक्षुरासीत्तस्यैवापेक्षितं योगमारूढस्य तत्फलप्राप्तौ कर्मसंन्यासः शमशब्दवाच्यो हेतुत्वेन कर्तव्य इति वचनादारुरुक्षोरारूढस्य चाभिन्नत्वप्रत्यभिज्ञानान्न तयोर्भिन्नत्वं शंकितुं शक्यमित्याह पुनरिति यत्तु यावज्जीवश्रुतिविरोधात् योगारोहणसीमाकरणं कर्मणोऽनुचितमिति तत्राह उच्यत इति पूर्वोक्तरीत्या कर्मतत्त्यागयोर्विभागोपपत्तौ श्रुतेरन्यविषयत्वात् योगमारूढस्य मुमुक्षोर्जिज्ञासमानस्य नित्यनैमित्तिककर्मस्वपि परित्यागसिद्धिरित्यर्थः इतश्च यावज्जीवं कर्मकर्तव्यत्वं न भवतीत्यर्थः ननु योगभ्रष्टशब्देन गृहस्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्यत्वे सत्यपि यावज्जीवं कर्म कर्तव्यमिति नेत्याह गृहस्थस्येति तेनापि मुमुक्षुणा कृतस्य कर्म्मणो मोक्षातिरिक्तफलानारम्भकत्वाद्योगभ्रष्टोऽसौ छिन्नाऽभ्रमिव नश्यतीति शंका सावकाशेत्याशंक्याह अवश्यं हीति अपौरुषेयाविदृष्टापाद्वेदात् फलदायिनो कर्म्मणः स्वाभाविकी शक्तिरवरा ब्रह्मभावस्य च स्वतः सिद्धत्वान्न कर्म्मफलत्वमिति मोक्षातिरिक्तस्यैव फलस्य कर्म्मारम्भकमिति कर्म्मिणि योगभ्रष्टेऽपि कर्म्मगतिं गच्छतीति निरवकाशाशंकेत्यर्थः ननु मुमुक्षुणा काम्यप्रतिषिद्धयोगकरणात् कृतयोश्च नित्यनैमित्तिकयोरफलत्वात् कथं तदीयस्य कर्म्मणो नियमेन फलारम्भकत्वं तत्राह नित्यस्यचेति चकारेण नैमित्तिकं कर्मानुकृष्यते वेदप्रमाणकत्वेऽपि नित्यनैमित्तकयोरफलत्वे दोषमाह चान्यथेति कर्मण्यनुष्ठितस्य फलारम्भकत्वध्रौव्यात् गृहस्थो योगभ्रष्टोऽपि कर्मगतिं गच्छतीति न तस्य नाशाऽशंकेति शेष इतोऽपि गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीत्याह नचेति ज्ञानं कर्म चेत्युभयं ततो भ्रष्टोऽयं नश्यतीति वचनं गृहस्थे कर्मणि सति नार्थवद्भवितुमलं तस्य कर्मनिष्ठस्य कर्मणो विभ्रंशे हेत्वभावात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्य कर्मणो मुमुक्षुणा भगवति समर्पणात् कर्तरि फलानारम्भकत्वादस्ति विभ्रंशकारणमिति शंकते कर्मेति राजाराधनबुद्ध्या धनधान्यादिसमर्पणस्याधिकफलहेतुत्वोपलम्भादीश्वरे समर्पणं न भ्रंशकारणमिति दूषयति नेत्यादिना अधिकफलहेतुत्वेऽपि मोक्षहेतुत्वमिष्यतामिति शंकते मोक्षायेति तदेव चोद्यं विवृणोति स्वकर्मणामिति सहकारिसामर्थ्यात्तस्य फलान्तरं प्रत्युपायत्वासिद्धिरिति हेतुं सूचयति योगेति ध्यानसहितस्य संन्यासस्य मोक्षोपयिकत्वे कुतो योगभ्रष्टमधिकृत्य नाशाऽशंकेत्याशंक्याह योगाच्चेतिसहकार्यभावे सामग्र्याभावात्फलानुपपत्तेर्युक्ता नाशाशंकेत्यर्थः ध्यानसहितमीश्वरे कर्मसमर्पणं मोक्षायेत्यत्र प्रमाणाभावात् गृहस्थोयोगभ्रष्टशब्दवाच्योनभवतीति दूषयति नेति गृहस्थस्य योगभ्रष्टशब्दवाच्यत्वाभावे हेत्वन्तरमाह एकाकीति न खल्वेतानि विशेषणानि गृहस्थसमवायीनि सम्भवन्ति तेन तस्य ध्यानयोगविध्यभावात् न तत्प्रतियोगभ्रष्टशब्दवचनमुचितमित्यर्थः एकाकित्ववचनं गृहस्थस्यापि ध्यानकाले स्वो गृहायत्वाभावाभिप्रायेण भविष्यतीत्याशङ्क्य अपरिग्रहोचादिवद्ध्यानस्य प-[illegible]नाध्यन्वाभावात् [illegible]निषेधप्रसंगान्मैवमित्याह नचाचेति विशेषणान्तरपर्यालोचनयापि [illegible]ो भवितुमर्हतीत्याह नचेति किंचगृहस्थस्यैवैकाकित्वादि[illegible] [illegible]प्रत्युभयभ्रष्टत्वो नोपपद्यत इत्याहभवेति नहिगृहस्थं प्रति [illegible]

स्मात् [illegible] स्व [illegible] च [illegible] तत्प्रधानात् [illegible] कर्मण-

स्तदभावादनुष्ठितकर्म्मवशात् फलप्रतिबन्धादिती यथोक्तप्रश्नालोचनया न गृहस्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः ननु भगवता संन्यासस्य प्रतिपिद्धत्वात् गृहस्थस्यैव योग विधानात्तस्यैव योगप्रष्टशब्दवाच्यत्वमिति शंकते अनाश्रित इत्यनेनेति भगवद्वाक्यं न प्रतिषेधपरमिति परिहरति न ध्यानेति स्तुतिपरत्वमेव स्फोरयति न केवलमिति सतत्त्वबुद्धयत्वमनुतिष्ठन्निति सम्बन्धः वाक्यस्योभयपरत्वमाशङ्क्य वाक्यभेदप्रसंगान्मैव मित्याह न चेति इतोऽपि भगवतः संन्यासाश्रमप्रतिषेधोऽभिप्रेतो न भवतीत्याह नच प्रसिद्धमिति तस्यप्रसिद्धं संन्यासित्वं योगित्वंचेति सम्बन्धः प्रसिद्धत्वमेव व्याकरोति श्रुतीति इतोऽपि संन्यासाश्रमं भगवान्नप्रतिषेधतीत्याह स्ववचनेति विरोधमेव साधयति सर्वकर्म्माणीत्यादिना अनाश्रित इत्यादिवाक्यस्य यथा श्रुतार्थत्वमुपपत्तेः स्तुतिपरत्वमुपपादितमुपसंहरति तस्मादिति कर्मफलसंन्यासित्वमत्र मुनिशब्दार्थः स्तुतिपरं वाक्यमवतार्योक्तमर्थ मुदाहरति अनाश्रित इतिकर्मफलेऽभिलाषो नास्तीत्येतावता कथं तदनाश्रितत्ववाचो युक्तिरित्याशङ्क्य व्यतिरेकमुखेन विशदयति यो हीति कार्यमित्यादि व्याकरोति स्वयमुतः सन्निति कथं कर्मिणः संन्यासित्वं योगित्वंच कर्मित्वविरोधादित्याशंक्याह य ईदृश इति स्तुतेरत्र विवक्षितत्वान्नानुपपत्तिश्चोदनीयेति मन्वानः सन्नाह इत्येवमिति न निरग्निरित्यादेरर्थमाह न केवलमिति अग्नयो गार्हपत्याऽऽहवनीयाऽन्वाहार्यपचनप्रभृतयः तन्त्रग्नित्वे सिद्धमक्रियत्वमग्नि साध्यत्वात् क्रियाणां तथाच न निरग्नि रित्येतावतैवापेक्षितसिद्धे नचाक्रिय इत्यनर्थकमर्थपुनरुक्तेरितितत्राह अनग्नीति उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्त्यामाशंकां दर्शयति ननु चेति प्रसिद्धं परित्याज्याप्रसिद्धिरुपादीयमाना प्रसिद्धि विरुद्धेति चोद्यं दूषयति नैष दोष इति उभयस्यसाग्नौसक्रिये च संन्यासित्वस्य योगित्वस्य चेत्यर्थः गुणवृत्त्योभयसम्पादनं प्रश्नपूर्वकं प्रकटयति तत् कथमित्यादिना ॥ १ ॥

स्वामिकृतटीका।

चित्ते शुद्धेऽपि न ध्यानं विना संन्यासमात्रतः मुक्तिः स्यादिति षष्ठेऽस्मिन् ध्यानयोगो वितन्यते पूर्वाध्यायान्ते संक्षेपेणोक्तं योगं प्रपंचयितुं षष्ठाध्यायारम्भस्तत्र तावत् सर्वकर्माणि मनसा संन्यस्येत्यारभ्य संन्यासपूर्विकाया ज्ञाननिष्ठायास्तात्पर्येणाभिधानाद् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसंगं प्राप्तं वारयितुं संन्यासादपि श्रेष्ठत्वेन कर्म्मयोगं स्तौति अनाश्रित इति द्वाभ्यां कर्मफलमनाश्रितोऽनपेक्षमाणः सन्नवश्यंकार्यतया विहितं कर्मयः करोति स एव संन्यासी योगी च नतु निरग्निरग्निसाध्यश्रौत कर्मत्यागी नचाक्रियोऽग्निसाध्यपूर्ताख्यकर्मत्यागी च ॥ १ ॥

नवलभाष्य।

पीछेके अध्यायके अन्तमें सम्यग्दर्शनरूप ज्ञानका अन्तरंग जो ध्यानयोग तिसके सूत्रभूत अर्थात् संक्षेपकरके सबध्यानयोगके तात्पर्यको कहनेवाले जे (स्पर्शान्कृत्वाबहिः) इत्यादि तीनश्लोकसे उपदेशरूपकरके कहे अब उनकी वृत्तिरूप अर्थात् उन्हींश्लोकोंका व्याख्यानरूप यहछठा अध्याय आरम्भकिया जाताहै तहां ध्यानयोगका वहिरंग साधन कर्महै इस कारण से जबतक ध्यानयोग की प्राप्तिहोय तबतक अधिकारी जो गृहस्थ तिसको कर्म अवश्य करना चाहिये इसहेतुसे भगवान् कर्म योगकी स्तुति करते हैं (अनाश्रितइति) न कहो किसत्रासते ध्यानयोगकी प्राप्तिमें एकमर्यादा

रूप अर्थात् पहिली सिड्ढीकी तरह कर्मको कहतेहो क्योंकि जबतक जीवै तवतक वर्णाश्रम विहित कर्मकरनाही चाहिये ऐसा कर्मकाण्डमें जहांतहां वर्णनकियाहै इससे यहसिद्धहुआ कि समुच्चयवादी के मतमें ध्यानयोग की प्राप्तिमें भी कर्मको नहींछोड़े तिसपे कहते हैं कि ऐसी नहीं आशंका करनी उचितहै क्योंकि [आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते] जो मुनियोग की प्राप्तिहोने की इच्छाकरै उसको कर्महीं कारणहै अर्थात् कर्मही प्रथम करना चाहिये ऐसा भगवान्हीने विशेष विधानकरके निर्णय करदिया है कि जबतक ध्यानयोगकी प्राप्ति न होय तभी तक कर्म करनाचाहिये इससे और जब ध्यानयोग को प्राप्तहोजाय फिर तिसके उपरान्त ज्ञाननिष्ठाहीमें स्थितरहै ऐसाभी भगवान् ने कहाहै इससे तुम्हारी आशंका नहीं बनसक्ती जो कदाचित् कर्म और संन्यास जे दोनोंध्यानयोग की प्राप्तिहोनेकीइच्छा करनेवाले को और ध्यानयोग को प्राप्तहोगयाहै उसको भी बराबर एकहीसे करनेके योग्यहोते तो भगवान् दोनोंका न्यारे न्यारे मर्य्यादापूर्वक क्यों विधान करते अर्थात् जबतक ध्यानयोग प्राप्तहोय तभीतक कर्मकरै और बाद ध्यानयोग की प्राप्तिके सन्यासही को करै ऐसा जो भगवान् ने कहा है सो वचन अनर्थक होजायगा तब अब समुच्चयवादी सिद्धान्तीसे यह कहता है कि जबतक जीवै तबतक अग्निहोत्रकरै ऐसा वेदमेंकहाहै तिसके प्रमाणसे हम भगवान्के वचनका यह आशय कहते हैं कि जगत्में तीनतरहकेमनुष्य हैं एकतो ध्यानयोग की इच्छाकरनेवाले हैं अर्थात् यह वे इच्छाकिया करते हैं किसीतरह योगाभ्यास हमको होय तो हम परमात्मा के ध्यानसमाधिमें स्थितहो आनन्दयुक्त रहाकरैं और कोई ऐसे हैं कि ध्यानयोगमें स्थितहो-रहेहैंहैं अर्थात् जिनको पूर्णयोग प्राप्तहोगयाहै इससे अहर्निश परमात्माके ध्यानही में वे मग्नरहते हैं और एकऐसे मनुष्यहैं कि संसारहीमें फसेहुए हैं इससे वे योगके प्रभावको जानतेही नहीं हैं फिर योगाभ्यास की इच्छा कैसे करसक्ते हैं तो जे तीसरेप्रकारके मनुष्य कहे तिन्हीं के वास्ते भगवान्ने कहाहै कि वे पुरुष योगकी प्राप्तिहोने की इच्छाकरें तो पहिले उनको वर्णाश्रमविहित कर्म करनाचाहिये और जो योगको प्राप्तहोजायँ तो संन्यास धारणकरैं और जो पहिलेके दो प्रकारके कहिआये हैं वे मनुष्य तो जब तक जीवैं तबतक वेदोक्तकर्म भी करते रहैं और ज्ञानयोग को भी करैं तो ऐसी व्यवस्थामें भगवान् का वचन भी निरर्थक नहींहुआ और समुच्चय वादभी सिद्धहुआ अर्थात् ज्ञान और कर्म इनका संग संग करना भी सिद्धहुआ तो अब सिद्धान्ती समुच्चयवादी से कहताहै कि जो भगवान् का आशय ऐसाहोता तो आपका कहना ठीकरहा परन्तु भगवान् के कहेहुए श्लोकमें तो जैसा आप कहते हो वह अर्थही नहीं निकलता अर्थात् उससे विपरीत अर्थ सिद्धहोता है क्योंकि भगवानने ऐसाकहाहै कि (योगारूढस्यतस्यैवशमः कारणमुच्यते) इसका अर्थ यहहै कि जिस पुरुषने योगके प्राप्तहोने की

इच्छा की थी वहीपुरुष जब पूरा पूरा समाधिपर्य्यंत योगको प्राप्तहोजाय तौ उसको कर्म करनेका कुछ प्रयोजन नहीं किन्तु शमही अर्थात् ज्ञानही उसका कारणहै फिर वह संन्यास धारणकर ज्ञानही में स्थितरहै तौ इसमें यहबात भगवान् ने खुलीहीं हुई कही कि जिस पुरुष ने योगकी इच्छासे पहिले कर्मयोग कियाथा फिर वही पुरुष अन्तःकरण शुद्धिको प्राप्तहो जब योगको प्राप्तहुआ उसीको सन्न्यासको कहा और जो आपने कहाथा कि जे तीसरे प्रकारके संसारी पुरुषहैं तिनकेलिये यहां भगवान् ने योगके पहिले कर्मका उपदेश किया और योगके अनन्तर संन्यासको कहा सो अर्थ कहां निकला और जो औरहीका ग्रहणहोता तौ फिर तिसी पुरुषको शमकारण है ऐसा किसवास्ते कहते इससे यहां तिसीको ऐसा कहने से यह सूचितकिया कि जिसने योगकी इच्छाकरके कर्म कियाथा और वही फिर योगको प्राप्त हुआ तौ उसीको सन्न्यासका विधानहै और इसीश्लोकके पहिलेके अर्द्ध भागमें योगशब्द का ग्रहणकरिआये थे फिर यहां [योगारूढस्य] इसपदमें योगशब्द का ग्रहणकिया इससे भी यही सूचितहोताहै कि उसीका यहां ग्रहण है जिसने पहिले योगकी इच्छा की थी और यहभी विचारकरके देखना चाहिये कि जो सांसारिक विषय भोगमें लिप्तहै उसको योग की इच्छा ही कैसे सम्भवहोसक्ती है तौ फिर उसके प्रति उपदेशभी निरर्थकहोजायगा और जो कहा कि योगको प्राप्तहोगया है वहभी कर्मकरै तौ जब परमात्मा के ध्यानमें स्थितहुआ तौ उसको कर्म करनेका प्रयोजनहीं क्यारहा और उस अवस्थामें योगीको कर्म सम्भवही कैसे होताहै इससे जे तीसरेप्रकारके संसारी पुरुष कहे उन्हींके वास्ते वेदकी आज्ञाहै कि जबतक जीवै तबतक कर्मकरै और ज्ञानीको और ध्यानावस्थित योगीको तौ भगवान्का कहाकर्म त्यागही उचित है तौ फिर समुच्चयवादी का कहाहुआ ज्ञान और कर्मका संगसंग करना कैसे बनसक्ता है अब कदाचित् समुच्चयवादी यहकहै कि इसीअध्यायमें भगवान् ने कहा कि जो योगभ्रष्ट पुरुष होताहै वह पवित्र जो धनीलोग तिसके यहां उत्पन्नहोताहै तो इसकथनसे सूचितहोताहै कि गृहस्थको भी योगका अधिकारहै इसीसे वह योगसे भ्रष्टहोके स्वर्गादिलोक में कर्मफलको भोगके फिर पवित्र धनवान् के गृहमें जन्मलेताहै ऐसाकहै तौ इसका उत्तर सिद्धांतवादी कहताहै कि ऐसे आपके कहने में अर्जुनका प्रश्नही नहीं संभवहोगा क्योंकि अर्जुनने यह प्रश्नकिया कि जोपुरुष योगाभ्यासमें प्रवृत्तहुआ और फिरकिसी कारणसे उसकी इन्द्री चलायमान हुई अथवा संपूर्ण योगकोविना प्राप्तहुये वीचहीमें शरीर छूटगया और उसकी श्रद्धाबनीहीथी तौ फिर उसको योगफलतो प्राप्त नहींहुआ और कर्मको पहिलेही त्यागकरचुका था इतसे इधरसे भीगया तौ दोनोंलोकोंमें भ्रष्ट हुआ कौनगतिको प्राप्तहोताहै तौ फिरइस प्रश्नसे स्पष्ट विदितहोताहै कि कर्म करनेवाला जो योगसे भ्रष्टहुआहै उसकी प्रश्नहींहै जो कदाचित् उस

की प्रश्नहोती तो उसने जोनित्य नैमित्तिकादि कर्मकिये हैं उनका अवश्य फलहोताही तहांमोक्ष यद्यपि कर्मजन्य नहींहै परन्तु स्वर्गादिफल तो होता ही फिर सर्वथा नाशकी अर्जुननेशंका किसवास्तेकी नकहोकाम्य कर्मतोयोगी कर्त्ताही नहींहै और नित्य कर्मका कुछफल विशेषकहींकहानहीं इससेशंका होसक्ती तोयह कहनायुक्त नहींहै क्योंकि नित्य जोअग्निहोत्र संध्योपासनादि कर्महैं सो वेद बोधितहींहै अर्थात् वेदहीने जतायाहै तो जोउसका कुछफल न होयतो उसके विधान करनेवाला शास्त्रही अनर्थक होजायगा इससे जब तक पुण्यकर्म उसयोगीका बनाहै तबतक दोनोंलोकके नाशकी आशंकाक-रना ठीकनथी अब कदाचित् समुच्चयवादी कहैकि कर्मतो उसयोगीने कि-याथा परन्तु वहकर्म ईश्वरको समर्पण करादिया इससे कर्त्तामें उसका फल नहीं होसक्ता तो यहभीकहना तुम्हारा ठीकनहीं क्योंकि ईश्वरमें समर्पण करनेसे तो उसका अधिक फलहोना चाहिये जैसेकिसीने अपनाधन राजा केपास रखिदिया तो क्याउसका नाशहोताहै उसका तोराजा और अधिक मानकरताहै तो समुच्चयवादी यह कहताहै कि ईश्वरमें जो उसने कर्म स-मर्पण किये सो केवल मोक्षहीके लियेकिये थे कुछ और फलकेलिये नहीं किये तोफिरजबमोक्षार्थ जोयोगउससे चलायमान हुआ तोऔर फलतोकुछ होनानहीं फिरनाशकी आशंका अर्जुनको युक्तही है तब सिद्धांतवादी कहता है कि जो गृहस्थको ध्यानयोगका अधिकार होयतो आपका कथन सब सं-भव होसक्ताहै वहांतो ऐसालिखाहै कि (एकाकीयतचित्तात्मा त्यक्तसर्वपरिग्रहः निराशीःब्रह्मचारिव्रतेस्थितः) अकेलाहोय और अपने वशकियाहै चित्त और देहजिसने और त्यागदियाहै धनपुत्रादि परिग्रह जिसने और सबका-मनाओं करिकै रहितहो और ब्रह्मचर्य्यमें स्थितहोय ऐसाजो होयसो ध्यान योगका अधिकारी है यह कहनेसे कर्मका त्यागही भगवान्को अभिमत है और कुछ ध्यानयोगमें स्त्रीकेसहायकी आशंका नहींप्राप्तथी जिसकेअर्थ ए-काकी अर्थात् अकेलेका विधान करते और कामना रहित और अपरिग्रह अर्थात् संग्रह करनेके योग्य धनादिकोंका त्यागकरदेवै इनको आदिलेकै जे योगीके विशेषण कहे हैं तेगृहस्थमें नहीं संभवहोते हैं और जो अर्जुन ने दोनोंलोकके नाशकी आशंका करके जो प्रश्नकिया सो भी गृहस्थमें नहीं संभवहोती क्योंकि योगभ्रष्ट होनेमें भी गृहस्थको मोक्षकी प्राप्ति न होउ परन्तु कर्मके अधिकार होनेसे कर्मों करके जे लोकहोते हैं तिनकेबने रहने से सर्वथा नाशकी आशंका नहीं संभवहोती और जो सबकर्म उसने मोक्ष हीके लिये ईश्वरमें समर्पण किये हैं इससे मोक्ष न होनेसे नाशकी आशं-का ठीकहीहै ऐसा जो कहाथा तिसका यहउत्तरहै कि यद्यपि मोक्ष न होने में समर्पित कर्मोंकी निष्फलता तुम्हारी दृष्टिसेरहो परन्तु पहिले कियेहुये —महैं और आगेभी कर्मके अधिकार होनेसे गृहस्थमें सर्वथा फलकेनहीं —ा असंभवसे दोनों लोकके नाशकी आशंकासे अर्जुनका प्रश्न संभव

और हेअर्जुन दूरहोगयेहैं पापजिसके ऐसा जो योगी सो सदात्मा [illegible] में समाधिस्थ चित्तको करताहुआ अनायासहीसे ब्रह्मकरके संस्पर्श [illegible] ऐसा जो अत्यन्त सुख तिसको प्राप्तहोताहै ॥ २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥ २९ ॥

शङ्करभाष्यम्।

[illegible] ॥ २९ ॥

आनन्दगिरिकृतटीका।

[illegible]

स्वामिकृतटीका।

ब्रह्मसाक्षात्कारमेव दर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेन युक्तात्मा समाहितचित्तः सर्वत्र समं ब्रह्मैव पश्यतीति तथा स स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरान्तेष्ववस्थितं पश्यति तानि च आत्मन्यभेदेन पश्यति ॥ २६ ॥

नवलभाष्य।

अबइस समयमें संसारका विच्छेद कारणनाम छूटजानेका कारण जो ब्रह्मका एकत्व दर्शन रूपयोगका फलसो दिखायाजाता है (सर्वेति) हेअर्जुन योगकरके एकाग्रहुआहै अन्तःकरण जिसका और सबजगह एकही ब्रह्म है ऐसाहै ज्ञानजिसको ऐसा जो योगी सो सबप्राणियोंमें स्थित अपने आत्मा को देखताहै और ब्रह्माको आदिलेके सब प्राणियोंको अपने आत्मामें देखता है ॥ २९ ॥

> यो मां पश्यति सर्वत्र सर्वञ्च मयि पश्यति।
> तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥ ३० ॥

शङ्करभाष्यम्।

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते यो मामिति यो मां पश्यति वासुदेवं [illegible] सर्वेषु भूतेषु पश्यति सर्वञ्च ब्रह्मादिभूतजातंमयि सर्वात्मनि पश्यति [illegible] अहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति [illegible] वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वात् [illegible] प्रिय एव भवति ॥ ३० ॥

आनंदगिरिकृतटीका।

उक्तस्यैकत्वज्ञानस्य फलविकल्पत्वशंकां निवर्त्तयति [illegible] दति यो मामिति तत्फलमिदानीमुपन्यस्यति [illegible] मामिति तत्फलोक्तिभागं व्याचष्टे तस्यैवेति [illegible] प्रणश्यतीत्याशङ्क्याह नेति अहं परमानन्दो न [illegible] व्याचष्टे विद्वानिति विद्वानिवाविद्वानपीत्यत्र [illegible] टुपश्च स्वरूपेण मतोऽपि व्यवहित [illegible] परम्परमपरोक्षत्वे हेतुमाह तस्य [illegible] स्यात्मेति ॥ ३० ॥

[illegible]

एवं भूतात्मज्ञाने [illegible] मां परमेश्वरं सर्वत्र [illegible] न प्रणश्यामि [illegible] तो [illegible] ॥

नवलभाष्य।

अवइस आत्माके एकत्व दर्शनका फलकहते हैं कि (योमामिति) हे अर्जुन सब प्राणियोंका आत्मा जो मैं वासुदेव तिसको सब प्राणियों में देखताहै और सब ब्रह्मादिक प्राणियोंको मेरेविषे देखताहै तिस आत्माके एकत्वदर्शी पुरुषको मैं जो ईश्वर सो कभी परोक्षताको प्राप्त नहींहोताअ-र्थात् सबकालमें उसको दिखाईहीदेताहूं यहनहीं कि कभीवह मुझकोनदेखे और वहज्ञानी मुझको कभी अदृश्य नहीं होताहै अर्थात् उसको मैं सदा देखाही करताहूं क्योंकि तिसज्ञानीका और मेराआत्मा एकहीहै और अप-ना आत्मा सबिको प्रियहोताहै ॥ ३० ॥

सर्वभूतस्थितं यो मां भंजत्येकत्वमास्थितः ।
सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥ ३१ ॥

शङ्करभाष्यम्।

यस्माच्चाहमेव स सर्व्वात्मैकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षो-भिधीयते सर्व्वेति सर्वथा सर्वप्रकारैर्वर्त्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्ते नित्यमुक्त एव सः न मोक्षंप्रति केनाचित् प्रतिबध्यत इत्यर्थः ॥ ३१ ॥

आनन्दगिरिकृतटीका।

विद्वदीश्वरयोरेकत्वानुवादेन विद्याफलं विवृणोति यस्माच्चेति तस्मादेकत्वं ... प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलविधिरिति मत्वाह इत्येतदिति ... द्विरहितस्य यमनियमादिसंस्कारवतः स्वैरप्रवृत्त्यसम्भवेऽपि तामंगीकृत्य ... सर्वथेति प्रतिभानतोऽपि यथेष्टचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिक... चारप्रतिबन्धादित्याशङ्क्याह न मोक्षमिति ॥ ३१ ॥

स्वामिकृतटीका।

नचैवम्भूतो विधिकिंकरः स्यादित्याह सर्वस्थितमिति सर्वभूतेषु स्थितं मामेकत्व-मास्थित आश्रितो यो भजति स योगी ज्ञानी सन् सर्वथा कर्मपरित्यागेनापि वर्त्तमानो मय्येव वर्त्तते मुच्यते न तु भ्रश्यतीत्यर्थः ॥ ३१ ॥

नवलभाष्य।

जिसकारणसे सबमें आत्माका एकत्व देखनेवाला मैंहीहूं इससम्यग्द-र्शनरूप पहिले श्लोकके अर्थको अनुवाद करिके उसका फल जो मोक्ष सो अब दिखायाजाताहै (सर्वेति) हेअर्जुन जो पुरुष एकत्वरूप ज्ञानको आश्रय करिके सब प्राणियोंमें स्थित जो मैंहूं तिसका भजन करताहै सो सबप्रकार करिके वर्त्तमान भी है अर्थात् किसीवर्ण आश्रममें वर्तमान भीहै ... है और वर्त्तताहै ... जो परमपद तिसमें स्थित नित्य ...

ने उन विषयों से जुदाहोताहुआ योगीका चित्त अपने आनन्द के लिये र समाधिहीमें स्थित होताहै यह भगवान्का अभिप्राय है ॥ ३५ ॥

असंयतात्मना योगो दुष्प्राप्य इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

शङ्करभाष्यम्।

यः पुनरसंयतात्मा तेन असंयतेति असंयतात्मना अभ्यासवैराग्याभ्यां असंयत आत्मा अन्तःकरणं यस्य सोऽयमसंयतात्मा तेनाऽसंयतात्मना योगो दुःप्रापो दुःप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां वश्यमापादित आत्मा मनो यस्य सोऽयं वश्यात्मा तेन यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतो यथोक्तादुपायात् ॥ ३६ ॥

आनन्दगिरिकृतटीका।

संयतात्मनो योगप्राप्तिः सुलभेत्युक्त्वा व्यतिरेकं दर्शयति यः पुनरिति व्यतिरेकोप न्यासपरं पूर्वार्द्धमनूद्य व्याकरोति असंयतेति पूर्वोक्तान्वयव्याख्यानपरमुत्तरार्द्धं व्याचष्टे यस्त्वित्यादिना अन्तःकरणस्य स्ववशत्वे सिद्धेऽपि वैराग्यादावास्थावता भवितव्यमित्याह यततेति उपायवैराग्यादि पूर्वकोमनो निरोधः ॥ ३६ ॥

स्वामिकृतटीका।

एतावांस्त्विह निश्चय इत्याह असंयतेति उक्तप्रकारेणाभ्यासवैराग्याभ्यां फलसंयत आत्मा चित्तं यस्य तेन योगो दुःप्राप्यः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा चित्तं यस्य तेन पुरुषेण पुनश्चानेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ॥ ३६ ॥

नवलभाष्य।

और हे अर्जुन जो फिर असंयतात्मा पुरुष है अर्थात् अभ्यास और वैराग्य करके जिसने अपना चित्त वशीभूत नहींकिया है उस पुरुष को तो योग दुष्प्रापही है अर्थात् दुःखसेभी प्राप्तहोनेको योग्यनहीं है यह मेरीबुद्धि है अर्थात् मेरीबुद्धिमें ऐसा निश्चित होताहै और जिस योगीनेतो अभ्यास और वैराग्य करके अपनामन वशमें किया है वह यत्नकरताहुआ अर्थात् जिसमें फिरभी कभी यहमन विषयोंमें न जानेपावे इसकेलिये सावधान होके अधिक यत्नकरताहुआ जो योगी तिसको तो पूर्वोक्त उपायसे योगप्राप्तहोनेको शक्यही है अर्थात् उसको तो प्राप्तहोताही है ॥ ३६ ॥

अर्जुनउवाच।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
प्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७॥

शङ्करभाष्यम्।

परलोकेहलोकप्राप्तिनिमित्तानि कर्म्माणि संन्यस्तानि योग

नवलभाष्य।

अबइस आत्माके एकत्व दर्शनका फलकहते हैं कि (योमामिति) हे अर्जुन सब प्राणियोंका आत्मा जो मैं वासुदेव तिसको सब प्राणियों में देखताहै और सब ब्रह्मादिक प्राणियोंको मेरेविषे देखताहै तिस आत्माके एकत्वदर्शी पुरुषको मैं जो ईश्वर सो कभी परोक्षताको प्राप्त नहींहोताअर्थात् सबकालमें उसको दिखाईहीदेताहूं यहनहीं कि कभीवह मुझकोनदेखे और वहज्ञानी मुझको कभी अदृश्य नहीं होताहै अर्थात् उसको मैं सदा देखाही करताहूं क्योंकि तिसज्ञानीका और मेराआत्मा एकहीहै और अपना आत्मा सबीको प्रियहोताहै ॥ ३० ॥

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः।
सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ॥ ३१ ॥

शङ्करभाष्यम्।

यस्माच्चाहमेव स सर्व्वात्मैकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षोऽभिधीयते सर्व्वेति सर्वथा सर्वप्रकारैर्वर्त्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्ते नित्यमुक्त एव सः न मोक्षंप्रति केनाचित् प्रतिवध्यत इत्यर्थः ॥ ३१ ॥

आनन्दगिरिकृतटीका।

विद्वदीश्वरयोरेकत्वानुवादेन विद्याफलं विवृणोति यस्माच्चेति तस्मादेकदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलविधिरिति मत्वाह इत्येतदिति रागादिरहितस्य यमनियमादिसंस्कारवतः स्वैरप्रवृत्त्यसम्भवेऽपि तामंगीकृत्य ज्ञानं स्तौति सर्वथेति प्रतिभासतोऽपि यथेष्टचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिकदुराचारप्रतिबन्धादित्याशङ्क्याह न मोचमिति ॥ ३१ ॥

स्वामिकृतटीका।

नचैवम्भूतो विधिकिंकरः स्यादित्याह सर्वस्थितमिति सर्वभूतेषु स्थितं मामभेदमास्थित आश्रितो यो भजति स योगी ज्ञानी सन् सर्वथा कर्मपरित्यागेनापि वर्तमानो मय्येव वर्तते मुच्यते न तु भ्रश्यतीत्यर्थः ॥ ३१ ॥

नवलभाष्य।

जिसकारणसे सबमें आत्माका एकत्व देखनेवाला
र्शनरूप पहिले श्लोकके अर्थको अनुवाद
अब दिखायाजाताहै (सर्वेति)
करके सब प्राणियोंमें
करके वर्त्तमान भी है
हीविषे वर्त्तताहै अर्थ

स्वामिकृतटीका ।

एतत् स्फुटयति चञ्चलमिति चञ्चलं स्वभावेनैव चपलं किञ्च प्रमाथि प्रमथनशीलं देहेन्द्रियक्षोभकरमित्यर्थः किञ्च बलवद्विचारेणापि जेतुमशक्यं किञ्च दृढं विषयवासनानुबन्धतया दुर्भेद्यम् अतो यथाऽऽकाशे दोधूयमानस्य वायोः कुम्भादिषु निरोधनमशक्यं तथाऽहं तस्य मनसो निग्रहं निरोधं दुष्करं सर्वथा कर्तुमशक्यं मन्ये ॥ ३४ ॥

नवलभाष्य ।

हे कृष्ण × अर्थात् हे भक्तजनोंके पापादिदोषों के खैंचनेवाले नाम दूर करनेवाले जिससे यह मन बड़ाचञ्चल है और केवल चञ्चलही होय सो नहीं किन्तु इन्द्रिय और शरीर इनको मथन करनेवाला है अर्थात् कुमार्ग में डालकरके वश करनेवाला है और फिर यह बलवान्भीहै अर्थात् अत्यन्त प्रबल है दुर्निवार होनेसे किसीके वश करनेको शक्यनहीं है और फिर दृढ़ है तन्तुनागके सदृश छेदनकरने को शक्यनहीं है अर्थात् तन्तुनागनाम वरुणकी फांसीका है सो वह जलमें पड़ी रहती है किसी तरहसे उसको कोई काटनहीं सक्ता है तैसेही इसमनके छेदनकरनेको किसीकी सामर्थ्य नहीं है तिस मनका निग्रह एक जगह रोककरके रखना में पवन की तरहसे दुष्कर मानता हूं अर्थात् सब जगह चलताहुआ जो पवन तिसको कोई जैसे एक किसी स्थानमें नहीं रोकसकै तैसे मनका वश करना तिस पवनसेभी में दुष्कर मानता हूं ॥ ३४ ॥

श्रीभगवानुवाच ।

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ ३५ ॥

शङ्करभाष्यम् ।

श्रीभगवानुवाच एवमेतद्यथा ब्रवीषि असंशयं नास्ति संशयो मनो दुर्निग्रहं चञ्चलमित्यत्र हे महाबाहो किन्तु अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्याञ्चित् समानप्रत्ययावृत्तिश्चित्तस्य वैराग्येण च गृह्यते वैराग्यं नाम दृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं विषयेषु वितृष्णा वैराग्यं तेन च वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्यैवं तन्मनो गृह्यते निरुध्यत इत्यर्थः ॥ ३५ ॥

× यहां व्याकरणकी रीतिसे कृषधातुका अर्थ विलेखनहै अर्थात् खैंचना और आकर्षण करनाहै तिससे नक् प्रत्ययहोताहै तो कृष्ण ऐसाशब्द सिद्धहोताहै तो इसका अर्थ यह हुआ कि जो स्मरण करनेवाले भक्तोंके मनको अपनी तरफखैंचै अथवा भक्तोंके कष्टको दूरकरै अथवा भक्तोंकेलिये नानाप्रकारकी संपदाओंका आकर्षणकरै सो कृष्ण कहाता है इसप्रकारसे कृष्णशब्द करके परमात्माही कहाजाताहै तो यहां अर्जुनका यह अभिप्राय है कि यद्यपि मनचंचल और बलवान्भी है परन्तु आपके आश्रय रहतेहैं इससे आप ही इसको खैंचके दृढकरनेको समर्थहो बिनाआपकी कृपा इसका वश होना मेरीसमझ में नहींआता है ॥

त्युपायमर्जुनउवाच योऽयमिति योऽयंयोगस्त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्याहं न पश्यामि नोपलभे चञ्चलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्धमेतत् ॥ ३३॥

आनंदगिरिकृतटीका।

मनश्चञ्चलमस्थिरमित्युपक्रम्य निर्विशेषे चित्तस्थैर्यं दुःशक्यमिति मन्वानस्तदुपाय बुभुत्सया पृच्छतीति प्रश्नमुत्थापयति एतस्येति तत्प्राप्त्युपायं शुश्रूषुरिति मन्वान मन श्चञ्चलत्वेऽपि तन्निग्रहद्वारा योगस्थैर्यंसम्पाद्यतामित्याशङ्काह एतस्येति प्रसिद्धमिति सम्बन्धः ॥ ३३ ॥

स्वामिकृतटीका।

उक्तलक्षणस्य योगस्यासम्भवं मन्वानोऽर्जुन उवाच योऽयमिति साम्येन मनसो लय विक्षेपशून्यतया केवलात्माकारावस्थानेन योऽयं योगस्त्वया प्रोक्त एतस्य योगस्य स्थिरां दीर्घकालां स्थितिं न पश्यामि मनसश्चञ्चलत्वात् ॥ ३३ ॥

नवलभाष्य।

अब अर्जुन पूर्वोक्त जो यह सम्यक् दर्शनरूपयोग अर्थात् परमात्मज्ञान रूप योग तिसकी दुष्करता को अर्थात् दुःख करके करनेकी योग्यता को विचार करके शीघ्रही उसके प्राप्तिके उपायकी सुननेकी इच्छाकरके पूछता है (योयमिति) हे मधुसूदन जो योग आपने सबजगह सम दृष्टिकरके कहा अर्थात् ब्रह्मदृष्टि करके कहा इस योगकी मैं मनकी चञ्चलता से स्थिर स्थिति नहीं देखताहूं अर्थात् मनकी स्थिरताके आधीन योग है और मन का स्वभाव है चञ्चल इससे योगकी स्थिरताको नहीं देखताहूं ॥ ३३ ॥

चञ्चलं हि मनः कृष्ण प्रमाथि बलवद्दृढम्।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ ३४ ॥

शङ्करभाष्यम्।

चञ्चलमिति चञ्चलं हि मनः कृष्ण इति कृषतेर्विलेखनार्थस्य रूपं भक्तजनपापादिदोषा कर्षणात् कृष्ण हि यस्मान्मनः चञ्चलं न केवलमत्यर्थं चञ्चलं प्रमाथिच प्रमथनशीलं प्रमथ्नाति शरीरमिन्द्रियाणि च विक्षिपति परवशीकरोति किञ्च बलवत् प्रबलं न केनचिन्नियन्तुं शक्यं दुर्निवारत्वात् किञ्च दृढं तन्तुनागव दच्छेद्यंतस्यैवम्भूतस्य मनसोऽहं निग्रहं रोधं मन्ये वायोरिव यथा वायोर्दुष्करो निग्रहस्ततोऽपि मनसो दुष्करं मन्य इत्यभिप्रायः ॥ ३४ ॥

आनन्दगिरिकृतटीका।

मनसश्चञ्चलत्वेपि कृष्णपदपरिनिःपत्तिप्रकारं सूचयति कृष्ण इतीति कथं कर्षकत्व माप्तकामस्य भगवतः सम्भवतीत्याशङ्काह भक्तेति ऐहिकामुष्मिकसर्वसम्पदामाकर्ष शीलत्वाच्चेति द्रष्टव्यं प्रमथ्नाति क्षोभयति तदेव क्षोभकत्वं प्रकटयति विक्षिपतीति दुर्निवारत्वमभिप्रेताद्विषयादाक्रष्टुमशक्यत्वं विशेषणान्तरमाह किञ्चेति अच्छेद्यत्वं विशे षणान्तरमाह किञ्च दृढमिति तन्तुनागो वरुणपाशशब्दितो जलचारी पदार्थोऽत्यन्तदृढ तया छेत्तुमशक्यत्वेन प्रसिद्धो विवक्षितः वायोरित्युक्तं व्यनक्ति यथेति ॥ ३४ ॥

से उन विषयों से जुदाहोताहुआ योगीका चित्त अपने आनन्द के लिये फिर समाधिहीमें स्थित होताहै यह भगवान्का अभिप्राय है ॥ ३५ ॥

असंयतात्मना योगो दुष्प्राप्य इति मे मतिः।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ ३६ ॥

शङ्करभाष्यम्।

यः पुनरसंयतात्मा तेन असंयतेति असंयतात्मना अभ्यासवैराग्याभ्यां असंयत आत्मा अन्तःकरणं यस्य सोऽयमसंयतात्मा तेनाऽसंयतात्मना योगो दुःप्रापो दुःप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां वश्यमापादित आत्मा मनो यस्य सोऽयं वश्यात्मा तेन तु यतता भूयोऽपि प्रयत्नं कुर्वता शक्योऽवाप्तुं योग उपायतो यथोक्तादुपायात् ॥ ३६ ॥

आनन्दगिरिकृतटीका।

संयतात्मनो योगप्राप्तिः सुलभेत्युक्त्वा व्यतिरेकं दर्शयति यः पुनरिति व्यतिरेकोपन्यासपरं पूर्वार्द्धमनूद्य व्याकरोति असंयतेति पूर्वोक्तान्वयव्याख्यानपरमुत्तरार्द्धं व्याचष्टे यस्त्वित्यादिना अन्तःकरणस्य स्ववशत्वे सिद्धेऽपि वैराग्यादावास्थावता भवितव्यमित्याह यततेति उपायवैराग्यादि पूर्वकोमनो निरोधः ॥ ३६ ॥

स्वामिकृतटीका।

एतावांस्त्विह निश्चय इत्याह असंयतेति उक्तप्रकारेणाभ्यासवैराग्याभ्यां फलसंयत आत्मा चित्तं यस्य तेन योगो दुःप्राप्यः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्त्ती आत्मा चित्तं यस्य तेन पुरुषेण पुनश्चानेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ॥ ३६ ॥

नवलभाष्य।

और हे अर्जुन जो फिर असंयतात्मा पुरुष है अर्थात् अभ्यास और वैराग्य करके जिसने अपना चित्त वशीभूत नहींकिया है उस पुरुष को तो योग दुष्प्रापही है अर्थात् दुःखसेभी प्राप्तहोनेको योग्यनहीं है यह मेरीबुद्धि है अर्थात् मेरीबुद्धिमें ऐसा निश्चित होताहै और जिस योगीनेतो अभ्यास और वैराग्य करके अपनामन वशमें किया है वह यत्नकरताहुआ अर्थात् जिसमें फिरभी कभी यहमन विषयोंमें न जानेपावे इसकेलिये सावधान होके अधिक यत्नकरताहुआ जो योगी तिसको तो पूर्वोक्त उपायसे योगप्राप्तहोनेको शक्यही है अर्थात् उसको तो प्राप्तहोताही है ॥ ३६ ॥

अर्जुनउवाच।

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ३७॥

शङ्करभाष्यम्।

तत्र योगाभ्यासाङ्गीकरणेन इहलोकपरलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि ...

आनन्दगिरिकृतटीका।

प्रश्नमंगीकृत्य प्रतिवचनमुत्थापयति श्रीभगवानिति कुत्र संशयराहित्यं तत्राह्न
इति कथं तर्हि मनोनिरोधो भवति तत्राह किंत्विति अभ्यासस्वरूपं सामान्येन निरू
यति अभ्यासो नामेति कस्याञ्चिच्चित्तभूमावित्यविशेषितो ध्येयो विषयो निर्दिश्य
समानप्रत्ययावृत्तिर्विजातीयप्रत्ययान्तरितेति शेषः चित्तस्येतिषष्ठीप्रत्ययस्यतद्विकाल
द्योतनार्थं वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वैतृष्ण्यं वैराग्यं नामेति सम्बन्ध
तत्र हेतुं सूचयति दोषेति विषयेषु वितृष्णा विषयेषु दोषदर्शनमभ्यस्यते तेन वैतृष्ण्यं
जायते तेन निगृह्यमाणं निर्दिशति विक्षेपेति तस्मिन् गृहीते निरुद्धे मनोनिरोधेऽस्य कि
स्यादित्यपेक्षायामाह एवमिति अभ्यासहेतुकवैराग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्ति
मनो विषयविमुखमन्तर्निष्ठं भवतीत्यर्थः ॥ ३५ ॥

स्वामिकृतटीका।

तदुक्तंचञ्चलत्वादिकमंगीकृत्यैव मनोनिग्रहोपायं श्रीभगवानुवाच असंशयमितिचञ्चल
त्वादिना मनो निरोद्धुमशक्यमिति यद्वदसि एतन्निःसंशयमेव तथापि तु अभ्यासेनपरमा
त्माकारया वृत्त्या विषयवैतृष्ण्यं नच गृह्यते अभ्यासेनालं प्रतिबन्धाद्वैराग्येण च विक्षे
पप्रतिबन्धादुपरतवृत्तिकं सत् परमात्माकारेण परिणतं तिष्ठतीत्यर्थः तदुक्तं योगश्च
मनसो वृत्तिशून्यस्य ब्रह्माकारतयास्थितिः या सम्प्रज्ञातनामासौ समाधिरभिधीयत
इति ॥ ३५ ॥

नवलभाष्य।

अब श्रीभगवान् अर्जुन के प्रश्नका उत्तर कहते हैं कि हे लम्बायमान
भुजायुक्त अर्जुन जैसे तू कहता है सो तैसेही है अर्थात् मनचञ्चल है और
दुःख करके वशकरने योग्यभी है इस तेरे कहने में कुछसन्देह नहीं है तौभी
हे कुन्तीकेपुत्र अभ्यास करके और वैराग्य करके यह मनग्रहणकिया जाता
है नाम वश कियाजाता है तहां अभ्यास उसको कहते हैं कि चित्तकी कि
सी भूमिका में समान प्रत्यय वृत्तिहोना अर्थात् जैसे ध्येय आत्मस्वरूपमा
प्रत्यय करके अर्थात् निश्चय करके चित्तका प्रवाहहुआ तिससे विरुद्धदेहा
दिपदार्थोंका चित्तमें नहींलाना और यहां देखे जे सरसस्वादु अन्न भोजन
स्त्री पुत्रादि भोग और नहीं देखे जे स्वर्ग के दिव्य गन्ध अप्सरा आदि भोग
तिन्होंमें मिथ्यात्वके अर्थात् झूंठपनेके और परिणाम में दुःखदायीपने के
निश्चयसे इनमें भोगकी तृष्णाका नहींहोना उसको वैराग्य कहते हैं तिस
वैराग्यकरके और पूर्वोक्त जो अभ्यास तिस करके विक्षेपरूप चित्तके प्रचार
के नहीं होनेसे रुकाहुआ जो मन सो विषयोंसे विमुख आत्म सुखमें स्थित
होताहै अर्थात् विना आनन्द तो मन कहींजायहीनहीं सका तो जब ऐसे
और विषयों से निवृत्त हुआ जैसेजैसे एकाग्र होताजाता है तैसेतैसे इसको
आत्मानन्दकी प्रतीतिहुई और सत्संग वशसे और प्रत्यक्षभी विषयोंमें
[illegible]

भ्रमिव नश्यति किंवा न नश्यति अप्रतिष्ठो निराश्रयो हे महाबाहो विमूढः सन् ब्रह्म प्राप्तिमार्गे ॥ ३८ ॥

आनंदगिरिकृतटीका।

प्रश्नमेव विवृणोति कच्चिदिति प्रशस्तप्रश्नार्थत्वं कच्चिदित्यस्यांगीकृत्य व्याचष्टे किमिति उभयविभ्रष्टत्वं स्पष्टयति कर्म्मेत्यादिना वायुना छिन्नं विश्कलितमभ्रं यथा नश्यति तद्वदित्याह छिन्नेति नाशाशंकानिमित्तमाह निराश्रय इति कर्म्ममार्गरूपावष्टम्भाभावेऽपि ज्ञानमार्गावष्टम्भस्तस्य भविष्यतीत्याशंक्याह विमूढः सन्निति नहि कर्मिणां प्रतीयमाशंकायुक्ताभिलापं त्यक्त्वेश्वरे समर्प्यावाकर्म्मानुतिष्ठतो निरुपचारेण तद्भंगवचनासम्भवात् सर्वकर्म्मसंन्यासिनस्तु विहितानां त्यागात् ज्ञातोपायाच्च विच्युतेरनर्थप्राप्तिशंका युक्तेति भावः ॥ ३८ ॥

स्वामिकृतटीका।

प्रश्नाभिप्रायं विवृणोति कच्चिदिति कर्म्मणामीश्वरेऽर्पितत्वादननुष्ठानाच्च तावत् कर्म्मफलं स्वर्गादिकं न प्राप्नोति योगानिष्पत्तेश्चमोक्षंनप्राप्नोति एवमुभयस्माद् भ्रष्टः अप्रतिष्ठोनिराश्रयः अतएव ब्रह्मप्राप्त्युपाये पथि मार्गे विमूढः सन् कच्चित् किंन नश्यति किंवा नश्यतीत्यर्थः नाशेदृष्टान्तः यथा छिन्नाभ्रं पूर्वस्मादभ्राद्विश्लिष्टमभ्रान्तरमप्राप्तं सन् मध्य एव विलीयते तद्वदित्यर्थः ॥ ३८ ॥

नवलभाष्य।

क्या वह योगी कर्ममार्ग और योगमार्ग इनदोनों मार्गोंसे भ्रष्टहुआ कटेहुये मेघके सदृश नाशको प्राप्तहोता है अथवा नहीं अर्थात् जैसे थोड़ासा बादलकाखण्ड बड़ेबादल मेंसे अलग कटके दूसरे बादल में नहीं मिलने पावता है वीचहीं में पवन के वेगसे विलायजाता है तैसे वह योगीभी कर्ममार्ग कोतो पहिलेही छोड़चुकाथा और योगभी पूराहोने नहींपाया तो क्या वहउस मेघकेतुल्य नष्टहोजाताहै किंवानहीं नाशको प्राप्तहोताहै क्योंकि वह निराश्रयहै कोई आश्रय उसका दृढ़नहीं हुआहै और हे महाबाहो लंबीभुजाओं करके शोभित कृष्ण जिससे वह ब्रह्मकी प्राप्तिके मार्गमें विमूढ़ है अर्थात् अच्छीतरह जाननेवाला नहींहै ॥ ३८ ॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ३९ ॥

शंकरभाष्यम्।

एतदिति एतन्मे मम संशयं कृष्ण छेत्तुमपनेतुमर्हसि अशेषतः त्वदन्यः त्वत्तोन्यः ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य नहि यस्मादुपपद्यते न सम्भवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ॥ ३९ ॥

आनंदगिरिकृतटीका।

यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह एतदिति मत्तोऽन्यः कश्चिदृषिर्वा देवो वा त्वदीयं संशयं छेत्स्यतीत्याशंक्याह तदन्य इति अन्यस्य संशयच्छेत्तुरभावे फलितमाह अत इति ॥ ३९ ॥

सिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति योगी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमाशंक्यार्जुनउवाच अयतिरिति अयतिरप्रयत्नवान् योगमार्गे श्रद्धयाऽस्तिक्यबुद्ध्या योगतो योगादन्तकालेऽपि चलितं मानसं मनो यस्य स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ॥ ३७ ॥

आनन्दगिरिकृतटीका।

प्रश्नान्तमुत्थापयति तत्रेत्यादिना मनोनिरोधस्य दुःखसाध्यत्वमाशंक्य परिहृते सति प्रष्टापुनरवकाशं प्रतिलभ्योवाचेति सम्बन्धः लोकद्वयप्रापककर्म्मसम्भवे कुतो योगिनोनाशशङ्केत्याशङ्क्याह योगोभ्यासेति तथापियोगानुष्ठानपरिपाकपरिप्राप्तिसम्यग्दर्शनसामर्थ्यान्माचोपपत्तौ कुतस्तस्य नाशाशंकेति चेन्मैवमनेकान्तरायवत्त्वाद्योगस्येह जन्मनिप्राप्तिसंसिद्धेरसिद्धिरित्यभिसन्धायाह योगसिद्धीति अभ्युदयनिःश्रेयसवहिर्भावोनाशो योगमार्गतत्फलस्य सम्यग्दर्शनादिति शेषः तर्हि ततो वहिर्मुखत्वमेवात्यन्तिकंसंवृत्तमित्याशंक्याह श्रद्धयेति तर्हि योगमार्गमाश्रयते नेत्याह योगादिति मरणकाले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाशाभावाद् युक्तं ततश्चलितमानसत्वमित्याशङ्क्याह भ्रष्टेति गम्यत इति गतिः पुरुषार्थः सामान्यप्रश्नमन्तर्भाव्यविशेषप्रश्नो द्रष्टव्यः ॥ ३७ ॥

स्वामिकृतटीका।

अभ्यासवैराग्याभावेन कथञ्चिदप्राप्तसम्यग्ज्ञानः किं फलं प्राप्नोतीत्यर्जुन उवाच अयतिरिति प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः नतु मिथ्याचारतया ततः परं यस्तु सम्यक् न यतते शिथिलाभ्यास इत्यर्थः तथा योगाच्चलितं मानसं विषयप्रवणं चितं यस्य मन्दवैराग्य इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कां गतिं प्राप्नोति ॥ ३७ ॥

नवलभाष्य।

तहां योगाभ्यासही को जिसने सबसे अधिक जानके आश्रयणकिया और इसलोकमें और परलोकमें फलके देनेवाले जे कर्म तिन्होंका त्यागकिया और मोक्षमेंसाधन जो सम्यक दर्शन ज्ञानरूप योग सिद्धिका फल सोभी प्राप्तहुआ नहीं और मरणसमय में उस योगी का चित्त चलायमान हुआ अर्थात् योगसे रहित हुआ तो तिस योगीके नाशकी आशंका करके अर्जुन पूछता है कि (अयतिरिति) हे कृष्ण जो योगी योगाभ्यास के यत्नते रहित है अर्थात् जिसका चित्त मरणसमय में समाधि रहित होगया और न उस समय में इन्द्रियोंकी व्याकुलता से योगको करसका है और योगमार्ग में श्रद्धायुक्ततो हैही और मरणसमय में स्मरणहीन हो के शरीरको छोड़दिया तो योगकाफल जो सम्यक् दर्शन अर्थात् ब्रह्मको जानके ब्रह्मरूप होजाना तिसको विनाप्राप्तहुये फिर वह कौनगतिको प्राप्तहोता है ॥ ३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ३८ ॥

शङ्करभाष्यम्।

कच्चिदिति कच्चित् किं नोभयविभ्रष्टः कर्ममार्गात् योगमार्गाच्च विभ्रष्टः सन् छिन्ना

नहीं प्राप्तहोताहै अर्थात् नियगतिको नहीं प्राप्तहोताहै और यहां भगवान्ने अर्जुनसे तातकहा तिसका अर्थयहहै कि जो पुत्ररूप करिकै अपने आत्मा को विस्तारकरै सो तातकहावै इस अक्षरार्थसे तातनाम पिताकाहै और पिताही पुत्ररूप करके होताहै इससे पुत्र भी तातशब्द करके कहाजाता है और शिष्य भी पुत्रके तुल्यहोताहै इससे शिष्य भी तातशब्द करके कहा जाताहै इस आशयसे अर्जुनसेभी तातऐसा भगवान्ने कहा ॥ ४० ॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

शङ्करभाष्यम्।

किन्त्वस्य भवति प्राप्येति योगमार्गेषु प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य गत्वा पुण्यकृता मश्वमेधादियाजिनांलोकांस्तत्र च उषित्वा वा समनुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भोगक्षये शुचीनां यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते ॥ ४१ ॥

आनन्दगिरिकृतटीका।

योगभ्रष्टस्य लोकद्वयेऽपि नाशाभावे किं भवतीति पृच्छति किंत्विति तत्र श्लोकेनोत्तरमाह प्राप्येति कथं संन्यासीति विशेष्यते तत्राह सामर्थ्यादिति कर्म्मणि व्यापृतस्य कर्म्मिणो योगमार्गप्रवृत्त्यानुपपत्तिस्तत्प्रवृत्तावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्वकर्मणस्तद्भ्रंशाशंकाऽनवकाशादित्यर्थः समानां नित्यत्वं मानुषसमाविलक्षणत्वं वैराग्याभावविवक्षया विभूतिमतां गृहे जन्मेति विशिष्यते ॥ ४१ ॥

स्वामिकृतटीका।

तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्वमेधादियाजिनां लोकान् प्राप्य तत्र शाश्वतीः समा बहून् संवत्सरानुषित्वा वासमुखमनुभूय शुचीनां सदाचाराणां श्रीमतां धनिनां गेहे स योगभ्रष्टो जन्म प्राप्नोति ॥ ४१ ॥

नवलभाष्य।

फिरक्या इसको होताहै इस आकांक्षामें (प्राप्येति) हेअर्जुनवहयोगमार्ग में प्रवृत्त जो कर्मोंके त्यागकरनेवाला संन्यासी सो पुण्य करनेवाले अर्थात् अश्वमेधादि यज्ञ करनेवाले जो पुरुष तिन्होंके भोगकरने योग्य लोकोंको प्राप्तहोके फिर तिनलोकोंमें बहुतवर्षतक वासकरके अर्थात् वहांके सुखोंको भोगकरके फिर उसभोगके क्षयमें पवित्रजे लक्ष्मीवान् अर्थात् बडे ऐश्वर्य युक्त जे पुरुष तिनके गृहमें वह योगभ्रष्ट पुरुष उत्पन्नहोता है ॥ २१ ॥

अथवा योगिनामेव कुले भवति धीमताम्।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ४२ ॥

शङ्करभाष्यम्।

अथवा श्रीमतां कुलादन्यस्मिन् योगिनामेव दरिद्राणां कुले भवति जायते धीमतां

स्वामिकृतटीका।

त्वयैव सर्वज्ञेनायं मम सन्देहो निरसनीयः त्वत्तोऽन्यस्तु एतत्सन्देहनिवर्तको नास्तीत्याह एतदिति एतत् एतत्छेत्ता निवर्तकः स्पष्टमन्यत् ॥ ३९ ॥

नवलभाष्य।

इससे हेकृष्ण इसमेरे संदेहको निश्शेष करके अर्थात् सबप्रकारसे आप ही दूरकरनेको योग्यहो और जिससे आपके सिवाय और कोई ऋषि वा देवता इसमेरे संशयका छेदन करनेवाला नहीं संभवहोताहै ॥ ३९ ॥

श्रीभगवानुवाच।

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते।
नहि कल्याणकृत् कश्चिद्दुर्गतिं तात गच्छति ॥४०॥

शङ्करभाष्यम्।

पार्थेति हे पार्थ नैव इहलोके नामुत्र परस्मिन् वा लोके विनाशस्तस्यविद्यते नास्ति नाशो नामपूर्वस्माद्धि न जन्मप्राप्तिः स तस्य योगभ्रष्टस्य नास्ति नहि यस्मात् कारणात् कल्याणकृत् शुभकृत् कश्चिद्दुर्गतिं कुत्सितांगतिं हे तात तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते पिता एव पुत्र इति पुत्रोऽपि तात उच्यते शिष्योऽपि पुत्रतुल्य उच्यते यतो गच्छति ॥ ४० ॥

आनंदगिरिकृतटीका।

योगिनो नाशाशंकां परिहरन्नुत्तरमाह भगवानिति यदुक्तमुभयभ्रष्टो योगी नश्यतीति तत्राह पार्थेति तत्र हेतुमाह नहीति योगिनो मार्गद्वयाद्भ्रष्टस्यैहिको नाशः शिष्टगर्हालक्षणो न भवतीति श्रद्धादेः सद्भावात्तथापि कथमामुष्मिकनाशशून्यत्वमित्याशङ्क्य तद्रूपनिरूपणपूर्वकं तदभावं प्रतिजानीते नाशो नामेति तत्र हेतुभागं विभजते नहीत्यादिना उभयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सामिकृतश्रवणादेश्चाभावादुपपन्नं शुभकृत्त्वं कथं पुत्रस्थानीयः शिष्यः सम्बोध्यते पितुरेव तात शब्दत्वादित्याशङ्क्याह तनोतीति तेन पुत्रस्थानीयस्य शिष्यस्य तातेति सम्बोधनमविरुद्धमित्यर्थः न गच्छति कुत्सितां गतिं कल्याणकृत्वादिति नाशाभावः ॥ ४० ॥

स्वामिकृतटीका।

अत्रोत्तरं श्रीभगवानुवाच पार्थेति सार्द्धैश्चतुर्भि इह लोके नाश उभयभ्रंशात् पातित्यं अमुत्र परलोके नाशो नरकप्राप्तिस्तदुभयं तस्य नास्त्येव यतः कल्याणकृत् शुभकारी कश्चिदपि दुर्गतिं न गच्छति अयञ्च शुभकारी श्रद्धया योगे प्रवृत्तत्वात् तनोतीति लोकरीत्या उपलालयन् सम्बोधयति ॥ ४० ॥

नवलभाष्य।

अब भगवान् इस प्रश्नका उत्तर कहतेहैं कि (पार्थेति) हे अर्जुन नतो इसलोकमें औरनपरलोकमें उस योगभ्रष्ट पुरुषका नाशहोताहै अर्थात् नी ले जन्मसेहीन जन्मकी प्राप्ति नहींहोतीहै क्योंकि हे तात जिसकारण कोई भी कल्याणके करनेवाला अर्थात् अच्छीबातका करनेवाला दुर्गति

नवलभाष्य ।

हे अर्जुन फिर वह योगियोंके कुलमें जन्मको प्राप्तहोके पूर्वदेहमें अभ्यास
करी जो आत्मबुद्धि अर्थात् आत्मज्ञान तिसको फिर अनायासहीसे प्राप्त
होताहै और हे अर्जुन पूर्वकाकिया जो वह संस्कार तिसके कारणसे फिर
मोक्षहीकेलिये पहिलेसे भी अधिक यत्नमें प्रवृत्तहोताहै ॥ ४३ ॥

पूर्व्वाभ्यासेन तेनैव क्रियते ह्यवशोऽपि सः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥ ४४ ॥

शङ्करभाष्यम् ।

कथम्भूतं पूर्व्वदेहबुद्धिसंयोगं इति तदुच्यते पूर्वेति यः पूर्व्वजन्मनि कृतोऽभ्यासः स पूर्व्वा-
भ्यासस्तेनैव वलवता ह्रियते संसिद्धौ हि यस्मादवशोऽपि सः योगभ्रष्टः न कृतंचेत् योगाभ्या-
सजात् संस्कारात् वलवत्तरमधर्मादिलक्षणं कर्म तदा योगाभ्यासजनितेन संस्कारेणाह्रियतेऽधर्म
श्चेद्वलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत एव तत्क्षये तु योगजः संस्कारः स्वयमेव
कार्य्यमारभते न दीर्घकालस्थस्यापि विनाशस्तस्यास्तीत्यर्थाजिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमि-
च्छन् योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् सोपि शब्दब्रह्मवेदोक्तकर्मानुष्ठानफल-
मतिवर्त्तते अपाकरिष्यति किमुत बुद्ध्या यो योगं तन्निष्ठो
अभ्यासं कुर्य्यात् ॥ ४४ ॥

आनंदगिरिकृतटीका ।

यदि पूर्वसंस्कारोऽस्येच्छामुपनयन् प्रवर्तयति तथाचाप्रवृत्तिरनिच्छया स्यादित्या-
शङ्क्याह पूर्वेति स हि योगभ्रष्टः समनन्तरजन्मकृतसंस्कारवशादुत्तरस्मिन् जन्मनि अनि-
च्छन्नपि योगं प्रत्येवाकृष्टो भवतीत्यर्थः तत्र कैमुतिकन्यायं सूचयति जिज्ञासुरिति पूर्वार्द्धं
विभजते पूर्वेति तस्मान्नेच्छया तस्य प्रवृत्तिरिति शेषः योगभ्रष्टस्याधर्मादिप्रतिबन्धेऽपि
तर्हि पूर्वाभ्यासवशाद् बुद्धिसम्बन्धः स्यादित्याशङ्क्याह नेत्यादिना यदि योगभ्रष्टे न यो-
गाभ्यासजनितसंस्कारप्राबल्यात् प्रवलतरधर्मप्रभेदरूपं कर्म न कृतं स्यात् तदानेन संस्का-
रेण वशीकृतः सन्निच्छादिरहितोऽपि बुद्धिसम्बन्धभाग् भवतीत्यर्थः विपक्षे योगसंस्कार
स्याभिभूतत्वान्न कार्य्यारम्भकत्वमित्याह अधर्मश्चेदिति योगजसंस्कारस्याधर्माभिभूतस्
कार्य्यमकृत्वैवाभिभावकप्राबल्ये प्रणाशः स्यादित्याशङ्क्याह तत्क्षये त्विति कालस्य
धानान्निवृत्तिं शंकित्वोक्तेनेति तृणजलौकादृष्टान्तश्रुत्या संस्कारस्य दीर्घतायाः समधिग
स्यादिति भावः कैमुतिकन्यायोक्तिपरमुत्तरार्द्धं विभजते जिज्ञासुरपीत्यादिना अत्र
संन्यासीति विशेषणं पूर्ववदवधेयमित्याह सामर्थ्यादिति नहि कर्म्मी कर्ममार्गे प्र
स्ततो भ्रष्टः शंकितुं शक्यते अतः संन्यासी पूर्वोक्तविशेषणैः विशिष्टो योगभ्रष्टो
सोपि वैदिकं कर्म तत्फलञ्चातिवर्त्तते किमुत योग बुद्ध्या तन्निष्ठः सदाभ्यासं कुर्वन्
तत्फलञ्चातिवर्त्तते किमिति वक्तव्यमिति योजना योगनिष्ठस्य कर्म तत्फलाति-
रातोऽधिकफलावाप्तिर्विवक्ष्यते ॥ ४४ ॥

स्वामिकृतटीका ।

तत्र हेतुः पूर्वेति तेनैव पूर्वदेहकृताभ्यासेनावशोऽपि कुतश्चिदन्तरायात् [illegible]
[illegible] विषयेभ्यः [illegible] [illegible] क्रियते तदेव पूर्वाभ्यासेन [illegible]

बुद्धिमतां एतद्धि जन्म यद्दरिद्राणां योगिनां कुले दुर्लभ्यतरं दुःखेन लभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्तविशेषणे कुले यस्मात् ॥ ४२ ॥

आनन्दगिरिकृतटीका।

आढ्यवैराग्यादिकल्याणाधिक्ये पक्षान्तरमाह अथवेति योगिनामिति कर्म्मिणां ग्रहणं माभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्यावतां शुचीनां दरिद्राणां कुले जन्म दुर्लभं प्रमादकारणाभावादित्याह एतद्धीति किमपेक्ष्यास्य जन्मनो दुःखलभ्याद्पि दुःख-लभ्यतरत्वं तदाह पूर्व्वमिति यद्यपि विभूतिमतां शुचीनां गृहे जन्म दुःखलभ्यं तथापि तदपेक्षया इदं जन्म दुःखलभ्यतरं यदीदृशं शुचीनां दरिद्राणां विद्यावतामिति विशेषणोपेते कुले लोके जन्मलक्षणमित्यर्थः यदुक्तमपरं जन्मोक्तं तस्योत्तमत्वे हेतुमाह यस्मादिति ॥ ४२ ॥

स्वामिकृतटीका।

अल्पकालाभ्यस्तयोगभ्रंशे गतिविशेषमुक्त्वा चिराभ्यस्तयोगभ्रंशे पक्षान्तरमाह अथवेति योगनिष्ठानां धीमतां ज्ञानिनामेव कुले जायते ननु पूर्व्वोक्तानामनारूढयोगानां कुले एतज्जन्म स्तौति ईदृशं जन्म एतद्धि लोके दुर्लभतरं मोक्षहेतुत्वात् ॥ ४२ ॥

नवलभाष्य।

अथवा हे अर्जुन लक्ष्मीवान् पुरुषोंके कुलसे अन्य जो योगियोंका कुल अर्थात् दरिद्रीभी जे योगी तिनकाजो कुलतिसमें वह योगभ्रष्ट पुरुषउत्पन्न होताहै परन्तु यहयोगियोंके कुलमें जो जन्महै सो हेअर्जुन अत्यन्त दुर्लभहै अर्थात् बहुतसुकृत सहायहोयं तो ऐसीजगह जन्महोय लक्ष्मीयुक्त पुरुषोंके कुलसे दरिद्र योगियोंके कुलमें जन्मश्रेष्ठहै यह भगवानका आशयहै ॥ ४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम्।
यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ४३ ॥

शङ्करभाष्यम्।

तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं बुद्धिसंयोगं लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं यतते च यत्नं करोति ततस्तस्मात् पूर्व्वकृतात् संस्काराद्भूयः संसिद्धिनिमित्तं हे कुरुनन्दन ॥ ४३ ॥

आनन्दगिरिकृतटीका।

बुद्धेत्यात्मविषयेति शेषः पूर्वस्मिन् देहे भवं तत्रानुष्ठितसाधनविशेषजनितमित्यर्थः यथोक्तजन्मनि साधनानुष्ठानमन्तरेणैव बुद्धिसम्बन्धः स्यादित्याशङ्क्याह यतते इति यत्नप्रयत्नानुष्ठानविषयः ॥ ४३ ॥

स्वामिकृतटीका।

ततः किमत आह तत्रेति तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहसम्बन्धिनं तमेव ब्रह्मविषयया बुद्ध्याः संयोगं लभते ततश्च भूयोऽधिकं संसिद्धौ मोक्षे यत्नं करोति ॥ ४३ ॥

स्वामिकृतटीका।

यदैवं मन्दप्रयत्नेऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोनेऽकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा ततः श्रेष्ठां गतिं यातीति किंवक्तव्यमित्यर्थः ॥ ४५॥

नवलभाष्य।

काहेसे योगश्रेष्ठहै इस आकांक्षामें कहतेहैं कि (प्रयत्नादिति) हे अर्जुन अधिक यत्न करताहुआ जो योगी सो शुद्धहुये हैं पापजिसके ऐसाहोके अर्थात् पापरहित होके अनेक जन्मोंमें संचयाकिया जो योग तिसकरके सम्यग्दर्शन ज्ञानरूप सिद्धिको प्राप्तहोके परमगतिको प्राप्तहोताहै ॥ ४५ ॥

तपस्विभ्योऽधिकोयोगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिकोयोगी तस्माद्योगी भवार्ज्जुन ॥ ४६॥

शङ्करभाष्यम्।

यस्मादेवं तस्मात् तपस्विभ्य इति तपस्विभ्योऽधिको योगी ज्ञानिभ्योपि ज्ञानमात्रशास्त्रार्थपाण्डित्यं तद्वद्भ्योऽपि मतो ज्ञातोऽधिकः श्रेष्ठ इति कर्मिभ्योऽग्निहोत्रादिकर्म तद्वद्भ्योऽधिको योगी विशिष्टः तस्माद्योगी भवाऽर्जुन ॥ ४६ ॥

आनन्दगिरिकृतटीका।

सम्यग्ज्ञानद्वारा मोक्षहेतुत्वं योगस्योक्तमनूद्य योगिनः सर्वाधिकत्वमाह यस्मादिति योगस्य सर्वस्मादुत्कर्षादवश्यकर्तव्यत्वाय योगिनः सर्वाधिक्यं साधयति तपस्विभ्य इति योगिनो ज्ञानिनश्च पर्य्यायत्वात् कथं तस्य ज्ञानिभ्योऽधिकत्वमित्याशङ्क्याह ज्ञानमिति योगिनः सर्वाधिकत्वे फलितमाह तस्मादिति ॥ ४६ ॥

स्वामिकृतटीका।

यस्मादेवं तस्मात्तपस्विभ्य इति कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्योऽपि ज्ञानिभ्यः शास्त्रविज्ञानवद्भ्योपि कर्म्मिभ्य इष्टापूर्तादिकर्मकारिभ्योपि योगिश्रेष्ठो ममाऽभिमतः तस्मात्त्वंयोगी भव ॥ ४६॥

नवलभाष्य।

जिससेऐसाहै तिससे हेअर्जुन तपस्वी जे तप करनेवालेहैं तिनसे योगी श्रेष्ठहै और ज्ञानी जे शास्त्रोंके अर्थके जाननेवाले जे पण्डितलोग हैं तिनसे भी योगीश्रेष्ठहै और उनशास्त्रोंको जानके जे अग्निहोत्रादि कर्म करनेवाले हैं तिनसे भी योगीमुझको अधिकश्रेष्ठ अभिमतहै तिससे हे अर्जुन तू भी योगीहो अर्थात् योगाभ्यासमें तत्परहोउ ४६ ॥ ॥

योगिनामपि सर्व्वेषां मद्गतेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः॥ ४७॥
इति श्रीभगवद्गीतायां ध्यानयोगो नाम षष्ठोऽध्यायः॥ ६॥

नैर्मुच्यत इतोमसर्थं कैमुतिकन्यायेन स्पष्टयति जिज्ञासुरिति साद्धं न योगस्य स्वरूपं जिज्ञासुरेव केवलं न तु प्राप्तयोगः एवंभूतो योगप्रविष्टमात्रोऽपि पापवशाद्योगभ्रष्टोऽपि शब्दब्रह्मवेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रामति तेभ्योऽधिकं फलं प्राप्य मुच्यत इत्यर्थः ॥ ४४ ॥

नवलभाष्य।

कैसापूर्व देहका वुद्धि संयोगहै यह सूचन कराते कहतेहैं (पूर्वेति) हेअर्जुन पूर्वजन्ममें कियाजो योगाभ्यास तिसके वलकरके अवशभी पराधीनजो वह योगभ्रष्ट सो मोक्षमार्गमें प्रवृत्त कियाजाताहै अर्थात् उसपूर्वजन्मके संस्कार वशसे किसीविध्न करके वाधित नहींहुआ योगहीमें प्रवृत्तहोताहै परन्तु जब योगाभ्यासके संस्कारसे प्रवलकोई अधर्म न कियाहोय तो ऐसा ही होताहै और जो कदाचित् योगाभ्यासकी अपेक्षासे अधर्मही अधिक कियाहोताहै तौ उसवलवान् अधर्मके संस्कारसे योगका संस्कार तिरस्कृत होजाताहै अर्थात् तब कुछकाल विषय सेवनादिकका उसको विघ्नहोताहै तिसके भोगके क्षयमें फिर योगका संस्कार उदयहोताहै तौ फिर योगमें प्रवृत्तहोताहै और बहुत कालका कियाहुआ भी योगहै परन्तु उसके संस्कार का नाश तौ कभी नहींहोता है इससे हे अर्जुन योगका जिज्ञासू भी होय अर्थात् योगके स्वरूपके जाननेकी इच्छा करताहुआ भीजो पुरुषनाम योग भ्रष्ट संन्यासी सो वेदोक्त कर्मोंके फलोंको उल्लंघन करताहै अर्थात् तिन्होंके बन्धनमें नहींआता और तिससे अधिक सुखको प्राप्तहोताहै और जो योग शास्त्रको जानके जैसाचाहिये तैसे योगाभ्यास करताहुआ कर्म्म गतिको उल्लंघन करैहै इसका क्या कहनाहै ॥ ४४ ॥

प्रयत्नात् यतमानस्तु योगी संशुद्धकिल्बिषः।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥ ४५ ॥

शङ्करभाष्यम्।

कुतश्च योगित्वं श्रेय इति प्रयत्नादिति प्रयत्नात् प्रयतमानादधिकतरं यतमान इत्यर्थः तत्र योगी विद्वान् संशुद्धकिल्बिषो विशुद्धकिल्बिषः स शुद्धपापोऽनेकेषु जन्मसु किञ्चित् किञ्चित् संस्कारजातमुपचित्य तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धः ततो लब्धसम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिं ॥ ४५ ॥

आनंदगिरिकृतटीका।

योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं युक्तं उत्तरश्लोकमवतारयति कुतश्चेति मृदुप्रयत्नेन मोच्यते चेदधिकप्रयत्नस्य योगहेतोरकिञ्चित्करत्वमित्याशङ्क्य हेत्वन्तरमिव प्रकटयति प्रयत्नादिति तत्र योगविषये प्रयत्नातिरेके सतीत्यर्थः ततः सञ्चितसंस्कारसमुदायादिति मायत् समुत्पन्नसम्यग्दर्शनवशात् प्रकृष्टा गतिः संन्यासिना लभ्यते तेन शीघ्रं मुक्तिच्छ अधिकप्रयत्नो भवेदल्पप्रयत्नस्तु चिरेणैव मुक्तिभागित्यर्थः ॥ ४५ ॥

श्रीमद्भगवद्गीतासटीक॥

सप्तमोऽध्यायः।

श्रीभगवानुवाच।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ १॥

शङ्करभाष्यम्।

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां स मे युक्ततमो मत इति प्रश्नबीजमुपन्यस्य स्वयमेव ईदृशं मदीयं तत्त्वमेवं मद्गतान्तरात्मा स्यादित्येतद्विवक्षुर्भगवानुवाच मयीति मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः हे पार्थ योगं युञ्जन् मनःसमाधानं कुर्वन् मदाश्रयोऽहमेव परमेश्वर आश्रयो यस्य स मदाश्रयो यो हि कश्चित् पुरुषार्थेन केनचिदर्थी भवति स तत् साधनं कर्माग्निहोत्रादितपोदानं वा किंचिदाश्रयं प्रतिपद्यते अयन्तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत् साधनान्तरं मय्येवासक्तमनाः भवति यस्त्वमेवम्भूतः सन् असंशयं समग्रं समस्तः विभूतिबलशक्त्यैश्वर्य्यादिगुणसम्पन्नं मां यथा येन प्रकारेण ज्ञास्यसि संशयमन्तरेणैवमेव भगवानिति तच्छृणूच्यमानं मया॥ १॥

आनंदगिरिकृतटीका।

कर्मसंन्यासात्मकसाधनप्रधानं त्वंपदार्थप्रधानं वा प्रथमषट्कं व्याख्याय मध्यमषट्कमुपास्यनिष्ठं तत्पदार्थनिष्ठं वा व्याख्यातुमारभमाणः सप्तमाध्यायमवतारयति योगिनामिति अतीताध्यायान्तेनान्तरात्मना यो भजते मामिति प्रश्नबीजं प्रदर्श्य कीदृशं भगवतस्तत्त्वं कथं वा मद्गतान्तरात्मा स्यादित्यर्जुनस्य प्रश्नद्वये जाते स्वयमेव भगवान् अपृष्टमेव तद्वक्तुं इच्छन्नुक्तवानित्यर्थः परमेश्वरस्य वक्ष्यमाणविशेषणं सकलजगदायतनत्वादिना नानाविधविभूतिभागित्वं तत्रासक्तिर्मनसो विषयान्तरपरिहारेण तन्निष्ठत्वं मनसो भगवत्येवासक्तौ हेतुमाह योगमिति विषयान्तरपरिहारे हि गोचरमालोच्यमानो भगवत्येव प्रतिष्ठितो भवतीत्यर्थः तथापि स्वाश्रये पुरुषो मनः स्थापयति नान्यत्रेत्याशङ्क्याह मदाश्रय इति योगिनो यदीश्वराश्रयत्वेन तस्मिन्नेवासक्तमनस्त्वमुक्तं तदुपपादयति यो हीति ईश्वरात्स्वाश्रयस्य प्रतिपत्तिमेव प्रकटयति हित्वेति अस्तु योगिनस्त्वदाश्रयप्रतिपत्त्या मनसस्त्वय्येवासक्तिस्तथापि मम किमायातमित्या-

शङ्करभाष्यम्।

योगिनामिति योगिनामपि सर्वेषां रुद्रादिध्यानपराणां मध्ये मद्गतेनमयि वासुदेवे सम नान्तरात्मनान्तःकरणेन श्रद्धावान् श्रद्दधानः सन्भजते सेवते यो मां स मे मम युक्तत शयेन युक्तो मतोऽभिप्रेत इति ॥ ४७ ॥

इतिश्रीभगवद्गीताभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

आनंदगिरिकृतटीका।

नत्वादित्यो विराडात्मा सूत्रं कारणमक्षरमित्येतेषामुपासका भूयांसो योगिनो म्यन्ते तेषां कतमः श्रेयानिष्यते तत्राह योगिनामिति यो भगवन्तं सगुणं निर्गुणं यथोक्तेन चेतसा श्रद्दधानः सन्ननवरतमनुसन्धत्ते स युक्तानां मध्येऽतिशयेन युक्तः नीश्वरस्याभिप्रेयः नहि तदीयोऽभिप्रायोऽन्यथाभवितुमर्हतीत्यर्थः तदनेनाध्यायेन योगस्य संन्यासहेतोर्मर्यादां दर्शयता सांगयोगं विवृण्वता मनोनिग्रहोपायो योगभ्रष्टस्यात्यन्तिकनाशशंकाञ्च शिथिलयता त्वं पदार्थाभिन्नस्य ज्ञाननिष्ठ वाक्यार्थज्ञानान्मुक्तिरिति साधितम् ॥ ४७ ॥

इति आनन्दगिरिकृतटीकायां षष्ठोऽध्यायः ॥ ६ ॥

स्वामिकृतटीका।

योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिनामपीति म तेन मय्यासक्तेनान्तरात्मना मनसा यो मां परमेश्वरं श्रद्धायुक्तः सन् भजते स क्तेभ्यः श्रेष्ठो मम सम्मतः अतो मद्भक्तो भवेति भावः ॥ आत्मयोगमवोचद्यो म योगशिरोमणिम् । तं वन्दे परमानन्दं माधवं भक्तसेवधिम् ॥ ४७ ॥

इति श्रीधरस्वामिकृते षष्ठोऽध्यायः ॥ ६ ॥

नवलभाष्य।

और हे अर्जुन योगियोंमेंभी जे रुद्रादि देवताओंके ध्यान में परा योगी हैं तिनयोगियोंके मध्यमें मैं जो वासुदेव परमात्मा तिसमें ल हुआ जो अन्तःकरण तिसकरके श्रद्धायुक्तहोके जो मेराभजन करता मुझको सबसेश्रेष्ठ योगी अभिमतहैअर्थात् उसीमें योगिशब्दकाअर्थ पायाजाताहै यहमेरा अभिप्रायहै ॥ ४७ ॥

इतिश्रीमद्भगवद्गीताभगवच्छंकराचार्यकृतभाष्यंमगंयानुसारसंस्कृत नन्दर्दिकामृतान्येनवलभाष्येषष्ठोऽध्यायसमाप्तः ॥ ६ ॥

श्रीमद्भगवद्गीतासटीक॥

सप्तमोऽध्यायः।

श्रीभगवानुवाच।

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु॥ १॥

शङ्करभाष्यम्।

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना। श्रद्धावान् भजते यो मां समेयुक्ततमो मत इति
बीजमुपन्यस्य स्वयमेव ईदृशं मदीयं तत्त्वमेवं मद्गतान्तरात्मा स्यादित्येतद्विवक्षुर्भगवानुवाच
मयीति मयि वक्ष्यमाणविशेषणे परमेश्वरे आसक्तं मनो यस्य स मय्यासक्तमनाः हे पार्थ
युञ्जन् मनःसमाधानं कुर्वन् मदाश्रयोऽहमेव परमेश्वर आश्रयो यस्य स मदाश्रयो
कश्चित् पुरुषार्थेन केनचिदर्थी भवति स तत् साधनं कर्माग्निहोत्रादितपोदानं वा किंचिदा
प्रतिपद्यते अयन्तु योगी मामेवाश्रयं प्रतिपद्यते हित्वान्यत् साधनान्तरं मय्येवासक्तमनाः भ
यस्त्वमेवम्भूतः सन् असंशयं समग्रं समस्तः विभूतिबलशक्त्यैश्वर्यादिगुणसम्पन्नं मां यथा
प्रकारेण ज्ञास्यसि संशयमन्तरेणैवमेव भगवानिति तच्छृणूच्यमानं मया॥ १॥

आनंदगिरिकृतटीका।

कर्मसंन्यासात्मकसाधनप्रधानं त्वं पदार्थप्रधानं वा प्रथमषट्कं व्याख्याय मध्यम
कमुपास्यनिष्ठं तत्पदार्थनिष्ठं वा व्याख्यातुमारभमाणः समनन्तराध्यायमवतारय
योगिनामिति अतीताध्यायान्तेनान्तरात्मना यो भजते मामिति प्रश्नबीजं प्र
कीदृशं भगवतस्तत्त्वं कथं वा मद्गतान्तरात्मा स्यादित्यर्जुनस्य प्रश्नद्वये जाते स्वय
भगवान् अपृष्टमेव तद्वक्तुं इच्छन्नुक्तवानित्यर्थः परमेश्वरस्य वक्ष्यमाणविशेषणं सकल
गदायतनत्वादिना नानाविधविभूतिभागित्वं तत्रासक्तिर्मनसो विषयान्तरपरिहारेण
निष्ठस्य मनसो भगवत्येवासक्तौ हेतुमाह योगमिति विषयान्तरपरिहारे हि गोचरमा
प्यमानो भगवत्येव प्रतिष्ठितो भवतीत्यर्थः तथापि स्वाश्रये पुरुषो मनः स्थापय
मानत्वेन्याशङ्क्याह मदाश्रय इति योगिनो यदीश्वराश्रयत्वेन तन्निःश्रेयसमनन्य
न्यात तदुपपादयति यो होति ईश्वराश्रयत्वस्य प्रतिपत्तिमेव प्रकटयति हित्वे
अन्तु योगिनस्त्वदाश्रयप्रतिपत्त्या मनसस्त्वय्येवासक्तिस्तथापि सम किमायातमित्य

शङ्करभाष्यम्।

योगिनामिति योगिनामपि सर्वेषां रुद्रादिध्यानपराणां मध्ये मद्गतेनमयि वासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान् श्रद्दधानः सन्भजते सेवते यो मां स मे मम युक्ततमोऽतिशयेन युक्तो मतोऽभिप्रेत इति ॥ ४७ ॥

इतिश्रीभगवद्गीताभाष्ये षष्ठोऽध्यायः ॥ ६ ॥

आनंदगिरिकृतटीका।

नन्वादित्यो विराडात्मा सूत्रं कारणमक्षरमित्येतेषामुपासका भूयांसो योगिनो दृश्यन्ते तेषां कतमः श्रेयानिष्यते तत्राह योगिनामिति यो भगवन्तं सगुणं निर्गुणं वा यथोक्तेन चेतसा श्रद्दधानः सन्ननवरतमनुसन्धत्ते स युक्तानां मध्येऽतिशयेन युक्तः सन् मे नेश्वरस्याभिप्रेयः नहि तदीयोऽभिप्रायोन्यथाभवितुमर्हतीत्यर्थः तदनेनाध्यायेन कर्मयोगस्य संन्यासहेतोर्मर्यादां दर्शयता सांगयोगं विवृण्वता मनोनिग्रहोपायमुपदिश्य योगभ्रष्टस्यात्यन्तिकनाशशंकाञ्च शिथिलयता त्वं पदार्थाभिज्ञस्य ज्ञाननिष्ठस्य वाक्यार्थज्ञानान्मुक्तिरिति साधितम् ॥ ४७ ॥

इति आनन्दगिरिकृतटीकायां षष्ठोऽध्यायः ॥ ६ ॥

स्वामिकृतटीका।

योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिनामपीति मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां परमेश्वरं श्रद्धायुक्तः सन् भजते स योगारूढेभ्यः श्रेष्ठो मम सम्मतः अतो मद्भक्तो भवेति भावः ॥ आत्मयोगमवोचद्यो भक्तियोगशिरोमणिम्। तं वन्दे परमानन्दं माधवं भक्तसेवधिम् ॥ ४७ ॥

इति श्रीधरस्वामिकृते षष्ठोऽध्यायः ॥ ६ ॥

नवलभाष्य।

और हे अर्जुन योगियोंमेंभी जे रुद्रादि देवताओंके ध्यान में तत्पर योगी हैं तिनयोगियोंके मध्यमें मे जो वासुदेव परमात्मा तिसमें लगा हुआ जो अन्तःकरण तिसकरके श्रद्धायुक्त होके जो मेराभजन करता है सो हमारा मतमें श्रेष्ठ योगी अभिमत है अर्थात् उत्तम योगी [illegible] ऐसा जानाहै यह मेरा अभिप्राय है ॥ ४७ ॥

इतिश्री [illegible] षष्ठोऽध्यायः ॥ ६ ॥

ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते॥ २॥

शङ्करभाष्यम्।

तच्च मद्विषयं ज्ञानमिति ज्ञानं ते तुभ्यमहं सविज्ञानं विज्ञानसहितं स्वानुभवसंयुक्तमिदं वक्ष्यामि कथयिष्याम्यशेषतः कात्स्न्र्येन तज्ज्ञानं विवक्षितं स्तौति श्रोतुरभिमुखीकरणाय यत् ज्ञात्वा यत् ज्ञानं ज्ञात्वा नेह भूयः पुनः ज्ञातव्यं पुरुषार्थसाधनमवशिष्यते नावशेषो भवतीति तत्त्वज्ञो यः स सर्वज्ञो भवतीत्यर्थः॥ २॥

आनन्दगिरिकृतटीका।

ज्ञास्यसीत्युक्त्या परोक्षज्ञानशंकायां तन्निवृत्त्यर्थं तदुक्तिप्रकारमेव विवृणोति तच्चेति इदमपरोक्षं ज्ञानं चैतन्यं तस्य सविज्ञातस्य प्रतिलम्भे किं स्यादित्याशङ्क्याह यज्ज्ञात्वेति इदमाचैतन्यस्य परोक्षत्वं व्यावर्त्तते तदेव सविज्ञानमिति विशेषणेन स्फुटयति अशेषतः अनवशेषेण तद्वेदनफलोपन्यासेन श्रोतारं तत्श्रवणप्रवणं करोति तज्ज्ञानमिति एकविज्ञानेन सर्वविज्ञानश्रुतिमाश्रित्योत्तरार्द्धतात्पर्यमाह यज्ज्ञात्वेति॥ २॥

स्वामिकृतटीका।

वक्ष्यमाणं स्तौति ज्ञानमिति ज्ञानं शास्त्रीयं विज्ञानमनुभवस्तत्सहितमिदं मद्विषयमशेषतः साकल्येन वक्ष्यामि यज्ज्ञात्वा इह श्रेयोमार्गे वर्त्तमानस्य पुनरन्यज्ज्ञातव्यमवशिष्टं न भवति तेनैव कृतार्थो भवतीत्यर्थः॥ २॥

नवलभाष्य।

और हे अर्जुन विज्ञान सहित अर्थात् अनुभव सहित जो यहज्ञान तिसको मैं तुझसे संपूर्ण भावकरके कहताहूं अब श्रोताको सन्मुख करने को भगवान् जिसज्ञानको आगे कहेंगे तिसकी स्तुति करते हैं अर्थात् तारीफ करतेहैं कि हे अर्जुन जिसज्ञानको जानके फिर और जानने योग्य कुछ बाकीनहीं रहेगा अर्थात् जो तत्त्वज्ञ पुरुष होताहै सो सर्वज्ञ होताहै॥ २॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः॥ ३॥

शङ्करभाष्यम्।

अतो विशिष्टफलत्वात् दुर्लभतरं ज्ञानं कथमित्युच्यते मनुष्याणामिति मनुष्याणां मध्ये सहस्रेषु कश्चिद्यतति सिद्धये सिद्ध्यर्थं यतति प्रयत्नं करोति तेषां यततामपि सिद्धानां सिद्धा हि ते ये मोक्षाय मोक्षमार्गे यतन्ते तेषां कश्चिदेव मां वेत्ति तत्त्वतो यथावत्॥ ३॥

आनंदगिरिकृतटीका।

भगवत्प्रसादलभ्यज्ञानस्य विशिष्टफलत्वमुक्त्वा फलितमाह अत इति [illegible] दुर्लभत्वं [illegible] प्रकटयति कथमित्यादिना [illegible] [illegible] कश्चिद्यतति सिद्धये [illegible] [illegible] [illegible] [illegible]

बुद्धिशब्दस्य निश्चयात्मककरणविषयत्वमाशङ्क्याह बुद्धिरितीति नहि हिरण्यगर्भसमष्टिबुद्धिरूपमन्तरेण व्यष्टिबुद्धिः सिध्यतीत्यर्थः अहङ्कारस्याभिमानविशेषात्मकत्वेनान्तःकरणप्रभेदत्वं व्यावर्त्तयति अहङ्कार इति अविद्यासंयुक्तमित्यविद्यात्मकमित्यर्थः कथं मूलकारणस्याहङ्कारशब्दत्वमित्याशङ्क्योक्तमर्थं दृष्टान्तेन स्पष्टयति यथेत्यादिना मूलकारणस्याहङ्कारशब्दत्वे हेतुमाह प्रवर्तकत्वादिति तस्य प्रवर्तकत्वं प्रपञ्चयति अहङ्कार एवेति सत्येवाहङ्कारे ममकारो भवति तयोश्चाभावे सर्वाऽप्रवृत्तिरिति प्रसिद्धमित्यर्थः उक्तां प्रकृतिमुपसंहरति इतीयमिति इयमित्यपरोक्षा साक्षिदृश्येति यावत् ऐश्वरी तदाश्रया तदैश्वर्योपाधिभूता प्रक्रियते महदाद्याकारेणेति प्रकृतिस्त्रिगुणं जगदुपादानं प्रधानमिति मतं व्युदस्यति मायेति तस्यास्तत्कार्याकारेण परिणामयोग्यत्वं द्योतयति शक्तिरिति अष्टधेति अष्टभिः प्रकारैरिति यावत् ॥ ४ ॥

स्वामिकृतटीका ।

एवं श्रोतारमभिमुखीकृत्येदानीं प्रकृतिद्वारा सृष्ट्यादिकर्तृत्वेनेश्वरतत्त्वं प्रतिज्ञातं निरूपयिष्यन् परापरभेदेन प्रकृतिद्वयमाह भूमिरिति द्वाभ्यां भूम्यादीनि पञ्चभूतसूक्ष्माणि मनःशब्देन तत्कारणभूतोऽहङ्कारः बुद्धिशब्देन तत्कारणं महत्तत्त्वं अहङ्कारशब्देन तत्कारणमविद्या इत्येवमष्टधा भिन्ना यद्वा भूम्यादिशब्दैः पञ्चमहाभूतानि सूक्ष्मैः सहैकीकृत्य गृह्यन्ते अहङ्कारशब्देनैवाहङ्कारस्तेनैव तत्कार्याणीन्द्रियाण्यपि गृह्यन्ते बुद्धिरिति महत्तत्त्वं मनःशब्देन तु मनसैवोन्नेयमव्यक्तस्वरूपं प्रधानमित्यनेन प्रकारेणमे प्रकृतिर्मायाख्या शक्तिरष्टधा भिन्ना विभागं प्राप्ता चतुर्विंशतिभेदभिन्नाप्यष्टस्वेवान्तर्भाव विवक्षयाऽष्टधा भिन्नेत्युक्तं तथाच क्षेत्राध्याये इमामेव प्रकृतिं चतुर्विंशतितत्त्वात्मना प्रपञ्चयिष्यति ॥ महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेवचाइन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचरा इति ॥ ४ ॥

नवलभाष्य ।

अब इसके उपरांत श्रोता जो अर्जुन तिसको रुचिके उत्पन्न करानेवाले वचनों करके भगवान् अपने संमुख करके कहनेके योग्य जो पदार्थ तिसको कहते हैं कि (भूमिरिति) हे अर्जुन भूमिं अर्थात् यहां भूमिशब्द करके भूमि का सूक्ष्मरूप जो तन्मात्रागन्ध तिसका ग्रहण विवक्षितहै कुछ स्थूल पृथिवीका ग्रहण नहींहै क्योंकि आगे (भिन्नाप्रकृतिरष्टधा) यहां भूम्यादिकों को प्रकृति शब्दकरिके भगवान् कहेंगे तो उससे विरोध पायाजायगा क्योंकि प्रकृतिनाम गन्धादिकोंहीकाहै पृथिवी आदिस्थूल भूतोंको तो विकार शब्द करके कहाहै तैसेही जलशब्दसे यहां रसका ग्रहणहै और अग्निशब्दकरिके रूपका ग्रहणहै और वायुशब्द करके स्पर्शका ग्रहणहै और आकाश शब्द करके शब्दका ग्रहणहै और मनशब्दसे मनका कारण जो अहंकार तिसका ग्रहणहै और बुद्धि शब्दकरिके महत्तत्त्वका ग्रहणहै जो हिरण्य गर्भकी बुद्धि है उस बुद्धिमें सबजीवोंकी व्यष्टि बुद्धियां अन्तर्गतहोतीहैं अर्थात् उसके भीतर आजातीहैं और ऐसेही अहंकार शब्दकरके अविद्या संयुक्त अव्यक्तका ग्रहणहै जैसे विषसे मिलाहुआ जो अन्नहै सो विषही कहाजाताहै ऐसेही

सिद्धिमित्याशङ्क्याह सिद्धा एवेति सर्वेषामेव तेषां ज्ञानोदयात्तस्य सुलभत्वमित्याश-
ङ्क्याह तेषामिति ॥ ३ ॥

स्वामिकृतटीका।

मद्भक्तिं विना तु मज्ज्ञानं दुर्लभमित्याह मनुष्याणामिति असंख्यातानां जी-
मध्ये मनुष्यव्यतिरिक्तानां श्रेयसि प्रवृत्तिरेव नास्ति मनुष्याणान्तु सहस्रेषु मध्ये क-
देव पुण्यवशात् सिद्धये आत्मज्ञानाय प्रयतते प्रयत्नं कुर्वतामपि सहस्रेषु प्राक्तनपुण्य-
दात्मानं वेत्ति तादृशानां चात्मज्ञानां सहस्रेषु कश्चिदेव मां परमात्मानं मत्प्र-
तत्त्वतो वेत्ति तदेवमतिदुर्लभमप्यात्मतत्त्वं तुभ्यमहं वक्ष्यामीत्यर्थः ॥ ३ ॥

नवलभाष्य।

इससे विशेष फलरूप होनेसे वह अतिदुर्लभज्ञानकैसाहै इसप्रकार
कहते हैं कि(मनुष्याणामिति) हे अर्जुन मनुष्योंके मध्यमें अनेक हजा-
कोईएकतौ मोक्षकेअर्थ यत्नकरताहै और मोक्षके अर्थ यत्नकरतेहुये जो
हैं अर्थात् मोक्षमार्गमें प्रवृत्तहोके जे मोक्षकेलिये यत्नकरते हैं तेभी
सिद्धही कहाते हैं इससे भगवान्ने ऐसाकहा तिनयत्न करनेवाले सि-
मध्यमें भी कोईही मुझको तत्त्वकरके जानताहै अर्थात् यथावत् जानता
सव सिद्धलोग भी मुझको जैसामैहौं तैसा नहीं जानसके हैं ॥ ३ ॥

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्नाप्रकृतरष्टधा ॥ ४ ॥

शङ्करभाष्यम्।

अतः श्रोतारं प्ररोचनेनाभिमुखीकृत्याह भूमिरिति भूमिरिति पृथिवीतन्मात्रमुच्यते न स्थू-
भिन्ना प्रकृतिरष्टधेति वचनात् तथाऽबादयोऽपि तन्मात्राण्येवोच्यन्ते आपोऽनलो वायुः ख-
मन इति मनसः कारणं अहंकारो गृह्यते बुद्धिरित्यहंकारकारणं महत्तत्त्वं अहंकार इत्यवि-
द्यासंयुक्तमव्यक्तं यथा विषसंयुक्तमन्नं विषमुच्यते एवमहंकारवासनावदव्यक्तं मूलका-
रणमहंकार इत्युच्यते प्रवर्तकत्वादहंकारस्य एवहि सर्वस्य प्रवृत्तिबीजं दृष्टं लोके इतीयं य-
थोक्ता प्रकृतिर्मे ममैश्वरी मायाशक्तिरष्टधा भिन्ना भेदमागता ॥ ४ ॥

आनन्दगिरिकृतटीका।

[illegible]

शङ्करभाष्यम्।

एतादिति एतद्योनीन्येते परापरे क्षेत्रक्षेत्रज्ञलक्षणे प्रकृती योनी येषां भूतानां तान्येतद्योनीनि भूतानि सर्वाणीत्येवमुपधारय जानीहि यस्मान्मम प्रकृतिर्योनिः कारणं सर्वभूतानां अतोऽहं कृत्स्नस्य समस्तस्य जगतः प्रभवः उत्पत्तिः प्रलयो विनाशस्तथा प्रकृतिद्वयद्वारेणाहं सर्वज्ञ ईश्वरो जगतः कारणमित्यर्थः ॥ ६ ॥

आनंदगिरिकृतटीका।

उक्तप्रकृतिद्वये कार्यलिङ्गकमनुमानं प्रमाणयति एतद्योनीति प्रकृतिद्वयस्य जगत्कारणत्वे कथमीश्वरस्य जगत्कारणत्वं तदुपगतमित्याशङ्क्याह अहमिति एतद्योनीत्युक्ते समनन्तरप्रकृतजीवभूतप्रकृतावेतच्छब्दस्याव्यवधानात् प्रवृत्तिमाशङ्क्य व्याकरोति एतादिति सर्वाणि चेतनाचेतनानि जनिमन्तीत्यर्थः सर्वभूतकारणत्वेन प्रकृतिद्वयमङ्गीकृतञ्चेत् कथमहमित्ययुक्तमित्याशङ्क्याह यस्मादिति मम प्रकृती परमेश्वरस्योपाधितया स्थिते इत्यर्थः तर्हि प्रकृतिद्वयं कारणमीश्वरश्चेति जगतोऽनेकविधकारणांगीकरणं स्यादित्याशङ्क्याह प्रकृतीति अपरप्रकृतिरचेतनत्वात्परप्रकृतेश्चेतनत्वेऽपि किञ्चिज्ज्ञत्वात् ईश्वरस्यैव सर्वकारणत्वं युक्तमित्याह सर्वज्ञेति ॥ ६ ॥

स्वामिकृतटीका।

अनयोः प्रकृतित्वं दर्शयन् स्वस्य तद्द्वारा सृष्ट्यादिकारणत्वमाह एतदिति एते चेत्र चेत्रज्ञस्वरूपे प्रकृती योनी कारणभूते येषां तानि एतद्योनीनि स्थावरजंगमात्मकानि सर्वाणि भूतानीति उपधारय बुध्यस्व तत्र जड़ा प्रकृतिर्देहरूपेण परिणमते चेतना तु मदंशभूता भोक्तृत्वेन देहेषु प्रविश्य स्वकर्मणा तानि धारयति ते च मदीये प्रकृती मत्तः सम्भूते अतोऽहमेव कृत्स्नस्य सप्रकृतिकस्य जगतः प्रभवः प्रकर्षेण भवत्यस्मादिति प्रभवः परमकारणमहमित्यर्थः तथा प्रलीयतेऽनेनेति प्रलयः संहर्ताप्यहमेवेत्यर्थः ॥ ६ ॥

नवलभाष्य।

और हे अर्जुन ने अपरा और परा क्षेत्रक्षेत्रज्ञसंज्ञकदोनों प्रकृतिहैं योनि अर्थात् कारण जिनके ऐसेसब भूतोंको अर्थात् प्राणियोंको तू जान और जिससे मेरी प्रकृति जो मायारूपशक्ति सो सबका कारणहै इससे प्रकृति द्वारा मैंही सबजगत्का प्रभवहों अर्थात् उत्पत्ति कारणहों और तैसेही प्रलय कारणभी मैंहीहूं अर्थात् मैं सर्वज्ञ ईश्वर जगत् कारणहों ॥ ६ ॥

मत्तः परतरं नान्यत् किंचिदस्ति धनंजय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ ७ ॥

शङ्करभाष्यम्।

यस्मादेवमतःमत्तः इतिमत्तः परमेश्वरात् परतरं अन्यत् कारणान्तरं किञ्चिन्नास्ति नविद्यते अहमेव जगत्कारणमित्यर्थः हे धनञ्जय यस्मादेवं तस्मान्मयि परमेश्वरे सर्वाणि भूतानि सर्वमिदं जगत् प्रोतमनुस्यूतमनुगतमनुविद्धं ग्रथितमित्यर्थः दीर्घतन्तुषु पटवत् सूत्रे च मणिगणाइव ॥ ७ ॥

आनन्दगिरिकृतटीका।

प्रधानात् परतोऽक्षरात् पुरुषस्य परमात्मनोऽपि परादन्यत् परं स्यादित्याशङ्क्य

अहंकारकी वासनायुक्त जो अव्यक्त अर्थात् मूलकारण प्रकृतिसो भी यहां अहंकार शब्दकरके कहाजाता है क्योंकि अहंकारको प्रवर्त्तकत्व है अर्थात् अहंकारही प्रवृत्तिमें कारण लोकमें देखाहै इससे हे अर्जुन सबकी प्रवृत्ति करानेवाली मेरीप्रकृति जो ऐश्वरीमाया शक्ति अर्थात् मैं जो ईश्वर तिसकी मायाशक्तिरूप जो प्रकृति सोई गन्ध तन्मात्रादि भेदकरके आठप्रकारके भेद को प्राप्तहै ॥ ४ ॥

अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मेऽपराम्।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥ ५ ॥

शङ्करभाष्यम्।

अपरेति अपरा न परा निकृष्टाऽशुद्धानर्थकरी संसाररूपा बन्धनात्मिकेयमितोऽन्यां यथोक्तायास्तु अन्यां विशुद्धां प्रकृतिं ममात्मभूतां विद्धि मे परां प्रकृष्टां जीवभूतां क्षेत्रज्ञलक्षणां प्राणधारणनिमित्तभूतां हे महाबाहो यया प्रकृत्या इदं धार्यते जगदन्तः प्रविष्टया ॥ ५ ॥

आनन्दगिरिकृतटीका।

अचेतनवर्गमेकीकर्तुं प्रकृतेरष्टधा परिणाममभिधाय. विकारावच्छिन्नं कार्यकरणं चेतनवर्गमेकीकर्तुं पुरुषस्य चैतन्यस्य विद्याशक्त्यवच्छिन्नस्यापि प्रकृतित्वं कथयितुमुक्तां प्रकृतिमनूद्य दर्शयति अपरेति निकृष्टत्वं स्पष्टयति अनर्थकरीति अनर्थकरत्वमेव स्फोरयति संसारेति कथञ्चिदप्यनन्यत्वव्यावृत्त्यर्थस्तुशब्दः अन्यामत्यन्तविलक्षणामिति यावत् अन्यत्वमेव स्पष्टयति विशुद्धामिति प्रकृतिशब्दस्यात्र प्रयुक्तस्यार्थान्तरमाह ममेति प्रकृष्टमेव भोक्तृत्वेन स्पष्टयति जीवभूतामिति प्रकृत्यन्तरादस्याः प्रकृतेरवान्तरविशेषमाह ययेति नहि जीवरहितं जगद्धारयितुं शक्यमित्याशयेनाह अन्तरिति ॥ ५ ॥

स्वामिकृतटीका।

अपरामिमां प्रकृतिमुपसंहरन् परां प्रकृतिमाह अपरेयमिति अष्टधा या प्रकृतिरुक्ता इयमपरा निकृष्टा जड़त्वात् परार्थत्वाच्च इतः सकाशात् परां प्रकृष्टामन्यां जीवभूतां जीवस्वरूपां मे प्रकृतिं जानीहि परत्वे हेतुः यया चेतनया क्षेत्रज्ञस्वरूपया स्वकर्मद्वारेणेदञ्चजगद्धार्यते ॥ ५ ॥

नवलभाष्य।

और हे अर्जुन इसप्रकृतिका नाम अपराहै अर्थात् नहीं जो परनाम उत्कृष्टहोय नामनिकृष्ट अशुद्धहोय और अनर्थके करनेवाली इसीसे संसाररूप बन्धनहीहै स्वरूप जिसका ऐसीयहहै और इससे दूसरी जो शुद्ध चेतनरूप प्रकृतिहै जिसको प्राणधारण करनेसे जीव कहतेहैं सो तो मेरास्वरूपभूतहीहै इससे हे अर्जुन इसको तो तू पराजान अर्थात् उत्कृष्टजान जिसप्रकृति करके सबजगत् धारण कियाजाताहै अर्थात् जो सबजगत्के भीतर प्रवेश करके सबको धारण करतीहै ॥ ५ ॥

एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

स्वामिकृतटीका ।

जगत्स्थितिहेतुत्वमेव प्रपञ्चयति रसोऽहमिति पञ्चभिः अप्सु रसोऽहं रस तन्मात्र स्वरूपया विभूत्या आश्रयत्वेनाप्सु स्थितोऽहमित्यर्थः तथा शशिसूर्ययोः प्रभास्मि चंद्रसूर्ये च प्रकाशरूपया विभूत्या तदाश्रयत्वेन स्थितोऽहमित्यर्थः अन्यत्रापीत्येवं द्रष्टव्यं सर्वेषु वेदेषु वैखरीरूपेषु तन्मूलभूत ओङ्कारोऽस्मि खे आकाशे शब्दः शब्दतन्मात्ररूपोऽस्मि नृषु पुरुषेषु पौरुषमुद्यमोऽस्मि उद्यमे पुरुषास्तिष्ठन्ति ॥ ८ ॥

नवलभाष्य ।

अब कदाचित् अर्जुनकहे कि कौन कौन धर्मकरके सबजगत् आपमेंपुहा हुआहै तो इस आकांक्षामें कहते हैं कि (रसइति) हे अर्जुन जैसे जलोंका साररसहै तैसेरसरूप जो मैंहूं तिसमें सारेजल पुहेहुये हैं और ऐसेही चन्द्रमा और सूर्य्य इनमें प्रभाकान्तिरूप मैंहूं और सब वेदोंमें ॐकाररूप मैंहूं तिस ॐकाररूप मेरेमें सबवेद संग्रथित होरहेहैं अर्थात् पिरोहे सरीखे होरहे हैं तैसे आकाशमें सारभूत शब्दहै तिस शब्दरूप मुझमें आकाश व्याप्तहोरहाहै तैसे पुरुषोंमें जो पुरुषत्व धर्महै अर्थात् पुरुषपना जिससे पुरुषयह है ऐसीबुद्धि होतीहै तिस पुरुषत्वरूप मेरेमें सबपुरुष पुहेहुये हैं ॥ ८ ॥

पुण्यो गन्धः पृथिव्याञ्च तेजश्चास्मि विभावसौ ।
जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥

शङ्करभाष्यम् ।

पुण्य इति पुण्यः सुरभिर्गन्धः पृथिव्यां चाहं [illegible]
गन्धस्य स्वभावत एव पृथिव्यां दर्शितमबादिषु रसादेः [illegible]
दविद्याधर्मापेक्षं संसारिणां भूतविशेषसंसर्गनिमित्तं [illegible]
तथा जीवनं सर्वभूतेषु येन जीवन्ति सर्वाणि भूतानि [illegible]
[illegible] तपस्विनः [illegible] ॥ ९ ॥

आनन्दगिरिकृतटीका ।

[illegible]

प्रकृतिद्वयद्वारा सर्वकारणत्वमीश्वरस्योक्तमुपजीव्य परिहर्तुं
परमित्यत्र हेतुमाह मयीति परतरशब्दार्थमाह अन्यदिति
शब्दः निषेधफलं कथयति अहमेवेति सर्वजगत्कारणत्वेन सि
नेन विशदयति यस्मादिति अतो दीर्घेषु तिर्यक्षु च पटघटि
वगम्यते तद्वन्मय्येवानुगतं जगदित्याह दीर्घे त यथा च
धीयन्ते तदभावे विप्रकीर्यन्ते तथा मय्येवात्मभूतेन सर्वं व्या
स्यादिति श्लोकोक्तं दृष्टान्तमाह सूत्रे इति ॥ ७ ॥

स्वामिकृतटीका।

यस्मादेवं तस्मान्मत्त इति मत्तः सकाशात् परतरं श्रेष्ठं
न्यं कारणं किञ्चिदपि नास्ति स्थितिहेतुरप्यहमेवेत्याह मयि
प्रोतं ग्रथितमाश्रितमित्यर्थः दृष्टान्तः स्पष्टः ॥ ७ ॥

नवलभाष्य।

और हे अर्जुन जिससे ऐसाहै इससे मैं जो ईश्वर
गत् कारणनहींहै और मेरेहीमें सब जगत् प्रोत होरह
जैसे सूतमें अर्थात् धागेमें मणियां संग्रथितहोवैं अर्थ
लम्बे तंतुओंमें वस्त्रपुहाहोय तैसे सारानगत् मुझसे

रसोऽहमप्सु कौन्तेय प्रभास्मि श
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं

शङ्करभाष्यम्।

केन केन धर्म्मेण विशिष्टे त्वयि सर्व्वमिदं प्रोतमित्युच्यते रस
रसस्तस्मिन् रसभूते मय्यापः प्रोता इत्यर्थः एवं सर्व्वत्र यथाहमप्सु
सूर्ययोः प्रणवः ओङ्कारः सर्ववेदेषु तस्मिन् प्रणवभूते मयि सर्ववेदा
शब्दः सारभूतः तस्मिन् मयि खं प्रोतं तथा पौरुषं पुरुषस्य भाव
तस्मिन् मयि पुरुषाः प्रोताः ॥ ८ ॥

आनन्दगिरिकृतटीका।

अबादीनां रसादिषु प्रोतत्वप्रतीतेस्त्वय्येव सर्वं प्रोतमित्यु
केनेति तत्रोत्तरमुत्तरग्रन्थेन दर्शयति उच्यत इतिसारो मधुरो
मिति कथं तत्राह तस्मिन्निति अप्सु यो रसः सारस्तस्मिन्मयि
आप इति यदुत्तरत्र सर्वत्र व्याख्यानं कर्तव्यमित्याह एवमिति
प्रभास्मीत्यादि व्याचष्टे यथेति चन्द्रादित्ययोर्या प्रभा तद्भूते
तत्र [illegible]

और हे अर्जुन सनातन अनादि कालसे चलाआया जो बीज अर्थात्
उत्पत्ति कारण सो मैंहीहूं और बुद्धिमान् पुरुषोंकी जो बुद्धिहै अर्थात् सत्
असत् पदार्थोंकी न्यारे न्यारे भावकरके जो अन्तःकरणको जाननेकी शक्ति
सो मैंहूं और तेजस्वी पुरुषोंका जो तेज प्रगल्भता जिससे साधारणपुरुष
कोईसामना नहींकरसक्ताहै अर्थात् तिरस्कार नहींकरसक्ताहै सो मैंहूं॥ १०॥

बलम्बलवतां चाहं कामरागविवर्जितम् ।
धर्म्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥

शङ्करभाष्यम् ।

बलमिति बलं सामर्थ्यमोजो बलवतामहं तच्च बलं कामरागविवर्जितं कामश्च रागश्च काम रागौ कामस्तृष्णा असन्निकृष्टेषु विषयेषु रागो रञ्जनाप्राप्तेषु विषयेषु ताभ्यां कामरागाभ्यां विवर्जितं देहादिधारणमात्रार्थं बलं सत्त्वमहमस्मि नतु यत् संसारिणां तृष्णा रागकारणं किंच धर्म्मोऽविरुद्धो धर्मेण शास्त्रार्थेन अविरुद्धो यः प्राणिषु भूतेषु कामो यथा देहधारणमात्राद्यर्थो ऽशनपानादिविषयः कामोऽस्मि हे भरतर्षभ ॥ ११ ॥

आनन्दगिरिकृतटीका।

यच्च बलवतां बलं तद्भूते मयि तेषां प्रोतत्वमित्याह बलमिति कामक्रोधादिपूर्वं कस्यापि बलस्यानुमतिं वारयति तच्चेति कामरागयोरेकार्थत्वमाशङ्क्यार्थभेदमावेदयति कामस्तृष्णेत्यादिना विशेषणसामर्थ्यसिद्धं व्यावर्त्यं दर्शयति नत्विति शास्त्रार्थाविरुद्ध कामभूते मयि तथाविधकामवतां भूतानां प्रोतत्वं विवक्षित्वाह किञ्चेति धर्माविरुद्ध काममुदाहरति यथेति ॥ ११ ॥

स्वामिकृतटीका।

किञ्च बलमिति· कामोऽप्राप्तेषु वस्तुष्वभिलाषो राजसः रागः पुनरभिलषितेऽर्थे प्राप्तेऽपि पुनरधिकेऽर्थे चित्तरञ्जनात्मकस्तृष्णापर्यायस्ताभ्यां विवर्जितं बलवतां बलमस्मि सात्त्विकं स्वधर्मानुष्ठानसामर्थ्यमहमित्यर्थः धर्मेणाविरुद्धः स्वदारेषु पुत्रोत्पादनमात्रोपयोगी कामोऽहमिति ॥ ११ ॥

नवलभाष्य।

और हे अर्जुन जो काम और रागइन करके रहित जो बलवान् पुरुषों का बलहै सो मैंहूं अर्थात् जेविषय समीप नहींहैं उन्होंमें भोगकी जो तृष्णा होनी उसको कामकहते हैं और जे अपने समीप विषय हैं तिन्होंमें प्रीति विशेषका होना उसको रागकहते हैं तिन कामरागके निमित्तसे जो शरीरमें बलनबढ़ायाजावे किंतु स्वभाव सिद्धही जोशरीरमात्र धारणके अर्थ जोबली पुरुषका बलहै सो मैंहीहूं नामवह बलमेरीही विभूतिहै और जो औरके तिरस्कारकी कामनासे वा स्त्री आदिभोगोंकी इच्छासे संपादनकिया जो बल है सो मेरी विभूतिनहींहै यह अभिप्रायहै और हेअर्जुन जो धर्मसे अविरुद्ध अर्थात् धर्मशास्त्रसे विरोध जिसमें नहीं पायाजाय ऐसा जो देह धारणमात्र

स्वामिकृतटीका।

किञ्च पुण्य इति पुण्योऽविकृतो गन्धो गन्धतन्मात्रं पृथिव्यामाश्रयभूतोऽहमि यद्वा विभूतिरूपेणाश्रयत्वस्य विवक्षितत्वात् सुरभिगन्धस्यैवोत्कृष्टतया विभूति पुण्योगन्ध इत्युक्तं तथा विभावसौ अग्नौ यत्तेजो दुःसहा दीप्तिस्तदहं सर्व जीवनं प्राणधारणमायुरहमित्यर्थः तपस्विषु वानप्रस्थादिषु द्वन्द्वसहनरूपं तपोऽस्मि

नवलभाष्य।

और पृथिवीमें जो पुण्यअति पवित्रगन्धहै अर्थात् जो घ्राणइन्द्रीको प्रकरनेवाला सुरभिनाम करकेहै सो मैंहीहूं तिसीमें पृथिवी पुहरहीहै यहां गन्धमें पुण्यत्व धर्म जो है सो स्वभावहीसे पृथिवी में रहताहै ए जलादिकोंमें रसादिकोंमें भी जो पुण्यत्वहै सो स्वाभाविकहै और वोही विभूतिहै यह भगवान्ने यहां पुण्यशब्दके कहनेसे सूचितकिया और गन्धादिकोंमें अपुण्यताहै अर्थात् खराबपनाहै सोतो अविद्या धर्मादिको अपेक्षा करके सांसारिक प्राणियोंके संसर्गसेहै अर्थात् उन प्राणियोंके पा दि दोषोंसे गन्धादिकोंमें भी विकार उत्पन्नहुये हैं प्रथम तो पुण्य रूपही और हे अर्जुन अग्निमें दीप्ति जो प्रकाशहै सो मैंहीहूं और तपस्वी लोग सार जो तपहै सो मैंहूं तिस तपरूप मेरेमें सबतपस्वी पुहरहे हैं ॥ ९॥

बीजं मां सर्वभूतानां विद्धि पार्थ सनातनम्।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्॥ १०॥

शङ्करभाष्यम्।

बीजमिति बीजं प्ररोहकारणं मां विद्धि सर्व्वभूतानां हे पार्थ सनातनं चिरन्तनं कि बुद्धिर्विवेक शक्तिरन्तःकरणस्य बुद्धिमतां विवेकशक्तिमतामस्मि तेजः प्रागल्भ्यं त तेजस्विनामहं ॥ १० ॥

आनंदगिरिकृतटीका।

ननु सर्वाणि भूतानि स्वकारणे प्रोतानि कथं तेषां त्वयि प्रोतत्वं तत्राह बीजमि बीजान्तराद्यपेक्षयाऽनवस्थां वारयति सनातनमिति चैतन्यस्याभिव्यञ्जकं तत्त्वनि श्चयसामर्थ्यं बुद्धिस्तद्वतां या बुद्धिस्तद्भूते मयि सर्वे बुद्धिमन्तः प्रोता भवन्तीत्य किञ्चेति प्रागल्भ्यवतां यत् प्रागल्भ्यं तद्भूते मयि तद्वन्तः प्रोता इत्याह तेज इति तं प्रागल्भ्यं यत्पराभिभवसामर्थ्यं परैश्च प्रधृष्यत्वम् ॥ १० ॥

स्वामिकृतटीका।

किञ्च बीजमिति। सर्वेषां चराणां भूतानां बीजं सजातीयोत्पादनसामर्थ्यं प्रक नित्यं उत्तरोत्तरसर्वकार्येष्वनुस्यूतं तदेव बीजं मद्विभूतिं विद्धि ननु प्रकृतिर्यक्ति नाश्यत् तथा बुद्धिमतां बुद्धिः प्रज्ञाहमस्मि तेजस्विनां प्रगल्भानां तेजः प्रा महं ॥ १० ॥

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ १३ ॥

शङ्करभाष्यम् ।

एवम्भूतमपि परमेश्वरं नित्यशुद्धबुद्धमुक्तस्वभावं सर्वभूतात्मानं निर्गुणं संसारदोषबीजप्ररोहकारणं मां नाभिजानाति जगदित्यनुक्रोशं दर्शयति भगवान् तच्च किं निमित्तं जगतोऽज्ञानमुच्यते त्रिभिरिति त्रिभिर्गुणमयैर्भावैर्गुणविकारैः रागद्वेषमोहादिप्रकारैर्भावैः पदार्थैरेभिर्यथोक्तैः सर्वमिदं प्राणिजातं जगत् मोहितमविवेकतामापादितं सत् नाभिजानाति मामेभ्यो यथोक्तेभ्यो गुणेभ्यः परं व्यतिरिक्तं विलक्षणञ्चाव्ययं व्ययरहितं जन्मादिसर्व्वभावविकारवर्जितमित्यर्थः ॥ १३ ॥

आनन्दगिरिकृतटीका ।

सतोश्वरस्य स्वातन्त्र्ये नित्यशुद्धत्वादौ च कुतो जगतस्तदात्मकस्यसंसारित्वमित्याशङ्कतदज्ञानादित्याह एवम्भूतमपीति यद्यप्रपञ्चोऽविक्रियश्च त्वंःकस्मात्त्वामात्मभूतं स्वयंप्रकाशं सर्वो जनस्तया न जानातीति मत्वा शङ्कते तच्चेति श्लोकेनोत्तरमाह उच्यत इतिएभ्यः परमित्यप्रपञ्चकत्वमुच्यते अव्ययमिति सर्वविक्रियाराहित्य ॥ १३ ॥

स्वामिकृतटीका ।

एवं भूतमीश्वरं त्वामेवं जनः किमिति नजानातीत्यत आह त्रिभिरिति त्रिभिस्त्रिविधैरेभिः पूर्वोक्तैर्गुणमयैः कामलोभादिभिर्गुणविकारैर्भावैः स्वभावैर्मोहितमिदं जगत् अतो मां नाभिजानाति कथंभूतं एभ्यो भावेभ्यः परं एभिरस्पृष्टं एतेषां नियंतारं अत एवाव्ययं निर्विकारमित्यर्थः ॥ १३ ॥

नवलभाष्य ।

अब इसप्रकार नित्यशुद्ध बुद्धमुक्त स्वभाव और सबभूतोंका आत्मा और निर्गुण और संसारदोष बीजके प्ररोहका अर्थात् अंकुरका कारण ऐसा जोमैंहूं तिसकोजगत् नहीं जानताहै यह अपनी दया दिखातेहुये भगवान् सोवहजगत्केअज्ञानमें क्या निमित्तहै इस आकांक्षामें कहतेहैं(त्रिभिरिति)हे अर्जुन तीनगुणमय अर्थात् गुणोंके विकार भावनाम रागद्वेष मोहादि प्रकारके पदार्थ तिन्होंकरके मोहित अर्थात् अविवेकताको प्राप्तहुआ जो प्राणियोंका समूहरूप जो जगत् सो इनगुणमय विकारोंसेपरे अर्थात् इनकरके रहित इनसे विलक्षण जन्मादि सबभाव विकारों करके वर्जित जो मैंहूं तिसको नहीं जानताहै ॥ १३ ॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ १४ ॥

शङ्करभाष्यम् ।

कथं पुनर्दैवीमेतां त्रिगुणात्मिकां वैष्णवीं मायामतिक्रामन्तीत्युच्यते दैवीति दैवी देवस्य विष्णोः स्वभावभूता हि यस्मात् एषा यथोक्ता गुणमयी मम माया दुरत्यया दुःखेनात्ययोऽतिक्रमणं यस्याः सा दुरत्यया तत्रैवं सति सर्वधर्मान् परित्यज्य मामेव मायाविनं स्वात्मभूतं स

र्वात्मना ये प्रपद्यन्ते ते मायामेतां सर्व्वभूतचित्तमोहिनीं तरन्त्यतिक्रामन्ति मुच्यन्त इत्यर्थः ॥ १४ ॥

आनंदगिरिकृतटीका।

यथोक्ताऽनादिसिद्धमायापारवश्यपरिपर्य्यनायोगात्... न कदाचिदपि मुदयमम्भावनेत्याशङ्क्यते कथं पुनरिति भगवदेकशरणतया तत्त्वज्ञानद्वारेण मः सम्भवतीति परिहरति उच्यत इतिकथंदुरत्ययत्वेन तदत्यय: स्यादिति वेति प्रधानस्यैव स्वातंत्र्य मायाया व्युदस्यति दैवत्येति स्वातन्त्र्ये माया हिशब्दद्योतितां हेतुं करोति यस्मादिति अनुभवसिद्धा सानकस्मादपलाप सर्पेति जगतस्ततत्वप्रतिवन्धकीभूता गुणाः सत्वादयो ममेति प्रागुक्तमेव सम्बन्धमनूद्य विधित्सितं दुरत्ययत्व विभजते दुःखेनेतिममैवेत्यादि व्या तस्मिन् मायारूपे यथोक्तरीत्या दुरत्यये सतीति यावत् मामेवेत्येवकारेण वेद्यकोटिनिवेशाभावो विवक्षते सर्वात्मना कर्म्मानुष्ठानादिव्यग्रतामन्तरेण्य तिक्रमो मोहातिक्रमो भवतीति मत्वा विशिनष्टि सर्वेति मायातत्प्रयुक्त मेऽपि कथंपुरुषस्य पुरुषार्थ सिद्धिरित्याशंक्याह तेनेति ॥ १४ ॥

स्वामिकृतटीका।

के तर्हि त्वां जानन्तीत्यत आह दैवीति दैवी अलौकिकी अत्यद्भुते मयी सत्वादिगुणविकारात्मिका मम परमेश्वरस्य शक्तिर्माया दुरत्यया दु प्रसिद्धमेततथापि मामेवेत्येवकारेणाव्यभिचारिण्या भक्त्या ये प्रपद्यन्ते मायामेतां सुदुस्तरामपि ते तरन्ति ततो मां जानन्तीति भावः ॥ १४ ॥

नवलभाष्य।

फिरकैसे इसदैवी त्रिगुणात्मिका वैष्णवी मायाको तरते हैं अर्था इससे पारहोतेहैं प्राणी इसहेतुसे इसका उपाय भगवान् कहतेहैं (दै ति) हे अर्जुन दैवी अर्थात् देव जो ईश्वर विष्णु मैं तिसकी स्वभा हीयह त्रिगुणात्मिका मायाकही इसीसेदुरत्ययहै अर्थात् दुःखतरहै क्रमण उल्लंघन [illegible]ऐसी है तबजब ऐसेहुआ तो सबधर्मोंको त्या मायावी और अपना आत्मभूत जो मैं तिसीके शरणजे प्राप्तहोतेहैं प्राणियोंके चित्तके मोहन करनेवाली जो यहमाया तिसको उल्लंघन हैं अर्थात् तिसके पारहोके संसार बन्धनसे छूटते हैं अर्थात् निवारण णहोनेके और कोईदूसरा उपाय इसमायाके तरनेका नहीं है ॥ १४ ॥

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराऽध[illegible]
माययाऽपहृतज्ञाना आसु[illegible] [illegible]॥

शंकरभाष्य।

आनन्दगिरिकृतटीका।

भगवन्निष्ठाया मायातिक्रमहेतुत्वे तदेकनिष्ठत्वमेव सर्वेषामुचितमिति पृच्छति यद्येति पापकारित्वेनाविवेकभूयस्तया हिंसानृतादिभूयस्त्वाद्भूयसां जन्तूनां न भगवन्निष्ठत्वसिद्धिरित्याह उच्यत इति मौढ्यं पापकारित्वे हेतुरत एव निकृष्टाः संमुषितमिव तिरस्कृतं ज्ञानं स्वस्वरूपचैतन्यमेषामिति ते तथा ॥ १५ ॥

स्वामिकृतटीका।

किमिति तर्हि सर्वे त्वामेव न भजन्तीत्यत आह न मामिति नरेषु येऽधमास्ते मां न प्रपद्यन्ते न भजन्ति अधमत्वे हेतुः मूढा विवेकशून्याः तत्कुतो दुष्कृतिनः पापशीला अतो मयापहृतं निरस्तं शास्त्राचार्योपदेशाभ्यां जातमपि ज्ञानं येषां ते तथा अतएव दम्भो दर्पोऽभिमानश्च क्रोधपारुष्यमेवचेत्यादिना वक्ष्यमाणमासुरं भावं स्वभावं प्राप्ताः सन्तो न मां भजन्ति ॥ १५ ॥

नवलभाष्य।

अब जो आपहीके शरण होनेसे इसमायाके पारहोते हैं तो सबी प्राणी आपहीके शरण क्यों नहींहोते इस आशंकाको दूरकरतेहुये कहते हैं कि (नमामिति) हे अर्जुन ने इस संसारमें दुष्कृतपाप करनेवाले मनुष्यों में अधम मूढ़ पुरुषहैं तेमेरी शरणही नहीं प्राप्तहोतेहैं किंतुमाया करके अपहृत चुरायागयाहै विवेकज्ञान जिन्होंका ऐसेहुये हिंसा अनृतभाषण दंभ दर्पादि रूप जो असुरोंका स्वभावहै तिसका आश्रयण करतेहैं अर्थात् जब पापवश करके उनका विवेकज्ञान नष्टहोगया तो ईश्वरको जानही नहीं सके और उलटा संशय ग्रस्त चित्तहोके ईश्वर विषय मेंभी नानाप्रकारकी कुतर्ककरते हैं और रामकृष्णादिकों को ईश्वरावतारही वे आसुर पुरुष नहीं कहते हैं फिर उनके वचनोंमें श्रद्धाकरके कैसे परमेश्वरके शरणप्राप्तहोंय इसीसे वे मूढ़ पुरुष हिंसादिदोष ग्रस्तहुये विषय जालमें नानाप्रकारके दुःखोंकोअनुभव करतेभी कभी विरक्त नहींहोते हैं ॥ १५ ॥

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ॥ १६ ॥

शङ्करभाष्यम्।

ये पुनर्नरोत्तमाः पुण्यकर्माणः चतुर्विधेति चतुर्विधाश्चतुःप्रकारा भजन्ते सेवन्ते मां जनाः सुकृतिनः पुण्यकर्माणो हे अर्जुन आर्त्तः आर्तिपरिगृहीतः तस्करव्याघ्ररोगादिना अभिभूतःआभिभवं आपन्नो जिज्ञासुर्भगवत्तत्त्वं ज्ञातुमिच्छति योऽर्थार्थी धनकामो ज्ञानी विष्णोस्तत्त्वविच्च हे भरतर्षभ ॥ १६ ॥

आनंदगिरिकृतटीका।

केषां तर्हि तत्कृता सुकरोति तत्राह ये पुनरिति ते भजन्ते भगवन्तमिति शेषः ये त्वां भजन्ते ते किं सर्वे मायां तरन्ति नैवं प्रार्थना वैचित्र्यादित्याह चतुर्विधा इति

तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।
प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः॥ १७॥

शङ्करभाष्यम्।

तेषामिति तेषां चतुर्णां मध्ये ज्ञानी तत्त्ववित्तत्त्ववित्त्वान्नित्ययुक्तो भवत्येकभक्तिश्चान्यस्य भजनीयस्य दर्शनादतः स एकभक्तिर्विशिष्यते विशेषमाधिक्यमापद्यते अतिरिच्यत इत्यर्थः प्रियो हि यस्मादहमात्मा ज्ञानिनोऽतस्तस्याहमत्यर्थं प्रियः प्रसिद्धं हि लोके आत्मा प्रियो भवति इति तस्मात् ज्ञानिन आत्मत्वाद्वासुदेवः प्रियो भवतीत्यर्थः स च ज्ञानी मम वासुदेवस्यात्मैवेति ममात्यर्थं प्रियः॥ १७॥

आनन्दगिरिकृतटीका।

चतुर्विधानां तेषां सुकृतिनां भगवदभिमुखानां तुल्यत्वमाशंक्याह तेषामिति तस्य विशिष्यमाणत्वे हेतुमाह प्रियो हीति नित्ययुक्तत्वं भगवत्यात्मनि सदा समाहितचेतस्त्वं असारे संसारे भगवानेव सारः सोऽहमस्मीत्येकस्मिन्नद्वितीये स्वस्मादत्यन्तमभिन्ने भगवतिभक्तिः स्नेहविशेषोऽस्येत्येकभक्तिः तस्याधिक्ये हेतुं विवृणोति प्रियो हीत्यादिना भगवतो ज्ञानिनश्च परस्परं प्रेमास्पदत्वे प्रसिद्धिं प्रमाणयति प्रसिद्धं हीति आत्मनो ज्ञानिनं प्रतिप्रियत्वेऽपि भगवतो वासुदेवस्य कथं त प्रति प्रियत्वमित्याशंक्याह तस्मादिति अहज्ञानीनो निरुपाधिकप्रेमास्पदं परमपुरुषार्थत्वेनात्मत्वेन च गृहीतत्वादित्यर्थः ज्ञानिनोऽपि भगवन्तंप्रति प्रियत्वं प्रकटयति स चेति॥ १७॥

स्वामिकृतटीका।

तेषां मध्ये ज्ञानी श्रेष्ठ इत्याह तेषामिति तेषां मध्ये ज्ञानी विशिष्टः तत्र हेतवः नित्ययुक्तः सदा मन्निष्ठः एकस्मिन् मय्येव भक्तिर्यस्य सः ज्ञानीनो देहाद्यभिमानाभावेन चित्तविक्षेपाभावान्नित्ययुक्तत्वमेकान्तभक्तित्वञ्च सम्भवति नान्यस्य अतएव तस्याहमत्यन्तप्रियः स च मम तस्माद्वैतैर्नित्ययुक्तत्वादिभिश्चतुर्भ्यो भक्तिभिः स उत्तम इत्यर्थः॥ १७॥

नवलभाष्य।

तिनचार प्रकारके भक्तोंके मध्यमें तत्त्ववित् होनेसे ज्ञानी नित्ययुक्त है अर्थात् नित्यही मेरेमें समाहितचित्त एकाग्रचित्तहै और एकभक्तिहै क्योंकि दूसराकोई उसको भजन करनेके योग्यहै नहींहै इससे वह एकभक्तहै इसीसे सब भक्तोंमें अधिकहै अर्थात् श्रेष्ठहै और जिससे मैं ज्ञानीका आत्माहीं तिससे मैं ज्ञानीको अत्यन्त प्रियहीं और यह लोकमें भी प्रसिद्धहै कि अपना आत्मा सबको प्रियहोताहै तिससे आत्मा होनेसे वासुदेवभी ज्ञानीको प्रियहै और सो ज्ञानीभी मैं जो वासुदेव तिसका आत्माही है इससे मुझको अत्यन्त प्रियहै॥ १७॥

उदाराः स[illegible] ज्ञा[illegible] [illegible] मे मतम्।
आस्थितः [illegible]॥ १८॥

आपन्नस्तन्निवृत्तिमिच्छन्निति शेषः तत्त्वविदिति शब्दज्ञानवा...
र्थी मुमुक्षुरित्यर्थः ॥ १६ ॥

स्वामिकृतटीका।

सुकृतिनस्तु मां भजन्त्येव ते च सुकृततारतम्येन चतुर्विधा इत्याह चतुर्विधा इ
पूर्वजन्मसु ये कृतपुण्यास्ते मां भजन्ति ते चतुर्विधाः आर्त्तो रोगाद्यभिभूतः स चे
पूर्वं कृतपुण्यस्तर्हि मां भजति अन्यथा क्षुद्रदेवताभजनेन संसरति एवमुत्तरत्र
द्रष्टव्यं जिज्ञासुरात्मज्ञानेच्छुः अर्थार्थी अत्र परत्र च भोगसाधनभूतार्थलिप्सुः ज्ञानी
चात्मवित् ॥ १६ ॥

नवलभाष्य।

और जे तो पुण्यकर्म करनेवाले मनुष्योंमें श्रेष्ठहैं ते तो सब त्यागके
मेराही भजन करतेहैं इस आशयसे कहते हैं (चतुर्विधेति) हे अर्जुन चा
प्रकारके सुकृती पुण्यात्मा पुरुषमेरा भजन करतेहैं अर्थात् जे परमेश्वर
भजन करते हैं तेसब पुण्यशीलही हैं परन्तु पुण्यके तारतम्यसे अर्थात् न्
नाधिक्यभावसे उनकाभजन चारप्रकारका होताहै तिनमेंएकतो जो किसी
दुःखकरके पीड़ित पुरुषहै वह परमेश्वरका भजन करताहै अर्थात् चोर और
व्याघ्रादिकों करके कहींघिरगयाहै अथवा कोई बड़ेभारी रोगादिपीड़ा करके
व्याकुल होरहाहै तबवह पुण्यात्माहै तोउससमयमें परमेश्वरहीका स्मरण
करताहै फिरउस क्लेशसे निवृत्त होजाताहै और उस क्लेशसे निवृत्त होने
अनन्तर बड़ाभारी पुण्यका सहायहुआ तो संसार बन्धनरूप जो बड़ाभारी
दुःखतिसकी निवृत्तिके लिये परमेश्वरके स्वरूपके जाननेकी इच्छा करके
वहभजन करताहै तो वह जिज्ञासुभक्त दूसरे प्रकारकाहुआ उसीको मुमुक्षु
भी कहतेहैं क्योंकि जिसकी संसारसे मुक्तहोनेकी इच्छाहोय उसको शास्त्र
में मुमुक्षुकहाहै और जो एकवार परमेश्वरके भजनसे कोई दुःखसे निवृत्त
हुआ इससे उसको विश्वास तो उत्पन्नहुआ परन्तु बड़ाभारी उत्कट पुण्य
नहीं है किंतु सांसारिक भोगोंकी प्राप्तिहोनेके योग्यही पुण्यहै और उसको
की भी वासना सांसारिकभोगोंसे निवृत्त नहींहुईहै तो वहधनपुत्रकलत्र
इत्यादि भोगकी प्राप्तिहोनेही की इच्छाकरके परमेश्वरका भजन करताहै
वह तीसरा अर्थार्थी सकामभक्तहुआ और जिसने अधिक पुण्यके प्रभाव
संसारसे निवृत्तहो केवल परमेश्वरके जाननेकी इच्छासे भजन किया
और वहफिर परमेश्वरकेप्रसादसे ज्ञानकोप्राप्तहोगया तोवहज्ञानीहोकर
परमेश्वरके परमानन्द स्वरूपको जानके उसस्वरूपानन्दमें मग्नहो फिर
मे जुदाहोनेकी कभी इच्छानहीं करताहुआ इसी भगवत्स्वरूपमें अ
अभेददृष्टि करके रमण करताहै तो वह चौथाज्ञानी भक्तकहाताहै इ
पुण्य समूहोंकी गणना करने को कोई समर्थ नहीं जिससे कृतकृत्य
को नाशहुआहै ॥ १६ ॥

शङ्करभाष्यम्।

बहूनामिति बहूनां जन्मनां ज्ञानार्थसंस्कारार्जनाश्रयाणां अन्ते समा ज्ञानी मां वासुदेवं प्रत्यगात्मानं प्रत्यक्षतः प्रतिपद्यते कथं वासुदेवः नं मां प्रतिपद्यते स महात्मा न तत्समोऽन्योऽस्त्यधिको वाऽतः सुदु त्युक्तं॥ १९॥

आनंदगिरिकृतटीका।

...र्थ्यं परिहरति ज्ञानीति ज्ञानार्थसंस्कारो वासना तत्तज्जन्म जनिता बुद्धिशुद्धिस्तदाश्रयाणां तद्बहूनामनन्तानां जन्मनामिति प्राक्तनेष्वपि जन्मसु सम्भावितमित्याशङ्क्याह प्राप्तेति ज्ञानवतो ...द्वार। विवृणोति कथमिति यथोक्तज्ञानस्य तद्वतश्च दुर्लभत्वं सूच महत्सर्वोत्कृष्टमात्मशब्दितं चित्तमस्येति महात्मत्वे फलितं हेतु त्र वाक्योपक्रमानुकूल्यं कथयति मनुष्याणामिति॥ १९॥

स्वामिकृतटीका।

भक्तोऽतिदुर्लभ इत्याह बहूनां जन्मनां किञ्चित् पुण्योपचयेन अन्ते नवान् मन् सर्वमिदं चराचरं वासुदेव इति सर्वात्मदृष्ट्या मां प्रपद्यते महात्मा अपरिच्छिन्नदृष्टिः सुदुर्लभः॥ १९॥

नवलभाष्य।

ज्ञानीकी स्तुति करतेहुये भगवान् कहते हैं (बहूनामिति) हे अर्जुन ... अन्त्यमें अर्थात् ज्ञानकेअर्थ संस्कारोंके अर्जनमें साधन भूतजे ः तिन्होंके अन्त्यमें जिसजन्ममें ज्ञानवान् होता है अर्थात् प्राप्त ...परिप जिसज... तिसीजन्ममें मैंजो वासुदेव प्रत्यगात्मा ...ने स्वरूपसे अभिन्न जो वासुदेव मैंहूं तिसको प्रत्यच प्राप्तहोता सब वासुदेवहीहै इसप्रकार सर्वात्मा जोमैंहूं तिसको जो प्राप्तहो- ...हात्मा हजारों मनुष्योंमें दुर्लभहै क्योंकि न उसके समान कोई उससे अधिक कोईहै इससे वह दुर्लभ है॥ १९॥

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः।
तं तं नियममास्थाय प्रकृत्या नियताः स्वया॥ २०॥

शंकरभाष्यम्।

...व सर्वो वासुदेव इत्येवमप्रतिपत्तौ कारणमुच्यते कामैरिति कामैस्तैस्तैः पुत्रपशुस्वर्गादि ...हृतज्ञाना अपहृतविवेकविज्ञानाः प्रपद्यन्ते अन्यदेवताः प्राप्नुवन्ति वासुदेवादात्मनोऽन्या ...ं तं नियमं देवताराधने प्रसिद्धो यो यो नियमस्तं तमास्थायाश्रित्य प्रकृत्या संस्कारेण ...न्तरविशेषेण नियताः नियमिताः स्वया आत्मीयया॥ २०॥

...गिरिकृतटीका।

... यथोक्तज्ञानं नोदेतीत्या... न कश्चिन्न

शङ्करभाष्यम्।

न तर्हि आर्त्तादयस्त्रयो वासुदेवस्याऽप्रियाः नकिं तर्हि उदारा इति उदारा उत्कृष्टाः सर्व एवैते त्रयोऽपि मम प्रिया एवेत्यर्थः नहि कश्चिन्मद्भक्तो मम वासुदेवस्याप्रियो भवति ज्ञानी त्वत्यर्थं प्रियोभवतीति विशेषः तत् कस्मादित्याह ज्ञानीत्वात्मैव नान्यो मत्त इति मे मम निश्चयः आस्थित आरोढुं प्रवृत्तः स च ज्ञानीहि यस्मादहमेव भगवान् वासुदेवो नान्योऽस्मीत्येवं युक्तात्मा समाहितचित्तः सन् मामेव परं ब्रह्म गन्तव्यमनुत्तमां गतिं गन्तुं प्रवृत्त इत्यर्थः ॥ १८ ॥

आनंदगिरिकृतटीका।

ज्ञानी चेदत्यर्थमीश्वरस्य प्रियो भवति तर्हि विशेषणसामर्थ्यादितरेषामप्रियत्वमिति शङ्कते न तर्हीति तेषां भगवन्तं प्रतिप्रियतमत्वविवक्षितमित्याह नेति एवमिति विशेषणस्य तर्हि किं प्रयोजनमिति पृच्छति किं तर्हीति सर्वेषां भगवदभिमुखानामुत्कर्षेऽपि ज्ञानिनि तदतिरेकमंगीकृत्य विशेषणमित्याह उदारा इति किं तत्प्रमाणमित्याशंक्य ईश्वरज्ञानमित्याह मे मम मतमिति ज्ञानी त्वात्मैवेत्यत्र हेतुमाह सर्व इति सर्वशब्दस्य ज्ञानिव्यतिरिक्तविषयत्वमाह त्रयोऽपीति ज्ञानिव्यतिरिक्तानां भगवदभिमुखत्वेऽपि ज्ञानाभावापराधान्न भगवत्प्रीतिविषयतेत्याशङ्क्याह नहीति कस्तर्हि भवति सति विशेषस्तत्राह ज्ञानीत्विति तमेव विशेषं प्रश्नपूर्वकं प्रकटयति कस्मादित्यादिना सर्वमात्मानं पश्यतोऽपि अपक्षपातिनः तस्य तव कथं यथोक्तो निश्चयः स्यादित्याशंक्यास्थित इत्येतत् व्याकरोति आरोढुमिति आरोहेहेतुं सूचयति सच ज्ञानीति गन्तुं प्रवृत्तमेव स्फुटयति मामेवेति ॥ १८ ॥

स्वामिकृतटीका।

तर्हि इतरे त्रयस्त्वद्भक्ताः किं संसरन्ति नहि नहीत्याह उदारा इति सर्वे उदारा महान्तः मोक्षभाज इवेत्यर्थः ज्ञानी तु पुनरात्मैवेति मे मतं निश्चयः यस्मात् स ज्ञानी युक्तात्मा मदेकचित्तः सन् न विद्यते उत्तमा यस्यास्तामनुत्तमां गतिंमामेवास्थित आश्रितवान् मद्व्यतिरिक्तमन्यत् फलं न मन्यत इत्यर्थः

नवलभाष्य।

न कहो और भक्तक्या आपको प्रियनहींहैं तिसपै कहतेहैं (उदाराः) हे अर्जुन सब भक्तमेरे उदारहीहैं अर्थात् मुझको प्रियहीहैं किसी रीति कोई भक्तमुझको प्रियनहोय सोनहींहै किंतु भक्तमुझको प्रियहैं तिनमें ज्ञानी तो अत्यन्तप्रियहै काहेसे जिससे ज्ञानीमेरा आत्माही है और मेरा ऐसानिश्चयहै जिसकारणसे सो ज्ञानी वासुदेव मैंहूं अन्य नहीं ऐसे युक्तात्मा समाहित चित्तहोके अर्थात् एकाग्रचित्तहोके मैं जो पाने होनेके योग्य जो गतितिसको प्राप्तहोनेको प्रवृत्तहुआ है ॥ १८ ॥

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः॥ १९॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

शङ्करभाष्यम् ।

...निमित्त त्वामेव न प्रपद्यन्ते इत्युच्यते अव्यक्तमिति अव्यक्तमप्रकाशं व्यक्तिमापन्नं प्र... इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वर मपि सन्तमबुद्धयोऽविवेकिनः परं भावं पर... रूपमजानन्तोऽविवेकिनो ममाव्ययं व्ययरहितमनुत्तमं निरातिशयं मदीयं भावमजान... न्त इत्यर्थः ॥ २४ ॥

आनंदगिरिकृतटीका ।

...भजनस्योत्तमफलत्वेऽपि प्राणिनां प्रायेण तन्निष्ठत्वाभावे प्रश्नपूर्वकं निमित्तं... किनिमित्तमित्यादिना अप्रकाशं शरीरग्रहणात् पूर्वमिति शेषः इदानीं लीला... ग्रहावस्थायामित्यर्थः प्रकाशस्य तर्हि कदाचित्कत्वं भगवति प्राप्तमित्याह... यं तर्हि भगवन्तमागन्तुकप्रकाशं मन्यन्ते तत्राबुद्धय इत्युत्तरं तद्विवृणोति... अनुत्तममिति विशेषणद्वयं सोपाधिकनिरुपाधिकभावार्थं ॥ २४ ॥

स्वामिकृतटीका ।

...समाने प्रयासे महति च फलविशेषे सति सर्वेऽपि किमिति देवतान्तरं हित्वा... भजन्ति तत्राह अव्यक्तमिति अव्यक्तं प्रपञ्चातीतं मां व्यक्तिं मनुष्यमत्स्य... प्राप्तमल्पबुद्धयो मन्यन्ते तत्र हेतुः मम परं भावं स्वरूपमजानन्तः कथं... त्तमं न विद्यते उत्तमो भावो यस्मात् तं मद्भावम् अतो जगद्रचणार्थं... नाविशुद्धोर्जितसत्त्वमूर्तिं मां परमेश्वरं कर्मनिर्मितभौतिकदेहं देवता... ते मन्दमतयो मां नातीवाद्रियन्ते प्रत्युत चिप्रफलदं देवतान्तरमेव... रेणान्तवत् फलं प्राप्नुवन्तीत्यर्थः ॥ २४ ॥

नवलभाष्य ।

... तुम्हारे शरण नहीं प्राप्तहोते हैं यह कदाचित्अर्जुनकहै ...गवान् कहतेहैं कि (अव्यक्तमिति) हे अर्जुन अबुद्धि जे...ते ऐसामानतेहैं कि पहिले ज्ञानऐश्वर्यादि करके प्रका-...देवके गृहजन्म पाइकेऐसेप्रकाशयुक्तहुयेहैं जैसेइतर...आदि विशेषसे प्रकाशयुक्त होय और यहनहीं जानते...ऐश्वर्यादि युक्त ईश्वरही कृष्णरूप करके प्रकटहै...प्रकट कभी मनुष्यके सदृश कर्मादि वशसे देह...तोभी मूढ़मनुष्य मुझको ऐसामानते हैं कि...हैं तैसेयह भी कोई देवकी वसुदेवके गृहमें...यहनहीं जानते हैं कि नित्यमुक्त शुद्धबुद्ध...के प्रभाव करके नटवत्लीला विग्रह प्र...रूप अव्यय विकाररहित मेरे निर...ते हैं ॥ २४ ॥

कि अपनाको हितकरनेवाले जो कामहैं तिनको वहभक्त प्राप्तहोताहै सो यह अर्थ तो ठीकनहीं क्योंकि काम किसीको हितकारी कभी होतेही नहीं हैं ॥ २२ ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

शङ्करभाष्यम् ।

यस्मादन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते अतः अन्तवदिति अन्तवद्विनाशि तफलं तेषां तद्भवत्यल्पमेधसामल्पप्रज्ञानां देवान् देवयजो यान्ति देवान् जयन्ति इति देवय ते देवान् यान्ति मद्भक्ता यान्ति मामपि एवं समानेऽप्यायासे मामेव न प्रतिपद्यन्ते अनन्तफलाय अहो खलु कष्टं वर्तत इत्यनुक्रोशं दर्शयति भगवान् ॥ २३ ॥

आनन्दगिरिकृतटीका ।

प्रेक्षपूर्वकारीणि कामानां हि तत्त्वाभावे हेतुमाह यस्मादिति किञ्च ये कामिनस्ते अविवेकिनस्ततश्चाविवेकपूर्वकत्वात् कामानां कुतो हितत्वाशंकेत्याह अविवेकिन इति कामानामनन्तफलत्वेनाहितत्वमाशंक्याह अतइति तेषामविवेकपूर्वकत्वमतः तुशब्दार्थः तुशब्दोऽवधारणार्थः कामफलस्यानाशित्वे किमिति कामनिष्ठत्वं जन्तूनामित्याशंक्य अज्ञामान्द्यादित्याह अल्पेति किं तर्हि साधनमनन्तफलायेत्याशंक्य भगवद्भक्तिरित्याह मद्भक्ता इति अक्षरार्थमुक्त्वा श्लोकस्य तात्पर्यार्थमाह एवमिति देवताप्राप्तौ भगवत्प्राप्तौ चेति शेषः मामेवेत्यादौ देवताविशेषं प्रतिपद्यन्ते अन्तवत् फलायेति यत्नं तत्र परीत्ये कारणमविवेकातिरिक्तं नास्ति इत्यभिप्रेत्याह अहो खल्विति ॥ २३ ॥

स्वामिकृतटीका ।

तदेवं यद्यपि सर्वा अपि देवता ममैव तनवोऽतस्तदाराधनमपि यत्नतो मदाराधनमेव तत्तत्फलदातापि चाहमेव तथापि साक्षान्मद्भक्तानाञ्च तेषाञ्च फलवैषम्यं भवतीत्याह अन्तवदिति अल्पमेधसां परिच्छिन्नदृष्टीनां मया दत्तमपि तत्फलमन्तवन्नाशि भवति तदेवाह देवान् यजन्तीति देवयजस्तेदेवानन्तवतो यान्ति मद्भक्तास्तु मामनाद्यनन्तं परमानन्दं प्राप्नुवन्ति ॥ २३ ॥

नवलभाष्य ।

और हे अर्जुन जिससे अन्तयुक्तहै साधन व्यापार जिन्होंका ऐसे भी ऐसे वेकामी पुरुषहैं अर्थात् जिस कर्मरूप साधनसे फलकी इच्छा करते हैं नाशवान्है इससे उन अल्पबुद्धि पुरुषोंको नाशवानही फल [illegible] देवताओंके यजन पूजन करनेवाले पुरुष देवताओंको प्राप्त [illegible] मेरे प्रेमभक्त मुझको भी प्राप्तहोते हैं यहां भगवान् यह [illegible] हैं तो भी मन्दबुद्धि पुरुष [illegible] है [illegible]

नवलभाष्य ।

और हे अर्जुन जो जो कामना करनेवाला पुरुषजिसजिस देवताकी मूर्त्ति कोभक्तहोकेउस देवताकी श्रद्धासे पूजनकरनेकी इच्छाकरताहै तिसातिसका-मनायुक्त पुरुषकी तिसातिस देवतामें वोही अचल नाम स्थिर जो श्रद्धा है तिसको मैं विधान करताहूं अर्थात् स्थिर करताहूं अर्थात् जिस श्रद्धासे प-हिले वह पूजक स्वभावहीसे जिसकिसी देवताके पूजनमें प्रवृत्तहुआ था उसी श्रद्धाको मैं अन्तर्यामि रूपकरके दृढ़ करदेताहूं कुछ अपनी तरफ़ से नयी श्रद्धाको उत्पन्न नहीं करताहूं ॥ २१ ॥

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान् मयैव विहितान् हितान् ॥२२॥

शङ्करभाष्यम् ।

स तयेति स तया मद्विहितया श्रद्धया युक्तः सन् तस्या देवतायाः तन्वा आराधनमीहते चेष्टते लभते च ततः तस्या आराधिताया देवता तन्वाः कामानीप्सितान् मयैव परमेश्वरेण सर्वज्ञेन कर्मफलविभागज्ञतया विहितान्निर्मितान् तान् हि यस्मात्ते भगवता विहिताः कामा स्तस्मात्तानवश्यं लभन्ते इत्यर्थः हितानिति पदच्छेदे हितत्वं कामानामुपचरितं कल्प्यं नहि कामाऽहिताः कस्यचित् ॥ २२ ॥

आनंदगिरिकृतटीका ।

आराधितदेवताप्रसादात् फलप्राप्तौ किमीश्वरेणेत्याशंक्य तस्य सर्वज्ञस्य सर्वकर्मफल विभागाभिज्ञस्य तद्देवताधिष्ठातृत्वात्तस्यैव फलदातृत्वमित्याह सर्वज्ञेनेति एको बहूनां योविदधाति कामानित्यादि श्रुतिमाश्रित्य हितानिति पदद्वयं व्याचष्टे यस्मादिति हि-तानीत्येकं पदमिति पक्षं प्रत्याह हितानिति मुख्यत्वासम्भवे किमित्यौपचारिकत्वमि-त्याशंक्याह नहीति ॥ २२ ॥

स्वामिकृतटीका ।

ततश्च स तयेति स भक्तस्तया दृढया श्रद्धया तस्याः प्रतिमाया आराधनमीहते करोति ततश्च कामाः ये मत्कल्पितास्तांश्च ततो देवताविशेषाल्लभते किन्तु मयैव तत्तद्देवता न्तर्यामिना विहितान् निर्मितान् हि स्फुटमेतत् तत्तद्देवतानामपि मदधीनत्वात् मूर्तित्वादित्यर्थः ॥ २२ ॥

नवलभाष्य ।

फिरवह मझकरके विधान करीहुई जोश्रद्धा तिसकरके युक्तहोके तिस देवताकी मूर्त्तिके आराधनको करताहै फिर उसदेवतामें अन्तर्यामि रूपकर के प्रविष्ट मैंजो कर्मफलोंको विभाग करके देनेवाला सर्वज्ञ ईश्वर तिसकरके रचेहुये जे अभीष्ट कामतिनको उस आराधन करीहुई देवताकी मूर्त्तिसे प्राप्तहोताहै यह पुरुष क्योंकि जिसमें सत्यसंकल्प भगवानके रचेहुये वे प-दार्थ हैं इससे अवश्य उनको प्राप्तहोते हैं और जो कोई ऐसा अर्थ करते हैं

प्रोक्तं हृदि निधाय ज्ञानानुदये हेत्वन्तरमाह आत्मैवेति कामैर्नानाविधैरपहृतविवेकविज्ञानस्य देवतान्तरनिष्ठत्वमेव प्रत्यग्भूतपरदेवताप्रतिपत्यभावे कारणमित्याह कामैरिति देवतान्तरनिष्ठत्वे हेतुमाह तं तमिति प्रसिद्धो नियमो जपोपवासप्रदक्षिणनमस्कारादिः नियमविशेषाश्रयणे कारणमाह प्रकृत्येति ॥ २० ॥

स्वामिकृतटीका।

तदेवं कामिनोऽपि सन्तः कामप्राप्तये परमेश्वरमेव ये भजन्ति ते कामान् प्राप्य शनैर्मुच्यन्त इत्युक्तं ये त्वत्यन्तं राजसास्तामसाश्च कामाभिभूताः क्षुद्रदेवताः सेवन्ते ते संसरन्तीत्याह कामैरिति चतुर्भिः ये तु तैस्तैः पुत्रकीर्त्तिशत्रुजयादिविषयैः कामैरपहृतविवेकाः सन्तोऽन्याः क्षुद्रा भूतप्रेतयक्षादिदेवता भजन्ति किं कृत्वा तत्तद्देवताराधने यो यो नियम उपवासादिलक्षणस्तं तं नियमं स्वीकृत्य तत्रापि च स्वीयया प्रकृत्या पूर्वाभ्यासवासनया नियता वशीकृताः सन्तो देवताविशेषं भजन्ति ॥ २० ॥

नवलभाष्य।

सबका आत्माही वासुदेवहै इसप्रकार ज्ञानके नहीं होनेमें कारण कहते हैं (कामैरिति) हे अर्जुन तौन तौन जे पुत्र पशुस्वर्गादि विषय कामना तिन्हों करके नष्टहुआहै विवेकज्ञान जिन पुरुषोंका ते अपने पूर्व जन्मोंके संस्कारों करके वशीभूतहुये तिसतिस देवताके आराधनका तौन तौन शास्त्रोक्त नियमको आश्रयण करके अर्थात् जिस देवताके आराधनका नाम पूजन करनेका जो नियम अर्थात् स्नान दानव्रत यजनादिकहाहै तिसको तिसी प्रकारसे करके अपना आत्मरूप जो वासुदेव तिससेअन्य जे इन्द्रादि देवताहैं तिनको प्राप्तहोते हैं ॥ २० ॥

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥२१॥

शङ्करभाष्यम्।

तेषाञ्च कामिनां यो य इति यो यः कामी यां यां देवता तनुं श्रद्धया संयुक्तो भक्तश्चार्चितुं पूजयितुमिच्छति तस्य तस्य कामिनोऽचलां स्थिरां श्रद्धां तामेव विदधामि स्थिरीकरोमि ययैव पूर्वं प्रवृत्तः स्वभावतो यो यो यां देवतातनुं श्रद्धया अर्चितुमिच्छतीति ॥२१॥

आनन्दगिरिकृतटीका।

तत्तद्देवताप्रसादात् कामिनामपि सर्वेश्वरे सर्वात्मके वासुदेवे क्रमेण भक्तिर्भवतीत्याशङ्क्याह तेषाञ्चेति स्वभावतो जन्मान्तरीयसंस्कारवशादित्यर्थः भावशुद्धिस्थिरया श्रद्धया संस्काराधीनया देवताविशेषमाराधयतोऽपि भगवदनुग्रहादेव फलमित्याह यो य यामिति ईहते निर्वर्तयतीत्यर्थः ॥ २१ ॥

स्वामिकृतटीका।

तेषां मध्ये यो य इति यो यो भक्तो यां यां तनुं देवतारूपां मदीयमूर्तिं श्रद्धया अर्चितुं इच्छति प्रवर्तते तस्य तस्य भक्तस्य तन्मूर्तिविषयां तामेव श्रद्धामहमन्तर्यामी विदधामि करोमि ॥ २१ ॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः ।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

शङ्करभाष्यम् ।

किं निमित्त त्वामेव न प्रपद्यन्ते इत्युच्यते अव्यक्तमिति अव्यक्तमप्रकाशं व्यक्तिमापन्नं प्र
ाां गतं इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वर मपि सन्तमबुद्धयोऽविवेकिनः परं भावं पर
मात्मस्वरूपमजानन्तोऽविवेकिनो ममाव्ययं व्ययरहितमनुत्तमं निरतिशयं मदीयं भावमजान
मन्यन्त इत्यर्थः ॥ २४ ॥

आनंदगिरिकृतटीका ।

भगवद्भजनस्योत्तमफलत्वेऽपि प्राणिनां प्रायेण तन्निष्ठत्वाभावे प्रश्नपूर्वकं निमित्तं
वेदयति किंनिमित्तमित्यादिना अप्रकाशं शरीरग्रहणात् पूर्वमिति शेषः इदानीं लीला
ग्रहपरिग्रहावस्थायामित्यर्थः प्रकाशस्य तर्हि कदाचित्कत्वं भगवति प्राप्तमित्याह
त्येति कथं तर्हि भगवन्तमागन्तुकप्रकाशं मन्यन्ते तत्राबुद्धय इत्युत्तरं तद्विवृणोति
मिति परमनुत्तममिति विशेषणद्वयं सोपाधिकनिरुपाधिकभावार्थं ॥ २४ ॥

स्वामिकृतटीका ।

ननु च समाने प्रयासे महति च फलविशेषे सति सर्वेऽपि किमिति देवतान्तरं हित्वा
ामेव न भजन्ति तत्राह अव्यक्तमिति अव्यक्तं प्रपञ्चातीतं मां व्यक्तिं मनुष्यमत्स्य
मादिभावं प्राप्तमल्पबुद्धयो मन्यन्ते तत्र हेतुः मम परं भावं स्वरूपमजानन्तः कथं
म् अव्ययं नित्यं न विद्यते उत्तमो भावो यस्मात् तं मद्भावम् अतो जगद्रक्षणार्थं
लयाविष्कृतनानाविशुद्धोर्जितसत्त्वमूर्तिं मां परमेश्वरं कर्मनिर्मितभौतिकदेहं देवता
रसमं पश्यन्तो मन्दमतयो मां नातीवाद्रियन्ते प्रत्युत क्षिप्रफलदं देवतान्तरमेव
जन्ते ते चोक्तप्रकारेणान्तवत् फलं प्राप्नुवन्तीत्यर्थः ॥ २४ ॥

नवलभाष्य ।

कौन निमित्तसे तुम्हारे शरण नहीं प्राप्तहोते हैं यह कदाचित् अर्जुनकहै
स आकांक्षामें भगवान् कहतेहैं कि (अव्यक्तमिति) हे अर्जुन अबुद्धि जे
र्व अविवेकी पुरुष ते ऐसामानतेहैं कि पहिले ज्ञानऐश्वर्यादि करके प्रका-
ा रहितरहे जे अब वसुदेवके गृहजन्म पाइकेऐसेप्रकाशयुक्तहुयेहैं जैसेइतर
ोई राजकुमार संस्कारादि विशेषसे प्रकाशयुक्त होय और यहनहीं जानते
 कि स्वाभाविक ज्ञान बलैश्वर्यादि युक्त ईश्वरहीं कृष्णरूप करके प्रकटहैं
यथाहीं तो मैं अव्यक्त अप्रकट कभी मनुष्यके सदृश कर्मादि वशसे देह
ारणकर प्रकटनहीं होताहों तोभी मूढ़मनुष्य मुझको ऐसामानते हैं कि
से और जीवदेह धारण करते हैं तैसेयह भी कोई देवकी वसुदेवके गृहमें
सकारीजीव उत्पन्नहुआहै और यहनहीं जानते हैं कि नित्यमुक्त शुद्धबुद्ध
रूप ईश्वरहीने अपनी योगमायाके प्रभाव करके नटवत्लीला विग्रह प्र
टकियाहै क्योंकि वे अविवेकी मूढ़पुरुष अव्यय विकाररहित मेरे निर
तशयप्रभावको नहीं जानतेहैं इससे ऐसा मानते हैं ॥ २२ ॥

कि अपनाको हितकरनेवाले जो कामहैं तिनको वहभक्त प्राप्तहोताहै सो यह अर्थ तो ठीकनहीं क्योंकि काम किसीको हितकारी कभी होतेही नहीं हैं ॥ २२ ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३ ॥

शङ्करभाष्यम्।

यस्मादन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते अतः अन्तवदिति अन्तवद्विनाशि तु फलं तेषां तद्भवत्यल्पमेधसामल्पप्रज्ञानां देवान् देवयजो यान्ति देवान् यजन्त इति देवयजः ते देवान् यान्ति मद्भक्ता यान्ति मामपि एवं समानेऽप्यायासे मामेव न प्रतिपद्यन्ते अनन्तफलायाहो खलु कष्टं वर्तत इत्यनुक्रोशं दर्शयति भगवान् ॥ २२ ॥

आनन्दगिरिकृतटीका।

प्रेक्षापूर्वकारिणां कामानां हि तत्त्वाभावे हेतुमाह यस्मादिति किञ्च ये कामिनस्ते अविवेकिनस्ततश्चाविवेकपूर्वकत्वात् कामानां कुतो हितत्वाशंकेत्याह अविवेकिन इति कामानामनन्तफलत्वेनाहितत्वमाशंक्याह अतइति तेषामविवेकपूर्वकत्वमतः शब्दार्थः तुशब्दोऽवधारणार्थः कामफलस्यानाशित्वं किमिति कामिनिष्ठत्व वस्तूनामित्याशंक्य सामान्यादित्याह अपीति किं तर्हि साधनमनन्तफलायेत्याशंक्य भगवद्भक्तिरित्याह मद्भक्ता इति अक्षरार्थमुक्त्वा श्लोकस्य तात्पर्यार्थमाह एवमिति देवताप्राप्तौ भगवत्प्राप्तौ चेति शेषः मामेवेत्यादौ देवताविशेषं प्रतिपद्यन्ते अन्तवत् फलायेति यत्नश्च तत्र परोक्ष्ये कारणमविवेकातिरिक्तं नास्ति इत्यभिप्रेत्याह अहो खल्विति ॥ २३ ॥

स्वामिकृतटीका।

तदेवं यद्यपि सर्वा अपि देवता ममैव तनवस्तदाराधनमपि वस्तुतो मदाराधनमेव तत्फलदाताऽपि चाहमेव तथापि साक्षान्मद्भक्तानां च तेषां च फलवैषम्यं भवतीत्याह अन्तवदिति अल्पमेधसां परिच्छिन्नदृष्टीनां मया दत्तमपि तत्फलमन्तवन्नाशि भवति तदेवाह देवान् यजन्तीति देवयजस्ते देवानन्तवतो यान्ति मद्भक्तास्तु मामनाद्यनन्तं परमानन्दं प्राप्नुवन्ति ॥ २३ ॥

नवलभाष्य।

और हे अर्जुन जिनके अन्तवन्तहैं साधन व्यापार जिन्होंका ऐसे और ऐसे कामी पुरुषहैं अर्थात् जिन कर्मरूप साधनसे फलकी इच्छा करते हैं वह नाशवानहैं इससे उन अल्पबुद्धि पुरुषोंको नाशवानही फलहोताहै इसप्रकार देवताओंके यजन पूजन करनेवाले पुरुष देवताओंही को प्राप्तहोते हैं और हे कौन्तेय मेरे भक्त भी मानकोही प्राप्तहोते हैं यहां भगवान् यह सूचना करते हैं कि यत्न दोनोंका समानहीहै तो भी मन्दबुद्धि पुरुष नाशवान् फलके लिये यत्न करते हैं और मुझको न जानते हैं और अनन्त फलके लिये यत्न नहीं करते हैं यह बड़े कष्टकी बातहै इसप्रकार दयादिखाते हैं ॥ २३ ॥

अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः।
परं भावमजानन्तो ममाव्ययमनुत्तमम् ॥ २४ ॥

शङ्करभाष्यम्।

किं निमित्त त्वामेव न प्रपद्यन्ते इत्युच्यते अव्यक्तमिति अव्यक्तमप्रकाशं व्यक्तिमापन्नं प्रकाशं गतं इदानीं मन्यन्ते मां नित्यप्रसिद्धमीश्वर मपि सन्तमबुद्धयोऽविवेकिनः परं भावं परमात्मास्वरूपमजानन्तोऽविवेकिनो ममाव्ययं व्ययरहितमनुत्तमं निरतिशयं मदीयं भावमजानन्तो मन्यन्त इत्यर्थः ॥ २४ ॥

आनंदगिरिकृतटीका।

भगवद्भजनस्योत्तमफलत्वेऽपि प्राणिनां प्रायेण तन्निष्ठत्वाभावे प्रश्नपूर्वकं निमित्तं निवेदयति किंनिमित्तमित्यादिना अप्रकाशं शरीरग्रहणात् पूर्वमिति शेषः इदानीं लीलाविग्रहपरिग्रहावस्थायामित्यर्थः प्रकाशस्य तर्हि कदाचित्कत्वं भगवति प्राप्तमित्याह नित्येति कथं तर्हि भगवन्तमागन्तुकप्रकाशं मन्यन्ते तत्राबुद्धय इत्युत्तरं तद्विवृणोति परमिति परमनुत्तममिति विशेषणद्वयं सोपाधिकनिरुपाधिकभावार्थं ॥ २४ ॥

स्वामिकृतटीका।

ननु च समाने प्रयासे महति च फलविशेषे सति सर्वेऽपि किमिति देवतान्तरं हित्वा त्वामेव न भजन्ति तत्राह अव्यक्तमिति अव्यक्तं प्रपञ्चातीतं मां व्यक्तिं मनुष्यमत्स्यकूर्मादिभावं प्राप्तमल्पबुद्धयो मन्यन्ते तत्र हेतुः मम परं भावं स्वरूपमजानन्तः कथंभूतम् अव्ययं नित्यं न विद्यते उत्तमो भावो यस्मात् तं मद्भावम् अतो जगद्रक्षणार्थं लीलयाविष्कृतनानाविशुद्धोर्जितसत्त्वमूर्तिं मां परमेश्वरं कर्मनिर्मितभौतिकदेहं देवतान्तरसमं पश्यन्तो मन्दमतयो मां नातीवाद्रियन्ते प्रत्युत क्षिप्रफलदं देवतान्तरमेव भजन्ते ते चोक्तप्रकारेणान्तवत् फलं प्राप्नुवन्तीत्यर्थः ॥ २४ ॥

नवलभाष्य।

कौन निमित्तसे तुम्हारे शरण नहीं प्राप्तहोते हैं यह कदाचित् अर्जुनकहै इस आकांक्षामें भगवान् कहतेहैं कि (अव्यक्तमिति) हे अर्जुन अबुद्धि जे मूर्ख अविवेकी पुरुष ते ऐसामानतेहैं कि पहिले ज्ञानऐश्वर्यादि करके प्रकाश रहितरहे जे अब वसुदेवके गृहजन्म पाइकेऐसेप्रकाशयुक्तहुयेहैं जैसेइतर कोई राजकुमार संस्कारादि विशेषसे प्रकाशयुक्त होय और यहनहीं जानते हैं कि स्वाभाविक ज्ञान बलेश्वर्यादि युक्त ईश्वरही कृष्णरूप करके प्रकटहै अथवाहौं तो मैं अव्यक्त अप्रकट कभी मनुष्यके सदृश कर्मादि वशसे देह धारणकर प्रकटनहीं होताहौं तोभी मूढ़मनुष्य मुझको ऐसामानते हैं कि जैसे और जीवदेह धारण करतेहैं तैसेयह भी कोई देवकी वसुदेवके गृहमें संस्कारीजीव उत्पन्नहुआहै और यहनहीं जानते हैं कि नित्यमुक्त शुद्धबुद्धस्वरूप ईश्वरहीने अपनी योगमायाके प्रभाव करके नटवत्लीला विग्रह प्रकटकियाहै क्योंकि वे अविवेकी मूढ़पुरुष अव्यय विकाररहित मेरे निरतिशयप्रभावको नहीं जानतेहैं इससे ऐसा मानते हैं ॥ २४ ॥

कि अपनाको हितकरनेवाले जो कामहैं तिनको वहभक्त प्राप्तहोता है सो यह अर्थ तो ठीकनहीं क्योंकि काम किसीको हितकारी कभी होतेही नहीं हैं ॥ २२ ॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ॥ २३॥

शङ्करभाष्यम्।

यस्मादन्तवत्साधनव्यापारा अविवेकिनः कामिनश्च ते अतः अन्तवदिति अन्तवद्विनाशि तफलं तेषां तद्भवत्यल्पमेधसामल्पप्रज्ञानां देवान् देवयजो यान्ति देवान् जयन्ति इति देवयजः ते देवान् यान्ति मद्भक्ता यान्ति मामपि एवं समानेऽप्यायासे मामेव न प्रतिपद्यन्ते अनन्तफलायाहो खलु कष्टं वर्तत इत्यनुक्रोशं दर्शयति भगवान् ॥ २३ ॥

आनन्दगिरिकृतटीका।

प्रेक्षपूर्वकारिणि कामानां हि तत्त्वाभावे हेतुमाह यस्मादिति किञ्च ये कामिनस्तेऽविवेकिनस्ततश्चाविवेकपूर्वकत्वात् कामानां कुतो हितत्वाशंकेत्याह अविवेकिन इति कामानामनन्तफलत्वेनाहितत्त्वमाशंक्याह अतइति तेषामविवेकपूर्वकत्वमतः तुशब्दार्थः तुशब्दोऽवधारणार्थः कामफलस्यानाशित्वे किमिति कामनिष्ठत्वं जन्तूनामित्याशंक्य प्रज्ञामान्द्यादित्याह अल्पेति किं तर्हि साधनमनन्तफलायेत्याशंक्य भगवद्भक्तिरित्याह मद्भक्ता इति अक्षरार्थमुक्त्वा श्लोकस्य तात्पर्यार्थमाह एवमिति देवताप्राप्तौ भगवत्प्राप्तौ चेति शेषः मामेवेत्यादौ देवताविशेषं प्रतिपद्यन्ते अन्तवत् फलायेति वक्तव्यं उक्तवैपरीत्ये कारणमविवेकातिरिक्तं नास्ति इत्यभिप्रेत्याह अहो खल्विति ॥ २३ ॥

स्वामिकृतटीका।

तदेवं यद्यपि सर्वा अपि देवता ममैव तनवोऽतस्तदाराधनमपि वस्तुतो मदाराधनमेव तत्तत्फलदातापि चाहमेव तथापि साक्षान्मद्भक्तानाञ्च तेषाञ्च फलवैषम्यं भवतीत्याह अन्तवदिति अल्पमेधसां परिच्छिन्नदृष्टीनां मया दत्तमपि तत्फलमन्तवत् विनाशि भवति तदेवाह देवान् यजन्तीति देवयजस्ते देवानन्तवतो यान्ति मद्भक्तास्तु मामनाद्यनन्तं परमानन्दं प्राप्नुवन्ति ॥ २३ ॥

नवलभाष्य।

और हे अर्जुन जिससे अन्तयुक्तहै साधन व्यापार जिन्होंका ऐसे अविवेकी वेकामी पुरुषहैं अर्थात् जिस कर्मरूप साधनसे फलकी इच्छा करतेहैं वह नाशवान्है इससे उन अल्पबुद्धि पुरुषोंको नाशवान्ही फलहोता है इसप्रकार देवताओंके यजन पूजन करनेवाले पुरुष देवलोकों को प्राप्तहोते हैं और जे मेरेभक्तहैं ते मुझको भी प्राप्तहोते हैं यहां भगवान् यह सूचन करतेहैं कि श्रमतो दोनोंको बराबरहीहै तो भी मन्दबुद्धि पुरुष नाशवान फलकेलिये यत्नकरते हैं और मुझको न जानते हैं और अनन्त फलकेलिये न मेराभजन करते हैं यहबड़े कष्टकी वार्ताहै इसप्रकार दयादिखाते हैं ॥२३॥

स्य मायाविना ज्ञानं प्रतिबध्नाति यथान्यस्यापि मायाविनो मायाज्ञानं तद्वत् यत एवमतः वे
दामीति अहन्तु वेदजाने समतीतानि समतिक्रान्तानि भूतानि तथा वर्तमानानि चार्जुन भवि
णि च भूतानि वेदाहं मान्तु वेद न कश्चन मद्भक्तं मच्छरणमेकं मुक्त्वामत्तत्त्ववेदनाभाव
न मां भजते ॥ २६ ॥

आनंदगिरिकृतटीका।

मायया भगवानावृतश्चेत्तस्यापि लोकस्येव ज्ञानप्रतिबन्धः स्यादित्याशङ्क्याह यथे
नहीयं माया मायाविनो विज्ञानं प्रतिबध्नाति मायात्वात् लौकिकमायावत् अथ
नेश्वरो मायाप्रतिबद्धज्ञानोमायावित्वात् लौकिकमायाविवदित्यर्थः भगवतो म
प्रतिबद्धज्ञानत्वाभावेन सर्वज्ञत्वमप्रतिबद्धं सिद्धमित्याह यत इति लोकस्य माया
बद्धविज्ञानत्वादेव भगवदाभिमुख्यशून्यत्वमित्याह मांत्विति कालत्रयपरिच्छिन्नसम
वस्तुपरिज्ञाने प्रतिबन्धो नेश्वरस्यास्तीति द्योतनार्थस्तुशब्दः मां त्विति लोकस्य
वत्तत्त्वज्ञाने प्रतिबन्धं द्योतयति तर्हि त्वद्भक्तिर्विफलेत्याशङ्क्याह मद्भक्तमि
तर्हि सर्वोऽपि त्वद्भक्तिद्वारा त्वां ज्ञास्यति नेत्याह मतत्त्वेति विवेकवती मद्भ
नतु विवेकशून्यसर्वस्यापीत्यर्थः ॥ २६ ॥

स्वामिकृतटीका।

मदीयमं स्वरूपमजानन्त इत्युक्तं तदेव स्वस्य सर्वात्मत्वमनावृतज्ञानशक्ति
दर्शयन्नन्येषामज्ञानमेवाह वेदाहमिति समतीतानि विनष्टानि वर्तमानानि च भावि
च त्रिकालवर्तीनि भूतानि स्थावरजङ्गमानि सर्वाण्यहं वेद जानामि मायाश्रयत्वान
तस्याः स्वाश्रयव्यामोहकत्वाभावात् मान्तु कोऽपि न वेत्ति मन्मायामोहितत्वात् प्रसि
द्धि लोके मायायाः स्वाश्रयाधीनत्वमन्यमोहकत्वञ्चेति ॥ २६ ॥

नवलभाष्य।

और हे अर्जुन जिसयोगमाया करके आच्छादित छिपाहुआ जोमैंहूं ति
सको यह मूढ़लोक नहीं जानताहै सो वह मेरी योगमाया में जो माया
ईश्वर तिसके ज्ञानको नहीं ढकसक्तीहै जैसे लोकमें मायावी पुरुषकी मा
या और पुरुषोंकेज्ञानको आच्छादन करकेमोहित करतीहै तैसेउसमाया
पुरुषके ज्ञानको नहीं आच्छादित करती है तैसे ईश्वरके ज्ञानकोभी ईश्व
कीमाया नहीं प्रतिबन्धयुक्त करसक्तीहै जिससे ऐसाहै इससे हे अर्जुन
भूतप्राणी उत्पन्न होगयेहैं और जे होरहेहैं और जे आगे उत्पन्न होनेवा
हैं तिनको सबकोमैं जानताहूं और मुझको तो कोईनहीं जानताहै तिस
मेरेही एकशरण ऐसा जो मेराभक्त तिसको छोड़के मेरे स्वरूपको कोईन
जानताहै इससे मेराभजन नहीं करता किन्तु कामवशहोके और और
देवताओंको भजता है ॥ २६ ॥

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ॥ २७ ॥

शङ्करभाष्यम्।

येन पुनः [illegible] प्रतिबन्धेन [illegible] न [illegible]

नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥२५

शङ्करभाष्यम् ।

तदज्ञानं किं निमित्तं इत्युच्यते नाहमिति नाहं प्रकाशः सर्वस्य लोकस्य केषांचिदेव म
द्भक्तानां प्रकाशोऽहमित्यभिप्रायः योगमायासमावृतो योगो गुणानां युक्तिर्घटनं सैव माया यो
गमाया तया योगमायया समावृतः संछन्न इत्यर्थः अतएव मूढो लोकोऽयं नाभिजानाति मा
मजमव्ययं ॥ २५ ॥

आनन्दगिरिकृतटीका ।

अविवेकरूपमज्ञानं भगवद्विषयप्रतिबन्धकमुक्तं तन्निमित्तमपि निमित्तं प्रश्नपूर्वकमनू
ज्ञानमुपन्यस्यति तदज्ञानमित्यादिना त्रिभिर्गुणमयैरित्यत्रौपाधिकरूपस्याप्रतिपत्तौ कारण
मुक्तमत्र तु सोपाधिकस्यापीति विशेषं गृहीत्वा व्याचष्टे नाहमिति तर्हि भगवद्भक्ति
रनुपयुक्तेत्याशंक्याह केषांचिदिति सर्वस्य लोकस्य न प्रकाशोऽहमित्यत्र हेतुमाह
योगेति अनाद्यनिर्वाच्यज्ञानाच्छन्नत्वादेव मद्विषये लोकस्य मौढ्यं ततश्च मदीयस्वरूप
विवेकाभावान्मद्विमुखत्वादित्यमित्याह अत एवेति ॥ २५ ॥

स्वामिकृतटीका ।

तेषां स्वाज्ञाने हेतुमाह नाहमिति सर्वस्य लोकस्य नाहं प्रकाशः प्रकटो न भवामि
किन्तु मद्भक्तानामेव यतो योगमायया समावृतः योगयुक्तिर्मदीयः कोऽप्यचिन्त्यः
प्रज्ञाविलासः स एव माया अघटमानघटनापटीयस्त्वात् तया संछन्न अतएव मत्स्व
रूपज्ञाने मूढःसन्नयं लोकोऽजमव्ययञ्च मां न जानातीति ॥ २५ ॥

नवलभाष्य ।

अवमूढ़ पुरुषोंके अज्ञानमें कारण कहते हैं कि (नाहमिति)और हेअर्जुन मैं अपने स्वाभाविक ज्ञानवल ऐश्वर्यादि रूपकरके सबको प्रकाशित नहीं होताहूं अर्थात् सबकोई मेरेयथार्थ स्वरूपको नहींजानसक्ते किंतुकोई एकान्त भक्तोंहीको में प्रकाशमान अर्थात् प्रकट होताहूं इससे वेई मुझको जानसक्ते हैं सबकोई नहीं क्योंकि जिससे मेरी अवटन घटना पटीयसी जो मेरी योगमाया तिसकरकेमैंआच्छादितहों अर्थात्जैसेतृणहैऔरवज्रहोजाय और वज्रतृण होजाय यह किसीके मनमें घटित नहींहोता नाम नहींआता है तिसके करनेमें वड़ी चतुर ऐसी जो मेरी योगमाया युक्ति विशेष रूपमाया तिसकरके ढकाहुआ हैं इसीसे यहमूढ़ मनुष्यलोक जन्मनाशादि विकार रहित सबसे पर जो मैंहूं तिसको नहीं जानता है ॥ २५ ॥

वेदाहं समतीतानि वर्त्तमानानि चार्जुन ।
भविष्याणि च भूतानि मान्तु वेद न कश्चन ॥ २६ ॥

शङ्करभाष्यम् ।

यया योगमायया समावृतं मां लोको नाभिजानातिनासौ योगमाया मदीया सती ममेश्वर

और इनदोनोंके हेतु इनमें प्रकट होनेवाले और अपने अपने अवसरमें सब प्राणियोंमें संबन्ध करनेवाले इच्छाद्वेषही द्वन्द्वशब्द करके ग्रहणकिये जातेहैं तहां इच्छा और द्वेषजे दोनों सुखदुःख और इनके कारणोंके प्राप्ति में जब अपने स्वरूपको प्रकट करतेहैं अर्थात् जिस समयमें किसीपुरुषको सुख प्राप्तहुआ वा दुःख प्राप्तहुआ अथवा सुखका कारणमित्र धनादिकसे मिलापहुआ और दुःखका कारण दुष्ट समागमादिक तिसकी प्राप्तिहुई तो उस पुरुषको सुखमें और सुखके कारणमें इच्छा प्रकटहोतीहै अर्थात् ऐसी उत्कट इच्छाहोती है जिससे यहसदा मुझको सुख ऐसाही रहै ऐसी चाह होतीहै और दुःखमें और दुःखके कारणमें द्वेष प्रकटहोताहै सो वहभीऐसा उत्कट बढ़ताहै जिससे अहर्निश संतप्त रहताहै फिर इसप्रकार वृद्धिकोप्राप्त हुये जे रागद्वेषते उस पुरुषकी बुद्धिको अपने वशमें करके परमार्थ आत्म-तत्त्व विषयक ज्ञानकी उत्पत्तिमें प्रतिबन्ध कारण जो मोह तिसको उत्पन्न करतेहैं और फिर इच्छाद्वेष रूपदोष करके वशहुआहै चित्त जिसका ऐसे पुरुषको व्यवहारके पदार्थोंका भी यथार्थ ठीक ठीक ज्ञाननहीं उत्पन्न होता तो इच्छाद्वेषादि दोषकरके व्याप्तहुई बुद्धि जिसकी ऐसेमूढ़ पुरुषको बहुतहै प्रतिबन्ध जिसमें ऐसा प्रत्यगात्म अपना स्वरूपभूत परमात्म तत्त्वका ज्ञाननहीं होताहै इसका कहनाही क्याहै इससे हे अर्जुन इसप्रकार इच्छा द्वेषसे उत्पन्नहुआ जो द्वन्द्वमोह तिसकरके उत्पत्ति कालहीमें सबप्राणी मूढ़ताको प्राप्तहोतेहैं अर्थात् मोहवशहुएही सबप्राणी उत्पन्नहोते हैं इससे मेरे स्वरूपका यथार्थ ज्ञान नहींहोता यह अभिप्रायहै ॥ २७ ॥

येषामन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ॥ २८ ॥

शङ्करभाष्यम् ।

यत एवमतस्तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्व्वभूतानि संमोहितानि मामात्मभूतं न जानन्ति अत एवात्मभावेन मान्तु न भजन्ते के पुनरनेन द्वन्द्वमोहेन निर्म्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्त इत्यपेक्षितमर्थं दर्शयितुमुच्यते येषामिति येषान्तु पुनरन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्म्मणां पुण्यं कर्म येषां सत्त्वशुद्धिकारणं विद्यते ते पुण्यकर्म्माणस्तेषां पुण्यकर्म्मणां ते द्वन्द्वमोहनिर्मुक्ता यथोक्तेन द्वन्द्वमोहेन निर्मुक्ता भजन्ते मां परमात्मानं दृढव्रता एवमेव परमार्थतत्त्वं नान्यथेत्येवं सर्व्वपरित्यागव्रतेन निश्चितविज्ञाना दृढव्रता उच्यन्ते ॥ २८ ॥

आनन्दगिरिकृतटीका ।

जायमानभूतानां मोहपरतन्त्रत्वे फलितमाह यत इति भगवत्तत्त्ववेदनाभावे तद्विषयं भजनं कथमित्याह अत एवेति यदि सर्वाणि भूतानि द्वन्द्वमोहनिबद्धानि तर्हि न कश्चिदपि भगवन्तं भजेदित्याशङ्क्याह के पुनरिति तर्हि कस्य भगवद्भजनं तदाह येषामिति तत्र द्वन्द्वमोहेन मोहितानामपि पुण्यकर्मणां भगवद्भजनसंभवं दर्शयति येषाम्

इत्यपेक्षायामिदमाह इच्छेति इच्छाद्वेषसमुत्थेन इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थेन केनेति विशेषापेक्षायामिदमाह द्वन्द्वमोहेनेति द्वन्द्वनिमित्तो मोहो द्वन्द्वमोहस्तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः सम्बध्यमानौ द्वन्द्वशब्देनाभिधीयेते तत्र यदा इच्छाद्वेषौ सुखदुःखतद्धेतुसम्प्राप्त्या लब्धात्मकौ भवतस्तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः नहीच्छाद्वेषदोषवशीकृतचित्तस्य यथा भूतार्थविषयज्ञानमुत्पद्यते बहिरपि किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इत्यतस्तेनेच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत भरतान्वय सर्व्वभूतानि संमोहितानि सन्ति संमोहं संमूढतां सर्गे जन्मनि उत्पत्तिकाले इत्येतत् यान्ति गच्छन्ति हे परन्तप मोहवशान्येव सर्वभूतानि जायमानानि जायन्त इत्यभिप्रायः ॥ २७ ॥

आनन्दगिरिकृतटीका।

भगवत्तत्त्वविज्ञानप्रतिबन्धकं मूलाज्ञानातिरिक्तप्रश्नद्वारेणोदाहरति केनेत्यादिना पुनःशब्दात् प्रतिबन्धकं मूलाज्ञानातिरिक्तप्रश्नद्वारेणोदाहरति केनेत्यादिना पुनःशब्दात् प्रतिबन्धकान्तरविवक्षा गम्यते अपरोक्षमवान्तरप्रतिबन्धकमिदमागृह्यते विशेषमाकांक्षापूर्वकं निक्षिपति केनेति विशेषापेक्षायामिति द्वन्द्वशब्देन गृहीतयोरपि इच्छाद्वेषयो ग्रहणं द्वन्द्वशब्दार्थोपलक्षणार्थमित्याह तावेति तयोरपर्यायमेकत्रानुपपत्तिं गृहीत्वा विशिनष्टि यथाकालमिति नच तयोरनधिकरणं किञ्चिदपि भूतं संसारमण्डले सम्भवतीत्याह सर्वभूतैरिति तथापि कथं तयोर्मोहहेतुत्वमित्याशङ्क्याह तत्रेति तयोराश्रयः सप्तम्यर्थः उक्तमेवार्थं कैमुतिकन्यायेन प्रपञ्चयति नहीति पूर्व्वभागानुवादपूर्वकमुत्तरभागेन फलितमाह अतइति प्रत्यगात्मन्यहङ्कारादिप्रतिबन्धप्रभावतो ज्ञानोत्पत्त्यसम्भवोऽतःशब्दार्थः कुलप्रयुक्तमहिम्ना स्वरूपशक्त्या च युक्तस्यैव यथोक्तप्रतिबन्धप्रतिविधानसामर्थ्यमिति द्योतनार्थं भारत परन्तपेति सम्बोधनद्वयतत्त्वज्ञानप्रतिबन्धं प्रकृतमवान्तरकारणमुपसंहरति मोहेति ॥ २७ ॥

स्वामिकृतटीका।

तदेवं मायाविषयत्वेन जीवानां परमेश्वराज्ञानमुक्तं तस्यैवाज्ञानस्य दृढत्वे कारणमाह इच्छेति सृज्यत इति सर्गः सर्गे स्थूलदेहोत्पत्तौ सत्यां तदनुकूले इच्छा तत्प्रतिकूले च द्वेषस्ताभ्यां समुत्थः समुद्भूतो यः शीतोष्णसुखदुःखादिद्वन्द्वनिमित्तो मोहो विवेकभ्रंशस्तेन सर्वाणि भूतानि सम्मोहं यान्ति अहमेव सुखी दुःखी चेति गाढतराभिनिवेशं प्राप्नुवन्ति अतस्तानि मज्ज्ञानाभावान्मां न भजन्तीति भावः ॥ २७ ॥

नवलभाष्य।

फिर कौनके तत्त्वज्ञानके प्रतिबन्ध करके प्रतिबन्धको प्राप्त उत्पन्नहुये वे प्राणी ते तुमको नहीं जानते हैं इस आकांक्षामें भगवान् कहते हैं कि (इच्छेति) हेभारत हेभरत वंशोद्भव और हे परन्तप हे शत्रुओंको संताप कारक अर्जुन इच्छा और द्वेष इनसे उत्पन्नहुआ जो द्वन्द्वनिमित्तक मोह तिस करके सबप्राणी उत्पत्ति समयमेंही मोहको प्राप्तहोते हैं अर्थात् शीत उष्ण सुखदुःख इच्छाद्वेष इनको आदिलेके परस्पर विरुद्ध दो दो पदार्थ द्वन्द्व कहाते हैं तो यहां शीतउष्णके सदृश परस्पर विरोधयुक्त और सुख और दुःख

मध्यमाधिकारिणं प्रत्याह मामिति परमेश्वराश्रयणं नाम विषयविमुखत्वेन भगवदेकनिष्ठत्वमित्याह मत्समाहितेति प्रयतनं भगवन्निष्ठासिद्ध्यर्थं बहिरङ्गानां यज्ञादीनामन्तरंगानाञ्च श्रवणादीनामनुष्ठानं प्रागुक्तं जगदुपादानं परंब्रह्म कथं ब्रह्म विदुरित्यपेक्षायां समस्ताध्यात्मवस्तुत्वेन सकलकर्मत्वेन च तद्विदुरित्याह कृत्स्न मिति ॥ २९ ॥

स्वामिकृतटीका।

एवञ्च मां भजन्तस्ते सर्वं विज्ञेयं विज्ञाय कृतार्था भवन्तीत्याह जरेति जरामरणयोर्निरसनार्थं मामाश्रित्य ये प्रयतन्ते ते तत् परं ब्रह्म विदुः कृत्स्नमध्यात्मञ्च विदुः येन तत्प्राप्यं तं देहादिव्यतिरिक्तं शुद्धमात्मानञ्च जानन्तीत्यर्थः तत्साधनभूतमखिलं सरहस्यं कर्म च जानन्ति इत्यर्थः ॥ २९ ॥

नवलभाष्य।

ते पुरुष किसवास्ते मेराभजन करतेहैं इस आकांक्षामे कहतेहैं कि (जरेति) हे अर्जुन जरा जो वृद्धावस्था और मरण+इनके जे क्लेश तिनको दूर करनेके लिये मैंजो परमेश्वर तिसका आश्रय करके अर्थात् मेरेविषे एकाग्रचित्तहोके जे यत्नकरतेहैं तेपरब्रह्मको जानतेहैं औरसंपूर्णजोअध्यात्मविषयकज्ञान अर्थात् अपना आत्माका जो कुछसत्य ज्ञानादिरूपपरमार्थ स्वरूप तिसको जानते हैं और संपूर्ण कर्म्मको जानते हैं अर्थात् जैसाकुछ कर्म्मका स्वरूपहै तिसको भी जानते हैं ॥ २९ ॥

साधि भूताधिदैवं मां साधियज्ञञ्च ये विदुः।
प्रयाणकालेऽपि चमां ते विदुर्युक्तचेतसः ॥ ३० ॥

इति श्रीभगवद्गीयां योगशास्त्रे कृष्णार्जुनसंवादे विज्ञानयोगो नाम सप्तमोऽध्यायः ॥ ७ ॥

शङ्करभाष्यम्।

साधीति साधिभूताधिदैवं अधिभूतं चाधिदैवञ्च अधिभूताधिदैवं तेन सह अधिभूताधिदैवेन वर्त्तते इति साधिभूताधिदैवं मां ये विदुः साधियज्ञञ्च सह अधियज्ञेन साधियज्ञं ये विदुः प्रयाणकाले मरणकालेऽपि च ते मां विदुः युक्तचेतसः समाहितचित्ता इति ॥ ३० ॥

इति श्रीमद्भगवद्गीताभाष्ये सप्तमोऽध्यायः ॥ ७ ॥

+जरामरण कहनेका आशय यहहै कि जरामरण दुःखकी निवृत्ति तौभव योगियों को योगाभ्यास से हुआही करती है अर्थात् यह योग स्वभाव सिद्धहै इससे प्राधान्य करके भगवान् ने इनहीं दुःखोंको कहा और वास्तव में तो परमेश्वरका आश्रयकरके योगसे सकल दुःखकी निवृत्ति होतीहै जैसा छठेअध्याय में कहिचुके हैं उसका नहीं विस्मरण करना ॥

नर्थकमापद्येतेति शङ्कते के पुनरिति अनेकेषु जन्मसु सुकृतवशादपाकृतदुरितानां द्वन्द्वप्रयुक्तमोहविरहिणां ब्रह्मचर्य्यादिनियमवतां भगवद्भजनाधिकारित्वान्न शास्त्रविरोधोऽस्तीति परिहरति उच्यत इति तुशब्दद्योत्यमर्थमाह पुनरिति मुक्तिरर्थात्त्वसिद्ध्यर्थं समाप्तप्रायमित्युक्तं प्रकृतोपयोगं पुण्यस्य कर्मणो दर्शयितुं विशिनष्टि सत्त्वेति उभयविधशुद्धे द्वन्द्वनिमित्तमोहनिवृत्तफलमाह ते द्वन्द्वेति मोहनिवृत्तेर्भगवन्निष्ठापर्यन्तत्वमाह भजन्त इति तेषां नानापरिग्रहवतां भगवद्भजनप्रतिहतिमाशङ्क्याह दृढेति ॥ २८ ॥

स्वामिकृतटीका।

कुतस्तर्हि केचन त्वां भजन्तो दृश्यन्ते तत्राह येषामिति येषान्तु पुण्याचरणशीलानां सर्वप्रतिबन्धकं पापमन्तगतं नष्टं ते द्वन्द्वनिमित्तेन मोहेन विनिर्मुक्ताः दृढव्रताः एकान्तिनः सन्तो मां भजन्ति ॥ २८ ॥

नवलभाष्य।

जिससे ऐसा सिद्धांतहै इससे तिस द्वन्द्वमोह करके प्रतिबन्धको प्राप्तहो रहाहै ज्ञानजिन्होंका ऐसे जे भूत प्राणी ते मोहको प्राप्तहुये आत्मभूत जो मैंहूं तिसको नहीं जानते हैं इसीसे आत्मभाव करके मेराभजन नहीं करते हैं कौन फिर इसद्वन्द्व मोहको छूटके तुमको जानके शास्त्रके अनुरोधसे अर्थात् जैसे शास्त्रमेंकहाहै तैसे आत्मभाव करके भजन करतेहैं इस आकांक्षामें कहते हैं कि (येषामिति) हे अर्जुन जिन पुण्यकर्म करनेवाले पुरुषोंका अर्थात् अन्तःकरणकी शुद्धि करनेवालाहै पुण्यकर्म जिन्होंका ऐसेजिनपुरुषोंका पापक्षीण होगयाहै ते पूर्वोक्त अर्थात् पाहिले श्लोकमें कहा जो द्वन्द्वमोह तिससे छूटेहुये दृढ़व्रत होकर मैं जो परमात्मा तिसको भजते हैं और इसीप्रकार परमार्थ तत्त्वहै अन्यथानहींहै इसप्रकार सबका परित्यागरूपव्रत करके निश्चितहुआहै विज्ञान जिन्होंका ऐसे जे पुरुषहैं ते यहां दृढ़व्रत कहेजाते हैं ॥ २८ ॥

जरामरणमोक्षाय मामाश्रित्य यतन्तिये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ॥२९॥

शंकरभाष्यम्।

ते किमर्थं भजन्त इत्युच्यते जरेति जरामरणमोक्षाय जरामरणयोर्मोक्षार्थं मां परमेश्वरमाश्रित्य मत्समाहितचित्ताः सन्तो यतन्ति प्रयतन्ते ये ते यद्ब्रह्म परं तद्विदुः कृत्स्नं समस्तमध्यात्मं प्रत्यगात्मविषयं वस्तु तद्विदुः कर्म्म चाखिलं समस्तं विदुः ॥ २९ ॥

आनंदगिरिकृतटीका।

च तस्य रात्रिः सापि तथेति कालविदामभिप्रायमनुश्रित्य ब्राह्मस्याहोरात्रस्य कालपरि
मायां दर्शयित्वा तत्रैव विभज्य कार्य्य कथयति प्रजापतेरिति अव्यक्तमव्याकृतमितिमद्धां
वारयति अव्यक्तमित्यादिना जातिप्रतियोगिभूता व्यक्तीर्व्यावर्तयति स्थावरेति अमदुत्प
[illegible]क्तिं प्रत्यादिशति अभिव्यज्यन्ते इति पूर्वोक्तमव्यक्तसंज्ञकं स्वापावस्थं ब्रह्म प्रजाप
[illegible]द्धितं तस्मिन्निति यावत् ॥ १८ ॥

स्वामिकृतटीका।

ततः किमत आह अव्यक्तादित्यादिकार्यस्याव्ययरूपं कारणात्मकं तस्मादव्यक्तात् का
[illegible]रूपात् व्यज्यन्त इति व्यक्तयश्चराचराणि भूतानि प्रादुर्भवन्ति कदा अहरागमे ब्रह्म
[illegible] दिवसस्योपक्रमे तथा रात्रेरागमे ब्रह्मशयने तस्मिन्नेवाव्यक्तसंज्ञके कारणरूपे प्रलयं
[illegible]न्ति यद्वा तेऽहोरात्रविद इत्येतन्न विधीयते किन्तु ते प्रसिद्धा अहोरात्रविदो जना ब्र
[illegible]णो यदहर्विदुस्तस्याह्न आगमेऽव्यक्तादव्यक्तयः प्रभवन्ति याञ्च रात्रिं विदुस्तस्या रा-
त्रेरागमे प्रलीयन्त इति द्वयोरन्वयः ॥ १८ ॥

नवलभाष्य।

और हे अर्जुन जिससे इसप्रकारकरके कालकीगतिकरके सबलोकव्याप्त
हैं इससे सबलोक पुनरावर्ती हैं अर्थात् आते भी फिर जाते भी हैं अब ब्र-
ह्माकेदिनमें जो होताहै और रात्रिमें जो होताहै तिसकोकहते हैं कि (अव्य-
क्तेति) हे अर्जुन ब्रह्माकेदिनकेप्रारम्भमें अर्थात् जिससमयमें ब्रह्माजगते हैं
उससमय में अव्यक्त जो ब्रह्माकी स्वापावस्था अर्थात् निद्रावस्था तिससे
सब व्यक्तियां जे स्थावरजंगमप्रजाते सबउत्पन्नहोती हैं और जब ब्रह्माकी

रणहीकोप्राप्तहोते हैं कौन फिर ऐसे हैं जे तुमसेअन्यको प्राप्तहोके संसारमें फिर लौटआतेहैं इसआकांक्षामें कहतेहैं आब्रह्मेति हे अर्जुन ब्रह्मलोकपर्यन्त अर्थात् ब्रह्मलोक सहित जितने लोकहैं ते सब पुनरावर्त्ती हैं अर्थात् उनलोकोंको प्राप्तहोके मनुष्य फिर संसारमें लौटआता है और मैं जो एक हौं तिसकोप्राप्तहोके तौ हे अर्ज्जुन फिर जन्मनहींहोताहै अर्थात् मुक्तिही को प्राप्तहोताहै ॥ १६ ॥

सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः ॥ १७ ॥

शङ्करभाष्यम् ।

ब्रह्मलोकसहिता लोकाः कस्मात् पुनरावर्त्तिनः कालपरिच्छिन्नत्वात् कथं सहस्रेति सहस्रयुगपर्य्यंतं सहस्राणि युगानि पर्य्यन्तपर्य्यवसानं यस्याह्नस्तदहः सहस्रयुगपर्य्यन्त ब्रह्मणः प्रजापतेः विराजो विदुः रात्रिमपि युगसहस्रामहःपरिमाणामेव के विदुरित्याह तेऽहोरात्रविदः कालसंख्याविदोजना इत्यर्थः ॥ १७ ॥

आनंदगिरिकृतटीका।

यस्य स्वाभाविकी संशयप्रयुक्ता च शुद्धिस्तस्यैवोक्तेऽर्थे बुद्धिरुदेतीति मत्वा संबुद्धिद्वयं ब्रह्मलोकसहितानां पुनरावृत्तौ हेतुं प्रश्नद्वारा दर्शयति ब्रह्मेति उक्तमेव हेतुमाकांक्षापूर्वकमुत्तरश्लोकेन साधयति कथमित्यादिना यथोक्ताहोरात्रावयवमासर्त्वयनसंवत्सरावयवं शतसंख्यायुरवच्छिन्नत्वात् प्रजापतेस्तदन्तर्वर्त्तिनामपि लोकानां यथायोग्यकालपरिच्छिन्नत्वेन पुनरावृत्तिरित्यभिप्रेत्य व्याचष्टे सहस्रेत्यादिना ॥ १७ ॥

स्वामिकृतटीका।

ननु च तपस्विनो दानशीलावीतरागास्तितिक्षवः त्रैलोक्यस्योपरिस्थानं लभन्ते शोकवर्जितं इत्यादिपुराणवाक्यैस्त्रिलोक्याः सकाशान्महर्लोकादीनामुत्कृष्टत्वं गम्यते विनाशित्वं च सर्वेषामवैशिष्ट्ये कथमसौ विशेषः स्यादित्याशङ्क्य बहुकल्पकालावस्थायित्वनिमित्तोऽसौ विशेष इत्याशयेन स्वमानेन शतवर्षायुषो ब्रह्मणोऽहन्यहनि त्रिलोक्या उत्पत्तिर्निशि निशि च प्रलयो भवतीति दर्शयिष्यन् ब्रह्मणोऽहोरात्रयोः प्रमाणमाह सहस्रेति सहस्रं युगानि पर्यन्तोऽवसानं यस्य तद् ब्रह्मणो यदहस्तद्ये विदुः युगसहस्रमन्तो यस्यास्तां रात्रिञ्च योगबलेन ये विदुस्त एव सर्वज्ञा जना अहोरात्रविदः येषान्तु केवलं चन्द्रादित्यगत्यैव ज्ञानं ते तथाहोरात्रविदो न भवन्ति अल्पदर्शित्वात् युगशब्देनात्र चतुर्युगमभिप्रेतं चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यत इति विष्णुपुराणोक्तेः ब्रह्मण इति च महर्लोकादिवासिनामुपलक्षणार्थं तत्रायं कालगणनाप्रकारः मनुष्याणां यद्वर्षं तद्देवानामहोरात्रं तादृशैरहोरात्रैः पक्षमासादिकल्पनया द्वादशभिर्वर्षसहस्रैश्चतुर्युगं भवति चतुर्युगसहस्रन्तु ब्रह्मणो दिनं तावत्प्रमाणैव रात्रिस्तादृशैरचाहोरात्रैः पक्षमासादिक्रमेण वर्षशतं ब्रह्मणः परमायुरिति ॥ १७ ॥

नवलभाष्य।

ब्रह्मलोकसहित सबलोक काहेसे पुनरावर्त्तीहैं जिससे कालकीगतिकरके

...करताहै यहसिद्धान्तहै तिसीको संसारमें वैराग्यके अर्थ भगवान्कहते (भूतग्रामइति) हे अर्जुन कर्म्मोंकेआधीन जो यह प्राणियोंका समूह ...उत्पन्नहोके लीनहोताहै अर्थात् जो पूर्व्वकल्पमें प्राणियोंकासमूहरहा ...ोई इसकल्पमें पहिलेकर्म्मोंकेआधीन सबस्थावरजङ्गम प्राणियोंकासमूह ब्रह्माके दिनमें उत्पन्नहोके फिर रात्रिके आगम में लीन होताहै और जब फिर ब्रह्माके दिवसका प्रारम्भ होताहै तौ अवश अस्वतन्त्र हुआ उत्पन्न होताहै ॥ १९ ॥

परस्तस्मात्तु भावोऽन्यो व्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥ २० ॥

शाङ्करभाष्यम् ।

यदुपन्यस्तमक्षरं तस्य प्राप्त्युपायो निर्दिष्ट ओमित्येकाक्षरं ब्रह्मेत्यादि अथेदानीमक्षरस्यैव स्वरूपनिर्दिदिक्षयेदमुच्यते पर इति अनेन योगमार्गेणेदं गन्तव्यमिति परस्तस्मादिति परो व्यतिरिक्तो भिन्नः कुतस्तस्मात् पूर्व्वोक्तादव्यक्तात् तुशब्दोऽव्यक्ताक्षरस्य विवक्षितस्य व्यक्ता वैलक्षण्यविशेषणार्थः भावोऽक्षराख्यं परं ब्रह्म व्यतिरिक्तत्वे सत्यपि सालक्षण्यप्रसङ्गोऽस्तीति तद्विनिवृत्त्यर्थमाह अन्य इति अन्यो विलक्षणः सचाव्यक्तोऽनिन्द्रियगोचरः परस्तस्मादित्युक्तः कस्मात् पुनः परः पूर्व्वोक्ताद्भूतग्रामबीजभूतादविद्यालक्षणादव्यक्तादन्यो विलक्षणो भाव इत्यभिप्रायः सनातनश्चिरन्तनो यः स भावः सर्व्वेषु भूतेषु ब्रह्मादिषु नश्यत्सु न विनश्यति ॥ २० ॥

आनंदगिरिकृतटीका ।

अक्षरं ब्रह्म परममित्युपक्रम्य तदनुपयुक्त किमिदमन्यदुक्तमित्याशङ्क्य गूनमनूद्यान न्तरग्रन्थसङ्गतिमाह यदुपन्यस्तमिति अक्षरस्वरूपे निर्दिदिक्षिते तस्मिन् पूर्वोक्तयोगमा गेस्य कथमुपयोगः स्यादित्याशङ्क्य तत्प्राप्त्युपायत्वेनेत्याह अनेनेति गन्तव्यमिति योग मार्गोक्तिरुपयुक्तेति द्योपः पूर्वोक्तादव्यक्तादिति सम्बन्धः परशब्दस्य व्यतिरिक्तविषयत्वे [illegible] शब्देन वैलक्षण्यमुक्त्वा पुनरन्यशब्दप्रयोगात् पौनरुक्त्यमित्याशङ्क्याह [illegible] इति तु नाद्योक्तिं वैलक्षण्यमन्यशब्देन प्रकटितं [illegible] मालक्ष्यति ततश्चाव्यक्ताद्भिन्नत्वेऽपि ब्रह्मणस्तेन [illegible] मित्यर्थः यद्वा परशब्दस्य प्रकृष्टवाचिनो भावविशेषणार्थं [illegible] पृथ्यः अनादिभावस्याक्षरस्याविनाशित्वमर्थसिद्धं [illegible] नश्यद्विकारजातं पुरुपान्तं विनश्यति न तु विनाश [illegible]

स्वामिकृतटीका ।

लोकानां अनित्यत्वं प्रपञ्च्य परमेश्वरस्वरूप [illegible] तस्माच्चराचरकारणभूतादव्यक्तात् परस्तस्मादि [illegible] गोचरो भावः सनातनोऽनादिः स तु सर्वेषु [illegible] विनश्यति ॥ २० ॥

नवलभाष्य ।

जिस अक्षरका प्रकरण पहिले [illegible] और [illegible] ओमित्येकाक्षरं यहकहाथा अब इसतनन्तरमें [illegible]

रात्रिका आगमहोताहै अर्थात् प्रारम्भहोताहै तो उसीब्रह्मकी निद्रावस्थामे सब प्रजा लीन होजाती हैं ॥ १८ ॥

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते।
राज्यागमेऽवशः पार्थ प्रभवत्यहरागमे ॥ १९ ॥

शंकरभाष्यम्।

अकृताभ्यागमकृतविप्रणाशदोषपरिहारार्थं बन्धमोक्षशास्त्रप्रवृत्तिसाफल्यप्रदर्शनार्थं अविद्यादि क्लेशमूलकर्माशयवशाद्यावशीभूतग्रामो भूत्वा प्रलीयतइत्यतः संसारे वैराग्यप्रदर्शनार्थञ्चेदमाह भूतग्राम इति भूतग्रामो भूतसमुदायः स्थावरजङ्गमलक्षणो यः पूर्व्वस्मिन् कल्पे आसीत् स एवायं नान्यो भूत्वा पुनः अहरागमे प्रलीयते पुनः पुनः राज्यागमेऽहः क्षयेऽवशोऽस्वतन्त्र एव पार्थ प्रभवति जायते स एव अहरागमे ॥ १९ ॥

आनन्दगिरिकृतटीका।

ननु प्रबोधकाले ब्रह्मणो यो भूतग्रामो भूत्वा तस्यैव स्वापकाले विलीयते तस्मादन्यो भूयोभूयो ब्रह्मणोऽहरागमे भूत्वा पुनररात्र्यागमे परवशो विनश्यति तदेवं प्रत्यवान्तर कल्पं भूतग्रामविभागो भवेदित्याशङ्कानन्तरश्लोकतात्पर्य्यमाह अकृतेति प्रतिकल्पं प्राणिनिकायस्य भिन्नत्वे सति अकृताभ्यागमादिदोषप्रसंगात् तत्परिहारार्थं भूतग्रामस्य प्रतिकल्पमैक्यमास्थेयमित्यर्थः यदि स्थावरजंगमलक्षणप्राणिनिकायस्य प्रतिकल्पमन्यथात्वं तदेकस्य बन्धमोक्षान्वयिनो भावात् काण्डद्वयात्मनो बन्धमोक्षार्थस्य शास्त्रस्य प्रवृत्तिरफला प्रसज्येत् अतस्तत्साफल्यार्थमपि प्रतिकल्पं प्राणिवर्गस्य नवीनत्वानुपपत्तिरित्याह बन्धेति कथं पुनर्भूतसमुदायोऽस्वतन्त्रः सन्नवशीभूत्वा प्रविलीयते तत्राह अविद्येति आदिशब्देनास्मितारागद्वेषाभिनिवेशा गृह्यन्ते यथोक्तं क्लेशपञ्चकं मूलम्प्रतिलभ्य कल्पं प्रतिलभ्य धर्म्माधर्म्मात्मकंकर्म्मराशिरुद्भवति तद्वशादेवास्वतन्त्राभूतसमुदायो जन्मविनाशावनुभवतीत्यर्थः प्राणिनिकायस्य जन्मनाशाभ्यासोक्तेरर्थसिद्धमर्थमाह इत्यत इति संसारे विपरिवर्त्तमानानां प्राणिनामस्वातन्त्र्यादवशानामेव जन्ममरणप्रबन्धसम्बाधत् अलमनेन संसारेणेति वैतृष्ण्यं तस्मिन् प्रदर्शनीयं तदर्थञ्चेदम्भूतानामहोरात्रमावृत्तिवचनमित्यर्थः समनन्तरवाक्यमिदमापरामृश्यते रात्र्यागमे लयमनुभवतोऽहरागमेच प्रभवं प्रतिपद्यमानस्य प्राणिवर्गस्य तुल्यं पारवश्यमित्याशयवानाह अवशइति ॥ १९ ॥

स्वामिकृतटीका।

तत्र च कृतनाशाकृताभ्यागमशङ्कां वारयन् वैराग्यार्थं सृष्टिप्रलयप्रवाहस्य विच्छेदं दर्शयति भूतग्राम इति भूतानां चराचरप्राणिनां ग्रामः समूहो यः प्रागासीत् स एवायमहरागमे भूत्वा भूत्वा रात्र्यागमे प्रलीयते प्रलीय पुनरप्यहरागमेऽवशः कर्म्मादिपरतन्त्रः सन् प्रभवति नान्य इत्यर्थः ॥ १९ ॥

नवलभाष्य।

अब नहीं करेहुयेकी जिससेप्राप्ति न होय और करेहुयेकानाश न होय इसदोषके दूरकरनेकेलिये बन्धमोक्षशास्त्रकी प्रवृत्तिकासाफल्य दिखानेके लिये अविद्यादिक्लेशोंका मूलकारणभूत जो कर्म्माशय अर्थात् कर्म्मवासना तिसकेवशसे पराधीन जो प्राणियोंकासमूह सो वारम्बारउत्पन्नहोके लीन

शङ्करभाष्यम्।

तल्लब्धेरुपाय उच्यते पुरुष इति पुरुषः पुरि शयनात् पूर्णत्वाद्वा सपरः पार्थ परो निरतिशयो यस्मात् पुरुषान्न परं किञ्चित् स भक्त्या लभ्यस्तु ज्ञानलक्षणयाऽनन्यया आत्मविषयया यस्य पुरुषस्यान्तःस्थानि मध्यस्थानि कार्य्यभूतानि कार्य्यं हि कारणस्यान्तर्वर्त्ति भवति येन पुरुषेण सर्वमिदं जगत्तत व्याप्तं आकाशेनेव घटादि ॥ २२ ॥

आनन्दगिरिकृतटीका।

ननु व्यक्तादतिरिक्तस्य तद्विलक्षणस्य परमपुरुषस्य प्राप्तौ कश्चिदसाधारणो हेतुरपि तथो यस्मिन् प्रेक्षापूर्वकारी यत्प्रेक्षया प्रवृत्तो निवृत्तोति तत्राह तल्लब्धेरिति परस्य पुरुषस्य सर्वकारणत्वं सर्वव्यापकत्वंच विशेषणद्वयमुदाहरति यस्येति निरतिशयत्वं विशदयति यस्मादिति तुशब्दोऽवधारणार्थः भक्तिर्भजनं सेवा प्रदक्षिण प्रणामादि लक्षणान्तां व्यावर्तयति ज्ञानेति उक्ताया भक्तेर्विषयतो वैशिष्ट्यमाह अनन्ययेति कोऽसौपुरुषो यद्विषया भक्तिस्तत्प्राप्तौ पर्य्याप्तेत्याशङ्क्योत्तरार्द्धं व्याचष्टे यस्येति कथं भूतानां तदवस्थत्वं तत्राह कार्य्यं हीति स पर्य्यगादिति श्रुतिमाश्रित्याह येनेति ॥ २२ ॥

स्वामिकृतटीका।

तत्प्राप्तौ च भक्तिरन्तरंगोपाय इत्युक्तमेवेत्याह पुरुष इति स चाह परः पुरुषोनन्यया न विद्यतेन्या शरणत्वेन यस्यास्तया एकान्तरभक्त्यैव लभ्यो नान्यथा परत्वमेवाह यस्य कारणभूतस्यान्तरमध्ये भूतानि येन च कारणभूतेनेदं सर्वं जगततं व्याप्तम् ॥ २२ ॥

नवलभाष्य।

अब उसकी प्राप्तिका उपाय कहते हैं कि (पुरुषइति) हेपार्थ हे अर्जुन देहरूपपुर में शयनकरने से अथवा सर्वत्र परिपूर्ण होने से पुरुषरूप और सबसे उत्कृष्ट होने से पर अर्थात् निरतिशय जिससे अधिक कोईनहोय उसको निरतिशय कहते हैं क्योंकि श्रुतिमें ऐसा कहाहै कि पुरुषसेपर कोई नहीं है ऐसा जो वह पर पुरुष परमात्मा सो हे अर्जुन अनन्य भक्तिकरिके अर्थात् भेदभाव रहित ज्ञानलक्षणा जो भक्तिहै तिसीकरके प्राप्त होनेके योग्यहै कैसा वहहै जिसके अन्तर्गत सब ब्रह्मादि स्थावरान्त भूत हैं क्योंकि कारण के अन्तर्गत कार्यकीसत्ता रहाही करती है और जिस पुरुषकरिके सबजगत् व्याप्तहोरहा है जैसे आकाश करके घटआदि पदार्थ व्याप्त हैं तैसे परमात्मा करके आकाशादिभी व्याप्त हैं ॥ २२ ॥

यत्र काले त्वनावृत्तिमावृत्तिञ्चैव योगिनः।
प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

शङ्करभाष्यम्।

मद्भक्तानां प्रणवावेशितब्रह्मबुद्धीनां कालान्तरमुक्तिभाजां ब्रह्मप्रतिपत्तये [illegible] रवक्तव्य इति यत्र काल इत्यादि [illegible] [illegible] [illegible] ॥ यत्र काले प्रयाता इति [illegible]

यहकहाजाताहै कि (परइति) हे अर्जुन तिसपूर्व्वोक्त अव्यक्तसंज्ञक प्रकृति से परे अन्य उससेविलक्षण अर्थात् और तरहका क्योंकि प्रकृति तो जड़ है और यहचेतनहै इससे विलक्षण औरही अव्यक्त अर्थात् इन्द्रियादिकों के अगोचरनाम नहीं प्रत्यक्षहोनेवाला और तुशब्दसेमायाकार्य्य जो प्रपञ्च तिससे न्यारा और सनातन अर्थात् सबकालमें रहनेवाला ऐसापरमात्मा अक्षर ब्रह्मरूपभावहै जो ब्रह्मादि तृणपर्यन्त प्राणियोंकेनाशमें भी नाशको कभी प्राप्त नहीं होताहै अर्थात् सदा एकरसहीरहताहै ॥ २० ॥

अव्यक्तोऽक्षरइत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्त्तन्ते तद्धाम परम मम ॥ २१ ॥

शङ्करभाष्यम् ।

अव्यक्त इति योऽसावव्यक्तोऽक्षर इत्युक्तस्तमेवाक्षरसंज्ञकमव्यक्तं भावं आहुः परमां प्रकृष्टां गतिं यं भावं प्राप्य गत्वा न निवर्त्तन्ते संसाराय तद्धामस्थानं परमं प्रकृष्टं मम विष्णोः परम पदमित्यर्थः ॥ २१ ॥

आनन्दगिरिकृतटीका ।

यथोक्तेऽव्यक्ते भावे श्रुतिसम्मतिमाह अव्यक्त इति तस्य परमगतित्वं साधयति यः प्राप्येति योऽसावव्यक्तो भावोऽत्र दर्शितः स येनाक्षरं पुरुषं वेद सत्यमित्यादिश्रुतावक्षर इत्यक्षरं भावं परमां गतिं पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरित्याद्याः श्रुतयो वदन्तीत्याह योऽसाविति परमपुरुषस्य परमगतित्वमुक्तं व्यनक्ति यं भावमिति तद्विष्णोः परमं पदमिति श्रुतिमत्र संवादयति तद्धामेति ॥ २१ ॥

स्वामिकृतटीका ।

अविनाशे प्रमाणं दर्शयन्नाह अव्यक्त इति यो भावोऽव्यक्तोऽतीन्द्रियः अक्षरः प्रवेशना शून्य इति तथा अक्षरात् सम्भवतीह विश्वमित्यादि श्रुतिष्वक्षर इत्युक्तः परमां गतिं गम्यं पुरुषार्थमाहुः पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरित्यादिश्रुतयः परमगति त्वमेवाह यं प्राप्य न पुनर्निवर्त्तन्त इति तच्च ममैव धाम स्वरूपं ममेत्युपचारे षष्ठी राहोः शिर इतिवत् अतोऽहमेव परमागतिरित्यर्थः ॥ २१ ॥

नवलभाष्य ।

और जो अव्यक्त अक्षरनामकर के कहाहै नाम अविनाशी भाव कहाहै उसीको परमगति कहतेहैं अर्थात् हे अर्ज्जुन उसको ऋषिलोग उत्कृष्टगति कहतेहैं और फिर जिस ब्रह्मभावकोप्राप्तहोके जन्म मरणरूप संसारकोप्राप्त नहींहोतेहैं सो मैं जो विष्णुहों तिसका परम उत्कृष्टधामहै अर्थात् निवास स्थानहै ॥ २१ ॥

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ २२ ॥

नर्जन्म आवृत्तिं तद्विपरीतान्चैव योगिन इति कार्मिणश्चोच्यन्ते कार्म्मिणस्तु गुणतः कर्म्मयोगे योगिनामिति विशेषणात् तत्र विभज्यन्ते योगिनः यत्र काले प्रयाता मृता योगिनोऽनावृ यान्ति यत्र काले च प्रयाता मृता आवृत्तिं यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥ २३ ॥

आनन्दगिरिकृतटीका।

ननु ज्ञानायत्ता परमपुरुषप्राप्तिरुक्ता नच ज्ञानं मार्गमपेक्ष्य फलाय कल्पते विदुषे गत्युत्क्रान्तिनिषेधश्रुतेः तथाच मार्गोक्तिरयुक्तेत्याशंक्य सगुणशरणानां तदुपदेशोऽत्येव नित्यभिप्रेत्याह प्रकृतानामिति वक्तव्य इति यत्र काल इत्याद्युच्यते इति सम्बन्धः चेद्वक्तव्यस्तर्हि किमित्यध्यात्मादिभावेन सविशेषं ब्रह्मध्यायतां फलाप्तये मूर्द्धन्यनाड़ी सम्बन्धे देवयाने पथ्युपन्यस्यत्वाय वक्तव्यं कालो निर्दिश्यते तत्राह विवक्षितेति सोऽन्थे मार्गस्तदुक्तिशेषत्वेन कालोक्तिरित्यर्थः पितृयानमार्गोपन्यासस्तर्हि किमिति क्रियते तत्रा आवृत्तिमिति मार्गान्तरस्यावृत्तिफलत्वादस्य चानावृत्तिफलत्वात् तदपेक्षया महीयान् मिति स्तुतिर्विवक्षितेति भावः योगिन इति ध्यायिनां कर्म्मिणाञ्च तन्त्रेणाभिधानमि त्याह योगिन इति कथं कर्मिषु योगिशब्दो वर्त्ततामित्याशंक्यानुष्ठान गुणयोगादित्याह कर्मिणस्त्विति गुणतो योगिन इति सम्बन्ध. तत्रैव वाक्योपक्रमस्यानुकूल्यमाह कर्म्म योगेनेति अवशिष्टान्यक्षराणि व्याचक्षाणो वाक्यार्थमाह यत्रेति योगिनोऽत्र विवक्षिताः ये आवृत्तावधिकृता योगिनः कर्मिण इति विभागः कालप्राधान्येन मार्गद्वयोपन्यासमुप क्रम्य तमेव प्रधानीकृत्य देवयानं पन्थानमवतारयति तं कालमिति ॥ २३ ॥

स्वामिकृतटीका।

तदेवं परमेश्वरोपासकास्तत्पदं प्राप्य न निवर्त्तन्ते अन्ये त्वावर्त्तन्तइत्युक्तं तत्र केन मार्गेण गता नावर्त्तन्ते केन वा वर्त्तन्त इत्यपेक्षायामाह यत्रेति यत्र यस्मिन् काले प्रया ता योगिनोऽनावृत्तिं यान्ति यस्मिंश्च काले प्रयाता आवृत्तिं यान्ति तं कालं वक्ष्यामीत्य न्वयः अत्र च रश्म्यानुसारी अतश्चायनेऽपि दक्षिण इति सूचितन्यायेनोत्तरायणादिकाल विशेषमरणस्य त्वविवक्षितत्वात् कालशब्देन कालाभिमानिनोभिरातिवाहिकीभिर्देवता भिः प्राप्योमार्ग उपलक्ष्यते अतोऽयमर्थः यस्मिन् कालाभिमानिदेवतोपलक्षिते मार्गे प्र याता योगिन उपासकाः कर्मिणश्च यथोक्तमनावृत्तिभावत्वञ्च यान्ति तं कालाभिमा निदेवतोपलक्षितं मार्गं कथयिष्यामीति अग्निर्ज्योतिषोः कालाभिमानत्वाभावेऽपि भूय सामहरादिशब्दोक्तानां कालाभिमानिनां साहचर्यादाम्रवनमित्यादिवत् कालशब्देनोप लक्षणमविरुद्धं ॥ २३ ॥

नवलभाष्य।

अब प्रकरण में कहेहुये जे ओंकार की उपासना करनेवाले कालान्तरमें मुक्तिको प्राप्तहोनेवाले योगी तिनको उस ब्रह्मकी प्राप्तिकेलिये उत्तरमार्ग कहना चाहिये इससे अगाड़ीका श्लोक भगवान् कहते हैं न कहो फिर यत्र काले इसश्लोकमेंतो कालशब्दका उच्चारण किया है फिर मार्गका कथनकैसे सम्भव होताहै तिसपै कहते हैं कि यहां कालशब्द से लक्षणा करके मार्गही भगवान् को कहना अभीष्ट है जो और कर्मियों के दक्षिण मार्गका निरूपण इसप्रकरण में किया सो उत्तरमार्गकी स्तुतिके अर्थ है (यत्रेति) हे अर्जुन

दिना तत्रेति सप्तमी पूर्ववदेव सामीप्यार्था इष्टादीत्यादिशब्देन पूर्तदत्ते गृह्येते कृतात्य येऽनुशयवानिति न्यायं सूचयति तत्क्षयादिति आरोहावरोहयोरभ्यासवाचिना पुनः शब्देन संसारस्यानादित्वं सूच्यते ॥ २५ ॥

स्वामिकृतटीका।

आवृत्तिमार्गमाह धूम इति धूमाभिमानिनी देवता रात्र्यादिशब्दैश्च पूर्ववदेव रात्रिकृष्णपक्षदक्षिणायनरूपषण्मासाभिमानिन्यस्तिस्रोदेवता उपलक्ष्यन्ते एताभिरुपलक्षितो यो मार्गस्तत्र प्रयातः कर्मयोगी चान्द्रमसं ज्योतिस्तदुपलक्षितं स्वर्गलोकं प्राप्य तत्रेष्टापूर्तकर्मफलं भुक्त्वा पुनरावर्तते तत्रापि श्रुतिः ते धूमम भिसम्भवन्ति धूमाद्रात्रिं रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षद्यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकात् चन्द्रं ते प्राप्यान्नं भवन्तीत्यादि तदेवं निवृत्तिकर्मसहितोपासनया क्रममुक्तिः काम्यकर्मभिश्च स्वर्गभोगानन्तरमावृत्तिः निषिद्धकर्मभिस्तु नरकभोगानन्तरमावृत्तिः क्षुद्रकर्मणान्तु जन्तूनां अत्रैव पुनः पुनर्जन्मेति द्रष्टव्यं ॥ २५ ॥

नवलभाष्य।

धूमइति हे अर्जुन धूमशब्दकरके धूमाभिमानिनी देवता और रात्रिका अभिमानीदेवता और कृष्णपक्षका देवता और षण्मास दक्षिणायनाभिमानीदेवता इनदेवताओंके मार्गकरके कर्मयोगकरनेवालामनुष्य चन्द्रमा करके प्रकाशित स्वर्ग लोकको प्राप्तहोके कर्मभोगकी समाप्तिमें फिर मनुष्यलोक में आके जन्मादिकोंको प्राप्तहोताहै अर्थात् अग्निहोतादि कर्मकरनेवालेकी जब मृत्युहोतीहै तौ प्रथम उसको धूमाभिमानिनीदेवता अपनेलोकको ले जाताहै फिर रात्रिकादेवता अपनेलोकमें प्राप्तकरताहै फिर कृष्णपक्षकाअभिमानीदेवता अपने लोकमें प्राप्तकरताहै फिर षण्मास दक्षिणायनका देवता चन्द्रलोकमें प्राप्तकरताहै वहां पुण्यकर्मों के फलोंको भोगिके तिसके अन्त्यमें पुण्यशेषसे फिर वेदज्ञकर्मी ब्राह्मणादिकोंके गृहजन्मकोप्राप्तहो कर्म हीकोकरताहै इसप्रकार वारम्वार जन्ममरणको प्राप्तहोताहै ॥ २५ ॥

शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते।
एकया यात्यनावृत्तिमन्ययाऽवर्त्तते पुनः॥ २६ ॥

शङ्करभाष्यम्।

शुक्लेति शुक्लपक्षे शुक्ला च कृष्णा च शुक्लकृष्णे ज्ञानप्रकाशकत्वात् [illegible] कृष्णा एते शुक्लकृष्णे हि गती जगत् इत्यधिकृतानां ज्ञानकर्मणोर्न जगतः [illegible] सम्भवतः शाश्वते नित्ये संसारस्य नित्यत्वादिष्टं [illegible] शुक्लया [illegible] वृत्तिमन्ययेतरयाऽवर्त्तते पुनः भूयः ॥ २६ ॥

आनंदगिरिकृतटीका।

रात्र्यादौ मृतानां ब्रह्मविदामब्रह्मविदां [illegible] निवृत्त्याह शुक्लेति ज्ञानप्रकाश[illegible]

नवलभाष्य।

अब उन्हीं देवताओंको कहते हैं (अग्निरिति) अग्नि और ज्योति शब्द करकेभी यहां कालाभिमानी देवताही का ग्रहण है अथवा अग्नि ज्योति शब्दोंकरके प्रसिद्ध जो अग्नि सूर्य्यादि देवता तिन्हीं का ग्रहण है बहुतसे कालवाचक देवताओं के संग इनको कहाहै इससे इनदोनोंकाभी कालशब्दसे भगवान्ने ग्रहणकिया जैसे लोकमें कहते हैं कि यह आम्रका वनहैतो उसवन में केवल आम्रही के वृक्ष नहींहोते हैं किन्तु और वृक्षभी होते हैं परन्तु आम्रों के वृक्ष बहुतहोते हैं इससे आम्रवन ऐसा व्यवहार होता है तैसे यहांभी कालशब्दही करके सबके ग्रहणमें दोषनहीं है और अहः शब्द से दिनका अभिमानी जो देवता अर्थात् दिनका स्वामी अपना को मानरहाहै ऐसा जो देवता तिसका ग्रहण है ऐसेही इस प्रकरणमें यहां अभिमानीपद लिखाजायगा वहां स्वामी ऐसा अर्थ जानना और शुक्ल शब्दकरके शुक्लपक्षाभिमानी देवता ग्रहण कियाजाता है ऐसेंही षण्मास उत्तरायण कालाभिमानी देवताका ग्रहण जानना तो हे अर्जुन प्रणोंको त्यागकरकेइनदेवताओं के मार्गकरके गयेजे ब्रह्मोपासक योगीजन ते क्रम*करके ब्रह्मको प्राप्तहोते हैं अर्थात् मुक्तिको प्राप्तहोते हैं और शीघ्र उसीसमय में मुक्तिकी प्राप्तितौ सम्यग्दर्शन ज्ञानमें स्थित जेज्ञानी तिन्हींकी कही क्योंकि ज्ञानीके प्राण निकलके कहीं बाहरलोक में नहीं जाते हैं किन्तु ब्रह्महीमें लीनहोते हैं ऐसा *श्रुतिमें कहाहै तिससे वेज्ञानी ब्रह्ममय ब्रह्मभूतही हैं॥ २४ ॥

धूमो रात्रिस्तथा कृष्ण षण्मासा दक्षिणायनम्।
तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते ॥ २५ ॥

शङ्करभाष्यम्।

धूम इति धूमो रात्रिः धूमाभिमानिनी रात्र्याभिमानिनी च देवता तथा कृष्णः कृष्णपक्ष देवता षण्मासा दक्षिणायनमिति च पूर्ववद्देवतैव तत्र चन्द्रमसि भवं चान्द्रमसं ज्योतिरुत्फलं इष्टादिकारी योगी कर्मी प्राप्य भुक्त्वा तत्क्षयादिह निवर्त्तते पुनः ॥ २५ ॥

आनंदगिरिकृतटीका।

प्रकृतं देवयानं प्रस्थानं स्तोतुं पितृयानमुपन्यस्यति धूम इति तत्रापि मार्गचिह्नानि भोगभूमीश्च व्यवच्छिद्य आतिवाहिकदेवताविषयत्वं धूमादिपदानां विभजते धूमेत्या

---

*अर्थात् ओंकारमें ब्रह्मकाध्यान करनेवाला और अन्त्यसमयमें सुषुम्नानाड़ीके द्वारा ब्रह्मरन्ध्रको भेदनकर जिसने योगबल करके प्राणोंको निकाला है ऐसेयोगीको प्रथम अग्निदेवता अपने लोकको लेजाता है फिर वहां सज्योतिका अभिमानी देवता अपने लोकमें प्राप्तकरता है फिर दिनका देवता लेजाता है फिर शुक्लपक्ष का देवता फिर षण्मास उत्तरायण काल का देवता ब्रह्मलोक में योगीको प्राप्तकरता है फिर वहांकासुख भोग अपनी इच्छापूर्वक मुक्तिको प्राप्तहोता है इसप्रकार क्रममुक्ति वेद में कहीहै २४ ॥

*नतस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते इति श्रुतेः ॥ १८ ॥

नवलभाष्य।

और हे अर्जुन इनदोनोंमार्गोंका जाननेवाला योगी कभी मोहकोप्राप्त नहींहोताहै अर्थात् योगी यहबातजानताहै कि इसमार्गकरके संसारकोप्राप्त होताहै और इसमार्गकरके मोक्षको प्राप्तहोताहै इसकारण से कोई योगी कभी मोहको प्राप्तनहींहोताहै तिससे हे अर्ज्जुन तू सबकालमें योगयुक्तहो अर्थात् समाहित समाधिस्थहै चित्त जिसका ऐसा रहाकर ॥ २७ ॥

वेदेषु यज्ञेषु तपःसु चैव दानेषु यत् पुण्यफलं प्रदिष्टम् ।
अभ्येति तत् सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यम्॥२८॥

इतिश्रीभगवद्गीतासु योगशास्त्रेषु श्रीकृष्णार्ऽजुनसंवादे तारकब्रह्मयोगो नाम अष्टमोऽध्यायः ॥ ८ ॥

शङ्करभाष्यम्।

शृणु योगस्य माहात्म्यं वेदेष्विति वेदेषु सम्यगधीतेषु यज्ञेषु च साद्गुण्येनानुष्ठितेषु तपःसु च सुतप्तेषु दानेषु च सम्यग्दत्तेषु यदेतेषु पुण्यफलं प्रदिष्टं शास्त्रेणात्येत्यतीत्य गच्छति तत् सर्वं फलजातमिदं विदित्वा सप्त प्रश्ननिर्णयद्वारेणोक्तं सम्यगवधार्य्यानुष्ठाय इह यथा योगी परं उत्कृष्टमैश्वरं स्थानमुपैति प्रतिपद्यते आद्यमादौभवं कारणं ब्रह्मेत्यर्थः ॥ २८ ॥

इति श्रीमद्भगवद्गीताभाष्ये अष्टमोऽध्यायः ॥ ८ ॥

आनन्दगिरिकृतटीका।

श्रद्धावृद्ध्यर्थं योगंस्तौति शृण्विति पवित्रपाणित्वप्राङ्मुखत्वादिसाद्गुण्यमध्ययनस्य सम्यक्त्वमंगोपांगोपेत्य मनुष्ठानस्यसाद्गुण्यं तपसां शास्त्रोक्तानां सुतप्तत्वं मनोबुद्ध्या[illegible] कारपूर्वकत्वं दानस्य च सम्यक्त्वं देशकालपात्रानुगुणत्वमिदं विदित्वेत्यत्रेदम[illegible]मेव स्फुटयति सप्तेति यद्यपि किं तद् ब्रह्मेत्यादावध्यधियज्ञः कथं कोऽत्रेत्यत्र प्रश्नद्वय प्रतिभासानुसारेण कैश्चिदुक्तं तथापि प्रतिवचनालोचनायां द्वित्वप्रतीत्यभावात् [illegible] विवक्षया च शब्दद्वयस्य प्रतिनियतत्वाच्च सप्तेति विभज्यते नवेदं [illegible] त्वनुष्ठानपर्यन्तमित्याह सम्यगिति प्रकृतो ध्याननिष्ठो योगीत्युच्यते [illegible] पदं तदेव तिष्ठत्यस्मिन्नयोपमिति स्थानं योगानुष्ठानादैश्वर[illegible] क्रमेण लब्धुं शक्यमिति भावः तदनेन सप्त प्रतिवचनेन [illegible] पदार्थो व्याख्यातः ॥ २८ ॥

इति आनन्दगिरिकृतटीकायां [illegible] ॥ ८ ॥

स्वामिकृतटीका।

अध्यायार्थमष्टप्रश्नार्थनिर्णयनफलमुपसंहरति वेदेषु [illegible]

देवयानाख्या गतिस्तदभावाज्ज्ञानप्रकाशकत्वाभावात् धूमाद्यप्रकाशोपलक्षितत्वाद्वि प्राप्यत्वाच्च कृष्णा पितृयानलक्षणा गतिः तयोर्गत्योः श्रुतिस्मृतिप्रसिध्ययोः द्विश जगच्छब्दस्य ज्ञानकर्म्माधिकृतविषयत्वेन सङ्कोचे हेतुमाह न जगत इति अन्यथा नकर्म्मोपदेशानर्थक्यादित्यर्थः तयोर्नित्यत्वे हेतुमाह संसारस्येति मार्गयोर्यावत्सं भावित्वे फलितमाह तत्रेति क्रममुक्तिरनावृत्तिः भूयो भोक्तव्यकर्मवशादित्यर्थः ॥ २६

स्वामिकृतटीका।

उक्तमार्गावुपसंहरति शुक्लेति शुक्लाऽर्चिरादिगतिः प्रकाशमयत्वात् कृष्णा धूमादि तिस्तमोमयत्वात् एते गती मार्गौ ज्ञानकर्म्माधिकारिणौ जगतः शाश्वते अनादी. सं संसारस्यानादित्वात् तयोरेकया शुक्लयाऽनावृत्तिं मोक्षं याति अन्यया कृष्णया तु पुन वर्त्तते ॥ २६ ॥

नवलभाष्य।

हे अर्ज्जुन इसप्रकार शुक्ल और कृष्ण ये दो गती जगत्को अभिमत और निरन्तरचलीआती हैं अर्थात् ज्ञानके प्रकाशसे शुक्लगती तौ प्रणवोप सक जे ज्ञानी अधिकारी हैं तिनकी है और कर्म्मके अधिकारी हैं तिनक कृष्णगतिहै कर्ममार्गको अविद्याकार्य्य होनेसे अप्रकाशरूपा कृष्णगति और जे कर्माधिकाररहितहैं तिनकी कृष्ण गति भी नहींहै अर्थात् स्वर्गलो कमें गतिनहींहै किन्तु इसीलोकमें जीवते मरतेहैं तिनमें एकशुक्लगतिकरके तौ मोक्षको प्राप्तहोताहै और दूसरी कर्मियोंकी कृष्णगति जो कही तिसक के संसारमें फिर लौटआताहै ॥ २६ ॥

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवाऽर्जुन॥२७॥

शङ्करभाष्यम्।

नैत इति नैते यथोक्ते सृती मार्गौ पार्थ जानन् संसारायैकाऽन्या मोक्षाय चेति योगी न मुह्यतिनकश्चन कश्चिदपि तस्मात् सर्व्वेषु कालेषु योगयुक्तः समाहितो भवाऽर्जुन ॥ २७ ॥

आनन्दगिरिकृतटीका।

गतेरुपास्यत्वाय तद्विज्ञानं स्तौति नैत इति योगस्य मोहापोहकत्वे फलितमाह त स्मादिति ज्ञानप्रकारमनुवदति संसारायेति मोक्षाय क्रममुक्तयर्थमित्यर्थः योगी ध्यानि ष्ठो गतिमपि ध्यायन्नैव मुह्यति केवलं कर्म दक्षिणमार्गप्रापकं कर्तव्यत्वेन न प्रत्येती त्यर्थः योगस्यापुनरावृत्तिफलत्वे नित्यकर्तव्यत्वं सिद्धमित्युपसंहरति, तस्मादिति ॥ २७ ॥

स्वामिकृतटीका।

मार्गज्ञानफलं दर्शयन् भक्तियोगमुपसंहरति [illegible] मार्गौ [illegible]
पकौ जानन् कश्चिदपि योगी न मुह्यति सुख [illegible]
मेश्वरनिष्ठ एव भवतीत्यर्थः स्पष्टमन्यत् ॥ २७

श्रीमद्भगवद्गीतासटीक॥

नवमोऽध्यायः।

श्रीभगवानुवाच।

इदन्तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात्॥ १ ॥

शङ्करभाष्यम्।

अष्टमे नाडीद्वारेण धारणायोगः सगुण उक्तस्तस्य च फलमग्न्यर्चिरादिक्रमेण कालान्तरे ब्रह्मप्राप्तिलक्षणमेवानावृत्तिरूपं निर्दिष्टं तत्रानेनैव प्रकारेण मोक्षप्राप्तिफलमधिगम्यते नान्यथेति तदाशङ्काव्यावित्त्सया भगवानुवाच इदमिति इदं ब्रह्मज्ञानं वक्ष्यमाणमुक्तञ्च पूर्वेष्वध्यायेषु तद्बुद्धौ सन्निधीकृत्येदमित्याह तुशब्दो विशेषनिर्द्धारणार्थः इदमेव तु सम्यग्ज्ञानं साक्षान्मोक्षप्राप्तिसाधनं वासुदेवः सर्वमित्यात्मैवेदं सर्वमेकमेवाद्वितीयमित्यादि श्रुतिस्मृतिभ्यो नान्यद्य येऽन्यथातो विदुरन्यराजानस्तेऽक्षय्यलोका भवन्तीत्यादि श्रुतिभ्यश्च ते तुभ्यं गुह्यतमं गोप्यतमं प्रवक्ष्यामि कथयिष्याम्यनसूयवे असूयारहिताय किंतज्ज्ञानं किंविशिष्टं विज्ञानसहितमनुभवयुक्तं यत् ज्ञानं ज्ञात्वा प्राप्य मोक्ष्यसेऽशुभात् संसारबन्धनात्॥ १॥

आनन्दगिरिकृतटीका।

अतीतेनागामिनोध्यायस्यागतार्थत्वं वक्तुं वृत्तमनुद्रवति अष्टम इति नाड्या सुषुम्नाख्या धारणाख्येनाङ्गेन युक्तो योगः धारणायोगः सगुणः सर्वद्वारसंयमनादिगुणान्वितः स [illegible] हित इत्यर्थः तत्फलोक्त्यर्थमनन्तराध्यायारम्भमाशङ्क्याह तस्य चेति [illegible] दिनोपलक्षितेन क्रमवता देवयानेन यथेति यावत् ग्रामान्तरमेव यथा [illegible] मनेन मार्गेणेत्याशङ्क्याह कालान्तर इति [illegible] न तस्येत्यादिश्रुतिविरोधः स्यादित्याशयेन प्रकृते तत्रेति [illegible] निवृत्त्यर्थमनन्तराध्यायस्य प्रवृत्तिं दर्शयति तदा प्रकृतेति [illegible] लोचनया बुद्धिसन्निधानादिदं [illegible] ब्रह्मज्ञानं [illegible] कृताशानात् ज्ञानस्य [illegible] तुशब्द इत्याह [illegible] इदमेवेति [illegible] द्वैतज्ञानमपि क्वचित् मोक्षहेतुरित्याशङ्क्याह [illegible]

दिभिः तपःसु कायशोषणादिभिः दानेषु सत्पात्रेऽर्पणादिभिः यत्पुण्यफलमुपदिष्टं शास्त्रेषु तत्सर्वमभ्येति ततोऽपि श्रेष्ठं योगैश्वर्यं प्राप्नोति किं कृत्वा इदमष्टप्रश्नार्थनिर्णयेनोक्तं तत्त्वं विदित्वा ततश्च योगी ज्ञानी भूत्वा परमुत्कृष्टं आद्यं जगन्मूलभूतं स्थानं विष्णोः पदं प्राप्नोति ॥ २८ ॥

इति स्वामिकृतटीकायामष्टमोऽध्यायः ॥ ८ ॥

नवलभाष्य ।

और अब योगकेमाहात्म्यको श्रवणकर अर्थात् हे अर्जुन तू सुन इसआशयसेकहते हैं कि (वेदेष्विति) हे अर्जुन सम्यक्प्रकारसे पढ़हुये जे वेद तिन्होंकेविषे और अच्छीतरह साङ्गोपाङ्गसेकियेहुये जे यज्ञ तिन्होंमें और अच्छीतरहसे कियेहुये जे तप अर्थात् मन और इन्द्रिय इन्होंकोवशकरके किये जे तप तिन्होंमें और अच्छीतरह श्रद्धापूर्वक वेदवित् ब्राह्मणोंमेंदिये जे दान इनसबोंमेंशास्त्रकरके जो पुण्यफलकहागयाहै तिसको उल्लंघनकरके योगी परमउत्कृष्टस्थान जो ब्रह्म तिसकोप्राप्तहोताहै कौनसायोगीप्राप्तहोता है इसआकांक्षामें कहते हैं कि (तत्सर्वमिदंविदित्वा) अर्थात् इसअध्याय में जैसे अर्ज्जुनकी किं तद्ब्रह्मइत्यादि साता प्रश्नोंका उत्तरकहाहै,तिसको अच्छीतरहसेजानके वैसेही अनुष्ठानकरनेवाला जो योगी सो सब उक्त वेदाध्ययनादि पुण्यफलोंको उल्लंघनकरके अर्थात् इनसबोंसेअधिक पुण्यफल रूप परमपदको प्राप्तहोताहै ॥ २८ ॥

इतिश्रीमद्भगवद्गीताभगवच्छंकराचार्यकृतभाष्येस्वर्गवास्युमादत्तविरचिततत्त्वविवेकामृताख्येनवलभाष्येअष्टमोऽध्यायस्समाप्तः ॥ ८ ॥

ब्रह्ममें नहीं और स्वगतभेद जैसे अपने हस्तपादादि अवयवोंकाभेद सोभी ब्रह्ममें नहीं सम्भवहोता क्योंकि ब्रह्मका अवयवही कोईनहीं है जिससे भेद होय और जे द्वैतरूप प्रपञ्चसे विलक्षण आत्माकोदेखते हैं ते अन्यराजाके तुल्य अक्षयलोकको प्राप्तहोते हैं इसप्रकार श्रुतिस्मृतियोंकेदेखनेसे ब्रह्मरूप ही अपनाकोजानना सो सम्यग्दर्शन ज्ञानकहाताहै इसीज्ञानसे साक्षात्मोक्षकोप्राप्तहोताहै ऐसा जो यहअत्यन्तगुप्तज्ञान तिसको हे अर्जुन मैं तेरेअर्थ कहताहूं कदाचित् कोई आशंकाकरै कि ज्ञानगुप्त कैसे जो ज्ञान अनेक श्रुति स्मृतियों में प्रसिद्ध और भगवान्ने भी गीतामें बहुतबारकहा और अनेक वेदान्तीलोग ज्ञानहीका बहुत उपदेशकरते हैं और श्रोतालोग भी बहुत श्रवणकरते हैं तौ जो अत्यन्त प्रसिद्धवस्तु उसको भगवान्ने अत्यन्तगुप्त कौन आशयसेकहा तौ इसकाउत्तरयहहै कि ज्ञान अत्यन्त दुर्ज्ञेयहै यही इसकी गुप्तताहै विना भगवत्कृपा किसीको प्राप्तनहींहोता बहुतसे वेदान्ती लोग शास्त्रप्रक्रियासे निरूपण भी करतेहैं परन्तु फिर वे आपही मोहगर्त्तमें गोते खाते हैं जे धनपुत्रादिएषणाओंसे नहींनिवृत्तहोते कोई महात्मा परमहंस नारायण रूप विरले हैं जे इसअविद्याजालग्रस्त जीवोंका उद्धारकरते हैं इसआशयसे परमदयालु भगवान् ज्ञानको वारम्वार उपदेश करते हैं और अति गुप्त रहस्य इसज्ञानको कहतेहैं ॥ १ ॥

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययम् ॥ २ ॥

शङ्करभाष्यम्।

तच्च स्तौति राजविद्येति राजविद्या विद्यानां राजा दीप्त्यतिशयवत्त्वात् दीप्यते हीयमतिशयेन ब्रह्मविद्या सर्वविद्यानां राजगुह्यं तथा गुह्यानां राजा पवित्रं पावनमिदमुत्तमं सर्वेषां पावनानां शुद्धिकारणमिदं ब्रह्मविज्ञानमुत्कृष्टतममनेकजन्मसहस्रसञ्चितमपि धर्माधर्मादि समूलं कर्म्मक्षणमात्राद्भस्मीकरोति यतोऽतः किं तस्य पावनत्वं वक्तव्यं किञ्च प्रत्यक्षावगमं प्रत्यक्षेण सुखादेरिवावगमो यस्य तत् प्रत्यक्षावगमं अनेकगुणवतोऽपि धर्मविरुद्धत्वं दृष्टं [illegible] ग इव न तथा आत्मज्ञानं धर्मविरोधि किन्तु धर्म्यं धर्मादनपेतं एवमपि स्यात् दुःसम्पाद्यत्वमित्यत आह सुसुखं कर्त्तुं यथा रत्नविवेकविज्ञानं तत्राल्पायासानां अन्येषां कर्म्मणां सुखसम्पाद्यानामल्पफलत्वं फलतः दुष्कराणाञ्च महाफलत्वं दृष्टमितीदन्तु सुखसम्पाद्यत्वात् फलक्षयाद्व्येतीति प्राप्ते तदाहाऽव्ययं नास्य फलतः कर्म्मवद्व्ययोऽस्तीति अव्ययं अतः श्रद्धेयमात्मज्ञानं ॥ २ ॥

आनन्दगिरिकृतटीका।

तदाभिमुख्यसिद्धये तज्ज्ञानं स्तौति तदेवेति [illegible] हेतुमाह दीप्तीति कुतो ब्रह्मविद्यायाः विद्यान्तरेभ्यो [illegible] इति दृश्यते हि विद्वदन्येभ्यो लोके [illegible] कारणं ब्रह्मज्ञानमित्येतदुपपादयति [illegible] म्यमिदं ज्ञानं किन्तु [illegible]

त्यत्र श्रुतिमुदाहरति अथेति अविद्याप्रकरणोपक्रमार्थोऽथशब्दः अतो द्वैतादन्यथा भि-न्नत्वेनेत्यर्थः विदुस्तत्त्वमिति शेषः द्वैतस्य दुर्निरूपत्वेन कल्पितत्वात् तज्ज्ञानं रज्जुस-र्पादिज्ञानतुल्यत्वान्न क्षेमप्राप्तिहेतुरिति चकारार्थः असूया गुणेषु दोषाविष्करणं तद्रहि-ताय ज्ञानाधिकृताय इत्यर्थः ज्ञानं ब्रह्मचैतन्यं तद्विषयं वा प्रमाणज्ञानं तस्य तेनैव विशे-षितत्वानुपपत्तिमाशङ्क्य व्याकरोति अनुभवेति विज्ञानमनुभवः साक्षात्कारस्तेन सहित-मित्यर्थः उक्तज्ञानं प्राप्तस्य किं स्यादित्याशङ्क्याह यज्ज्ञानमिति ॥ १ ॥

स्वामिकृतटीका।

परेशः प्राप्यते शुद्धभक्त्येति स्थितिमष्टमे। नवमे तु तदैश्वर्य्यमत्याश्चर्यं प्रपञ्चयते॥ एवं तावत् सप्तमाष्टमयोः स्वीयपरमेश्वरतत्त्वं भक्त्यैव सुलभं नान्यथेत्युक्तमिदानीमचि-न्त्यं स्वकीयमैश्वर्यं भक्तेश्चासाधारणप्रभावं प्रपञ्चयिष्यन् श्रीभगवानुवाच इदमिति वि-शेषेण ज्ञायते अनेनेति विज्ञानमुपासनं तत्सहितं ज्ञानमीश्वरविषयमिदं तु तेऽनसूयवे पुनः पुनः स्वमाहात्म्यमेवोपदिशतीत्येवं परमकारुणिके मयि दोषदृष्टिरहिताय तुभ्यं व-क्ष्यामि तुशब्दोवैशिष्ट्ये तदेवाह गुह्यतममित्यादिना गुह्यं धर्मज्ञानं ततो देहादिव्यति-रिक्तात्मज्ञानं गुह्यतरं ततोऽपि परमात्मज्ञानमतिरहस्यत्वाद्गुह्यतमं तज्ज्ञात्वाऽशुभात् संसारबन्धान्मोक्ष्यसे सद्य एव मुक्तो भविष्यसि ॥ १ ॥

नवलभाष्य।

अष्टमाध्यायमें सुषुम्नानाड़ीकेद्वाराअंगीकरके सहित धारणायोगकहा तिस काफल अर्चिरादि मार्गकरके क्रमसेकालान्तरमें अर्थात् देरकरकेब्रह्मप्राप्ति लक्षण अर्थात् ब्रह्मप्राप्तिही है स्वरूपजिसका ऐसा मोक्षरूप फलकहा तहां इसीप्रकार करके मोक्ष प्राप्ति रूप फलप्राप्तहोताहै और प्रकारसे नहीं प्राप्त होताहै ऐसी कदाचित् अर्जुनके हृदयमें आशंकाहोय तिसआशंकाको दूर करनेकी इच्छाकरके श्रीभगवान् कहते हैं कि (इदमिति) हे अर्जुन यह जो आगे कहाजायगा और पीछेके अध्यायोंमें जोकहिआये विज्ञानसहित ब्रह्म ज्ञान अर्थात् अनुभवसहित ब्रह्मज्ञान तिसको मैं असूया दोषरहित जो तू तिसकेअर्थ कहताहूं और हे अर्जुन जिस ज्ञानकोजानके अर्थात् प्राप्तहोके अशुभ जो संसारबन्धन तिससे तू छूटजायगा अब यहां(इदन्तुतेगुह्यतमम्) इसमें तु शब्द जो भगवान्नेकहाहै सो विशेष अर्थके निश्चयकेलिये कहा है अर्थात् हे अर्जुन यह एक सम्यग्ज्ञान जो है सो साक्षात् मोक्ष प्राप्तिका साधनहै यह कौनसा सम्यग्ज्ञानहै जो कि श्रुति और स्मृतियोंमें प्रसिद्धहै जैसे (वासुदेवःसर्वमितिआत्मैवेदंसर्व्वम् एकमेवाद्वितीयमित्यादिश्रुतिस्मृ-तिभ्यः नान्यदण्ययेन्यथातोविदुरन्यराजानस्तेऽक्षय्यलोकाभवन्तीत्यादिश्रुति-भ्यश्च) अर्थ सबजगत् वासुदेव जोपरमात्मा तिसीकास्वरूपहै और जोकुछ दिखाई पड़ताहै सो सब आत्माही है और एक अद्वितीयब्रह्म है अर्थात् सजातीय विजातीय स्वगत भेदकरकेरहित ब्रह्महै तहां सजातीयभेद जैसे ब्राह्मणोंमें परस्पर कुलकाभेद तैसे ब्रह्मका किसीसे भेदनहीं है क्योंकि ब्रह्म जातिरहितहै और विजातीय भेद जैसे ब्राह्मणका क्षत्रियादिकों से सो भी

क्या जौंहरीलोगोंको रत्नोंकेजाननेमें भारवाहक मनुष्यकेतुल्य कष्टहोता है किन्तु अभ्यासवशसे विद्याकी निपुणतासे देखतेही सत्य और झूंठापनेको जानसक्तेहैं तो भी लोकमें जे थोड़ेश्रमसे कर्म्महोतेहैं अर्थात् जे सुसाध्य कर्महोतेहैं तिनका थोड़ाहीफल देखनेमेंआताहै और जे कर्म कष्टसेहोते हैं अर्थात् बड़ेश्रमसेहोते हैं उनकाफल भी बड़ादेखाहै इससे सुखसाध्यहोनेसे ज्ञानफलसे न्यूनताको प्राप्तहोताहोगा अर्थात् फल इसका थोड़ाहोताहोगा ऐसा दोष प्राप्तहुआ तिसके निवारणकरनेकोकहा कि (अव्ययम्) यह ज्ञान कभी फलकेक्षयसे व्ययको प्राप्तनहींहोताहै अर्थात् कर्म्मकीतरह न्यूनताको प्राप्त नहींहोताहै इससे अव्ययहै इससे आत्मज्ञान श्रद्धाकरनेयोग्यहै २ ॥

अश्रद्दधानाः पुरुषा धर्मस्यास्य परन्तप ।
अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि॥ ३ ॥

शङ्करभाष्यम्।

ये पुनः अश्रद्दधाना इति अश्रद्दधानाः श्रद्धाविरहिताः आत्मज्ञानस्य धर्म्मस्यास्य स्वरूपे तत्फले च नास्तिकाः पापकारिणोऽसुराणामुपनिषदं देहमात्रात्मदर्शनमेव प्रतिपन्ना असन्तः पुरुषाः परन्तप अप्राप्य मां परमेश्वरं मत्प्राप्तौ नैवाशङ्केति मत्प्राप्तिमार्गसाधनभेदभक्तिमात्रमप्य प्राप्येत्यर्थः निवर्त्तन्ते निश्चयेन आवर्त्तन्ते क्व मृत्युसंसारवर्त्मनि मृत्युयुक्तं संसारस्तस्य वर्त्म नरकतिर्यगादिप्राप्तिमार्गस्तस्मिन्नेव वर्त्तन्त इत्यर्थः ॥ ३ ॥

आनन्दगिरिकृतटीका।

आत्मज्ञानाख्ये धर्मे श्रद्धावतां तन्निष्ठानां परमपदप्राप्तिमुक्त्वा ततो विमुखानां संसारप्राप्तिमाह ये पुनरिति आत्मज्ञानतत्फलयोर्नास्तिकानेव विशिनष्टि पापेति उक्तानामासुरप्रकृतीनां भगवत्प्राप्तिसम्भावनाभावादप्राप्य मामित्यप्रसक्तप्रतिषेधः स्यादित्याशङ्क्याह मत्प्राप्ताविति ॥ ३ ॥

स्वामिकृतटीका।

नन्वेवमप्यतिसुकरत्वेन के नाम संसारिणः स्युस्तत्राह अश्रद्दधाना इति अस्य भक्तिसहितज्ञानलक्षणस्य धर्मस्येति कर्मणि षष्ठी इमं धर्ममश्रद्दधाना आस्तिक्येनानाद्रियमाणा उपायान्तरैर्मत्प्राप्तये कृतप्रयत्ना अपि मामप्राप्य मृत्युयुक्ते संसारवर्त्मनि निवर्तन्ते मृत्युव्याप्तसंसारमार्गे परिभ्रमन्तीत्यर्थः ॥ ३ ॥

नवलभाष्य।

और हे अर्जुन जे पुरुष आत्मज्ञानरूप जो स्वधर्म तिसमें श्रद्धाकरके रहितहैं अर्थात् जे पुरुष देहमात्रमें आत्मदृष्टिके करनेवाले अर्थात् देहात्म कोमानके आत्मज्ञानकेस्वरूपमें और फलमें नास्तिकताको प्राप्तहुयेहैं पुनः जे पापकारी असत्पुरुषते मेरी प्राप्तिके मार्गमें साधन जो भक्तिकहिये तिसको विनाहीप्राप्तहुये मृत्युयुक्त संसारकेमार्गमें अर्थात् नरकादिकोंकी प्राप्तिरूप मार्गमें निरन्तररहतेहैं ॥ २ ॥

यद्वावगम्यत इति अवगमःफलं प्रत्यक्षोऽवगमोऽन्योति दृष्टफलत्वं ज्ञानस्योच्यते धर्म्य मित्येतद्व्याकरोति अनपेतमिति धर्मस्येव तस्य क्लेशसाध्यत्वमाशङ्क्याहएवमपीति रत्नवि मयं विवेकज्ञानं सम्प्रयोगादुपदेशापेक्षादनायासेनदृष्टं तथेदं ब्रह्मज्ञानमित्याह यथेति अव्य यमिति विशेषणमाशङ्कापूर्वकं विवृणोति तत्रेत्यादिना व्यवहारभूमिः सप्तम्यर्थः ज्ञानस्या क्षयफलत्वे फलितमाह अत इति ॥ २ ॥

स्वामिकृतटीका।

किञ्च राजविद्येति इदं ज्ञानं राजविद्या विद्यानां राजा राजगुह्यं गुह्यानाञ्च राजा विद्यासु गोप्येषु चातिरहस्यं श्रेष्ठमित्यर्थः राजदन्तादित्वादुपसर्जनस्यापि परत्वं राज्ञां विद्या राज्ञां गुह्यमिति वा उत्तमं पवित्रमिदमत्यन्तपावनं ज्ञानिनां प्रत्यक्षावगमञ्च प्र त्यक्षः स्पष्टोऽवगमोऽवबोधो यस्य तत् प्रत्यक्षावगमं दृष्टफलं इत्यर्थः धर्म्यं धर्म्मादनपेतं वेदोक्तसर्वधर्मफलत्वात् कर्त्तुञ्च सुसुखं सुखेन कर्त्तुं शक्यमित्यर्थः अव्ययञ्चाक्षयफल त्वात् ॥ २ ॥

नवलभाष्य।

तिसज्ञानकी भगवान् स्तुतिकरतेहैं (राजविद्येति) हे अर्जुन यह ज्ञान प्रकाशके अधिकहोनेसे सबविद्याओंकाराजाहै इससे इसको राजविद्याकहते हैं क्योंकि सबलोकमेंप्रसिद्धहै कि सबविद्याओंके मध्यमें ब्रह्मविद्या अपनी दीप्तिकरके प्रकाशकरती है और जितने गुप्तपदार्थ हैं तिनका यह आत्म- ज्ञान राजाहै इससे राजगुह्यहै अर्थात् जो सबकेपास भी सबकालमें है परंतु इसको कोई जाननहीं सक्ता इससे यह अतिगुप्त है और यह उत्तम पवित्र है नामपावन है अर्थात् जितने पवित्रकरनेवाले शुद्धि करनेवाले पदार्थ हैं तिन्हीं के मध्यमें यह आत्मविज्ञान अत्यन्त उत्कृष्टहै नाम श्रेष्ठ है जिससे अनेक हजारों जन्मके सञ्चित कियेहुयेभी धर्म्म अधर्म्मादि कर्मोंको जड़ समेत क्षणमात्रमें भस्मकरदेता है इससे इसकी पवित्रता क्या कहनाचा- हिये और फिर यह ज्ञान कैसा है किजो प्रत्यक्षावगम है अर्थात् प्रत्यक्ष है सुखादिक के सदृश अवगम निश्चय जिसका ऐसा है जैसे अपने सुखको वा दुःखको सबकोई प्रत्यक्ष जानसक्ता है कि इसमें हमको सुखहै इसमें दुःखहै तो जिसआत्माको सुखका वा दुःखका किसीने निश्चय किया तो उसआत्माकाजाननाभी प्रत्यक्षही सम्भवहोताहै अर्थात् अपनेआपही जा- ननायनसक्ताहै औरकेजतानेसे ठीकठीक आत्मज्ञान नहींहोताहै और जो अपनाको भूलगयाहै उसको औरकेजतानेसेज्ञान भी होताहै तो भी ठीक ठीक जब आपही अपनाको जाने तब वह जाननेवाला कहाता है इससे आत्मज्ञान प्रत्यक्षावगमनहींहै यहसिद्धहुआ और लोकमें अनेकगुणयुक्तभी पुरुषहै परन्तु कोई धर्मविरोधी भी गुण दिखाईपड़ताही है तैसे यह ज्ञान नहींहै किन्तु धर्म्यहै अर्थात्धर्मयुक्तहै तौभी लोकमेंधर्मयुक्तपदार्थहै सोभी कष्टसे सिद्धहोताहै ऐसाहोताहै तैसा यह ज्ञाननहीं है किन्तु (सुसुखंकर्तुम्) अर्थात् सुखपूर्वक करनेको योग्यहै जैसे रत्नोंके विवेकका विज्ञान होताहै

होते इससे सब भूत मेरेमें स्थितकहेजातेहैं जिससे उनभूतोंको मैं आत्माहों इससे उनभूतोंमेंस्थितहों ऐसा मूढ़बुद्धियोंको मैं प्रतीतहोताहूं इससे म कहताहूं कि हे अर्जुन मैं उनभूतोंमें स्थितनहींहूं जैसे मूर्त्तपदार्थ अर्थात् जैसे मूर्तिमान्पदार्थ किसीमेंस्थितहोय तौ वह उसको आलिंगनकरेहुये स्थित प्रतीतहोता है तैसे मेरा किसीसे मिलापनहीं फिर मैं कैसे स्थितहोसक्ताहूं और आकाश भी मेरी सत्तासे प्रतीतहोताहै इससे आकाशका अन्तस्वरूप मैं हूं इसकारणसे गौण मेरी स्थिति प्रतीतिहोतीहै वास्तवमेंनहीं है ॥ ४ ॥

नच मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्नच भूतस्थो ममात्मा भूतभावनः ॥ ५ ॥

शंकरभाष्यम् ।

नह्यसंसर्गिवस्तु क्वचिदाधेयभावेनावस्थितं भवस्रत एवासंसर्गित्वान्मम नचेति नच मत्स्थानि भूतानि ब्रह्मादीनि पश्य मे योगं युक्तिः घटनं मे ममैश्वरं योगमात्मनः ईश्वरस्येदमैश्वरं याथात्म्यमित्यर्थः तथाचास्मनो या श्रुतिरसंसर्गित्वादसङ्गतां दर्शयत्यसङ्गो नहि सज्जत इदञ्चाश्चर्यमन्यत् पश्यभूतभृदसङ्गोऽपि सन् भूतानि बिभर्ति नच भूतस्थो यथोक्तेन न्यायेन दर्शितत्वाद् भूतस्थत्वानुपपत्तेः कथं पुनरुच्यते असौ ममात्मेति विभज्य देहादिसंघातं तस्मिन्नहङ्कारमध्यारोप्य लोकबुद्धिमनुसरन् व्यपदिशति ममात्मेति न पुनरात्मन आत्मा अन्य इति लोकवदजानन् तथा भूतभावनो भूतानि भावयति उत्पादयति वर्द्धयति वा भूतभावनः ॥ ५ ॥

आनंदगिरिकृतटीका ।

संश्लेषाभावेऽपि किमिति नाधेयत्वमत आह नहीति परमेश्वरस्य भूतेषु स्थित्यभावेऽपि भूतानां तत्र स्थितिरास्थितेति कुतोऽसङ्गत्वं तत्राह भतएवेति नचेत् तत्र न कार्योऽवधारणार्थः भूतानामीश्वरेणैव स्थितिरित्यत्र हेतुमाह पश्येति आत्मनोऽसङ्गत्वमक्रिय मित्यत्र प्रमाणमाह तथाचेति असङ्गश्चेदीश्वरस्तर्हि कथं मत्स्थानि भूतानीत्युक्तं कथञ्च तथोक्तांश्च मत्स्थानीति तद्विरुद्धमुदीरितमित्याशङ्क्याह इदञ्चेति तर्हि भूतसम्बन्धः स्यादिति नेत्याह नचेति यथोक्तेन न्यायेन असंगत्वेनेति यावत् असंगतया [illegible] भूतानि सम्बन्धेऽपि कल्पनया तदविरोधान्न मिथोविरोधोऽस्तीति भावः आत्मनः [illegible] ऽन्यत्वायोगाय कुतः सम्बन्धोक्तिरित्याशङ्क्याह भतेति यथा लोके [illegible] भेदमारोप्य ममायमिति सम्बन्धमनुभवति न तथेह सम्बन्धः [illegible] भावादतो भेदे सत्येव लोके सम्बन्धबुद्धिदर्शनमनुसरन् [illegible] भज्याहङ्कारं तस्मिन्नारोप्य असौममात्मेति भेदं [illegible] व्यपदेशात्ततो निकृष्टस्य स्वरूपस्यात्मशब्देन निर्द्दिश्य [illegible] त्वांगीकारेणैवात्मा भूतानि भावयतीत्याह तथेति ॥ ५ ॥

स्वामिकृतटीका ।

किञ्च नचेति नच मयि स्थितानि भूतानि [illegible]
मयत्वञ्च पूर्वोक्तं विरुद्धमित्याशङ्क्याह पश्येति मे [illegible]
घटनाचातुर्य्यमिदं पश्य मदीययोगमाया [illegible]
अन्यदप्याश्चर्यं पश्येत्याह भूतेति भूतानि बिभर्ति [illegible]

अध्याय ९

मया ततमिदं सर्वं जगदव्यक्तमूर्त्तिना।
मत्स्थानि सर्वभूतानि नचाहं तेष्ववस्थितः ॥ ४॥

शङ्करभाष्यम्।

इति ज्ञानं स्तुत्वार्जुनमभिमुखीकृत्याह मयेति मया मम यः परोभावस्तेन ततं व्याप्तं सर्वमिदं जगदव्यक्तमूर्त्तिना न व्यक्ता मूर्त्तिः स्वरूपंयस्य मम सोऽहमव्यक्तमूर्त्तिस्तेन मयाव्यक्तमूर्त्तिना करणागोचरस्वरूपेणेत्यर्थः तस्मिन्मय्यव्यक्तमूर्त्तौस्थितानि मत् स्थानि सर्व्वभूतानि ब्रह्मादीनि स्तम्बपर्य्यन्तानि नहि निरात्मकं किंचिद्भूतं व्यवहारायावकल्प्यतेऽतो मत् स्थानि मयात्मना आत्मवत्त्वेन स्थितानि अतो मयि स्थितानीत्युच्यते तेषां भूतानामहमेव आत्मा इत्यतस्तेषु स्थितः इति मूढबुद्धीनामवभासतेऽतोब्रवीमि नचाहं तेषु भूतेष्ववस्थितो मूर्त्तवत् संश्लेषाभावेनाऽऽकाशस्याप्यन्तरतमो ह्यहं ॥ ४ ॥

आनन्दगिरिकृतटीका।

स्तुतिनिन्दाभ्यां ज्ञाननिष्ठां मह्नीकृत्य ज्ञानं व्याख्यातुमारभते स्तुत्येति सोपाधिकस्य व्याप्त्यसम्भवमभिप्रेत्य विशिनष्टि ममेति अनवच्छिन्नस्य भगवद्रूपस्य निरुपाधिकत्वमेव साधयति करणेति व्याप्यव्यापकत्वेन जगतो भगवतश्च परिच्छेदमाशङ्क्याह तस्मिन्निति तथापि भगवतो भूतानाञ्चाधाराधेयत्वेन भेदः स्यादित्याशङ्क्याह नहीति निरात्मकस्य व्यवहारानर्हत्वे फलितमाह अत इति ईश्वरस्य भूतात्मत्वे तेषु स्थितिः स्यादित्याशङ्क्याह तेषामिति तस्य तेषु स्थित्यभावं व्यवस्थापयति मूर्तवदिति ॥ ४ ॥

स्वामिकृतटीका।

तदेवं वक्तव्यतया प्रस्तुतस्य ज्ञानस्य स्तुत्या श्रोतारमभिमुखीकृत्य तदेवं ज्ञानं कथयति मयेति द्वाभ्याम् अव्यक्ता अतीन्द्रिया मूर्त्तिः स्वरूपं यस्य तादृशेन मया कारणभूतेन सर्वमिदं जगत्ततं व्याप्तं तत् सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेः अतएव कारणभूते मयि तिष्ठन्तीति मत्स्थानि सर्वाणि भूतानि चराचराणि एवमपि घटादिषु स्वकार्येषु मृत्तिकेव तेषु भूतेषु नाहमवस्थित आकाशवदसंगत्वात् ॥ ४ ॥

नवलभाष्य।

अब इसप्रकार भगवान् ज्ञानकीस्तुतिकरके अर्जुनको सम्मुखकरके कहते हैं (मयेति) हेअर्जुन अव्यक्त अप्रकट अर्थात् इन्द्रियादिकोंके नहीं गोचर है मूर्तिजिसकी ऐसा जो मैं अर्थात् सबसेपरे मेरा भाव तिसकरके सम्पूर्ण यह जगत् व्याप्तहोरहाहै तिस अव्यक्तमूर्त्ति मेरेविषे ब्रह्माको आदिलेके तृण पर्य्यन्त जे सम्पूर्णभूत ते स्थितहोरहे हैं अर्थात् नहीं कोई निरात्मक भूत आत्मरहित भूत व्यवहारकेअर्थ कल्पनाकियाजाताहै इससे सबभूत मेरे विषेस्थितहैं अर्थात् मैं जो आत्मा तिसकरके आत्मवत्वधर्मकरके स्थितहैं अर्थात् मैं सबभूतोंका आत्माहौं मेरेही होनेसे सबभूत आत्मवान्कहाते हैं और मैं न होऊं तो विनाआधार क्षणमात्र भी कोई कैसे स्थितहोसका है रज्जुमें कल्पितसर्प भी विनारज्जुके प्रतीतिकेयोग्य नहीं होसका और जे आकाशादि अत्यन्तसूक्ष्मभूत हैं ते भी विनाआत्माके प्रतीति गोचर नहीं

यथाऽऽकाशस्थितो नित्यं वायुः सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥ ६ ॥

शङ्करभाष्यम्।

यथोक्तेन श्लोकद्वयेन उक्तमर्थं दृष्टान्तेनोपपादयन्नाह यथेति यथा लोके आकाशस्थितः आकाशे स्थितो नित्यं सदा वायुः सर्वत्र गच्छतीति सर्वत्रगः महान् परिमाणतस्तथाकाशवत् सर्वगते मय्यसंश्लेषेणवस्थितानि मत्स्थानीत्येवं उपधारय जानीहि ॥ ६ ॥

आनंदगिरिकृतटीका।

सृष्टिस्थितिसंहाराणामसंगात्माधारत्वं मया ततमिदमित्यादि श्लोकद्वयेनोक्तोऽर्थस्त द्दृष्टान्तेनोपपादयन्नादौ दृष्टान्तमाहेति योजना सदेत्युत्पत्तिस्थितिसंहारकालो गृह्यते आ काशादेर्महतोऽन्याधारत्वं कथमित्याशङ्क्याह महानिति यथा सर्वगामित्वात् परिमाण तो महान् वायुराकाशे सदा तिष्ठति तथा आकाशादीनि महान्त्यपि सर्वाणि भूतान्या काशकल्पे पूर्णे प्रतीच्यसंगे परस्मिन्नात्मनि संश्लेषमन्तरेण स्थितानीत्यर्थः ॥ ६ ॥

स्वामिकृतटीका।

असंश्लिष्टयोरपि आधाराधेयभावं दृष्टान्तेनाह यथेति अवकाशंविनावस्थानानुपपन्ने नित्यमाकाशस्थितो वायुः सर्वत्रगोऽपि महानपि नाकाशेन संश्लिष्यते निरवयवत्वेन संश्लेषायोगात् तथा सर्वाणि भूतानि मयि स्थितानि जानीहि ॥ ६ ॥

नवलभाष्य।

अब दो श्लोकों करके कहा जोअर्थ तिसको दृष्टान्तद्वारा सिद्धकरतेहुये कहते हैं (यथेति) हे अर्जुन जैसे आकाशमें सदास्थित बड़ाभारी पवनरहताहै और उसपवन से आकाशालिप्त नहींहोता तैसेही आकाशवत् सर्वव्यापक जोमैंहूं तिससे विनाही स्पर्शकरे सबभूत स्थितहैं ऐसा तू निश्चय करके जान ॥ ६ ॥

सर्वभूतानि कौन्तेय प्रकृतिं यांति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥

शङ्करभाष्यम्।

एवं वायुराकाश इव मयि स्थितानि सर्वभूतानि सर्वाणि भूतानि स्थितिकाले तानि प्रलयकाले कौन्तेय प्रकृतिं त्रिगुणात्मिकामपरां निकृष्टां यान्ति मामिकां मदीयां कल्पक्षये प्रलयकाले पुनर्भूयस्तानि भूतान्युत्पत्तिकाले कल्पादौ विसृजाम्युत्पादयाम्यहं पूर्ववत् ॥ ७ ॥

आनंदगिरिकृतटीका।

आकाशे वाय्वादिस्थितिवदाकाशादीनि भूतानि स्थितिकाले परमेश्वरे स्थितानि चे त्तर्हि प्रलयकाले ततोऽन्यत्र तिष्ठेयुरित्याशङ्क्याह सर्वेति प्रकृतिशब्दस्य [illegible] व्यावर्तयति त्रिगुणात्मिकामिति सा चापरेत्याह निकृष्टामिति [illegible] [illegible] पराधीनत्वेनास्वातन्त्र्यमाह मदीयामिति प्रलयकाले भूतानि [illegible] [illegible] त्पत्तिकालेऽपि ततस्तेषामुत्पत्ति रीश्वराधीनत्वं [illegible] ॥ ७ ॥

पालयतीति भूतभावनः एवं भूतोऽपि ममात्मा प्रपंचस्वरूपं भूतस्थो न भवतीति अयं व: यथा देहं बिभ्रत् पालयंश्च जीवोऽहङ्कारेण तत्संश्लिष्टस्तिष्ठति एवमहं भूतानि ध यन् पालयन्नपि तेषु न तिष्ठामि निरहङ्कारत्वादिति ॥ ५ ॥

नवलभाष्य ।

अब हे अर्जुन मैं सबभूतोंमें स्थितनहींहूं इसमें कारण असंगत्वहै क्योंकि जो वस्तुअसंगहै उसकीस्थिति किसीमें सम्भवनहींहोती है और आत्मा असंगहै ऐसाश्रुतिकहती है इससे असंगहोनेसे मैं भूतोंमें स्थित नहींहूं फिर इसी कारण से मेरेविषे भूतभी स्थित नहीं हैं ऐसा तुमजानो क्योंकि जैसे असंगआत्मा किसीमें स्थित नहींहोसक्ता ऐसेही असंगआत्मा में किसीकी स्थितिभी नहींवनसक्ती यह युक्तही है न कहौ फिर कैसे पहिले आपहीने कहाथा कि सबभूत मेरेबिषेस्थितहैं तिसकाउत्तर भगवान्कहते हैं कि अर्जुन यह मेरा ऐश्वरयोगतूदेख नाम मैं जो ईश्वर तिसका योग जो युक्ति अर्थात् संघटनरूप जो माहात्म्य तिसकोतूदेख अर्थात् अघटनघटनापटीयसीअचिन्त्यशक्ति जो मेरीयोगमाया तिसका प्रभाव तूदेख अघटन अर्थात् जो बात मनसे न आयसके उसको करनेमें जो प्रवीणहोय उसको अघटनघटना पटीयसीकहतेहैं तौ असंगआत्मामें भी सबभूतोंकीस्थितिको प्रतीतिकराना यह मेरी अचिन्त्यशक्ति मायाकाप्रभावहै तिसको तू देख सो जैसे मायावी ऐन्द्रजालिक अर्थात् इन्द्रजालकीविद्याका करनेवाला पुरुष अपने रूपही में अनेकप्रकारके व्याघ्रादिरूपको दिखलावे तैसे मैं भी अपनी योगमाया करके आपने आत्माहीको भूतादि रूपकरके दिखाताहूं तौ वास्तवमें तौ किसीभूतकासंसर्गहै नहीं मायाकरकेअन्यथारूपके दिखानेमात्रमें असंगताकाभी भंगनहीं और व्यवहारभी सिद्धहुआ इसमेरे ऐश्वर योगको तूदेख और हे अर्जुन औरभी आश्चर्य्यको देख कि असंगभीमैं सबभूतोंका भरण करताहूं और भूतोंमेंस्थित नहींहूं और हे अर्जुन मेरा आत्माभूतभावन अर्थात् भूतोंका उत्पन्नकरनेवाला है यह कथनतो परम आश्चर्य्य सूचकहै क्योंकि जबकि आप असंगहोनेसे मैं किसीभूतमें स्थित नहींहूं ऐसा कहते हो तो भूतभृत्हौ अर्थात् भूतोंका धारण करनेवालाहौ इससे अधिक क्या आश्चर्यहोगा और मेराआत्माभूतभावनहै यहकहनाभी नहीं सम्भवहोता क्योंकि जो तुम आत्मासे न्यारे कोई और होउ तौ यह कथन सम्भवहोय और असंगआत्मामें भरण भी नहीं सम्भवहोताहै तौ इसका समाधानयहहै कि यहां भगवान् देहादिसंघातको पृथक्करके तिसमें अहंकारको आरोपणकरके लोकबुद्धिको अनुस्मरण करते हुये देहादि संघातसेपृथक् जो आत्माहै तिसको लक्ष्यकरकेकहतेहैं कि यहआत्मा मेरा भूतभावनहै और यह नहींहै कि आत्मासे आत्मा अन्य है इसप्रकार अज्ञ पुरुषके सदृश कहाहोय ॥ ५ ॥

कर्म्माणि निबध्नन्ति धनञ्जय तत्र कर्म्मणामसम्बन्धस्ते कारणमाह उदासीनवदासीनं यथोदासीन उपेक्षकः कश्चित् तद्वदासीनमात्मनोऽविक्रियत्वमसंसक्तं फलसङ्गरहितमभिमानवर्जितमहङ्करोमीति तेषु कर्मसततोऽन्यस्यापि कर्तृत्वाभिमानाभावः फलं सङ्गाभावश्चाबन्धकारणमन्यथ कर्मभिर्बध्यते मूढः कोशकारवदित्यभिप्रायः॥ ९॥

आनंदगिरिकृतटीका।

यदि प्राकृतं भूतग्रामं स्वभावाद्विद्यातन्त्रं विषमं विदधासि तर्हि तव विषमसृष्टिप्रयुक्तं धर्मादिमत्त्वमित्यनीश्वरत्वापत्तिरिति शङ्कते तर्हीति तत्रेति सप्तम्या परमेश्वरो निरुच्यते ईश्वरस्य फलसंगाभावात् कर्तृत्वाभिमानाभावाच्च कर्मसम्बन्धवदीश्वरादन्यस्यापि तदुभयाभावो धर्माद्यसम्बन्धे कारणमित्याह अतोन्यस्येति यदि कर्मसु कर्तृत्वाभिमानो वा कस्यचित् कर्मफलसंयोगो वा स्यात्तत्राह अन्यथेति॥ ९॥

स्वामिकृतटीका।

नन्वेवं नानाविधानि कर्म्माणि कुर्वतस्तव जीववद्बन्धः कथं न स्यादित्यत आह नच मामिति तानि विश्वसृष्ट्यादीनि कर्म्माणि मां न निबध्नन्ति कर्म्मासक्तिर्हि बन्धहेतुः साचाप्तकामत्वान्मम नास्ति अत उदासीनवद्वर्तमानस्य मे बन्धं नोपपादयति उदासीनत्वे कर्तृत्वानुपपत्तेः कर्तृत्वं चोदासीनत्वानुपपत्तेरुदासीनवत् स्थितमित्युक्तं॥ ९॥

नवलभाष्य।

तो इसप्रकार विषम प्राणियोंके समूहको रचताहुआ जो परमेश्वर तिसको भी उस विषम सृष्टिकेकारणसे उत्पन्नहुये जो धर्म अधर्म तिन्होंकरके सम्बन्ध होनाचाहिये तो इसआशंकाको निवृत्त करनेको भगवान् कहते हैं (नचमांतानीति) हे अर्जुन वे जो भूत समुदायकी विषम सृष्टिके निमित्तसे उत्पन्नहुये जे कर्म्म ते ईश्वर जो मैं हूं तिसको नहीं बन्धनकरते हैं तिन कर्म्मोंके असम्बन्धमें कारणकहतेहैं कि हे अर्जुन कैसा मैं हूं तिसको नहीं बन्धनकरतेहैं कि (उदासीनवदासीनं) उदासीन जो कोई तटस्थ पुरुष अर्थात् जैसे कोई उसकीइच्छा न करे और न द्वेषकरे और उसमेंस्थित तो रहें उसको उदासीनकहते हैं तद्वत् स्थितहों और असक्त अर्थात् फल संग रहित उन सृष्ट्यादिकर्म्मोंमेंस्थितहों अर्थात् अभिमानवर्जित सृष्टि आदि कर्म्मोंको करताहूं इससे मुझको सृष्ट्यादिकर्म नहीं बन्धन करते हैं और जो कोई अभिमानरहित और फलमें आसक्तिरहित कर्म्मकरताहै तो उसको भी बन्धन नहीं होताहै और अभिमानपूर्वक कर्म्मफलोंमें आसक्तिसहित जो मूढ़पुरुष कर्म्मकरताहै सो तो कोशकारकीनाईं उन कर्म्मोंकरके बन्धनहीकोप्राप्तहोताहै अर्थात् कोशकार एक कृमीकाकीड़ाहोताहै सो अपनेरहनेको स्थान बनाताहै सो इसरीतिसे उसकृमीको बनाताहै जिसमें दरवाजा भी बन्दकरदेताहै तो उसको निकलनेकास्थान जब न रहा तो आप भी उसके भीतर बन्दहोजाताहै तैसे अज्ञ पुरुष भी इसरीतिसे कर्म्म करताहै जिसमें अपने कियेहुये कर्म्मोंसे आपही बन्धनको प्राप्तहोताहै यह अभिप्रायहै॥ ९॥

स्वामिकृतटीका।

तदेवमसंगस्यैव योगमायया स्थितिहेतुत्वमुक्तं तयैव सृष्टिप्रलयहेतुत्वाह सर्वेति कल्प
क्षये प्रलयकाले सर्वाणि भूतानि मदीयां प्रकृतिं यान्ति त्रिगुणात्मिकां यानि मायां लीय
न्ते पुनः कल्पादौ सृष्टिकाले तानि विसृजामि विशेषेण सृजामि ॥ ७ ॥

नवलभाष्य।

हे अर्जुन जैसे पवन आकाशमें स्थितरहताहै तैसे स्थितकालमें मेरेवि-
षेस्थित जेसबभूत तेकल्पक्षय में अर्थात् ब्राह्मप्रलयकालमें अपरासंज्ञक अ-
र्थात् अपराहैनामजिसका ऐसीजो निकृष्ट त्रिगुणात्मिकामेरी प्रकृति तिस
को प्राप्तहोते हैं अर्थात् तिसमें लीनहोजाते हैं और फि॰ उत्पत्तिकालमें क-
ल्पकी आदिमें उनभूतोंको फिर मैं उत्पन्न करताहूं पहिलेकी तरह ॥ ७ ॥

प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः।
भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

शङ्करभाष्यम्।

एवमविद्यालक्षणां प्रकृतिमिति प्रकृतिं स्वां स्वीयामवष्टभ्य वशीकृत्य विसृजामि पुनः पुनः
प्रकृतितो जातं भूतग्रामं भूतसमुदायं इमं वर्त्तमानं कृत्स्नं समग्रमवशमस्वतंत्रमविद्यादिदोषैः पर
वशीकृतं प्रकृतेर्वशात् स्वभाववशात् ॥ ८ ॥

आनन्दगिरिकृतटीका।

तर्हि कीदृशी प्रकृतिः सा च कथं सृष्टावुपयुक्तेत्याशङ्क्याह एवमिति संसारस्यानादि
त्वद्योतनार्थं पुनः पुनरित्युक्तं भूतसमुदायस्य विद्यास्मितादि दोषपरवशत्वे हेतुमाह स्व
भाववशादिति ॥ ८ ॥

स्वामिकृतटीका।

नन्वसंगो निर्व्विकारश्च त्वं कथं सृजसीत्यपेक्षायामाह प्रकृतिमित्यादि स्वां स्वाधीनां
प्रकृतिमवष्टभ्य अधिष्ठाय प्रलये लीनं सन्तं चतुर्विधमिमं सर्वभूतग्रामं कर्म्मादिपरवशं पुनः
पुनर्विविधं सृजामि विशेषेण सृजामीति वा कथं प्रकृतेर्वशात् प्राचीनकर्मनिमित्ततत्तत्स्व
भाववशात् ॥ ८ ॥

नवलभाष्य।

हे अर्जुन इसप्रकार अविद्या लक्षणजो अपनी प्रकृति तिसको वशकरके
मैं यह जो प्रकृतिवशसे नाम स्वभाववशसे अविद्याके दोषोंके आधीन जो
सम्पूर्णभूत समुदाय तिसको वारम्वार रचताहूं ॥ ८ ॥

नच मां तानि कर्माणि निवध्नन्ति धनञ्जय।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥

शङ्करभाष्यम्।

तर्हि तस्यैव परमेश्वरस्य तद्भूतग्रामं विषमं विदधतः तन्निमित्ताभ्यां धर्माधर्माभ्यां सम्बन्धः
स्यादितीदमाह भगवान् नचमामिति नच मामीशं तानि भूतग्रामस्य विषमविसर्गनिमित्तानि

धत्त्वोनिर्विकार: स परमे प्रकृष्टे हार्दे व्योम्नि स्थितो निर्विकार: न परमे प्रकृष्टे हार्दे व्योम्नि स्थितो दुर्विज्ञेय इत्यर्थ: ईश्वरस्य साक्षित्वमात्रेण स्रष्टृत्वे स्थिते फलितमाह ततश्चेति किंनिमित्तापरस्येयं सृष्टिर्न तावद्भोगार्था परस्य परमार्थतो भोगासम्बन्धित्वात्तस्यसर्व साक्षीभूतचैतन्यमात्रत्वान्न चान्यो भोक्ता चेतनान्तराभावादीश्वरस्यैकत्वादचेतनस्याभो क्तृत्वान्न च सृष्टिरपवर्गार्थतद्विरोधित्वान्नैवं प्रश्नो वा तदनुरूपं प्रतिवचनं वा युक्तं परस्य मायानिबन्धने सर्गे तत्यानवकाशत्वादित्यर्थ: परस्यात्मनो दुर्विज्ञेयत्वे श्रुतिमुदाहरति कोऽद्धेति तस्मिन् प्रवक्ता.पि संसारमण्डलेनास्तीत्याह क इहेति जगत: सृष्टिकर्तृत्वेन पर स्य ज्ञेयत्वमाशङ्क्य कूटस्थात्ततो न सृष्टिर्जातेत्याह कुत इति नहीयं विविधा सृष्टिरन्य स्मादपि कस्माच्चिदुपपद्यते अन्यस्य वस्तुनो भावादित्याह कुत इति कथं तर्हि सृष्टिरित्या शङ्क्याज्ञानाधीनेत्याह दृष्टिरिति ॥ १० ॥

स्वामिकृतटीका।

तदेवोपपादयति मयेति मया अध्यक्षेण अधिष्ठात्रा निमित्तभूतेन प्रकृति: सचराचरं विश्वं सूयते जनयति अनेन मदधिष्ठानेन हेतुना इदं जगद्विपरिवर्तते पुन: पुनर्जायते सन्नि धिमात्रेणाधिष्ठातृत्वात् कर्तृत्व मुदासीनत्वञ्चाविरुद्धमितिभाव: ॥ १० ॥

नवलभाष्य।

